सार्धत्रिशतिकालोत्तराख्योऽयं ग्रन्थः सिद्धान्तशैवागमेष्वष्टाविंशतिसंख्याकेष्वन्तिमस्य वातुलाख्यस्य मूलागमस्योपभेद इत्येतद्ग्रन्थव्याख्यात्रा श्रीमता रामकण्ठेन स्वोपोद्घाते[1] निर्दिश्यते। उपलभ्यमानेषु मूलागमेषु तन्त्रावताराख्यपटले "मूलागमानामुपागमानां च नाम्ना निर्देशः, प्रोक्तॄणां श्रोतॄणां च नामानि, श्लोकसंख्या" इत्यादिविषयाणां विवरणं दृश्यते। यदनुसृत्य अस्मत्प्रकाशिते रौरवागमप्रथमभागे उपोद्घातान्ते पट्टिकैका[2] दत्तास्ति। तत्र वातुलागमस्योपभेदेषु 'कालज्ञानम्' इति यो निर्दिष्टः स एव ग्रन्थः 'कालोत्तरम्' इत्यपि नाम्नाधुना प्रसिद्ध इति भाति। नेपालदर्बारग्रन्थालये कालोत्तरस्य मातृकैका[3] विद्यते। यत्र दशमपटलान्तपुष्पिका 'इति कालज्ञाने दशमः पटलः' इति, तथान्तिमपुष्पिका 'इति कालोत्तरेऽष्टादशः पटलः' इति च दृश्यते। अतः कालज्ञानस्यैव कालोत्तरमिति पर्यायनामेति ज्ञायते। तथा कालोत्तरभेदभूतस्य देवीकालोत्तराख्यस्य ज्ञानाचारपटलान्तश्लोके, तथा तद्वृत्तौ च तस्यागमस्य कालज्ञानमिति नाम्ना व्यवहारो दृश्यते।

अत्र 'मकुटम् मकुटोत्तरम्, रौरवम् रौरवोत्तरम्, वातुलम् वातुलोत्तरम्, शिवधर्मः शिवधर्मोत्तरम्' इतिवत् 'कालम् कालोत्तरम्' इति उपभेदद्वयमस्ति इति तु नाशङ्कनीयम्। यस्मात् कालोत्तरमेव कालाख्यमिति नाम्ना, कालज्ञानमिति नाम्ना च व्यवह्रियते। सर्वेषु भेदेषु च कालोत्तरस्यैव नाम बहुशो दृश्यते च।

रौरवागमोपभेदेषु 'कालाख्यम्' इत्येक उपभेदः, तथा प्रोद्गीतागमोपभेदेषु 'श्रीकालज्ञानम्' अथवा 'कालज्ञानम्' इत्येक उपभेदः परिगण्यते। अथापि [4]"नाम्ना तु वातुलात्तन्त्रात्' इति मूले दर्शनात्, तथा व्याख्यात्रा रामकण्ठेन चास्यागमस्य वातुलागमसंग्रहरूपत्वेनाभ्युपगतत्वाच्च नात्र विवादप्रसक्तिः। [5]"व्याख्यानतो विशेषप्रतिपत्तिः' इति परिभाषोक्तवत्।

नेपालदर्बारग्रन्थालये अ. १६३४ अङ्कितायां कालोत्तरमातृकायां प्रथमपटले उपोद्घातश्लोकेषु 'नाम्ना तु वाथुलीतन्त्रं कालाख्यमिति संज्ञकम्' इति पाठभेदो 'नाम्ना तु वातुलात्तन्त्राद्ध्नो घृतमिवोद्धृतम्' इत्यस्य स्थाने दृश्यते। तस्माद्वातुलागमस्यैव कालाख्यमिति नामेति यद्यपि वक्तुं शक्यते, तथापि पाठोऽयं न साधुरिति मूलमातृकान्तरदर्शनेन, तथा व्याख्यानदर्शनेन चाभ्युपगन्तव्यं भवति। अतः 'कालम्, कालोत्तरम्' इति वातुलम् वातुलोत्तरम् इतिवद् भेदद्वयमिति साधने नास्ति सांप्रदायिकप्रमाणम्। 'कालोत्तरम्' इति शब्दस्य कालातीतम् अथवा संख्यातीतमित्यर्थः। कालो-

---

[1]पृ. १.

[2]अस्मद्ग्रन्थमाला १८-१.

[3]नेपालदर्बारग्रन्थसूची भागद्वयात्मिका हरप्रसादशास्त्रिकृता, कलकत्ता, भाग १, अङ्क १६३४ (च)

[4]सार्धत्रि. १.४.पू.

[5]परिभाषेन्दुशेखरे, परिभाषा १.

त्तरस्य भेदबाहुल्यप्रदर्शकमिदं नामान्वर्थकम्। वस्तुतः शिवस्यैतन्नाम, यतः स कालातीतः। शिवप्रतिपादकशास्त्रस्यास्य तमधिकृत्य कृतत्वात् कालोत्तरमिति नामेति सुष्ठु।

कालोत्तराख्यस्योपागमस्य सन्ति बहवो भेदा इति तादृशमातृकाणामुपलम्भात्, तथा तत्रतत्रोदाहरणात्, अथवा तादृशनाम्नां निर्देशाद्वा ज्ञायते। श्रीमता रामकण्ठेनापि वृत्त्यारम्भे 'कालोत्तरबहुत्वेऽपि'[1] इति कालोत्तराख्यस्योपभेदबहुत्वं निर्दिष्टम्। तत्रोपलब्धानां नामान्यधो दीयन्ते —

१ कालोत्तरम्
२ बृहत्कालोत्तरम्
३ अयुतत्रयसंहिताकालोत्तरम् (अथवा त्र्ययुतग्रन्थसंहिताकालोत्तरम्)
४ देवीकालोत्तरम् (चतुर्विंशतिसहस्रकालोत्तरम्)
५ द्वादशसहस्रसंहिताकालोत्तरम्
६ षट्सहस्रसंहिताकालोत्तरम्
७ त्रयोदशशतिककालोत्तरम्
८ स तशतिककालोत्तरम्
९ चतु शतिककालोत्तरम्
१० सार्धत्रिशतिकालोत्तरम्
११ त्रिशतिकालोत्तरम्
१२ द्विशतिकालोत्तरम्
१३ स्कन्दकालोत्तरम्

१. कालोत्तरम्

अस्मद्ग्रन्थालये 'कालोत्तरम्' इत्याख्यस्य टि. ५९, टि. ६० इत्यङ्कितं मातृकाद्वयमस्ति। मातृकाद्वयमिदं क्रमेण मद्रपुरीराजकीयकोशागारस्थतालपत्रात्मकमातृकाद्वयस्य आर् १४३४३, आर् १६८०५ इत्यङ्कितस्य श्वेतपत्रलिखितप्रतिकृतिरूपम्। मातृकाद्वयमप्यपूर्णम्।

टि. ५९ अङ्कितायां मातृकायां १–३७२ पत्राणि सन्ति। तत्र १, १०, ११, १२ तमपटला न विद्यन्ते। नवमपटलस्यान्तिमभागः, त्रयोदशतमपटलस्यारम्भश्च न स्तः। सप्ततितमपटलस्यान्तिमभागोऽपि न दृश्यते। १३, १४, २१, ३५ पटलानामन्ते पुष्पिकासु 'इति कालोत्तरे अयुतत्रयसंहितायाम्' इति, १८, २७, ३०, ४३ पटलानामन्ते पुष्पिकासु 'इति कालोत्तरे द्वादशसहस्रसंहितायाम्' इति च निर्देशोऽस्ति। तथा षट्चत्वारिंशत्पटलपुष्पिकायां 'पञ्चचत्वारिंशत्पटलः' इति परिगणने प्रमादोऽपि दृश्यते। अष्टषष्टितमपटलानन्तरम् एकोनसप्ततिपटलात्पूर्वं च पुनः "इति कालोत्तरे द्वादशसहस्रसंहितायां सप्तषष्टितमः पटलः, 'इति कालोत्तरे द्वादशसहस्रसंहितायामष्टषष्टितमः पटलः" इति पटलद्वयमधिकतया दृश्यते॥

टि. ६० अङ्कितायां मातृकायां १–३४९ पत्राणि सन्ति। तत्र आदितः १–२८ पत्रेषु सार्धत्रिशतिकालोत्तरस्य अष्टमपटलादारभ्य सप्तविंशपटलान्तो भाग उपलभ्यते, यत्रस्थपाठान्तराणि 'उ' इति संज्ञया टिप्पण्यां निर्दिष्टानि। अस्यामेव मातृकायां २९–६५ तमपत्रेषु ग्रन्थान्तरादुद्धृताः प्रतिष्ठाविषयसंबन्धिनः श्लोका दृश्यन्ते। ६६-३४९ तमपत्रेषु कालोत्तरग्रन्थो दृश्यते। टि० ५९ मातृकायां यो भागो नष्टः स भागोऽत्रापि न विद्यते। अपि च द्वितीयतृतीयपटलौ, तथा पञ्च-

[1]पृष्ठ १.

विंशतितमपटलादारभ्य एकत्रिंशत्तमपटलान्तं चात्र मातृकायां नोपलभ्यन्ते। पूर्वत्रैव नवमत्रयोदशयोरन्तिमारम्भभागौ न स्तः। अपि च २०, २४, ६८, ७० पटलानामन्तिमो भागः, ४, ३२, ३३, ६९ पटलानामारम्भभागश्चात्र मातृकायां न दृश्यते। पूर्वत्रैव १३, १४, ३५ पटलानामन्ते पुष्पिकासु 'अयुतत्रयसंहितायाम्' इति, १८, ४३ पटलयोरन्ते 'द्वादशसहस्रसंहितायाम्' इति च निर्देशो दृश्यते। पूर्वत्राधिकतया द्वादशसहस्रसंहिताया उद्धृतौ ६७, ६८ तमपटलावत्र न स्तः। वाचकसौकर्याय टि. ५९ मातृकायां दृष्टा पटलानुक्रमणी दीयते —

कालोत्तरागमपटलपुष्पिकाः

इति श्रीकालोत्तरे मन्त्रोद्धारपटलो द्वितीयः। २
इति कालोत्तरे स्नानपटलस्तृतीयः। ३
इति कालोत्तरे भस्मस्नानपटलश्चतुर्थः। ४
इति कालोत्तरे पुष्पगन्धपटलः पञ्चमः। ५
इति कालोत्तरे पुष्पविशेषगन्धधूपार्घ्यपटलः। ६
इति कालोत्तरे अन्तःकरणपटलः सप्तमः। ७
इति कालोत्तरे शिवार्चनपटलोऽष्टमः। ८
इति कालोत्तरे (परिवारार्चनपटलः) ?
इति कालोत्तरे अयुतत्रयसंहितायां मुद्रालक्षणपटलस्त्रयोदशः। १३
इति कालोत्तरे अयुतत्रयसंहितायां मण्डलविधिश्चतुर्दशः पटलः। १४
इति कालोत्तरे स्वप्नपटलः पञ्चदशः। १५
इति कालोत्तरे दीक्षाविधाने षडध्व(पटलः) षोडशः। १६
इति कालोत्तरे योगदीक्षापटलः सप्तदशः। १७
इति कालोत्तरे द्वादशसहस्रसंहितायां चण्डेश्वरयागपटलोऽष्टादशः। १८
इति कालोत्तरे राजाभिषेकपटल एकोनविंशतिः। १९
इति कालोत्तरे नाडीचक्रपटलो विंशतिः। २०
इति कालोत्तरे अयुतत्रयसंहितायां कालचक्रपटल एकविंशतिः। २१
इति कालोत्तरे स्पर्शयोगे दशवायुचक्रध्यानपटलो द्वाविंशतितमः। २२
इति कालोत्तरे स्पर्शयोगविधाने मृतकार्यजीवकार्यप्रधानं नाम त्रयोविंशतिः पटलः। २३
इति कालोत्तरे स्पर्शयोगधारणामार्गे कालाग्निरुद्रब्रह्मध्यानं [नाम] चतुर्विंशतिः पटलः २४
इति कालोत्तरे प्रत्याहारपटलः पञ्चविंशतितमः। २५
इति कालोत्तरे धारणाविधिः षड्विंशतिः पटलः। २६
इति कालोत्तरे द्वादशसहस्रसंहितायां सप्तविंशतिः पटलः। २७
इति कालोत्तरे मन्त्राध्वपटलोऽष्टाविंशतितमः। २८
इति कालोत्तरे पञ्चाध्वपटलः एकोनत्रिंशतितमः। २९
इति कालोत्तरे द्वादशसहस्रसंहितायां तत्त्वाध्वपटलः। ३०
इति कालोत्तरे एकत्रिंशत्पटलः। ३१
इति कालोत्तरे वर्णाध्वविधाने द्वात्रिंशतिः पटलः। ३२
इति कालोत्तरे वर्णाध्वपटलस्त्रयस्त्रिंशतितमः। ३३
इति कालोत्तरे कलाध्वपटलश्चतुस्त्रिंशतितमः। ३४

इति कालोत्तरे अयुतत्रयसंहितायां रुद्राक्षधारणविधिः [पञ्चत्रिंशतितमः] पटलः। ३५
इति कालोत्तरे कृष्णाष्टमीव्रतफलं षट्त्रिंशतितमः (पटलः)। ३६
इति कालोत्तरे अष्टषष्टिस्थानपटलः सप्तत्रिंशतितमः। ३७
इति कालोत्तरे प्रायश्चित्तपटलोऽष्टात्रिंशतितमः। ३८
इति कालोत्तरे तुलाभारपटल एकोनचत्वारिंशत्। ३९
इति कालोत्तरे हिरण्यगर्भपटलश्चत्वारिंशतितमः। ४०
इति कालोत्तरे तिलपर्वतपटल एकचत्वारिंशतितमः। ४१
इति कालोत्तरे पृथ्वीदानपटलो द्विचत्वारिंशत्। ४२
इति कालोत्तरे द्वादशसहस्रसंहितायां लिङ्गोद्भवपटलस्त्रिचत्वारिंशत्। ४३
इति कालोत्तरे चतुश्चत्वारिंशत्पटलः। ४४
इति कालोत्तरे लिङ्गकल्पे पञ्चचत्वारिंशत्पटलः। ४५
इति कालोत्तरे लिङ्गकल्पे सिराविवरादिदोषपटलः पञ्च(षट्?) चत्वारिंशत्। ४६
इति कालोत्तरे लिङ्गलक्षणं सप्तचत्वारिंशत्पटलः। ४७
इति कालोत्तरे अधिवासनपटलोऽष्टाचत्वारिंशत्। ४८
इति कालोत्तरे पीठबन्धपटल एकोनपञ्चाशत्। ४९
इति कालोत्तरे प्रतिष्ठापटलः पञ्चाशत्। ५०
इति कालोत्तरे स्नपनपटल एकपञ्चाशत्। ५१
इति कालोत्तरे परिवारपटलो द्विपञ्चाशत्। ५२
इति कालोत्तरे प्रासादपटलस्त्रिपञ्चाशत्। ५३
इति कालोत्तरे ग्रामपुरपत्तनखेटकराजधानीपटलश्चतुःपञ्चाशत्। ५४
इति कालोत्तरे गर्भलक्षणमुहूर्तविशेषः पञ्चपञ्चाशत्पटलः। ५५
इति कालोत्तरे गर्भलक्षणे नृत्तपालगर्भपटलः षट्पञ्चाशत्। ५६
इति कालोत्तरे निर्वाणपटलः सप्तपञ्चाशत्। ५७
इति कालोत्तरे गर्भलक्षणेऽम्लानपुष्पपटलोऽष्टपञ्चाशत्। ५८
इति कालोत्तरे रत्नगर्भलक्षणम् एकोनषष्टितमः सर्गः (पटलः ?)। ५९
इति कालोत्तरे पञ्चगव्यपटलः षष्टितमः। ६०
इति कालोत्तरे वज्रकवाटलक्षणपटल एकषष्टितमः। ६१
इति कालोत्तरे वज्रकवाटलक्षणपटलो द्विषष्टितमः। ६२
इति कालोत्तरे वज्रकवाटलक्षणे कवाटरन्ध्रधारणपटलस्त्रिषष्टितमः। ६३
इति कालोत्तरे वज्रकवाटलक्षणे भ्रुवोर्मध्यधारणसेनास्तम्भपटलश्चतुष्षष्टितमः। ६४
इति कालोत्तरे पञ्चषष्टितमः पटलः। ६५
इति कालोत्तरे वज्रकवाटलक्षणे कर्णरूपधारणाक्षुत्पिपासानिद्रानिवृत्तिपटलः[षट्] षष्टितमः। ६६
इति कालोत्तरे वज्रकवाटलक्षणे हृदयधारणाध्यानसमाधिपटलः सप्तषष्टितमः। ६७
इति कालोत्तरे वज्रकवाटलक्षणे मन्त्रराजनाभिध्यानपटलः सर्वव्याधिनिवारणपटलश्चाष्टषष्टितमः। ६८
इति कालोत्तरे द्वादशसहस्रसंहितायां वज्रकवाटलक्षणे नाभेरधस्ताद्धारणापद्मविधानमृत्युञ्जयपटलः सप्तषष्टितमः। ६७
इति कालोत्तरे द्वादशसहस्रसहितायां वज्रकवाटलक्षणे सदाध्यात्मपटलोऽष्टषष्टितमः। ६८
इति कालोत्तरे वज्रकवाटलक्षणे शाश्वतस्थानशिवकूट... एकोनषष्टितमः [एकोनसप्ततितमः]। ६९

[सप्ततितमपटलोऽपूर्णः, अतः पटलनाम न ज्ञायते]

सार्धत्रिशत्यां विद्यमानेषु अन्तःकरणविन्यास-यजन-नाडीचक्र-जीवज्ञानाख्येषु पटलेषु ये श्लोकाः, तेषु बहवः श्लोका अस्मद्ग्रन्थागारीयकालोत्तरग्रन्थे तत्समानार्थकपटलेषु दृश्यन्ते। अस्मिन् विषये विशेषज्ञानाय समानजातीयश्लोकपट्टिकां पश्यत।

कालोत्तरस्यागमस्य विविधसंग्रहरूपाणां ग्रन्थानां मातृकास्तत्र तत्रोपलभ्यन्ते। तत्र नेपालदर्बार-ग्रन्थालये लभ्यमानानां सूची[1] —

प्र २७३ बृहत्कालोत्तरम् आदिखण्डितम् ४४ पटलाः

प्र २७३ (च) बृहत्कालोत्तरम् संपूर्णम् ८८ पटलाः

प्र १६३४ सार्धत्रिशतिकालोत्तरम्, तथा द्विशतिकालोत्तरं च।

प्र १६३४ (च) कालज्ञानम् अथवा कालोत्तरम् १८ पटलाः

द्वि २६२ (ख) कालज्ञानम् १७ श्लोकाः

प्र १११४ (छ) त्रयोदशशतिककालोत्तरम् १० पटलाः

तृ १२ त्रयोदशशतिककालोत्तरम्

द्वि २२६ (च) सप्तशतिककालोत्तरम् ३२ पटलाः

तृ १२ सप्तशतिककालोत्तरम्

प्र ८९ कालोत्तरतन्त्रम्

प्र ५२ कालोत्तरतन्त्रम्

प्र १८२ कालोत्तरतन्त्रम्

प्र १५८३ (च) कालोत्तरतन्त्रम् २५ पटलाः

कलकत्तानगरे विद्यमाने एसियटिक् सोसायटिग्रन्थालयेऽप्येका मातृका ५८९८ अङ्किता विद्यते, यत्र १८ श्लोकाः परं सन्ति।

एवं तिरुवनन्तपुरीयग्रन्थालयेऽप्येका मातृका ६७७ (एफ्) इत्यङ्किता 'कालोत्तरम्' इति शीर्षकेण निर्दिष्टा। अत्रान्ते 'इति कालोत्तरे नैष्ठिकाचारविचारः पञ्चषष्टितमः पटलः', 'इति सर्वज्ञानोत्तरे मोक्षोपायपटलः' इति पुष्पिकाद्वयं दृश्यते। अथाप्यत्र मुद्रिते देवीकालोत्तरा-गमे लभ्यमानं ज्ञानाचारविचारपटलमात्रमुपलभ्यते।

बडोदापुस्तकालये ७९१ अङ्किता मातृकैका विद्यते, यत्र १६०० श्लोकाः सन्ति।

एवमेव राजस्थानप्राच्यपुस्तकालये २९० अङ्किता कालोत्तरमातृकैकास्तीति ग्रन्थसूच्या ज्ञायते।

एवं "कालोत्तरम्" इत्याख्यया निर्दिष्टानां मातृकाणां समीक्षणे इदं वक्तव्यं भवति, यत् कालोत्तरमिति सामान्यनाम्ना सर्वे कालोत्तरभेदा व्यवह्रियन्त इति। कालोत्तरमातृकासु मध्ये-मध्ये अयुतत्रयसंहिताकालोत्तरात्, तथा द्वादशसहस्रसंहिताकालोत्तराच्च पटला उद्धृताः। एवं बृहत्कालोत्तराख्ये बहुशः 'इति कालोत्तरे' इत्येव पुष्पिकासु निर्देशो वर्तते। एवमुपलब्धस्य देवी-कालोत्तरस्य ज्ञानाचारपटलान्त्यश्लोके 'कालज्ञानम्' इति, पटलान्तिमपुष्पिकायां 'इति देवीकालो-त्तरे' इति च दृश्यते। एवमन्यासु मातृकासु नेपालदर्बारग्रन्थालये लब्धासु च विविधसंग्रहाः कालोत्तरनाम्नैव परिगण्यन्ते। एतावता प्रतिपादितं यदिदं "कालोत्तरम्" इति तत् सर्वेषां कालोत्तर-भेदानां विविधसंग्रहरूपाणां सामान्यनामेति, तत्तत्संग्रहरूपस्य विशिष्य 'अयुतत्रयसंहिता, द्वादश-सहस्रसंहिता, त्रयोदशशतिका, सप्तशतिका, चतुःशतिका, सार्धत्रिशती, त्रिशती, द्विशती, बृहत्का-लोत्तरम्' इत्यादि विशेषनामेति च वक्तव्यं भवति॥

---

[1]वीरपुस्तकालयस्थपुस्तकानां बृहत्सूचीपत्रम्, तन्त्रविषयकः चतुर्थो भागः; नेपालदर्बारग्रन्थसूची हरप्रसादशास्त्रिकृता भागद्वयात्मिका च।

२. बृहत्कालोत्तरम्

अस्ति बृहत्कालोत्तरस्य मातृकाद्वयं नेपालदर्बारग्रन्थालये अ २७३, अ २७३ (च) (अथवा प्र २७३, प्र २७३ च) इत्यङ्कितम्। तत्र द्वितीयमातृका संपूर्णेति भाति। यत्र ३२० पत्राणि, आदितः ८८ पटलाः सन्ति, येषां पटलानां नाम पट्टिकायामधो दीयते। प्रथममातृकायां १९५ पत्राणि सन्ति। आदौ ४४ पटला लुप्ताः। ४५ पटलमध्यात् ८८ पटलान्तो भागो लभ्यते। मातृकाद्वयेऽपि पुष्पिकासु सर्वत्र 'इति कालोत्तरे' इत्येव निर्दिश्यते। अन्ते परं "समाप्तं चेदं बृहत्कालोत्तरं नाम शिवसिद्धान्तम्" इति निर्देशो दृश्यते। तत्र प्रथम-मातृकायाः प्रतिकृतिरस्माभिरुपलब्धा। अतस्तत्र्यसमानजातीयश्लोकाः समानजातीयश्लोकपट्टिकायां दत्ताः। आदितः सप्तविंशतिपटलेष्वपि तादृशश्लोकाः स्युरिति पटलनामतोऽभ्यूहितुमवकाशोऽस्ति। परमद्यावधि प्रतिकृतेरनुपलम्भात्तद्गवेषणावकाशो नासीत्॥

बृहत्कालोत्तरपटलपुष्पिकाः

इति कालोत्तरे महातन्त्रे [मन्त्रोद्धारः] प्रथमपटलः १
इति कालोत्तरे महातन्त्रे प्रासादोद्धारपटलः २
इति कालोत्तरे महातन्त्रे निष्कलमन्त्रपटलः ३
इति कालोत्तरे महातन्त्रे कलाढ्यमन्त्रपटलः ४
इति कालोत्तरे महातन्त्रे खमलंकृतपटलः ५
इति कालोत्तरे महातन्त्रे क्षपणाख्यमन्त्रोद्धारपटलः ६
इति कालोत्तरे महातन्त्रे क्षयमन्त्रसंज्ञके व्योमव्यापिनि कण्ठोष्ठ्यमन्त्रोद्धारपटलः ७
इति कालोत्तरे महातन्त्रे संध्यापटलः ८
इति कालोत्तरे महातन्त्रे विधिस्नानपटलः ९
इति कालोत्तरे महातन्त्रे भस्मस्नानविधिपटलः १०
इति कालोत्तरे महातन्त्रे अर्चनाविधिपटलः ११
इति कालोत्तरे महातन्त्रे नित्याह्निकपटलः १२
इति कालोत्तरे महातन्त्रे दीक्षाविधिपटलः १३
इति कालोत्तरे महातन्त्रे सामान्यसर्वार्थपटलः १४
इति कालोत्तरे महातन्त्रे दीक्षापटलः १५
इति कालोत्तरे महातन्त्रे चण्डयागपटलः १६
इति कालोत्तरे महातन्त्रे समयिपुत्रकसाधकाभिषेकपटलः १७
इति कालोत्तरे महातन्त्रे तन्त्रोत्पत्तिव्याख्यापटलः १८
इति कालोत्तरे महातन्त्रे शिवतनुवर्णनपटलः १९
इति कालोत्तरे महातन्त्रे व्याख्यापटलः २०
इति कालोत्तरे महातन्त्रे गणपतिपूजापटलः २१
इति कालोत्तरे महातन्त्रे वागीश्वरीपूजापटलः २२
इति कालोत्तरे महातन्त्रे मण्डलपटलः २३
इति कालोत्तरे महातन्त्रे अस्त्रवर्णनपटलः २४
इति कालोत्तरे महातन्त्रे ग्रहयामलपटलः २५
इति कालोत्तरे महातन्त्रे अस्त्रपटलः २६

इति कालोत्तरे महातन्त्रे पाशुपतास्त्रपटलः २७
इति कालोत्तरे महातन्त्रे महास्त्रकथनपटलः २८
इति कालोत्तरे महातन्त्रे शिवशान्तिपटलः २९
इति कालोत्तरे महातन्त्रे अघोरकल्पशान्तिपटलः ३०
इति कालोत्तरे महातन्त्रे रुद्रशान्तिपटलः ३१
इति कालोत्तरे महातन्त्रे आश्रमपटलः ३२
इति कालोत्तरे महातन्त्रे गोचरपटलः ३३
इति कालोत्तरे महातन्त्रे समयाचारपटलः ३४
इति कालोत्तरे महातन्त्रे गुरुविचारपटलः ३५
इति कालोत्तरे महातन्त्रे अंशककाललक्षणपटलः ३६
इति कालोत्तरे महातन्त्रे गौरीयागपटलः ३७
इति कालोत्तरे महातन्त्रे मृत्युञ्जयपटलः ३८
इति कालोत्तरे महातन्त्रे व्रतेश्वरपटलः ३९
इति कालोत्तरे महातन्त्रे गुरुयागपटलः ४०
इति कालोत्तरे महातन्त्रे अनध्ययनपटलः ४१
इति कालोत्तरे महातन्त्रे पवित्रारोहणपटलः ४२
इति कालोत्तरे महातन्त्रे पवित्रारोहणपटलः ४३
इति कालोत्तरे महातन्त्रे प्रायश्चित्तपटलः ४४
इति कालोत्तरे महातन्त्रे प्रायश्चित्तपटलः ४५
इति कालोत्तरे महातन्त्रे अक्षसूत्रमालापटलः ४६
इति कालोत्तरे महातन्त्रे घण्टापटलः ४७
इति कालोत्तरे महातन्त्रे पुष्पपटलः ४८
इति कालोत्तरे महातन्त्रे अष्टपुष्पिकापटलः ४९
इति कालोत्तरे महातन्त्रे व्रतयात्रापटलः ५०
इति कालोत्तरे महातन्त्रे फाल्गुनकृष्णचतुर्दशीव्रतपटलः ५१
इति कालोत्तरे महातन्त्रे ग्रहव्रतादिपटलः ५२
इति कालोत्तरे महातन्त्रे व्रतपटलः ५३
इति कालोत्तरे महातन्त्रे तत्त्वोत्पत्तिपटलः ५४
इति कालोत्तरे महातन्त्रे नाडीचक्रोद्देशपटलः ५५
इति कालोत्तरे महातन्त्रे कालज्ञानपटलः ५६
इति कालोत्तरे महातन्त्रे कालाधिकरणपटलः ५७
इति कालोत्तरे महातन्त्रे प्रासादप्रणवव्याप्तिपटलः ५८
इति कालोत्तरे महातन्त्रे प्रत्यक्षयजनपटलः ५९
इति कालोत्तरे महातन्त्रे लिङ्गोद्धारपटलः ६०
इति कालोत्तरे महातन्त्रे उत्क्रान्त्यन्त्येष्टिपटलः ६१
इति कालोत्तरे महातन्त्रे अन्तर्यागपटलः ६२
इति कालोत्तरे महातन्त्रे कमण्डलुपटलः ६३
इति कालोत्तरे महातन्त्रे अन्त्येष्टिमृतोद्धारपटलः ६४
इति कालोत्तरे महातन्त्रे श्राद्धपटलः ६५

इति कालोत्तरे महातन्त्रे लिङ्गवर्णनापटलः ६६
इति कालोत्तरे महातन्त्रे लिङ्गपटलः ६७
इति कालोत्तरे महातन्त्रे प्रतिमापटलः ६८
इति कालोत्तरे महातन्त्रे मातृभैरववर्णनापटलः ६९
इति कालोत्तरे महातन्त्रे पीठपटलः ७०
इति कालोत्तरे महातन्त्रे वास्तुयागपटलः ७१
इति कालोत्तरे महातन्त्रे प्रासादलक्षणपटलः ७२
इति कालोत्तरे महातन्त्रे अधिवासपटलः ७३
इति कालोत्तरे महातन्त्रे अधिवासपटलः ७४
इति कालोत्तरे महातन्त्रे स्थापनपटलः ७५
इति कालोत्तरे महातन्त्रे जीर्णोद्धारपटलः ७६
इति कालोत्तरे महातन्त्रे वृषभपटलः ७७
इति कालोत्तरे महातन्त्रे योगपटलः ७८
इति कालोत्तरे महातन्त्रे उद्घातोद्देशपटलः ७९
इति कालोत्तरे महातन्त्रे जपपटलः ८०
इति कालोत्तरे महातन्त्रे ब्रह्माण्डवर्णनपटलः ८१
इति कालोत्तरे महातन्त्रे तत्त्वयुक्तिवर्णनापटलः ८२
इति कालोत्तरे महातन्त्रे मन्त्रार्थपटलः ८३
इति कालोत्तरे महातन्त्रे क्षेत्रग्रहणपटलः ८४
इति कालोत्तरे महातन्त्रे शक्तिवर्णनपटलः ८५
इति कालोत्तरे महातन्त्रे पूर्वसेवापटलः ८६
इति कालोत्तरे महातन्त्रे साधनपटलः ८७
इति कालोत्तरे महातन्त्रे अघोरादिशास्त्रपुष्टिपरिपालनापटलः ८८

समाप्तं चेदं बृहत्कालोत्तरं नाम शिवसिद्धान्तम्।

३. अयुतत्रयसंहिताकालोत्तरम्, ५. द्वादशसहस्रसंहिताकालोत्तरम् च

अयुतत्रयसंहिताकालोत्तरम् अथवा त्र्ययुतसंहिताकालोत्तरम् इत्याख्यः कालोत्तरभेद आसीदिति पूर्वं निर्दिष्टस्य कालोत्तरग्रन्थस्य १३, १४, २१, ३५ तमपटलपुष्पिकासु निर्देशाज्ज्ञायते। तथा द्वादशसहस्रसंहिताकालोत्तराख्यो भेद आसीदिति तदीयासु १८, २७, ३०, ४३, ६७, ६८ तमपटलीयपुष्पिकासु निर्देशादवगम्यते। एतदाख्यं प्रत्येकमातृकान्तरं नैतावत्पर्यन्तमनुपलब्धम् ॥

४. देवीकालोत्तरम् अथवा चतुर्विंशतिसहस्रकालोत्तरम्

देवीकालोत्तराख्यः कालोत्तरभेदः सुप्रसिद्धः। ग्रन्थेऽस्मिन् ज्ञानकाण्डे ज्ञानाचारबोधकाख्यः पञ्चषष्टितमः पटल एक एवोपलभ्यते। तस्य मातृकात्रयं टि. ८९, टि. २५०, टि. ४९६ इत्यङ्कितं समुपलभ्यतेऽस्मद्ग्रन्थालये। टि. ८९ इत्यङ्कितायां मातृकायां पटलान्ते पुष्पिकायां "इति देवीकालोत्तरे चतुर्विंशतिसहस्रे ज्ञानकाण्डे नैष्ठिकानां ज्ञाना[चार] विचारो[नाम]

पञ्चषष्टि[तमः]पटलः" इति दृश्यते। टि. २५० अङ्कितायां मातृकायामाद्यन्तभागो न विद्यते। टि. ४९६ इत्यङ्कितायां मातृकायां पटलान्ते "इति देवीकालोत्तरे चतुर्विंशतिस[हस्रे] ज्ञानकाण्डे नैष्ठिकानां ज्ञानाचारविचारः पञ्चषष्टि[तमः]पटलः" इति दृश्यते। सोऽयमेव भागः टीकया सह शैवप्रकाशविद्याशालाधिपेन कैलासपिल्लै इत्याख्येन ग्रन्थाक्षरैः श्रीलङ्कायां मुद्रितः। तथा सोलापुरे वीरशैवलिङ्गिग्रन्थमालायां ३७ तमपुष्पतया मराठीभाषाटीकया सह १९०९ तमे वत्सरे मुद्रितः।

अस्मद्ग्रन्थालये पूर्वनिर्दिष्टस्य ग्रन्थस्य वृत्तिसहितस्य मातृकात्रयं आर्. ई. २४०८२, टि. ९१, टि. ३१७ इत्यङ्कितं विद्यते। तत्र आर्. ई. २४०८२ इत्यङ्किता मातृका पत्रात्मिका संपूर्णा। अत्र १–४२ पुटानि विद्यन्ते। ग्रन्थाक्षरैर्विलिखिता। अन्ते "पुरातनगीतगोप्यार्थदर्शनेन निरञ्जनसिद्धेन सिद्धनञ्जाभिधानेन गुरूत्तमेन कर्णाटकभाषया कृतव्याख्यामवलोक्य संस्कृतेन व्याख्या संपूर्णेन कृता समाप्तिः" इति दृश्यते। अनेनेयं संस्कृतभाषायां विद्यमाना वृत्तिः कर्णाटकभाषावृत्तिमनुसृत्य विरचितेति निर्णेतुं शक्यते।

टि. ९१ इत्यङ्किता मातृका वृत्तिसहिता, अपूर्णा। अतः पटलान्तिमपुष्पिका भ्रष्टा। अस्यां मातृकायां दृश्यमाना वृत्तिः पूर्वनिर्दिष्टैव। अत्र ६१ तमश्लोकव्याख्यानान्ते "इति ज्ञानप्रकरणम्" इति निर्देशोऽस्ति। तदनन्तरं च "अथ आचारप्रकरणम्" इति शीर्षिका वर्तते। अतोऽयमेव पटलः प्रकरणद्वयात्मना विभक्त इति भाति।

टि. ३१७ इत्यङ्किता मातृकापि वृत्तिसहिता, अपूर्णा। अत्र दृश्यमाना वृत्तिरन्या। मातृकायामन्तिमभागो न दृश्यते। अथापि "मोहिका मूर्च्छिका" इति ३२ तमश्लोकव्याख्याने "अवस्थालक्षणं सर्वमस्माभिः सिद्धान्तसारावलीवृत्तौ प्रविस्तरेणोक्तम्" इति विद्यमानत्वादियं वृत्तिरनन्तशंभुविरचितेति निर्णेतुं शक्यते।

किं चास्मद्ग्रन्थालये आर्. ई. २५३४२ इत्यङ्किता मातृकैका विद्यते। सा च संपूर्णा, तालपत्रात्मिका। अत्र कर्णाटकभाषावृत्तिमनुसृत्य संस्कृतभाषायां कृताया वृत्तेर्द्राविडभाषायां पदार्थविवृतिरुपलभ्यते। अस्यां मातृकायां "इति देवीकालोत्तरे चतुर्विंशतिसहस्रज्ञानकाण्डे नैष्ठिकानां ज्ञानाचारविचारः पञ्चषष्टिः पटलः समाप्तः" इति पुष्पिका दृश्यते।

ग्रन्थोऽयं द्राविड्यां पद्यरूपेण भाषान्तरीकृतः। कर्ता तु न ज्ञायते। सोऽयं द्राविडभाषाव्याख्यया सह पो. मुत्तैयपिल्लै इत्यनेन १९३५ तमे वत्सरे प्रकाशितः। अस्मिन्प्रकाशने चोपोद्घाते "इतः पूर्वमपि देवीकालोत्तरस्य पद्यरूपात्मकं मूलं, तस्य गद्यरूपव्याख्यानं च प्रकाशितमस्ति। तस्य व्याख्यानस्य मायावादपरत्वात् पुनरियं व्याख्या कृता" इति निर्दिष्टम्।

"तमिल् इलक्किय अकारादि" इत्याख्ये "न. सि. कन्दैया पिल्लै" इत्येतैर्विरचिते ग्रन्थे द्राविडीग्रन्थानुक्रमण्यां (मद्रपुरी १९५२) ९७ तमे पृष्ठे "देवीकालोत्तरस्य ८५ सूत्राणि द्राविड्यां ६९ पद्यरूपेण भाषान्तरीकृतानि व्याख्यातानि च। तत्र मूलकर्तुर्व्याख्यातुश्च नामनिर्देशो नास्ति। १९ शतकस्थितेन 'शरवणपिल्लै' इत्येतेन रचितमिति प्रसिद्धिः" इति निर्देशोऽस्ति।

श्रीमता रमणमहर्षिणापि देवीकालोत्तरस्य ज्ञानाचारविचारपटलः ८५ पद्यरूपेण द्राविड्यां भाषान्तरीकृतः (श्रीरमणनूल् तिरट्टु, रमणाश्रमम्, तिरुवण्णामलै, १९४९, पृष्ठानि ५३–६८) आहत्य द्राविडीभाषायां देवीकालोत्तरस्यानुवादरूपं प्रकाशनत्रयमस्तीत्यवसीयते।

देवीकालोत्तरमातृकासु टि. ८९, टि. ४९६, आर. ई. २५३४२ इत्यङ्कितासु पटलान्तिमपुष्पिकापरिशीलनेन एवं वक्तव्यं भवति— "चतुर्विंशतिसहस्रकालोत्तरमिति देवीकालोत्तरस्यापरनाम, तथा कालोत्तरभेदोऽयं चतुष्पादात्मकः, यतो 'ज्ञानकाण्डे' इत्यत्र निर्देशोऽस्ति। तथा च प्रभाव्याख्यायामुद्धृताः श्लोकाः क्रियापादादुद्धृताः, ज्ञानरत्नावल्यामुद्धृताश्च चर्यापादादुद्धृताः स्युः"

इति। देवीशिवसंवादात्मकत्वादस्य देवीकालोत्तरमिति नामेति भाति। शिवकार्तिकेयसंवादरूपा अन्ये कालोत्तरभेदाः, इत्ययं विशेषो देवीकालोत्तरस्य कालोत्तरभेदानां च विज्ञेयः।

क्रियाक्रमद्योतिकाव्याख्यायां प्रभायां १००–१०१ पृष्ठयोः "तथा श्रीमच्चतुर्विंशतिसहस्रे" इति, तथा ज्ञानरत्नावल्याम् (टि. २३१) १६०–१६२ पृष्ठेषु "चतुर्विंशतिसहस्रे चतुर्विंशतिपटले" इति शीर्षकेण केचन श्लोका उद्धृताः।

तत्र प्रभाव्याख्यायामुदाहृताः श्लोकाः —

"बोधरूपा परा शक्तिः सादाख्यममयं स्मृतम्।
इच्छाज्ञानक्रियारूपं त्रिशूलं संव्यवस्थितम्।
ता एव परिणामेन खट्वाङ्गमपि साङ्गिनम्।
बीजानां विवृतिस्तेषां पूरणाद्बीजपूरकम्॥
माया डमरुरूपेण सैव दीर्घा द्विजिह्विका।
इन्दीवरं मनः प्रोक्तमिन्द्रियाण्यक्षमालिकाः"॥ इति॥

श्रीमज्ज्ञानरत्नावल्यामुदाहृताः श्लोकाः —

"देव्युवाच —

अन्तः कौला बहिः शैवा लोकाचाराश्च ब्राह्मणाः।
एते त्रयस्त्वया देव सूचिता न प्रकाशिताः॥
एतत् कौतूहलं देव कथयस्व प्रसादतः।

भैरव उवाच —

शृणु देवि परं गुह्यं कथयाम्यनुपूर्वशः॥
अन्तः शरीरमित्युक्तं कौलं श्रीयन्त्रवाहकम्।
तस्मान्नित्यं प्रवक्तव्यं कौलाभ्यासं वरानने॥
अन्तःकौलमिति प्रोक्तमभ्यासः सर्वदा प्रिये।
नाडीचक्रेषु यत्प्रोक्तं षड्दर्शनविनिर्णये॥
बिसपादादिविज्ञानेऽन्तर्यागविनिश्चये।
पूर्वं वै कथितं सर्वं विस्तरेण तवानघे॥
अधोर्ध्वव्यापिनीज्ञानं ज्ञात्वा कौलं समभ्यसेत्।
अथ — बहिः शैवमिति प्रोक्तं शृणुष्वायतलोचने॥
अण्डजे स्वेदजे वापि जरायुजोद्भिदेव च।
सवर्गं सर्वदं शान्तं शिवं सर्वत्र भावयेत्॥
इन्द्रियार्थेषु सर्वेषु विषयेषु च संस्थितः।
यत्र यक्षिनिरितिक्षता (यत्र निरीक्षेत ?) नाशिवं विद्यते क्वचित्॥
यत्र यत्र निरूप्येत ज्ञेयं तत्रैव चिन्तये [त्]।
प्रसह्य चापलं धीरो योगिनामपि योगदम्॥
यद्विज्ञेयं तत्र भावं स्थिरं पूर्णं सदा भवेत्।
चलित्वा यास्यते कुत्र सर्वमेव शिवात्मकम्॥
बहिः शैवमिति ज्ञात्वा नैव मुह्येत्कदाचन।
यस्यैवं सर्वगो भावः सोऽपि सर्वगतो भवेत्॥

एतत् ते परमं प्रोक्तं गुह्याद्गुह्यतरं परम्।" इति।

(टि. २३१. ज्ञानरत्नावलिः पृ० १६०–१६२)

६. षट्सहस्रसंहिताकालोत्तरम्, १३. स्कन्दकालोत्तरम् च

कालोत्तरभेदद्वयमिदं विद्यत इति ग्रन्थेषु तत्र तत्रोदाहरणाज्ज्ञायते। तथोदाहृतान् श्लोकानुद्धृत्य अनुबन्धे ते श्लोका दत्ता इति विशेषस्तत्रैव द्रष्टव्यः॥

७. त्रयोदशशतिककालोत्तरम्

त्रयोदशशतिककालोत्तरस्य संग्रहरूपोऽयं सार्धत्रिशतिकालोत्तराख्यो ग्रन्थ इति श्रीमता रामकण्ठेन स्वव्याख्यायामुपोद्घातश्लोकेषु (१. पृष्ठे) प्रदर्श्यते —

"कालोत्तरबहुत्वेऽपि मूलं सार्धशतत्रयम्।
तत्कर्त्रा क्षिप्रसिद्ध्यर्थं यत्त्रयोदशभिः शतैः॥
तत्रान्यसूत्रपटलासक्त्या विक्षेपतः कृतम्।" इति

सार्धत्रिशतिश्लोकव्याख्याने तत्र तत्र त्रयोदशशतिकश्लोकाश्च प्रमाणतयोद्धृताः। त्रयोदशशतिककालोत्तरमातृकाद्वयं नेपालदर्बारग्रन्थालये प्र. १११४ (छ), तृ.१२ इत्यङ्कितं विद्यते, परमस्य प्रतिकृतिर्नाद्यावध्युपलब्धा। अत्र ग्रन्थे, अन्यत्र च ग्रन्थेषूदाहृतांस्त्रयोदशशतिकश्लोकान्सर्वानपि संगृह्यानुबन्धे ते श्लोका दत्ता इति विशेषस्तत्रैव द्रष्टव्यः॥

८. सप्तशतिककालोत्तरम्

नेपालदर्बारग्रन्थालये २२६ (च) (अथवा तृ.१२) अङ्किता मातृकैका विद्यते, यत्र ३९ पत्राणि सन्ति। प्रथमपत्रं लुप्तम्। उपलब्धे भागे चाहत्य ३२ पटलाः; ६०९ श्लोकाश्च सन्ति। अन्ते च पुष्पिकैवं दृश्यते —"इति कालोत्तरे महातन्त्रे सप्तशतिकहंसवाचो नाम द्वात्रिंशत्तमः पटलः। समाप्तं चेदमखिल. . कालोत्तरं महाशास्त्रम्" इति। एतेन सप्तशतिककालोत्तरमित्याख्य एकः संग्रहोऽप्यस्तीत्यभ्यूह्यते।

इदमत्रावधेयम्। कालोत्तरं, कालोत्तरसंग्रहरूपाणि त्रयोदशशतिक-चतुःशतिक-द्विशतिक-सार्धत्रिशतिकरूपाणि कालोत्तराणि निर्दिशता श्रीमता रामकण्ठेन, तथा ५५ तमपृष्ठे उदाहृतेषु त्रयोदशशतिकस्थश्लोकेषु वा किमिति सप्तशतिकं तथा त्रिशतिकं च न निर्दिष्टमित्यत्र कारणं न जानीमः॥

९. चतुःशतिककालोत्तरम्

एतन्नाम्ना कालोत्तरभेद आसीदिति सार्धत्रिशतिकालोत्तरस्य षष्ठपटलान्ते श्रीमता रामकण्ठेनोद्धृतात् त्रयोदशशतिकसमाप्तिपटलश्लोकाज्ज्ञायते —

"पुत्रस्नेहान्मया पूर्वमाख्यातं ते शतद्वयम्।
सूत्रभेदेन तैः सार्धैः शतकैश्च त्रिभिः शुभम्॥
भूयश्चतुर्भिराख्यातं तत्त्रयोदशभिस्त्वयम्॥" इति।

कालोत्तरभेदस्यास्य मातृका वा, ग्रन्थादस्मादुद्धृताः श्लोका वा नाद्यावध्युपलब्धाः॥

११. त्रिशतिकालोत्तरम्

कालोत्तरभेदेषु त्रिशतिकालोत्तराख्यो भेदोऽपि विद्यत इति ज्ञायते। सिद्धान्तसारावलीव्याख्यायामनन्तशंभुना "त्रिशतिकालोत्तरे" इति शीर्षकेण केचन श्लोका उद्धृताः —

"आसनं पद्मकं बद्ध्वा यथासुखमथापि वा।
मूर्ध्नि चित्तं समाधाय मनसोच्चारयेद्धरम्॥
शनैः शनैः समाकृष्य बाह्यनाड्यां व्यवस्थितम्।
रुद्रशक्त्याग्रतो ध्यायेत्कुण्डल्यग्रेऽरुणप्रभम्॥
यावन्तं घटिकामार्गं ततो हिक्कां च कारयेत्।
संपूर्य प्रक्षिपेत्स्कन्द वायुं श्रोत्रे व्यवस्थितम्
निष्पीड्योर्ध्वं तु कुर्वीत यावत्तत्स्वस्तिकं गतम्।
सदाशिवं तु तस्योर्ध्वं बिन्दुनादं तथोपरि॥
बिन्दुनादं परित्यज्य ततः शक्तिमनुव्रजेत्।
शक्तिं त्यक्त्वा व्रजेदन्तः शिवं परमकारणम्॥
यत्र गत्वा न जायेत प्रतिज्ञा ननु पुत्रक।
इति संक्षेपतः प्रोक्ता चोत्क्रान्तिस्तव सुव्रत॥" इति

(सिद्धान्तसारावलीव्याख्यायां क्रियापादे २९ तमश्लोकव्याख्याने।)

"प्रासादाब्जशिखान्तस्थो यस्तु दीक्षां करोति हि।
आचार्यः सह शिष्यैः स शिवसायुज्यतां व्रजेत्॥" इति।

(सिद्धान्तसारावलीव्याख्यायां क्रियापादे ३५ तमश्लोकव्याख्याने)

अत्र 'प्रासादाब्ज' इत्यादिश्लोकः सार्धत्रिशत्यामपि (२२, ४) लभ्यते। अन्ये श्लोका एतावत्पर्यन्तमुपलब्धकालोत्तरमातृकासु अनुबन्धे उदाहृतश्लोकेषु वा नोपलभ्यन्ते।

१२. द्विशतिकालोत्तरम्

चतुःशतिककालोत्तरस्येव द्विशतिकालोत्तराख्यस्यापि भेदस्य निर्देशः पूर्वत्र त्रयोदशशतिकादुदाहृतश्लोकेषु दृश्यते। द्विशतिकालोत्तरस्य मूलमात्रयुक्ता टि. ३१७ अङ्किता मातृकैका, तथा टि. १७६ अङ्किता अघोरशिवाचार्यविरचितवृत्तिसहिता मातृकैका, इति मातृकाद्वयमस्मद्ग्रन्थालये समुपलभ्यते। यद्यपि टि. १७६ अङ्कितायां मातृकायां पुष्पिकासु "इति श्रीमद्विंशतिकालोत्तरे महातन्त्रे" इति दृश्यते। तदिदं लेखकप्रमादादागतम्। तत्र सर्वत्र 'श्रीमद्द्विशतिकालोत्तरे' इति भवितव्यम्। यत उपोद्घातश्लोकेषु श्रीमता अघोरशिवाचार्येणैवमुच्यते —

"शिवं शिवकरं नत्वा शैवानां हितकारिणी।
श्रीमत्कालोत्तरे वृत्तिर्द्विशतौ क्रियते मया॥" इति।

अत्र च सप्तदशपटलाः, आहत्य पञ्चोत्तरद्विशतमूलश्लोकाश्च सन्ति। 'सार्धत्रिशत्याः, द्विशत्याश्च श्लोकेषु साजात्यं बहु वर्तते' इत्ययं विषयः समानजातीयश्लोकपट्टिकादर्शनेन विशदीभविष्यति। द्विशतिकालोत्तरस्य असंपूर्णा मातृकैका नेपालदर्बारग्रन्थालये प्र. १६३४ अङ्किता विद्यते, यत्र दशमपटलादारभ्य अष्टादशपटलपर्यन्तो भागो विद्यत इति ग्रन्थसूच्यां पुष्पिकापट्टिकादर्शनेन सूच्यते। व्याख्यानदृशा अत्र सप्तदश एव पटला इति कृत्वा, तत्र अष्टादशपटलसूचिका पुष्पिका लेखकप्रमादादागता स्यात्। द्विशतिकालोत्तरस्य पटलपुष्पिका अधो दीयन्ते।

द्विशतिकालोत्तरपटलाः श्लोकसंख्या च

पटलसंख्या	पटलनाम	श्लोकसंख्या
१	मन्त्रोद्धारः	१२, १/२
२	यजनम्	५
३	अग्निकार्यविधिः	३
४	मण्डलविधिः	७
५	दीक्षाविधिः	१४
६	नाडीचक्रम्	३७, १/२
७	ज्ञानसद्भावः	२६
८	अग्नीषोमीयः	६
९	प्रासादः	४
१०	प्रासादलक्षणम्	१६
११	ज्ञानविज्ञानम्	७
१२	कालचक्रम्	५
१३	बृहत्कुमारिकाख्यानम्	८
१४	सकलनिष्कलादिभेदः	१२
१५	व्याप्तिः	८
१६	प्रत्ययाष्टकम्	१५
१७	प्रासादनिर्णयः	१९
	आहत्य श्लोकाः	२०५

यद्यपि वातुलाख्यस्य मूलागमस्योपभेदः कालज्ञानम् अथवा कालोत्तरम्, तस्य च महतः कालोत्तरस्य संग्रहरूपाः कालोत्तरभेदाः, तथापि तेषां मध्ये तत्र तत्र मतभेदस्यावकाशोऽस्तीत्यभ्यूह्यते। यतः सोमशम्भुपद्धतिव्याख्याता त्रिलोचनशिवाचार्यः समयदीक्षाविधौ सप्ताशीतितमश्लोकव्याख्यानावसरे एवं निर्दिशति "संहिताशब्दो द्विशतिकालोत्तरदृशा मूलाद्यस्त्रान्तमन्त्रषट्कवाचकः। सार्धत्रिशतिदृशा तु ब्रह्माङ्गवाचकः। अस्यास्तु पद्धतेर्द्विशतिकालोत्तरमूलत्वात् तदुक्तैव संहिता ग्राह्या" इति। अत्रायं च विशेषः। सार्धत्रिशतिस्त्रयोदशशतिककालोत्तरतन्त्रस्य संग्रहरूपेति श्रीमता रामकण्ठेन व्याख्यात्रा स्वोपोद्घातश्लोकेषु निर्दिश्यते—

"कालोत्तरबहुत्वेऽपि मूलं सार्धशतत्रयम्।
तत्कर्त्रा क्षिप्रसिद्ध्यर्थं यत्त्रयोदशभिः शतैः।
तत्रान्यसूत्रपटलासक्त्या विक्षेपतः कृतम्॥" इति।

तथा द्विशतिकालोत्तरं चतुःशतिककालोत्तरस्य संग्रहरूपमिति द्विशतिकालोत्तरस्य प्रथमपटले ४-५ तमश्लोकव्याख्याने श्रीमदघोरशिवाचार्येण प्रतिपाद्यते—"एवं शास्त्रसारात् वातुलात् सारात् चतुःशतिकादेव सारभूतम्" इति। अतः कालोत्तरसंग्रहे मतद्वयम्—"त्रयोदशशतिकं, तत्सारभूतं सार्धत्रिशतिकम्, चतुःशतिकं, तत्सारभूतं द्विशतिकालोत्तरम्" इति।

अत्र अघोरशिवपद्धतिः सार्धत्रिशतिकालोत्तरमतं, तथा सोमशम्भुपद्धतिश्च द्विशतिकालोत्तरमतमनुसरतीति कालोत्तरभेदयोरस्ति तत्र तत्र क्वचिद्विषये मतभेद इति विशेषः ॥

१०. सार्धत्रिशतिकालोत्तरम्

सार्धत्रिशतिकालोत्तरेऽस्मिन् सप्तविंशतिपटलाः सन्ति। यद्यपि नास्त्यत्र सांप्रदायिको ज्ञान-क्रिया-योग-चर्याख्यपादभेदः, तथापि पादचतुष्टयविषया अत्र संगृह्यन्त इति भाति। तत्र प्रथम-द्वादश-त्रयोदश-पञ्चदश-षोडश-सप्तदश-विंश-द्वाविंश-त्रयोविंशपटलाः, मन्त्रोद्धार-विद्या-मन्त्रसृष्टि-प्रासादभेद-प्रासादलक्षण-विज्ञान-व्याप्ति-प्रासादनिर्णय-ज्ञानामृतविषयप्रतिपादका विद्यापादे; द्वितीयपटलान्नवमपटलान्ताः, अन्तःकरणविन्यास-वारुणस्नान-भस्मस्नान-यजन-अग्निकार्य-मण्डलविधान-दीक्षा-अभिषेकविषयप्रतिपादकाः क्रियापादे; दशम-एकादश-अष्टादश-एकोनविंश-एकविंश-चतुर्विंशपटलाः, नाडीचक्र-जीवज्ञान-कालचक्र-शिवभेदाष्टक-प्रत्यय-प्रत्यक्षयजनविषयप्रतिपादका योगपादे; तथा चतुर्दश-पञ्चविंश-षड्विंश-सप्तविंशपटलाः, गतिभ्रंश-लिङ्गोद्धार-अन्त्येष्टि-अस्त्रयागविषयप्रतिपादकाश्चर्या-पादेऽन्तर्भवन्तीति वक्तुं शक्यते।

मूलभूते कालोत्तरे ये श्लोकाः, तेषु केचन तदुपभेदेष्वप्युपलभ्यन्ते। तस्मादेवान्यत्र च पद्धतिषु "कालोत्तरे" इति शीर्षकेणोदाहृताः केचन श्लोकाः सार्धत्रिशत्यामपि दृश्यन्ते। उदाहरणत ईशानशिवगुरुदेवपद्धतौ पूर्वार्धे प्रथमपटले ३१ तमश्लोकादूर्ध्वं, तथा उत्तरार्धे तृतीयपटले ५४ तमश्लोकादूर्ध्वं च "कालोत्तरे" इति शीर्षकेणोदाहृतौ श्लोकौ सार्धत्रिशत्यामपि क्रमेण १.५, १४ तमश्लोकतया दृश्येते। यस्मादयमागमः कालोत्तरसंग्रहरूपस्ततस्तत्र तत्र तस्मादुद्धृताः श्लोका अत्रापि स्युः।

क्रियाक्रमद्योतिकायां प्रभायां (पृ. १७) स्नानप्रकरणे "श्रीमत्सार्धत्रिशतिकायाम् — संहरेच्छिवतीर्थं तु ध्यात्वा संहारमुद्रया" इत्यर्धमेकमुदाहृतम्। तदिदमर्धं न कस्यांचिदपि मातृकायामुपलभ्यते। अथापि तृतीयपटले स्नानप्रकरणे नवमश्लोकस्य पूर्वार्धतयास्य स्थानं सुष्ठु भाति। एवं दुर्मरणप्रायश्चित्तविधौ —

> "क्रोधात् पाशाद् द्विषो वह्नेः शस्त्राच्च विषभक्षणात्।
> गिरिवृक्षात्प्राणहानिः षण्मासात्परिवत्सरात् ॥
> पुनः संस्कारकं कृत्वा दर्भाणां चैव पूर्ववत्।

इति श्रीमत्सार्धत्रिशतिकाश्रुतेः" इति सार्धश्लोकः क्रियाक्रमद्योतिकाव्याख्यायां प्रभायां ४४७ तमे पृष्ठे दृश्यते। अयं च भागो मातृकासु सर्वास्वपि नोपलभ्यते। प्रकरणादन्त्येष्टिविधौ योजनीय इति भाति।

अत्र सप्तविंशतिपटलेषु चाहत्य ३४७ श्लोकाः संख्याताः, असंख्याताश्च दशार्धश्लोकाः आहत्य ३५२ श्लोका उपलभ्यन्ते। तथा च सार्धत्रिशतीति पूर्णसंख्यागणनेन व्यवहार इत्यभ्युपगन्तव्यम्। श्लोकद्वयस्यात्र प्रक्षेप इति वक्तुं नास्ति प्रमाणम्। यदि श्लोकाः प्रक्षिप्तास्तदा व्याख्यात्रैव तत्र तत्र ते प्रक्षिप्ता इति सकारणं प्रक्षिप्तनिराकरणं कृतं दृश्यते (पृ. ५५, १२९ पश्यत)।

सार्धत्रिशतिकालोत्तरस्य व्याख्यानशैली अतीव प्रौढा, अतिसंक्षिप्ता, दुरवगाह्या च। मातृकाद्वयमेवैतावत्पर्यन्तं लब्धं, तदपि नातिशुद्धमिति सर्वमेतत् संपादनकार्ये श्रमकारणमभूत्। अथापि यावच्छक्ति टिप्पण्यादियोजनेन संपादितम्। असाधून्यपि पाठान्तराणि टिप्पण्यां दत्तानि, यत्साहाय्येन सुष्ठु पाठान्तरं सुधीः कश्चन कल्पयेत्तदा तानि तत्सहायकराणि भवन्त्वित्याशयेन।

सार्धत्रिशतिकालोत्तरस्यास्य बहूनि व्याख्यानान्यासन्निति प्रथमश्लोकार्धव्याख्याने मतचतुष्टय-दर्शनाज्ज्ञायते। एवमेव तत्र तत्र (उदाहरणतः ७, ८, २१, २२, २६, ३०, ३५, ४४, ४५, ५५, ९९, १००, १२१, १२९ पृष्ठेषु) व्याख्यानान्तरमनूद्य खण्डयते। परम्रिदानीं श्रीरामकण्ठकृत-वृत्तिमात्रं लभ्यते, यदधुना प्रकाश्यते। सोऽयं रामकण्ठो मतङ्गपारमेश्वरवृत्तिकार एवेति तदीय-विषयविचारस्तत्रैवास्मत्प्रकाशिते विद्यापादोपोद्घाते दत्तोऽस्ति।

सार्धत्रिशतिकालोत्तरागमोऽयं मद्रपुरीराजकीयतालपत्रकोशागारे, तथा तिरुवण्णामलैपुर्यां चोपलभ्यमानस्य वृत्तिसहितस्य मातृकाद्वयस्य साहाय्येन, तथा तत्रैवोपलभ्यमानमूलमात्रवन्मातृ-कात्रयस्य साहाय्येन च संपादितः। वृत्त्या सह प्रकाशनाद् वृत्तिमनुसृत्यैव पाठाः शोधिताः। एवमेव सार्धत्रिशतिकालोत्तरागमस्य मूलमात्रं श्रीमता "राफैल तोरेल्ला" इत्याख्येन महाशयेन संपादितं रोमापुरीविश्वविद्यालयप्राच्यविमर्शविभागपत्रिकायां ५० तमसंपुटे ३–४ सञ्चिकासु २७९–३१८ पृष्ठेषु १९७६ तमे क्रैस्तवाब्दे प्रकाशितम्। तदपि मूलपाठविषये समालोचितं, पाठव्यत्यासे टिप्पण्यां 'मु' इति संकेतेन तत्रत्यपाठान्तराणि निर्दिष्टानि। मातृकाविषयविशेषा उपयुक्तमातृकासूच्यां द्रष्टव्याः।

मातृकाद्वयेऽप्यत्र षोडशपटले २–८ तमश्लोकानां वृत्तिर्नष्टा। (१२१ तमे पृष्ठे १५ अङ्कितां टिप्पणीं पश्यत।) अत एव पञ्चमपटले ५ तमश्लोकस्य व्याख्याने "तत्रैव वक्ष्यामः" इति प्रासादलक्षणप्रकरणवृत्तौ वक्ष्यत इति सूचितो व्याख्यानभागो मातृकाद्वयेऽपि न दृश्यते। एव-मेव २१ तमपटले १९–२० तमश्लोकयोर्वृत्तिरपि न लभ्यते मातृकाद्वयेऽपि।

सार्धत्रिशतिकालोत्तरस्य मातृकैका प्र १६३४ इत्यङ्किता नेपालदर्बारग्रन्थालये वर्तत इति तद्ग्रन्थसूच्या ज्ञायते। तत्र सार्धत्रिशत्याः "अध्युष्टशतिकम्" इति नाम पुष्पिकासु दृश्यते। अत्र प्रथमपटले ४ तमश्लोकात्प्रभृत्येव ग्रन्थ आरब्धः। अन्तिमे सप्तविंशतितमपटले १९ श्लो-कस्योत्तरार्धं, २० तमश्लोकश्च न स्तः। अस्याः प्रतिकृतिरद्यावधि नास्माभिरुपलब्धा।

अत्र वृत्तावुदाहृता ग्रन्था ग्रन्थकर्तारश्च

अथर्ववेदः — अस्य पैप्पलाद-स्तौद-मौद-शौनकीय-जाजल-जलद-ब्रह्मवद-देवदर्श-चारणवैद्यभेदेन नवधा शाखाभेदो व्यवहृतः। अधुना पैप्पलाद-शौनकीयशाखाद्वयमेव मुद्रितमुपलभ्यते।

अथर्वशिराः — अष्टोत्तरशतोपनिषत्सु, अथर्ववेदोपनिषत्स्वष्टाविंशतिष्वेका।

अन्ये — सामान्यतः शास्त्रव्याख्याने "अन्ये" इत्यनूद्य स्वमतमाविष्क्रियते। परं ७ तमे पृष्ठे दृश्यमानं व्याख्यानान्तरं किं स्वाभिप्रेतमुत व्याख्यानान्तराशय इति न सुष्ठु ज्ञायते।

अवधूतगुरुः — अभिनवगुप्तकृतपरमार्थसारव्याख्याने (काश्मीरग्रन्थावलिः अङ्क ७, पृ. ३०) योगराजो "यदुक्तम् अवधूतसिद्धपादैः" इत्युदाहरति। अवधूतसिद्धविरचितं भक्तिस्तोत्रं गोपीनाथ-कविराजैः संपादितं 'ऋतम्' इत्याख्यपत्रिकायां (७, १-२, १९७५-१९७६) प्रकाशितम्। अन्ये ग्रन्था एतत्कर्तृका नाद्यावध्युपलब्धाः।

ऋग्वेदः — आश्वलायन-सांख्यायन-शाकल-बाष्कल-माण्डूकेयाख्यपञ्चशाखाभिन्नः। अधुना शाकल-संहितैव प्रचारे लभ्यते।

गुरवः — श्रीमान् सद्योज्योतिरेव "गुरवः" इतिशब्देन व्यवह्रियते। परं तु बहुषु स्थलेषु "अस्मद्गुरुभिरत्र पद्धतौ" इति यदा व्यपदिश्यते तदा नायं सद्योज्योतिः, किं तु श्रीरामकण्ठस्य साक्षाद्गुरुरेव प्रोच्यते। तद्गुरुणैका सार्धत्रिशतिकालोत्तरपद्धतिर्विरचितेति भाति। सेयं पद्धति-र्नोपलभ्यतेऽधुना।

चतुःशतिकालोत्तरम् — कालोत्तरभेदेष्वेकम्, मातृका नाद्योपलभ्यन्ते। द्विशतिकालोत्तरस्य मूलभूतमिदम्।

त्रयोदशशतिककालोत्तरम् — नेपालदर्बारग्रन्थालयेऽस्य मातृकैका लभ्यते। (नेपालदर्बारग्रन्थसूची भाग १. पृष्ठ ३७–३८) अस्य संग्रहभूतमेव सार्धत्रिशतिकालोत्तरमिति वृत्तिकृता रामकण्ठेन स्वोपोद्घाते निर्दिश्यते। तत्र तत्र प्रमाणतया तस्माच्छ्लोकानुदाहरति। अत्र, अन्यत्र चोद्धृतास्त्रयोदशशतिकश्लोका अनुबन्धे संगृहीताः।

द्विशतिकालोत्तरम् — अस्य मातृकाद्वयमस्मद्ग्रन्थालये विद्यते। मूलमात्रयुक्ता प्रथमा, अघोरशिवाचार्यवृत्तिसहिता द्वितीया। चतुःशतिकालोत्तरस्य संग्रहभूतमिदमिति वृत्तिकृतैव प्रतिपाद्यते।

दीक्षोत्तरम् — सद्योज्योतिविरचितनरेश्वरपरीक्षाटीकायामपि (पृ. २५६) रामकण्ठेन ग्रन्थोऽयमुदाहृतः। अस्मद्ग्रन्थालये निश्वासकारिकाख्यग्रन्थे (टि. १७) तदीयैकदेशीभूतो दीक्षोत्तराख्यग्रन्थोऽप्युपलभ्यते। अत्र एकोनविंशतिपटलाः सन्ति। ग्रन्थोऽयमपूर्ण इति भाति, यस्माद् दीक्षाविषयाः सर्वेऽत्र न लभ्यन्ते। उपलब्धे भागे रामकण्ठोदाहृतश्लोका न दृश्यन्ते।

नन्दिकेश्वरकारिका — 'नन्दिकेश्वरकारिका' अथवा 'नन्दिकेश्वरकाशिका' इत्येतन्नाम्ना पाणिनिसूत्रमूलभूतानां चतुर्दशशिवसूत्राणां व्याख्या सप्तविंशतिश्लोकात्मिका प्रसिद्धा। एषा उपमन्युकृततत्त्वविमर्शिन्याख्यव्याख्यया सह बहुशो मुद्रिता। परं रामकण्ठेनोदाहृताः श्लोका नात्रोपलभ्यन्ते। उदाहृतश्लोकाः शैवागमसंबन्धिनः। किमियं चन्द्रज्ञानागमोपागमभूतं नन्दिकेश्वरम्, उत तत्पद्धतिभूता कारिकारूपा इति तु न ज्ञायते।

न्यायविदः — यद्यपि न्यायशास्त्रकाराः पदेनानेन व्यपदिश्यन्ते। तथाप्यत्रोदाहृतो न्यायो मीमांसकैर्व्यवस्थापितः। 'प्रकृतिवद्विकृतिः कर्तव्या' इत्ययं न्यायो व्याकरणमहाभाष्यव्याख्याने पस्पशाह्निके कैयटेन मीमांसकैर्व्यवस्थापितो न्याय इत्युच्यते।

पदविदः — पदेनानेन वैयाकरणा निर्दिश्यन्ते। वाक्यपदीये अत्रोदाहृतश्लोको नोपलभ्यते। वैयाकरणेषु विशिष्य क इति न ज्ञायते।

पद्धतिः — "गुरवः" इति पदं पश्यत।

पारमेश्वरम् — अष्टाविंशतितमेषु शैवागमेषु षड्विंशतितमोऽयमागमः। नेपालदर्बारग्रन्थालयेऽस्यागमस्य १८१० तमाङ्गलवत्सरे लिखिता मातृका लभ्यते (अङ्क सि. ३६४)। नेपालदर्बारग्रन्थालयस्य सूच्यां हरप्रसादशास्त्रिकृतायां पारमेश्वरागममातृकाया अस्या लेखनकालो ८०२ तमाङ्गलवत्सर इति निर्दिष्टोऽस्ति। विक्रमसंवत्सरगणनया यद्यप्येवं वक्तुं शक्यते, तथापि नेपालीयमातृकासु नेपालीयसंवत्सरगणनयैव कालनिर्देश इति मातृकालेखनकालो १८१० तमाङ्गलवत्सर इति वक्तव्यमिति अस्या मातृकायाः प्रत्यक्षपरिशीलनपुरःसरमाचार्यफिलियोजामहाशया अभिप्रयन्ति। अस्यागमस्य प्रचारः कम्बोडियादेशेऽप्यासीदिति ९६७ तमवत्सराङ्कितशिलालेखया ज्ञायते। अस्मद्ग्रन्थालयेऽस्यापूर्णा मातृका काचित् (टि. २४९ अङ्किता) वर्तते। अत्र पटलत्रयमेवास्ति। कलकत्तानगरस्थिते एसियाटिक् सोसायटिग्रन्थालयेऽस्य मातृकैका (५८०८) वर्तते।

अत्र ग्रन्थे निर्दिष्टो विषयः पारमेश्वरागमस्योपागमभूते मतङ्गपारमेश्वरे यद्यपि सूच्यते, तथापि विशदतया न लभ्यत इति, मूलभूते पारमेश्वरागम एवायं विषयो निर्दिष्ट इत्यूहनीयो भवति।

भार्गवम् — मतङ्गपारमेश्वरे निर्दिष्टं "कवचभार्गवम्" इति ग्रन्थं पश्यत। मृगेन्द्रवृत्तिदीपिकायामपि (पृ. ११) "श्रीमद्भार्गवे" इत्येवोदाह्रियते।

मतङ्गम् — मतङ्गपारमेश्वरस्यैकदेशनाम।

मातृकाज्ञानवेदिनः — को ग्रन्थोऽत्र सूच्यत इति नावगम्यते। मातृकाभेदतन्त्रम् मातृकार्णवम् इत्याद्यनेकानि शाक्ततन्त्राणि प्रसिद्धानि।

यजुर्वेदः — 'एकशतमध्वर्युशाखाः' इति महाभाष्ये पस्पशाह्निके निर्दिश्यते। तत्र शुक्ल-कृष्ण-भेदेन प्रसिद्धोऽयम्। शुक्लयजुर्वेदेऽद्य वाजसनेयि-माध्यन्दिन-काण्व-कपिष्ठल-कठ-मैत्रायणीय-संहिता उपलभ्यन्ते। कृष्णयजुर्वेदेऽद्य तैत्तरीय-काठक-हिरण्यकेशीयसंहिताः परमुपलभ्यन्ते। एतद्वेदीयशाखासु जाबाल-सत्याषाढी-आपस्तम्बी-बौधायनी-गालव-बैजव-कात्यायनीयसंहिताभ्य उद्धृता मन्त्रा ग्रन्थेष्वन्यत्र प्रमाणतयोदाहृता दृश्यन्ते।

यज्ञसूत्रम् — एतन्नामको ग्रन्थोऽधुना नोपलभ्यते।

रामकण्ठः — व्याख्याने स्थलद्वये 'इत्युक्तम् अस्माभिः' इत्युदाहृतो भागो मुद्रितेषु तत्कृतेषु ग्रन्थेषु न दृश्यते। कस्माद्ग्रन्थादयं भाग उद्धृत इति न ज्ञायते।

रुद्रैकादशिनी — एषा कृष्णयजुर्वेदे तैत्तरीयसंहितापरनामधेये चतुर्थकाण्डे पञ्चमप्रपाठकीयानां रुद्रसंबन्धिनामेकादशानुवाकानां नाम।

रौरवम् — अस्यागमस्य भागद्वयमस्मद्ग्रन्थावल्यां १८ तमाङ्कत्वेन प्रकाशितम्। तृतीयो भागः प्रकाशयिष्यते। अथापि नैतावत्पर्यन्तमस्यागमस्य संपूर्णा मातृका लब्धेति ग्रन्थेऽत्रोदाहृताः केचन श्लोका नोपलभ्यन्त इति टिप्पण्यां निर्दिष्टम्।

वाक्यविदः — अनेन मीमांसका निर्दिष्टाः, न विशिष्य कश्चन ग्रन्थकर्ता।

वार्तिकम् — सद्योज्योतिकृतस्य मन्त्रवार्तिकाख्यस्य ग्रन्थस्यैकदेशग्रहणेन व्यवहारः। ग्रन्थोऽयमुदाहरणमात्रेण ज्ञायते।

वातुलम् — कालोत्तरागमस्य तत्संग्रहभूतस्य, सार्धत्रिशत्याश्च मूलभूतोऽष्टाविंशतितमः शैवागमः।

शतपथपरिशेषः — एतन्नामकग्रन्थोऽधुना नोपलभ्यते।

शिक्षाकाराः — ग्रन्थेऽत्रोदाहृतो भागः आपिशलिशिक्षायां, पाणिनिशिक्षायां चोपलभ्यते।

श्रुतिः — अत्र ग्रन्थे उदाहृतश्रुतिषु ये ये समुपलभ्यन्ते, ते टिप्पण्यां विशेषतो निर्दिष्टाः। एकत्र (४५–पृष्ठे) पुराणवचनमपि श्रुतिरिति निर्दिष्टम्।

सर्वज्ञानोत्तरम् — अस्य ज्ञानपादमात्रं द्राविडभाषानुवादेन सह देवसालपुर्यां शिवागमपरिपालन-सङ्घद्वारा १९२३ तमे क्रैस्तवाब्दे मुद्रितम्। उपागमोऽयमिति शिवज्ञानबोधभाष्यादिष्वस्ति व्यवहारः। अष्टाविंशतिशैवागमानामुपभेदेषु नास्य नाम दृश्यते। चतुष्षष्टितन्त्रेषु सर्वज्ञानोत्तरस्य नाम परिगण्यते। अस्य ज्ञानक्रियाचर्यायोगपादा अस्मद्ग्रन्थालये टि ३३४, टि ७६० अङ्कितयोर्मातृकयोरुपलभ्यन्ते। टि. ४९६ अङ्कितायां मातृकायां योगपादमात्रमुपलभ्यते।

सर्वज्ञानोत्तरवृत्तिः — शिवाग्रयोगीन्द्रेण सर्वज्ञानोत्तरस्य द्राविडी टीका विरचिता। सा च देवसालपुर्यां शिवागमपरिपालनसङ्घेन प्रकाशिता। संस्कृतवृत्तिरस्तीति ग्रन्थेषूदाहरणाज्ज्ञायते। मातृकाप्यस्तीति श्रूयते, परं नास्माभिरेतावत्पर्यन्तमुपलब्धा।

सांख्याः — अत्र ग्रन्थे उदाहृतो भागः सांख्यकारिकायां दृश्यत इति तत्रैव टिप्पण्यां निर्दिष्टम्।

सामवेदः — राणायनीय-सात्यमुग्र-कापोल-महाकापोल-लाङ्गलायन-शार्दूल-कौथुमादिशाखाभेदेन भिन्नः। अधुना राणायनीय-कौथुमशाखे एव प्रचारे दृश्येते।

सिद्धगुरवः — अनेन पदेन श्रीसद्योज्योतिर्व्यवह्रियते। तद्विषये विशेषो मतङ्गपारमेश्वरोपोद्घाते ४१–४२ पृष्ठयोर्दत्त इति तत्रैव द्रष्टव्यः।

सूक्ष्मस्वायंभुवम् — मतङ्गपारमेश्वरोपोद्घाते ४५ तमं पृष्ठं पश्यत।

स्वतन्त्रम् — अस्यासंपूर्णा मातृका टि ८६९ अङ्किता अस्मद्ग्रन्थालये विद्यते। वाराणसीय-सरस्वतीभवने, तथा कलकत्तास्थितएसियाटिक्सोसायटिग्रन्थालये च अपूर्णा एव मातृकाः सन्ति। शैवागमोपागमेषु स्वतन्त्रमित्यागमो न परिगण्यते। नापि चतुष्षष्टितन्त्रेषु। अथापि स्वतन्त्र-

मिति तन्त्रमेकमासीदिति मृगेन्द्रवृत्तौ क्रियापादे बहुश उदाहृतत्वात्, तथा शतरत्नसंग्रहादिषूदाहरणाच्चावगम्यते ।

स्वायंभुवम् — मतङ्गपारमेश्वरोपोद्घाते ४५ पृष्ठं पश्यत ।

एतदागमीयाः केचन विशेषाः

सार्धत्रिशतिकालोत्तरे प्रथमपटले सद्योजातादिपञ्चब्रह्ममन्त्राः, हृदयादिषडङ्गमन्त्राः, प्रासादमन्त्रः, पाशुपतास्त्रमन्त्रः इत्येते परिगणिताः । द्वितीये पटले धारणादिमन्त्राणां प्रस्तावो विद्यते । पञ्चदशे स्थूलसूक्ष्मपरभेदेन प्रासादमन्त्रजपविधानं, तथा षोडशे पटले ह्रस्व-दीर्घ-प्लुतभेदेन प्रासादमन्त्रप्रतिपादनं च दृश्यते । एकोनविंशे शिवभेदाष्टकस्य सकलादिमन्त्राष्टकस्य, तथा चैकविंशे पटलेऽष्टविधप्रत्ययभेदमन्त्राणां च वर्णनं दृश्यते ।

मतङ्गपारमेश्वरे क्रियापादे १. ५८–११७ श्लोकेषु व्योमव्यापिमन्त्रस्यैकाशीतिपदेष्वेव सर्वमन्त्राणामन्तर्गतत्वेन प्रतिपादनं दृश्यते — शिवाङ्गमन्त्राः पञ्च, विद्येश्वरमन्त्रा अष्ट, गायत्रीमन्त्रः, सावित्रीमन्त्रः, विद्येश्वरोपचारमन्त्रः, पञ्च ब्रह्ममन्त्राः, चण्डेशमन्त्रः, चण्डेशषडङ्गमन्त्राः, चण्डेशासनमन्त्रः, अनन्तेशासनमन्त्राः षट्, केसरमन्त्रा द्वात्रिंशत्, कमलमन्त्रः, दिक्पालमन्त्रा अष्ट, विद्याङ्गमन्त्राः पञ्च, तत्रैकमेव पदम् "ओं नमो नमः" इति शिरःशिखयोरुभयोरपि, वज्राद्यायुधमन्त्रः इति । एते मन्त्रा एकाशीतिपदैः प्रतिपाद्यन्ते ।

मृगेन्द्रे क्रियापादे प्रथमपटले शिवमन्त्रः, पञ्चब्रह्ममन्त्राः, पञ्चाङ्गमन्त्राः, आधारशक्तिमन्त्रः, आसनभूतस्य विद्येश्वरस्यानन्तस्य मन्त्रः, धर्मज्ञानवैराग्यैश्वर्याणां चतुर्णां मन्त्राः, तथा आसनभूतपङ्कजाङ्गानां कन्दबीजाङ्कुरादीनां मन्त्राः, वामादिशक्तिमन्त्राः, गायत्रीसावित्र्योर्मन्त्रौ, सूर्यचन्द्राग्निमण्डलेशानां मन्त्राः प्रोक्ताः । अत्र पञ्च ब्रह्ममन्त्राः, "हं हिं हुं हें हों" इति, पञ्चाङ्गमन्त्रा हृदयादिनेत्रान्ताः "हां हीं हूं हैं हौं" इति वर्णिताः । सार्धत्रिशतिकालोत्तरे नेत्रमन्त्रो "हं" इति प्रोक्त इति भेदो द्रष्टव्यः । आधारशक्त्यादिमण्डलेशान्तानां प्रणव एव मन्त्र इति प्रोच्यते । एवं विद्येश्वराणां, दिक्पालानां, गणेशानां, चण्डेश्वर-तत्त्वेश्वराणां च मन्त्राः प्रतिपादिताः । एतेषां स्वाभिधानं चतुर्थ्यन्तं प्रणवनमस्कारयुक्तं मन्त्र इति प्रतिपाद्यते । एवं स्रुङ्मकरादिमुद्राणां स्वाभिधानाद्यक्षरं नमस्कारादिजात्युपपदयुक्तं मन्त्र इत्युच्यते । पार्थिवप्रभृतीनां पञ्चधारणानां बिन्दुयुक्ता लकारवकाररेफयकारहकाराः क्रमेण मन्त्रा इति प्रोक्ताः । क्षेत्रपालस्य सानुस्वारः क्षकारो मन्त्र इत्युक्तः । अनुक्तानामन्येषां स्वाभिधानं चतुर्थ्यन्तं मन्त्रः, अथवा हकारः प्रणवादिर्वेति भण्यते ।

अचिन्त्यविश्वसादाख्ये पञ्चमपटले ५७ तमे श्लोके पूर्वार्धे "नेत्रं चतुर्दशं चैवमस्त्रं षोडशमुच्यते ।" इति नेत्रमन्त्रस्य स्वरूपं "हौं" इति प्रोक्तम् । सार्धत्रिशतिकालोत्तरे प्रथमपटले १० तमे श्लोके पूर्वार्धे "अनुस्वारो भवेन्नेत्रं सर्वेषां चोपरि स्थितः" इति नेत्रमन्त्रो "हं" इति निरूपित इति भेदो विज्ञेयः ।

पूर्वकामिके द्वितीयपटले चिन्तमणि-कालान्तकरुद्र-मातृका-माला-व्योमव्यापिमन्त्रा विशिष्य प्रतिपादिताः ।

पूर्वकारणे द्वितीये पटले नवात्मकमन्त्रोऽथवा शिवमन्त्रः, तथा सदाशिव-महेश-मनोन्मनी-पृथिव्यादिपञ्चभूतमन्त्राः, दशाक्षर-पाशुपतास्त्र-क्षुरिकास्त्र-बीजमुख्य-विद्याङ्गमन्त्राः, विद्येश-गणेश-लोकपाल-दशायुध-यक्ष-राक्षस-पैशाच-गन्धर्व-सिद्ध-किन्नर-ऋषि-भैरवमन्त्राः वर्णिताः ।

सुप्रभेदागमे क्रियापादे तृतीये पटले शिव-ब्रह्माङ्ग-विद्येश-गणेश-लोकपाल-लोकपालास्त्र-विद्याङ्ग-

बीजमुख्य-क्षुरिकास्त्र-पृथिव्यादिबीजमन्त्र-बीजब्रह्म-पिण्डमन्त्र-कलामन्त्र-पञ्चब्रह्ममन्त्राः प्रतिपाद्यन्ते।

अनुद्दिष्टमन्त्रकेषु कर्मसु विषये तत्कर्म हृदयमन्त्रेण कार्यमिति सार्धत्रिशतौ (५.५.उ) प्रोच्यते। अयमेव विषयो मतङ्गपारमेश्वरे क्रियापादे —

"पूर्वोक्तमखिलं कार्यं गायत्र्या सर्वमेव हि।
यस्मिन्यस्मिन्न मन्त्रोऽस्ति तस्मिंस्तस्मिन्सदा भवेत्॥
गायत्री कर्मणि श्रेष्ठा संपादयति योजिता।
सर्वं सर्वेषु कार्येषु नात्र कार्या विचारणा॥" ३.८१उ-८३पू

इति गायत्र्या कर्तव्यत्वेन विधीयते।

सार्धत्रिशतिकालोत्तरे प्रथमपटले १.१५-१६ श्लोकयोर्महामुद्रायाः परं विधिर्दृश्यते।

मतङ्गपारमेश्वरे क्रियापादे १.५-१२ श्लोकेषु शक्तिमुद्रा, बीजमुद्रा, प्रशान्तमुद्रा, आवाहनमुद्रा, संहारिणीमुद्रेति पञ्च मुद्रा विधीयन्ते।

किरणागमे क्रियापादे तृतीये पटले पञ्चमुखी, धेनुमुद्रा, लोकपालानां मुद्रा, आवाहनी, निष्ठुरा, शक्तिमुद्रा, स्थापनी, द्रव्यमुद्रेति मुद्राष्टकं सलक्षणं प्रोच्यते। अस्त्राणां तु मुद्रा स्वरूपतः प्रदर्शनीयेति प्रतिपाद्यते।

रौरवे विद्यापादे पञ्चमपटले नमस्कारमुद्रा, ध्वजमुद्रा, शशकर्णिका, मुकुला, पद्ममुद्रा, आवाहनी, निष्ठुरा, कालकण्ठी, लिङ्गमुद्रेति नव मुद्राः प्रोच्यन्ते।

योगजागमे अष्टमे पटले शोधनी, शङ्खमुद्रा, सुरभिमुद्रा, मुकुलमुद्रा, आवाहनी, निष्ठुरा, बीजमुद्रा, पञ्चमुखी, द्रव्यमुद्रा, शिवमुद्रा, संहारमुद्रा, सदाशिवमुद्रेति द्वादश मुद्रा वर्ण्यन्ते।

मृगेन्द्रे क्रियापादे पञ्चमे पटले स्रुङ्मुद्रा, मकरी, शूलमुद्रा, पद्ममुद्रा, धेनुमुद्रा, मनोरथमुद्रा, नमस्कारमुद्रा, आवाहनमुद्रा, स्थापनी, निरोधनी, परिघा, आकर्षणी, घटमुद्रा, तालमुद्रेति चतुर्दश मुद्राः सलक्षणं विधीयन्ते।

स्वायंभुवागमे त्रयोदशे पटले शोधनी, कालकण्ठी, मुकुली, शङ्खकर्णिका, निष्ठुरा, पद्ममुद्रा, नमस्कारमुद्रा, मनोरमा, शान्ता, लिङ्गमुद्रा, ध्वजमुद्रा, आवाहनी, गायत्री, नेत्रमुद्रा, अस्त्रमुद्रा चेति पञ्चदश मुद्राः प्रतिपाद्यन्ते।

अचिन्त्यविश्वसादाख्ये त्रयोदशे पटले आवाहनी, स्थापनी, संनिधापनी, निरोधिनी, अवकुण्ठिनी, लिङ्गमुद्रा, नमोमुद्रा, योनिमुद्रा, धेनुमुद्रा, हृदयादिषडङ्गमुद्राः, महामुद्रा चेति षोडश मुद्रा वर्ण्यन्ते।

सुप्रभेदागमे क्रियापादे नवमे पटले अस्त्रमुद्रा, वक्त्रमुद्रा, महामुद्रा, शोधनी, संहारिणी, पञ्चमुखी, सुरभिमुद्रा, द्रव्यमुद्रा, मुकुली, पद्ममुद्रा, शशकर्णी, शक्तिमुद्रा, बीजमुद्रा, आवाहनी, शान्ता, मनोरमा, ध्वजमुद्रा, निष्ठुरा, लिङ्गमुद्रा, गायत्री, कालकण्ठी, शूलमुद्रा, नमस्कारमुद्रा चेति त्रयोविंशतिमुद्रा बोध्यन्ते।

वीरागमे त्रयस्त्रिंशे पटले सुरभिमुद्रा, लिङ्गमुद्रा, मुकुलमुद्रा, शशकर्णिका, आवाहनी, निर्वीरा, सृष्टिमुद्रा, स्थितिमुद्रा, संहारमुद्रा, पञ्चब्रह्ममुद्राः, षडङ्गमुद्राः, शोधनी, पद्ममुद्रा, शूलमुद्रा, परशुमुद्रा, खड्गमुद्रा, पाशमुद्रा, अङ्कुशमुद्रा, धनुर्मुद्रा, बाणमुद्रा, घण्टामुद्रा, वज्रमुद्रा चेति एकत्रिंशन्मुद्राः प्रतिपाद्यन्ते।

पूर्वकारणे अष्टाविंशतितमे पटले लिङ्गमुद्रा, नमस्कारमुद्रा, तालमुद्रा, शङ्खमुद्रा, सुरभिमुद्रा, मुकुली, वाराही, निष्ठुरा, बीजमुद्रा, पञ्चवक्त्री, द्रव्यमुद्रा, शिखामुद्रा, संहारमुद्रा, सादाख्यमुद्रा, आसनी, महेशमुद्रा, वज्रमुद्रा, शक्तिमुद्रा, दण्डमुद्रा, खड्गमुद्रा, पाशमुद्रा, अङ्कुशमुद्रा, गदामुद्रा, शूलमुद्रा, पद्ममुद्रा, चक्रमुद्रा, टङ्कमुद्रा, महामुद्रा, घण्टामुद्रा, अस्त्रमुद्रा, शरमुद्रा, धनुर्मुद्रा चेति द्वात्रिंशन्मुद्रा विहिताः।

अजितागमे क्रियापादे षड्विंशे पटले शोधनी, कालकर्णी, मुकुली, शशकर्णिका, निष्ठुरा, पद्ममुद्रा, नमस्कारमुद्रा, मनोरमा, शान्ता, लिङ्गमुद्रा, ध्वजमुद्रा, आवाहनी, स्थापनी, रोधनी, संनिधीकरणी, गायत्री, नेत्रमुद्रा, अस्त्रमुद्रा, सुधा अथवा धेनुमुद्रा, पञ्चमुखी, संहारमुद्रा, वज्रमुद्रा, शक्तिमुद्रा, दण्डमुद्रा, खड्गमुद्रा, पाशमुद्रा, अङ्कुशमुद्रा, गदामुद्रा, शूलमुद्रा, पद्ममुद्रा, चक्रमुद्रा, द्रव्यमुद्रा, करकच्छपी, नाराचास्त्रमुद्रा, मृगी, महामुद्रा, शङ्खमुद्रा, तालमुद्रा, वाराही, त्रासिनी चेति चत्वारिंशन्मुद्राः सलक्षणं प्रतिपादिताः। अत्र पद्ममुद्राया द्विवारमुद्धारो वर्तते। लक्षणं त्वेकरूपमेव। एकासनकल्पने, अपरा ब्रह्मप्रीतिकरी सृष्टिकर्मणि प्रयोक्तव्या चेति भेदोऽवगन्तव्यः।

दीप्तागमे सप्ततितमे पटले मुकुली, पद्ममुद्रा, कर्णिका, शोधनी, पञ्चमुखी, सुरभिमुद्रा, द्रव्यमुद्रा, बीजमुद्रा, आवाहनी, ध्वजमुद्रा, निष्ठुरा, संहृतिमुद्रा, कालकण्ठी, लिङ्गमुद्रा, शान्ता, शङ्खमुद्रा, शिवमुद्रा, सदाशिवमुद्रा, महेशमुद्रा, शक्तिमुद्रा, शूलमुद्रा, परशुमुद्रा, खड्गमुद्रा, पाशमुद्रा, अङ्कुशमुद्रा, धनुर्मुद्रा, बाणमुद्रा, महाघण्टामुद्रा, वज्रमुद्रा, चन्द्रमुद्रा, हृन्मुद्रा, शिरोमुद्रा, शिखामुद्रा, कवचमुद्रा, अस्त्रमुद्रा, अक्षिमुद्रा, पञ्चब्रह्ममुद्राः, नमस्कारमुद्रा, महामुद्रा चेति त्रिचत्वारिंशन्मुद्राः प्रतिपाद्यन्ते। उपलब्धेष्वागमेषु अजितदीप्तयोरेवाधिकतया मुद्रा वर्ण्यन्ते।

सार्धत्रिशतिकालोत्तरे तृतीयचतुर्थपटलयोर्वारुणस्नान-भस्मस्नानयोरेव विधिर्दृश्यते। स्नानविषये आगमेषु यन्मतान्तरं, तद्विषये विवरणार्थमस्मदीये अजितागमे प्रथमभागे एकोनविंशे स्नानविधिपटले (पृ० १७२) द्वितीयसंख्यां टिप्पणीं पश्यत।

सार्धत्रिशतिकालोत्तरे भस्मस्नानपटले भस्मोत्पादनश्रुतेरभावादत्र संहितान्तरतो गोमयाद्याहरणादीनां प्रस्तावो न युक्त इति वृत्तिकृता प्रतिपादितम् (४. १ उ, २ पू. वृत्तौ)।

अचिन्त्यविश्वसादाख्ये नवमे पटले (६७-७८ श्लोकेषु),
मतङ्गपारमेश्वरे क्रियापादे द्वितीये पटले (२८–३० श्लोकेषु),
मृगन्द्रे क्रियापादे द्वितीये पटले (२२–२५ श्लोकेषु),
अजितागमे क्रियापादे एकोनविंशे पटले (७७–८८ श्लोकेषु),
पूर्वकामिके तृतीये पटले (४३–४९ श्लोकेषु),
पूर्वकारणे एकोनत्रिंशे पटले (५३–५५ श्लोकेषु),
किरणागमे क्रियापादे प्रथमपटले (१५–१८ श्लोकेषु),
चिन्त्यागमे चतुर्थे पटले (१४–१५ श्लोकेषु),
दीप्तागमे षट्पञ्चाशत्तमे पटले (३–८ श्लोकेषु),
मकुटागमे तृतीये पटले (४७–५५ श्लोकेषु),
रौरवागमे क्रियापादेऽष्टमे पटले (१–४ श्लोकेषु),
सुप्रभेदे क्रियापादे षष्ठे पटले (२५–२७ श्लोकेषु),
एषु भस्मस्नानविषये गोमयाद्याहरणप्रस्तावो दृश्यते।

सार्धत्रिशतिकालोत्तरे पञ्चमे पटले नित्यार्चने अनन्तासनकल्पनात्परमावाहनात्पूर्वं वामादिशक्तिनवकस्य सकर्णिकेषु पूर्वादिकेसरेष्वावरणतया विन्यासो विधीयते (५. ३. उ वृत्तौ)। ५.६ तमे श्लोके नित्यार्चने पूर्वोक्तशक्त्यावरणापेक्षया सप्तमपटले मण्डलयागेऽधिकतया विहिता गर्भावरणादयो नैव पूज्या इति च प्रोच्यते। अत्र सप्तमपटले मण्डलयागे नित्यार्चनप्रोक्तवत् शक्त्यावरणान्तमीश्वरमभ्यर्च्य, ततो गर्भावरण-लोकेशावरण-लोकेशास्त्रावरणानां त्रयाणामावरणानां पूजा कार्येति प्रोच्यते (७. ६–१० श्लोकेषु)। गर्भावरणे च पञ्चब्रह्मणां, हृदयादिषडङ्गानां च न्यासो विहितः॥

मतङ्गपारमेश्वरे तृतीयेऽर्चनप्रकरणे आसनकल्पनावाहनाद्युपचारादनन्तरमावरणपूजा प्रतिपाद्यते। नित्यार्चने गर्भावरणस्यैकस्यैव पूजा प्रोक्ता (३. ८३–९१ श्लोकेषु)। अत्र गर्भावरणे पञ्च-

ब्रह्मणां षडङ्गानां च ध्यानपुरःसरं पूजाकरणं प्रोक्तम्। अत्र वृत्तौ नित्यकर्मण्यावरणान्तरन्यासो नैव भवति, तस्येहाश्रुतत्वादित्यभिधीयते। अत्र पञ्चमेऽधिवासपटले मण्डलयागविषयेऽर्चनप्रकरण-प्रोक्तवद् भगवतः पूजां कृत्वा, ततो द्वितीयावरणत्वेन विद्येशानां, तृतीयावरणत्वेन लोकपालानां, चतुर्थावरणत्वेन लोकपालास्त्राणां च पूजा कार्येति विधीयते (५. ५०–७१ श्लोकेषु)। अतो मतङ्गपारमेश्वरे नित्यार्चने गर्भावरणस्यैकस्यैव पूजा, मण्डलयागे तु गर्भावरण-विद्येशावरण-लोकपालावरण-लोकपालास्त्रावरणानां चतुर्णां पूजेति सिद्धम्॥

अचिन्त्यविश्वसादाख्ये त्रयोदशे पटले (१३६–१३७) पूजाविधौ आसनकल्पनावाहनाद्युपचारादनन्तरम् —

"ईशानं कर्णिकामध्ये पूर्वे तत्पुरुषं यजेत्।
अघोरं दक्षिणे पूज्य वामदेवं तु चोत्तरे॥
सद्यं पश्चिमदेशे तु पूजयेद्ब्रह्मपञ्चकम्।"

इति ब्रह्मपञ्चकस्यैवावरणार्चने विनियोगो दृश्यते। परं त्वत्रास्य गर्भावरणमिति नामनिर्देशो नास्ति। एवमष्टमे क्रियादीक्षापटले मण्डलयागविषये —

"मण्डलन्यासपूजां च ततः कुर्यात्तु देशिकः।
उत्तराभिमुखो भूत्वा पद्ममध्ये शिवं यजेत्॥
ईशानं तत्र विन्यस्य पूर्वे तत्पुरुषं यजेत्।
अघोरं दक्षिणे भागे वामदेवं तु चोत्तरे॥
सद्यं पश्चिमदिग्भागे पञ्चब्रह्म न्यसेत्क्रमात्।
हृदयं विन्यसेद्वह्नौ दले नैर्ऋत्यके शिरः॥
वायव्यां च शिखा प्रोक्ताप्यैशान्यां कवचं यथा।
कर्णिकायां पुरोभागे नेत्रन्यासो विशेषतः॥
अनन्ताद्यष्टविद्येशानष्टाशासु यजेत्क्रमात्।
धर्मज्ञानं च वैराग्यमैश्वर्यं च तथैव च॥
अङ्गविद्येश्वराणां च मध्ये वह्न्यादिकोणके।
विन्यस्यैवं प्रसन्नात्मा पश्चात्कुम्भार्चनं भवेत्॥
....
वाहनायुधदीप्तांश्च दिक्षु शक्रादिषु स्थितान्।
विष्ण्वन्तान्दश संपूज्य नमस्कारैः स्वनामभिः॥"

(८. १००–१०७)

इति श्लोकेषु शिवस्य पूजानन्तरं, ब्रह्मपञ्चक-हृदयाद्यङ्ग-विद्येश-धर्मज्ञानादीनां, तथा शक्रादि-विष्ण्वन्तदशदिक्पालकानां च पूजा आवरणार्चने प्रोक्ता भवति। अत्रापि नामत आवरणानां निर्देशो न दृश्यते। अथापि नित्यपूजायां गर्भावरणस्य, तथा मण्डलयागे गर्भावरण-विद्येशावरण-धर्माद्यावरण-दशदिक्पालावरणानां पूजा प्रोक्तेति भाति।

मृगेन्द्रे क्रियापादे तृतीये नित्यार्चनपटले (१८–२० श्लोकेषु) आसनकल्पनावाहनाद्युपचाराद-नन्तरं पञ्चब्रह्मणां, हृदयाद्यङ्गानां च पूजा विधीयते। तेषामत्रावरणत्वेन निर्देशो नास्ति। ततो (२१–२६ श्लोकेषु) विद्येशावरण-गणेशावरण-लोकेशावरणानां त्रयाणां पूजा विधीयते। अष्टमे दीक्षापटले मण्डलयागे गृहविस्तारासंभवे त्वेकावरणकोऽप्याम्नात इत्येकावरणपूजाप्रकारः (८–४४ श्लोकेषु) वर्ण्यते। ८. ४६ श्लोकानुसारेण अस्त्रावरणस्य प्रत्येकावरणत्वस्वीकारेण चतुरावरणानां वा पूजा कार्येति वक्तव्यं भवति।

सुप्रभेदे क्रियापादेऽष्टमे शिवार्चनपटले आसनकल्पनावाहनाद्युपचारादनन्तरमावरणपूजा (१३६–१४९ श्लोकेषु) प्रतिपाद्यते। तत्र गर्भावरण-विद्येशावरण-गणेशावरण-लोकेशावरण-लोकेशास्त्रावरणानां पञ्चानां पूजा विहिता। अत्र गर्भावरणे पञ्चब्रह्मणाम्, आत्मविद्याशिवतत्त्वानां, आत्म-अन्तरात्म-परमात्मनां च पूजा प्रोक्तेति विशेषोऽवगन्तव्यः। चर्यापादे तृतीयपटले आवाहनाद्युपचारैः शिवपूजानन्तरं गर्भावरण-विद्येशावरण-गणेशावरण-लोकेशावरण-लोकेशास्त्रावरणानां पञ्चानां पूजा विधेयेति प्रोक्ता (३.७०–७२) ॥

पूर्वकामिके चतुर्थेऽर्चनविधिपटले शिवस्यावाहनाद्युपचारादनन्तरमावरणपूजा विधीयते (४४८–४९४ श्लोकेषु)। तत्र गर्भावरण-विद्येशावरण-गणेशावरण-लोकपालावरण-लोकपालास्त्रावरणानां पञ्चानां पूजा वर्ण्यते। अत्र गर्भावरणे पञ्चब्रह्मणां षडङ्गानां च पूजा कार्या, अथवा वामाद्या नव शक्तयो वा पूज्या इति विकल्पोक्तिर्दृश्यते। भेदश्चायं विशिष्यावगन्तव्यः। एकावरणपूजा वा कार्या, सा च त्रिविधा ब्रह्मभिरङ्गैश्च, केवलैरङ्गैः, केवलैर्ब्रह्मभिर्वेति। "ब्रह्माङ्गैर्लोकपैरस्त्रैः" इति त्रिभिरावरणैः सह त्र्यावरणपूजा वा कार्येति च प्रोच्यते। अथवा ब्रह्माङ्ग-विद्येश-अष्टमूर्ति-एकादशरुद्र-अस्त्रसहितलोकेशानां वा पूजा कार्येति पञ्चावरणेऽपि विकल्पोक्तिर्दृश्यते ॥

पूर्वकारणागमे त्रिंशत्तमे नित्यार्चनपटले शिवस्य आवाहनाद्युपचारादनन्तरमावरणार्चना प्रोच्यते (२८०–३५२ श्लोकेषु)। अत्र गर्भावरण-विद्येशावरण-गणेशावरण-लोकपालावरण-लोकपालास्त्रावरणानां पञ्चानां पूजा ध्यानपुरःसरं प्रतिपाद्यते। गर्भावरणे पञ्चब्रह्मणां हृदयादिषडङ्गानां पूजा वर्ण्यते। तथा ३५३ तमे श्लोके गणेशावरण-लोकेशावरणयोर्मध्ये वीरभद्रविघ्नेश्वरसहितसप्तमातॄणां पूजा विधेयेति च प्रतिपाद्यते ॥

अजितागमे क्रियापादे विंशे पटले (२१९–२२५ श्लोकेषु) शिवपूजायां नृत्ताद्युपचारानन्तरं पञ्चवक्त्रेषु हविःप्रदानं कृत्वा, द्वारबलिं दत्त्वा तत आवरणपूजां कुर्यादिति विधिर्दृश्यते। अत्र नित्यार्चने विद्येशावरण-गणेशावरण-लोकेशावरण-लोकेशास्त्रावरणानां चतुर्णां पूजा प्रोच्यते।

रौरवे क्रियापादे दशमे पटले (६२–६४ श्लोकेषु) अजितागमे प्रोक्तवत् नृत्ताद्युपचारादनन्तरमावरणपूजा विधीयते। अत्र विद्येश-गणेश-भवाद्यष्टमूर्ति-लोकपाल-वज्राद्यस्त्रावरणानां पञ्चानां पूजा कार्येति प्रोच्यते।

चिन्त्यागमेऽष्टमे पटले शिवार्चनविधौ (३४७–३७६ श्लोकेषु) शिवपूजानन्तरमावरणपूजा वर्ण्यते। अत्र प्रथमावरणे पञ्चब्रह्मषडङ्गानां सशक्तीनां, द्वितीये विद्येशानां सशक्तीनां, तृतीये गणेश्वराणां सशक्तीनां, चतुर्थे दिक्पालानां सशक्तीनां, पञ्चमे लोकेशास्त्राणां सशक्तीनां च पूजा विधीयते। एवमत्र पञ्चावरणपूजा प्रोक्ता भवति ॥

दीप्तागमे त्रयोविंशे पटले शिवपूजानन्तरं (५८–६८ श्लोकेषु) पञ्चावरणपूजा भण्यते। गर्भावरण-विद्येशावरण-गणेशावरण-लोकपालावरण-लोकपालास्त्रावरणानां पूजा वर्णिता। गर्भावरणे पञ्चब्रह्मणां षडङ्गानां च पूजा प्रोक्ता ॥

वीरागमे अष्टत्रिंशे पटले (११७–१३५ श्लोकेषु) पञ्चावरणपूजा शिवपूजानन्तरं प्रतिपाद्यते। अत्र गर्भावरण-विद्येशावरण-गणेशावरण-लोकपालावरण-लोकपालास्त्रावरणानां पञ्चानां पूजा विधीयते। गर्भावरणे चात्र पञ्चब्रह्मषडङ्गानां, आत्मविद्याशिवतत्त्वानां, शिव-सदाशिव-महेशानां च पूजा विधीयत इति विशेषो ज्ञेयः।

योगजागमे षष्ठे पटले (३४८–३५९ श्लोकेषु) शिवपूजानन्तरं पञ्चावरणपूजाभिधीयते। प्रथमे ब्रह्माङ्गानां, द्वितीये विद्येशानां, तृतीये गणेशानां, चतुर्थे दिक्पालानां, पञ्चमे दिक्पालास्त्राणां च पूजा प्रोक्ता ॥

मकुटागमे षष्ठे पटले (६०७–६४२ श्लोकेषु) गर्भावरण-विद्येशावरण-गणेशावरण-लोकेश-सौर-

लोकेशास्त्रावरणानां षण्णामावरणानां पूजा प्रोक्ता। गर्भावरणे सशक्तीनां ब्रह्माङ्गानां, तथा द्वितीये विद्येशानां सशक्तीनां, तृतीये सशक्तीनां गणेशानां, चतुर्थे सशक्तीनां लोकपालानां, पञ्चमे सौराणामष्टानां सशक्तीनां, षष्ठे सशक्तीनामस्त्राणां च पूजाभिधीयते।

सूक्ष्मागमे षड्विंशे पटले शिवपूजानन्तरं (९२–१०४ श्लोकेषु) पञ्चावरणपूजा प्रतिपाद्यते। तत्र गर्भावरण-विद्येशावरण-गणेशावरण-लोकेशावरण-लोकेशास्त्रावरणानां च पञ्चानामावरणानां पूजा प्रोच्यते। अत्र सर्वेषां शक्तयश्च निर्दिष्टाः। अतः सशक्तिकानां सर्वेषां पूजात्र प्रतिपाद्यते[1]॥

सार्धत्रिशतिकालोत्तरे अग्निकार्यपटले (६. १ श्लोके) कुण्डसंस्कारविषये अस्त्रेणोल्लेखनं कवचेनाभ्युक्षणमिति संस्कारद्वयमेव विधीयते। अत्र विषये वृत्तौ प्रोद्धार-शुद्धमृदापूरण-समीकरण-कुट्टन-सेचनादयोऽन्ये संस्काराः कवचेनाभ्युक्षणकरणेनैव संपन्नाः कार्याः। उल्लेखन-अभ्युक्षण-रूपसंस्कारद्वयमेव कर्तव्यमिति निर्णीतम्।

एवमग्निजननविषये गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-नामधेयाख्याः पञ्चैव संस्कारा हृदय-मन्त्रेण कर्तव्या इति विधीयन्ते। अत्राग्नेर्वक्त्रभेदेन कर्मविशेषप्रतिपादकं प्रकरणं प्रक्षिप्तमिति वृत्तिकृता सप्रमाणं साधितम्॥

मतङ्गपारमेश्वरे क्रियापादे (४. १९ उ–२३ श्लोकेषु) कुण्डस्य हुंफट्कारयुक्तेन तेजस्तेजः-पदेन मन्त्रवारिणा ताडनम्, सर्वात्मना मन्त्रेण अर्चनम्, लोकपालास्त्रसमूहं दिक्षु विन्यस्य प्रोक्षणेन कुण्डशोधनम्, विद्याङ्गास्त्रेण उल्लेखनम्, तेनैव प्रोद्धारः, विद्याङ्गकवचेन पूरणम्, भूःपदेन कुट्टनम्, तेनैव चतुष्पथकल्पनम् इति कुण्डसंस्कारा विहिताः। एवमत्र ताडन-अर्चन-शोधन-उल्लेखन–प्रोद्धार-पूरण-कुट्टन-चतुष्पथन्यासाश्चेति संस्काराष्टकं कुण्डसंस्कारविषये प्रोच्यते।

ततः (४. २३ उ.–३१ पू. श्लोकेषु) अग्निजननविषये गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकर्माख्याः पञ्च संस्कारा विधीयन्ते। तत्र सद्योजातेन विद्याङ्गहृदयेन च गर्भाधानम्, तथा वामदेवेन विद्याङ्गशिरसा च पुंसवनम्, अघोरेण विद्याङ्गशिखया च सीमन्तोन्नयनम्, तत्पुरुषेण पाशुपतास्त्रेण च जातकर्म, ईशानमन्त्रेण पुरुष्टुताख्येन विद्याङ्गकवचेन च नामकर्म कर्तव्यमिति तत्र मन्त्राश्च निर्दिष्टाः। अत्र "ब्रह्ममन्त्रा आहुतिपञ्चकदानेनोपाकुर्वन्ति। विद्याङ्गं त्वर्चनेनोपाकरोतीति भेदोऽवगन्तव्यः" इति वृत्तौ कथ्यते। ततोऽत्र (४. ३३–३४ श्लोकयोः) वक्त्रसंपादनं, वक्त्रोद्घाटनं चेति संस्कारद्वयं होमेन संपादनीयमिति विधीयते। तत्र वक्त्रसंपादने सद्योजातवामदेवाभ्याम्, अघोरतत्पुरुषाभ्याम्, ईशानशिवाभ्यां श्लिष्टाभ्यामाहुतित्रयं कर्तव्यम्। ततः शिवास्त्रेण वक्त्रोद्घाटनं कुर्यादिति मन्त्रनिर्देशपुरःसरं कर्मसंपादनप्रकारो निरूपितः। अत्र वृत्तौ सीमन्तकरणकर्मण्येवानयोर्वक्त्रसंपादनवक्त्रोद्घाटनयोः कर्मणोरन्तर्भाविनापकर्ष इति पञ्चैव संस्कारा गर्भाधानादय इति निर्णीयते॥

मृगेन्द्रे क्रियापादे षष्ठे पटलेऽग्निकार्यप्रकरणे (६. २–४ श्लोकेषु) कुण्डसंस्कारविषये अस्त्रेण शोधिते उत्सारितविघ्ने, अस्थिशल्यादिदोषनिवृत्त्यर्थं मनसा कृतोत्कीरण-पूरण-समीकरण-दाढर्या-पादन-सेक-रजोव्युदास-प्रलेपन-उल्लिखित-वज्राङ्किते कुण्डे हृन्मन्त्रेणासनार्थं दर्भविष्टरं निवेश्य, विश्वमातरं शास्त्रोक्तक्रमेणावाहयेत्। समन्तात् कुण्डस्य उत्थितैः कुशैः परिष्करणरूपम् अक्षपाटाख्यं संस्कारं, तथा चतुष्पथाख्यं संस्कारं च कुर्यादिति चोक्तम्। एवं च मृगेन्द्रे कुण्डसंस्कारविषये शोधन-विघ्नोत्सारण-उत्कीरण-पूरण-समीकरण-दाढर्यापादन-सेक-रजोव्युदास-प्रलेपन-उल्लेखन-वज्रीकरण-अक्षपाट-चतुष्पथकल्पनाख्यास्त्रयोदश संस्काराः प्रोच्यन्ते।

---

[1]आवरणविवरणपट्टिका, तत्तदावरणस्थदेवानां तथा तत्संबन्धिन्यो या याः शक्तयस्तासां नाम्नां पट्टिका च फ्रेञ्च्भाषीयोपोद्घाते दत्ता।

एवमग्निजननविषये (६. ९–१३ श्लोकेषु) "गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-वक्त्रोद्घाटन-वक्त्रविशोधन-नामधेयाख्यसंस्कारसंपत्त्यै सद्यादिमन्त्रैः पञ्च पञ्चाहुतीर्दद्यात्" इति सामान्येन संस्कारसंपादनमुपवर्ण्य विशिष्य तत्तत्संस्कारकरणप्रकारश्चाभिधीयते। एवमत्र गर्भाधान-पुंसवन-सीमन्त-जातकर्म-वक्त्रोद्घाटन-वक्त्रविशोधन-नामधेयाख्याः सप्त संस्काराः प्रोक्ताः ॥

अचिन्त्यविश्वसादाख्ये चतुर्दशे पटलेऽग्निकार्यप्रकरणे कुण्डसंस्कारविषये (३६–३८ श्लोकेषु) निरीक्षण-प्रोक्षण-ताडन-अभ्युक्षण-खनन-उद्धार-पूरण-समीकरण-सेक-कुट्टन-मार्जन-लेपन-अर्चन-अक्षपाटाख्याः चतुर्दश संस्काराः प्रोच्यन्ते।

एवमग्निसंस्कारविषये (५३–६० श्लोकेषु) गर्भाधान-पुंसवन-सीमन्त-वक्त्राङ्गनिर्णय-वक्त्रोन्मीलन-जातकर्म-वक्त्रलालापनोदनाभिधानाः सप्त संस्कारा विधीयन्ते ॥

सुप्रभेदागमे क्रियापादे एकादशे पटले अग्निकार्यप्रकरणे कुण्डसंस्कारविषये (५–८ श्लोकेषु) शोधन-क्षालन-शोषण-पाचन-उल्लेखन-अभ्युक्षण-रेखाचतुष्टयकल्पन-समर्चनानीति संस्काराष्टकं विधीयते। अस्त्रेणोल्लेखनम्, कवचेनाभ्युक्षणमिति उल्लेखनाभ्युक्षणयोः परं मन्त्रो निर्दिष्टः।

अग्निसंस्कारविषये (१४–२४ श्लोकेषु) गर्भाधान-पुंसवन-सीमन्त-जातकर्म-नामकर्माणीति पञ्च संस्कारा वर्णिताः ॥

किरणागमे क्रियापादे चतुर्थे पटलेऽग्निकार्यप्रकरणे कुण्डसंस्कारविषये (७–११ श्लोकेषु) प्रोक्षण-ताडन-अभ्युक्षण-उल्लेखन-उत्कीरण-पूरण-समीकरण-कुट्टन-संमार्जन-समालेपन-कलारूपप्रकल्पन-सूत्रावेष्टन-कलामयाभ्यर्चन-रेखाचतुष्टयकल्पन-वज्रीकरण-चतुष्पथन्यास-अक्षपाटाख्याः सप्तदश संस्काराः प्रोच्यन्ते।

ततः (११–२६ श्लोकेषु) अग्निसंस्कारविषये गर्भाधान-पुंसवन-सीमन्त-जातकर्म-वक्त्रैकीकरणाख्याः पञ्चसंस्कारा वर्णिताः ॥

पूर्वकामिकेऽष्टमे पटलेऽग्निकार्ये कुण्डसंस्कारविषये (४२–४५ श्लोकेषु) —

"वीक्षणं शिवमन्त्रेण प्रोक्षणं चास्त्रमन्त्रतः।
वर्मणाभ्युक्षणं कार्यं ताडनं चास्त्रमन्त्रतः ॥
उल्लेखनावकिरणपूरणं सेचनं तथा।
कुट्टनं च ततः कुर्यात्संमार्जनमतः परम् ॥
उपलेपः कुण्डक्लृप्तिः कुण्डस्य परिधानकम्।
कुण्डार्चनं च परिधिविष्टरन्यास एव च ॥
रेखाचतुष्टयं वज्रक्लृप्तिः शृङ्गाटकल्पना।
एतत्सर्वं तु मतिमानस्त्रमन्त्रेण कारयेत् ॥"

इत्यत्राष्टादश संस्काराः समन्त्रकं प्रतिपाद्यन्ते।

तत्र वीक्षणं शिवमन्त्रेण, प्रोक्षणताडनेऽस्त्रमन्त्रेण, अभ्युक्षणं कवचेनेति चतुर्णां मन्त्राः प्रोक्ताः। उल्लेखन-अवकिरण-पूरण-सेचन-कुट्टन-संमार्जन-उपलेप-कुण्डक्लृप्ति-कुण्डपरिधान-कुण्डार्चन-परिधिविष्टर-न्यास-रेखाचतुष्टयकल्पन-वज्रक्लृप्ति-शृङ्गाटकल्पनानां चतुर्दशानां संस्काराणामस्त्रमन्त्रेण कर्तव्यत्वं प्रतिपादितम्। एवमत्र अष्टादशकुण्डसंस्कारा वर्ण्यन्ते।

ततः (४६-६३ श्लोकेषु) अग्निसंस्कारविषये गर्भाधान-पुंसवन-सीमन्तोन्नयन-वक्त्राङ्गकल्पन-जातकर्म-वक्त्रोद्घाटन-लालापनोदन-नामकरणानीति संस्काराष्टकं विधीयते ॥

पूर्वकारणे द्वाविंशे पटलेऽग्निकार्यविधौ कुण्डसंस्कारविषये (९, १० श्लोकयोः) शोधनं, क्षालनं, शोषणं, पावनं, प्रोक्षणं चेति पञ्च संस्काराः सद्यादिब्रह्मपञ्चकैर्विधेया इति प्रतिपाद्यते।

ततः (१२–२९ श्लोकेषु) वह्निसंस्कारविषये गर्भाधान-पुंसवन-सीमन्त-जातकर्म-नामकरणानीति पञ्च संस्कारा विधीयन्ते ॥

अजितागमे क्रियापादे एकविंशेऽग्निकार्यविधौ कुण्डसंस्कारविषये (५५–६२ श्लोकेषु) निरीक्षणम्, प्रोक्षणम्, ताडनम्, अभ्युक्षणम्, खननम्, उत्कीरणम्, पूरणम्, समीकरणम्, सेचनम्, कुट्टनम्, संमार्जनम्, उपलेपनम्, कुण्डार्चनम्, कलामयकल्पनम्, कलामयाभ्यर्चनम्, रेखाचतुष्टयकल्पनम्, इति षोडश संस्काराः प्रोक्ताः। तत्र अस्त्रेण निरीक्षणम्, नेत्रेण संप्रोक्षणम्, तेनैव ताडनम्, अस्त्रेण अभ्युक्षणम्, कवचेन खननम्, तेनैव उत्कीरणं, पूरणं, समीकरणं च, हृन्मन्त्रेण सेचनम्, तेनैव कुट्टनम्, संमार्जनोपलेपौ अस्त्रेण, कवचेन कुण्डार्चनम्, हृन्मन्त्रेण कलामयकल्पनं, कलामयाभ्यर्चनं, रेखाचतुष्टयकल्पनं चेति षोडशसंस्काराणां मन्त्राश्च निर्दिष्टाः। रेखाचतुष्टयकल्पने अस्त्रेण वा समालिख्य प्रोक्षयेत्तदिति विकल्पोक्तिश्च दृश्यते।

ततः (६७–७८ श्लोकेषु) वह्नेः संस्कारा वर्ण्यन्ते। अत्र गर्भाधान-पुंसवन-सीमन्त-वक्त्रक्लृप्ति-वक्त्रोद्घाटन-जातकर्माणीति षट् संस्कारास्तथा (१०२ श्लोके) नामकर्म चेति सप्त संस्काराः प्रोक्ताः ॥

रौरवे क्रियापादे पञ्चदशे पटलेऽग्निकार्यविधौ (१, २ श्लोकयोः) कुण्डसंस्कारविषये गोमयालेपनं, शोषणं, पाचनं, प्रोक्षणं, कूर्चासनं चेति पञ्च संस्कारा अभिधीयन्ते। ततः (४–१८ श्लोकेषु) गर्भाधान-पुंसवन-सीमन्त-जातकर्म-नामकर्माणीति पञ्च संस्काराः प्रोक्ताः ॥

वीरागमे एकोनचत्वारिंशे पटलेऽग्निकार्यविधौ (१६, १७ श्लोकयोः) कुण्डसंस्कारविषये उल्लेखनम्, अभ्युक्षणम्, रेखाचतुष्टयकल्पनमिति त्रयः संस्कारा वर्णिताः।

ततः (२९–३९ श्लोकेषु) अग्नेः संस्कारा वर्ण्यन्ते। तत्र गर्भाधान-पुंसवन-सीमन्त-जातकर्म-नामकर्म-निष्क्रामण-प्राशन-चौल-उपनयन-व्रत-समावर्तन-विवाहा इति द्वादश संस्काराः प्रोच्यन्ते ॥

दीप्तागमे त्रयस्त्रिंशे पटलेऽग्निकार्यविधौ (११–१४ श्लोकेषु) कुण्डसंस्कारविषये शोधनम्, क्षालनम्, शोषणम्, पाचनम्, उल्लेखनम्, रेखाचतुष्टयकल्पनमिति षट् संस्काराः प्रोच्यन्ते।

ततः (१६–२९ श्लोकेषु) गर्भाधान-पुंसवन-सीमन्त-जातकर्म-नामकर्माणीति पञ्च संस्काराः प्रतिपाद्यन्ते ॥

चिन्त्यागमे दशमे पटलेऽग्निकार्यविधौ (३–६ श्लोकेषु) शोधनम्, क्षालनम्, शोषणं, दहनम्, प्रोक्षणम्, रेखाचतुष्टयकल्पनं चेति षट् संस्काराः प्रतिपाद्यन्ते। शोधन-क्षालन-शोषण-दहन-प्रोक्षणानि सद्यादिपञ्चब्रह्ममन्त्रैः कार्याणीत्युच्यते। रेखाकल्पनं हृदा कार्यमिति भण्यते।

ततः (१३–२१ श्लोकेषु) अग्नेः संस्कारा वर्ण्यन्ते। तत्र गर्भाधान-पुंसवन-सीमन्त-जातकर्म-नामकर्माणीति पञ्च संस्कारा वर्णिताः ॥

मकुटागमे षष्ठे पटलेऽग्निकार्यविषये कुण्डस्य संस्कारा न दृश्यन्ते। अग्निजननविषये (६७०-६८२ श्लोकेषु) गर्भाधान-पुंसवन-सीमन्त-जातकर्म-नामकर्म-अन्नप्राशन-चौलकर्म-व्रत-समावर्तन-विवाहा इति दश संस्कारा बोध्यन्ते ॥

स्वायंभुवागमे सप्तदशे पटले (२५–२८ श्लोकेषु) कुण्डसंस्कारविषये उल्लेखन-कुट्टन-रेखा-चतुष्टयकल्पन-प्रोक्षण-चतुष्पथन्यासाश्चेति पञ्च संस्काराः प्रोच्यन्ते। ततः (३१-३६ श्लोकेषु) अग्नेः गर्भाधान-पुंसवन-सीमन्त-जातकर्म-नामकरणानीति पञ्च संस्कारा वर्णिताः ॥

सार्धत्रिशतिकालोत्तरपटलार्थसंग्रहः

प्रथमपटले शास्त्रावतारक्रमो मन्त्रोद्धारश्च प्रतिपाद्यते। आदौ विघ्ननिवृत्त्यर्थं वृत्तिकर्तुः शिवनमस्कृतिः। ततो "बहूनां कालोत्तरागमानां रचयित्रा भगवतेश्वरेण समयिपुत्रकसाधकाचार्याणा-

मधिकारिणां क्षिप्रेण फलसिद्ध्यर्थं स्वेनैव रचितात्त्रयोदशशतिककालोत्तरादेव तत्रत्यसूत्रेषु पटलेषु केषुचिच्चातीवादरेण तान्येव संगृह्य सार्धत्रिशतिकालोत्तराख्यमिदं तन्त्रमकारि। शैवसंप्रदायमज्ञात्वान्यैर्व्याख्यातृभिः शास्त्रान्तरसंस्काराच्छिवोदितं मार्गं त्यक्त्वा असंबद्धानां विषयान्तराणां पटलान्तराणां चात्र संयोजनेन पदार्थमनवलम्ब्य स्वबुद्धया व्याख्यायि। मया तु सार्धत्रिशतिकालोत्तरमिति नाम्न आनुगुण्येन तत्संख्यानिश्चयविषये त्रयोदशशतिककालोत्तरमनुसृत्य, परैः स्वबुद्धया संघटितस्य विषयस्य पटलान्तरस्य च परित्यागेन, पदार्थक्रममवलम्ब्य वृत्तिः प्रतन्यते" इति व्याख्यात्रा वृत्तिकरणे स्वोद्यमहेतुर्निरूपितः।

साक्षात्सदाशिवाद्यथा विद्येशैरागमा अवगताः, तथा शिवशिष्येण श्रीकण्ठेनापि तस्मादेव कोटिसंख्याकं वातुलाख्यं तन्त्रमधिगत्य, तच्च लक्षसंख्याकत्वेन संगृह्य स्वपुत्राय कार्तिकेयायोपादेशि। परिणतमलानामप्यल्पकालजीवितत्वादिहेतुभिर्लक्षसंख्याकग्रन्थाध्ययने, तदुक्तार्थानुष्ठाने चासामर्थ्यात्तेषां परापरसिद्धिविषये करुणावता कार्तिकेयेन तदुपायजिज्ञासया भगवन्तमीश्वरं प्रति चतुर्भिरामन्त्रणैः स्तुतिपूर्वकं प्रार्थ्यते।

तत्र स्तुतौ 'भगवन्' इत्येतन्मात्रोक्तौ अणिमादिगुणाष्टकाभिवृद्धितः सत्यलोकोर्ध्ववर्तिनो ब्रह्मणः संबोधनं स्यात्। ततो ब्रह्मणोऽप्यतिशयप्रतिपादनाय 'देवदेवेश' इति द्वितीयसंबोधनम्। एवमपि ब्रह्माण्डमध्याधिकारिणोऽनन्तशिष्यस्य श्रीकण्ठस्य संबोधनं स्यादिति पुनर्लोकनाथेति संबोधनम्। तथापि विद्येशमध्यवर्तिश्रीकण्ठस्यामन्त्रणं स्यादिति 'जगत्पते' इति संबोधनान्तरम्। एवं सति जगतो गुणत्रयरूपत्वाद्गुणतत्त्वसंबन्धिभुवनेष्वेव कार्तिकेयादीनामवस्थितेरागमेषु प्रतिपादनाच्च गुणपर्वावस्थितस्य श्रीकण्ठनाथस्यैव संबोधनं, नान्यस्य श्रीकण्ठस्येति सिद्धमिति केषांचन व्याख्यानं वर्णितम्।

अत्रामन्त्रणबहुत्वस्य निष्प्रयोजनत्वाद्वक्तुरकुशलत्वमेव परो दोष इत्येतद्व्याख्यानस्यानुचितत्वं प्रतिपादितम्।

यजुर्वेदे रुद्रैकादशिन्यां भगवत्स्वरूपं वर्ण्यते। तथा ऋग्वेदे देवदेवत्वं, सामवेदे लोकनाथत्वम्, अथर्ववेदे जगत्पतित्वं च परमेश्वरस्य बोध्यते। अतो वेदचतुष्टयप्रतिपाद्यत्वप्रदर्शनाय चतुर्भिरामन्त्रणैः संबोधनमित्यन्येषां व्याख्यानं प्रादर्शि।

स्तूयमानसंबन्धिनां गुणद्रव्यकर्मजातीनां प्रतिपादनाय स्तुतेश्चतुर्विधत्वमित्यपरेषां व्याख्या प्रत्यपादि।

हेयोपादेययोस्तद्धेतुस्वभावयोश्च प्रतिपादनवशात्स्तुतेश्चतुर्विधत्वमित्यपरेषां व्याख्या निरूपिता। अयमेवार्थः सौगतच्छाययान्यैर्वर्ण्यत इति चतुर्थव्याख्यानमपि प्रदर्शितम्।

पक्षचतुष्टयेऽपि पितरं प्रति पुत्रस्य स्तुतिरिति स्पष्टतया न ज्ञायत इति दोषो वर्णितः।

व्याख्यानादौ पूज्योऽभिवन्द्यश्च शास्त्रावतारकोऽवश्यं ज्ञातव्यः, स च कार्तिकेयपिता गुणपर्ववर्ती शिवशिष्यः श्रीकण्ठनाथ एवेति प्रतिपादनात्प्रथमव्याख्यानस्याभ्युपगमः। रौरवादौ शास्त्रावतारकोऽनन्तशिष्यः श्रीकण्ठः। अत्र तु शिवशिष्यः श्रीकण्ठ इति विशेषः प्रादर्शि।

स्तुत्या भगवन्तमभिमुखीकृत्य कार्तिकेयेनेत्थं प्रार्थ्यते—"भवता मह्यं परापरपुरुषार्थसाधनं मन्त्रतन्त्रात्मकं लक्षसंख्याकं वातुलाख्यं तन्त्रं विस्तरत उपदिष्टम्। तत्र तादृशलक्षसंख्याकवातुलाख्यतन्त्रप्रोक्तविषयेषु सामर्थ्यपर्यालोचनया रुद्राणां देवानामत्राधिकारो भवेत्। सामान्येनात्र मनुष्याणामधिकारो न संभवति। ये त्वत्र मनुष्या लोभमोहविहीनत्वेन मलपरिपाकवशाच्छक्तिपातेन पवित्रीकृतास्तेऽत्र रुद्रविशेषवदधिकारिणः संपन्नाः। तेषामल्पकालजीवितत्वादतिविस्तीर्णशास्त्राध्ययनश्रवणे, अल्पवित्तत्वादिहेतुभिस्तदर्थानुष्ठाने च सामर्थ्याभावः। ततः सिद्धिमुक्तिलक्षणमहार्थसाधकमल्पग्रन्थं, 'पतिः, विद्या, अविद्या, पशुः, पाशः, पाशनिवृत्तिकारणम्' इति षण्णां

पदार्थानां निरूपकं शास्त्रं पूर्वोक्ताधिकारिणामनुग्रहकरणाय वक्तव्यम्" इति ।

अत्र प्रार्थनावाक्ये "मननं सर्ववेदित्वं त्राणं संसार्यनुग्रहः, एतदुभयधर्मविशिष्टा मन्त्राः । तथा च शिवतच्छक्तिविद्याविद्येश्वराः, तत्स्वरूपाश्चाणवः, तद्व्यक्तिस्थानत्वात्तदभिधायकाः शब्दाश्च मन्त्रा भवन्ति" इति मन्त्रशब्दार्थविवरणं दृश्यते । "मुक्तिसिद्धिरूपपरापरपुरुषार्थाधिकारिणां विशिष्टसंस्कारप्रतिपादनपूर्वकमीश्वराराधनाय नियतविधिनिषेधकमीश्वराज्ञात्मकं वाक्यजातं तन्त्रम्" इति तन्त्रस्वरूपं न्यरूपि ।

तथा "पतिपदार्थे शिवसदाशिवेश्वरलक्षणस्य तत्त्वात्मनोऽर्थराशेस्तद्भुवनादिभिः सह संग्रहः, विद्यापदार्थे मन्त्रमन्त्रेशात्मनस्तत्त्वद्वयस्य तद्भुवनैः सह संग्रहः, अविद्यापदार्थे मायातत्त्वस्य तद्भुवनैः कर्मात्मकैर्भावैश्च सह संग्रहः, पशुपदार्थे विज्ञानकेवलप्रलयकेवलसकलानां पशुत्वमलसंबन्धयोगात् पशुतया संग्रहः, पाशपदार्थे पृथिव्यादिकलान्तस्य त्रिंशत्तत्त्वात्मनो मायेयस्य तद्भुवनैर्मायागर्भाधिकारिभिश्च संग्रहः, पाशनिवृत्तिकारणपदार्थे सर्वस्य दीक्षादिकर्मणो मोक्षोपायस्य संग्रहः" इति षट्पदार्थविवरणं दृश्यते ।

कार्तिकेयप्रश्नवाक्ये 'देवेश' इति पाठस्योपक्रमोपसंहारयोरसंबन्धादयुक्तत्वं तथा 'देवैषाम्' इति पाठ एव युक्त इति प्रत्यपादि ।

एवं 'प्रसादार्थम्' इत्यस्य प्रासादस्य मन्त्रनाथस्यार्थप्रकाशकत्वाद्यदल्पग्रन्थं महार्थं तादृशं शास्त्रं वक्तव्यमिति प्रष्टव्यविशेषणत्वेन व्याख्यानमन्यैर्विरचितमिति सूचितम् ।

प्रार्थनास्वरूपमवगम्य भगवता "परिणतमलत्वेन शक्तिपातावृतत्वादनुग्राह्यत्वेन स्थितानां विस्तृतशास्त्रश्रवणे तदुक्तार्थानुष्ठाने चासामर्थ्यतोऽनधिकारिणां मनुष्याणामनुग्रहकरणाय यावत्संक्षेपं परमेश्वरप्रोक्तात्प्रकृतिभूताद् वातुलतन्त्राद्दध्नो घृतमिव स्वबुद्ध्या प्रमथ्य, तदीयवचनैरेव संगृह्योद्धृतं सकलार्थप्रतिपादकं शास्त्रं प्रवक्ष्यामि" इति कार्तिकेयाय प्रतिवचनदानम् ।

अनेन "पतिपदार्थस्य प्रथममुद्देशः, अस्य तन्त्रस्य परमेश्वरकर्तृकत्वम्, परश्च संबन्धः, एतद्भगवत्प्रतिवचनवाक्यमेवास्य तन्त्रस्य मूलसूत्रम्" इत्येते विषयाः सूचिता इति प्रदर्शितम् ।

ततः प्रथमतो मन्त्रसंक्षेपस्वरूपवर्णनद्वारेण विद्यापदार्थप्रतिपादनपूर्वकं शास्त्रमुपक्रम्यते ।

आदौ नादस्वरूपप्रतिपादनम् । तत्र "उच्चरितध्वंसिनां श्रोत्रग्राह्याणां वर्णानां वर्णसमूहानां वा पदानां क्रमभावित्वेनार्थाभिधायकत्वाभावादर्थबोधककारणत्वेन बुद्ध्यादिमायान्ततत्त्वेभ्यो भिन्नं, पुरुषस्य तच्छक्तेश्चाविकारित्वेन ताभ्यामपि व्यतिरिक्तं नादाख्यं तत्त्वं सिद्धम् । एवं तन्नादोपादानकारणत्वेन शुद्धविद्याया महामायायाः कुण्डलिन्याख्यायाः सिद्धिश्च संभवति" इति वृत्तिकृता स्वरचितनादकारिकाख्यग्रन्थप्रदर्शनेन नादस्वरूपविवरणं प्रत्यपादि ।

नादस्वरूपविज्ञानेन महामायापुरुषविवेकस्याप्युदयात्परमुक्तिप्राप्तिः, मायापुरुषविवेकोदयात्तु कर्मनिवृत्त्या विज्ञानकेवलत्वप्राप्तिः, गुणतत्त्वोर्ध्वभोग्यस्य कर्मणोऽनुपक्षयात्प्रकृतिपुरुषविवेकोदयान्मुक्तिरिति सांख्यानां वचनमनुपपन्नम् इत्यादिविषयाणां प्रतिपादनम् ।

नादस्वरूपविज्ञानेन शुद्धाध्वनि दिव्यसिद्धिप्राप्तिरपि संभवतीत्युक्तिः ।

"आचार्यो नादस्वरूपविज्ञानेन मन्त्रप्रयोगेण विषनिवृत्त्यादिवदात्मनां पाशच्छेदादिकं कर्म कुर्याद्" इत्युक्तिः । शुद्धाध्ववर्तिनां नादस्वरूपं संनिकृष्टं भवतीति प्रतिपादनम् । अशुद्धस्य शुद्धेऽध्वनि यथाप्रगमस्तथा शुद्धस्याप्यशुद्धेऽध्वन्यप्रगम इति नैव शङ्का कार्या । पुरुषसंबन्धिभोगमोक्षकार्यान्यथानुपपत्त्या यथेश्वरस्याशुद्धेऽध्वनि प्रगमः सिद्धस्तथा शुद्धस्याप्यशुद्धेऽध्वनि प्रगमः सिद्ध इति वर्णनम् । एतेन विज्ञानकेवलाद्यनेकभेदयुक्तः पशुपदार्थः सूचित इत्युक्तिः ।

शुद्धात्मैव स्थूलसूक्ष्मपररूपं त्रिविधं नादस्वरूपं ज्ञात्वा कर्म कुर्याद् इत्युक्तिः ।

"स्थूलं श्रोत्रग्राह्यः शब्दः । सूक्ष्मम् अश्रोत्रग्राह्यं तत्परामर्शज्ञानरूपमेवानुभवतः सिद्धं चिन्ता-

मयम्। परं चिन्तया रहितम्" इति स्थूलसूक्ष्मपररूपत्रिविधनादस्वरूपप्रतिपादनम्। शास्त्रान्तरेषु 'परा, पश्यन्ती' इति व्यपदिश्यमानयोरुभयोर्वाक्स्वरूपयोरत्र चिन्तया रहिते परेऽन्तर्भावः सूचितः।

स्थूलशब्दात्मकानां मन्त्राणां संक्षेपेणोद्धारः। तत्र प्रथमं पञ्चाशद्वर्णात्मकमातृकाक्रमानुवादेन सान्तस्य हकाराख्यस्य मन्त्रबीजस्य वर्णनम्। यतो हकारः सर्वेषां मन्त्रान्तराणामुच्चारणहेतुत्वं गतस्तस्मात्स सर्वगतः, न तु व्यापकत्वात्, सान्तमित्यनेनैवाव्यापकत्वप्रतीतेरिति हकाराख्यमन्त्रबीजस्य सर्वगतत्ववर्णनम्। एवमकारादिमात्राशून्यत्वात्तस्य हकाराख्यबीजस्य शून्यत्वम्। अथवा शून्याकाशवाचकत्वाच्छून्यत्वमिति शून्यत्वप्रतिपादनम्।

अकारादिविसर्गान्तासु षोडशमात्रासु मात्राद्वादशके एव ब्रह्माङ्गमन्त्राणामुद्ध्रियमाणत्वान्मध्ये षण्डयोर्ऋकारलृकारयोर्मात्राचतुष्टयस्य निरासो युक्त इति त्रयोदशशतिककालोत्तरात्प्रमाणवचनप्रदर्शनेन स्थापनम्।

ततः सद्योजातादिपञ्चब्रह्ममन्त्राणां हृदयादिषडङ्गमन्त्राणां च निरूपणम्। अत्र अकारादिविसर्गान्तासु षोडशमात्रासु ऋकारलृकारयोः प्रतिषेधादवशिष्टासु द्वादशमात्रासु मध्ये एकार-ओकारयोश्छन्दोगानां सात्यमुग्रिराणायनीयानां मतेन ह्रस्वत्वमभ्युपगम्य "अ, इ, उ, ए, ओ" इति पञ्च ह्रस्वमात्रा हकारयुक्ताः सद्योजातादिपञ्चमन्त्राभिधायिका इत्युक्तिः।

पञ्चब्रह्ममन्त्रोद्धारविषये "ईशानाद्यास्तु सद्यान्तं मूर्ध्न आरभ्य विन्यसेत्" इति मूर्तिन्यासक्रमः कुतो न भवतीत्याशङ्क्य, प्रासादनिर्णयप्रकरणे 'सद्यः कलाष्टसंयुक्तमकाराक्षरजं विदुः' इति सद्यस्याकाराक्षरजत्वप्रतिपादनात्सद्यादिक्रम एवात्र स्वीकार्य इति समाधानप्रतिपादनम्। अत्र त्रयोदशशतिककालोत्तरात्प्रमाणवचनं च प्रदर्शितम्।

अङ्गमन्त्रोद्धारविषये ब्रह्ममन्त्राणामिव क्रमान्तरस्याश्रवणाद् "हृदयं च शिरश्चैव शिखां कवचमेव च" इत्यादिमूर्तिन्यासक्रम एव स्वीकार्य इति प्रतिपादनम्। अत्रापि त्रयोदशशतिककालोत्तरात्प्रमाणवचनं प्रदर्श्यते। तथा च हकारयुक्ताः 'आ, ई, ऊ, ऐ' इति चतस्रो दीर्घमात्रा हृदयशिरःशिखाकवचमन्त्राभिधायिका भवन्ति।

एवं पञ्चम्या दीर्घमात्राया औकाररूपाया नेत्रमन्त्रत्वे प्राप्ते 'अनुस्वारो भवेन्नेत्रम्' इति विशेषविधिना हकारयुक्तानुस्वारमात्राया एव नेत्रमन्त्रवाचकत्वमिति सिद्धान्तवर्णनम्। पञ्चम्या दीर्घमात्राया द्वितीयनेत्रमन्त्राभिधायकत्वमिति व्याख्यानस्य खण्डनम्।

'सर्वेषां चोपरि स्थितः' इति श्रुत्या अनुस्वारमात्राया उद्धृतानामङ्गब्रह्मणां सर्वेषामप्युपरि स्थितिरिति निरूपणम्।

विसर्गमात्रया सहितं हकाराख्यं मन्त्रबीजमस्त्रमन्त्रवाचकम्, अत्रानुस्वारमात्राया अङ्गत्वेन प्राप्ताया बाधः इत्यस्त्रमन्त्रस्वरूपवर्णनम्।

एवं चात्र हं हिं हुं हें हों इत्येते क्रमेण सद्योजातवामदेवाघोरतत्पुरुषेशानमन्त्राभिधायका इति सिध्यन्ति। तथा हां हीं हूं हैं हं हः इत्येते क्रमेण हृदयशिरःशिखाकवचनेत्रास्त्रमन्त्राभिधायका इति सिध्यन्ति ।

सद्योजातनेत्रमन्त्रयोः 'हं' इति समानाकारत्वेऽपि सद्योजातमन्त्रे अकारमात्राया नोच्चारणार्थत्वं नेत्रमन्त्रे अकारमात्राया उच्चारणार्थत्वमिति विवेकः प्रदर्शितः। एवं विभक्तानां विशिष्टानां ब्रह्माङ्गमन्त्राणां स्वरूपनिर्णयः प्रोक्तः।

अथाविभक्तस्य शिवसंज्ञकस्य प्रासादमन्त्रस्य वर्णनम्। अत्र 'पञ्चमे' इत्यस्य पदस्य पञ्चदीर्घमात्रायुक्तत्वात् पञ्चमं यत्सान्तं हकाराख्यं बीजं तस्मिन्नौकारयुक्ते इत्यर्थमुपवर्ण्य तत्र षष्ठमूकारं योजयेदित्यन्वयप्रदर्शनम्। त्रयोदशान्तमित्यस्य त्रयश्च दश च त्रयोदश तेषां स्वराणामन्तं त्रयोदशान्तं त्र्यन्तं दशान्तमित्यर्थः। तत्र त्र्यन्तम् ई शिखारूपं, दशान्तमनुस्वारः एतदुभयं

च नियोजयेदिति वाक्यार्थमुपवर्ण्य, एकप्रयत्नतः समुच्चार्यमाणे निरन्तराव्यवहितहकारौकारोकार-बिन्दुप्लुतमात्रोपक्षिप्तेकाररूपशिखामात्राः संवेद्यन्त एव कूटाक्षरवन्नवात्मवदिति वृत्तिकृता प्रासाद-मन्त्रस्वरूपमत्रोपवर्णितम् ।

अत्र प्रासादमन्त्रविषये व्याख्यात्रयमनूद्य खण्डचते। तथा हि — 'पञ्चमम्' आकाशं तद्वाच-कत्वाद् यत्पञ्चमं हकारबीजमुक्तं तस्मिन् षष्ठमूकारं षोडशकलासंख्यया त्रयोदशान्तं चौकारं नियोजयेत्। 'सर्वेषां चोपरि स्थितः' इति वचनादेव बिन्दुः सिद्धः इति केषांचन व्याख्यातॄणां मतानुवादः।

पञ्चमे इत्यस्याङ्गेभ्यः पञ्चमे नेत्रबीजे 'हं' इत्यत्र षोडशकलासंख्यया षष्ठमूकारं त्रयोदशान्त-मौकारं च योजयेत्। नेत्रत्वादेवात्रानुस्वारस्य प्राप्तिः इत्यन्येषां व्याख्यातॄणां मतानुवादः।

अत्रोभयत्रापि शिखामात्राया अनुपपत्तिरेवेति दोषप्रदर्शनम्।

षष्ठं त्र्यन्तं दशान्तं च पञ्चमे आकाशबीजे हकारात्मनि विनियोजयेत् इत्यपरेषां व्याख्या-तॄणां मतानुवादः।

अत्र द्वादशमात्रासु मध्यादवशिष्टाया दीर्घपञ्चममात्राया अविनियुक्तत्वादव्याप्तिरूपो दोषो निरूपितः।

अथ पञ्चाशन्मातृकानुवादेन सान्तस्य हकाराख्यमन्त्रबीजस्य, षोडशस्वरमात्रासु मध्ये षण्डयो-ॠकारलृकारयोः परित्यागेन द्वादशमात्रासु पञ्चब्रह्ममन्त्राणां तदङ्गमन्त्राणां, प्रासादमन्त्रस्य चो-द्धारो वर्णितः। एतदपेक्षयावशिष्टेभ्यो मातृकावर्णेभ्यः केषांचन वर्णानामेव मन्त्रोद्धारे विनि-योग इति प्रदर्शनपूर्वकं पाशुपतास्त्रमन्त्रस्वरूपवर्णनस्योपक्रमः।

अत्र पाशुपतास्त्रमन्त्रस्वरूपप्रतिपादनं दृश्यते। एतादृशलक्षणमीशानशिवगुरुदेवपद्धत्यामपि तृतीयभागे ३३ तमे पृष्ठे दृश्यते। पशुपतेः परस्य विद्येश्वरस्य इदं पाशुपतमस्त्रमिति व्युत्पत्त्या विद्याङ्गास्त्रमित्यर्थवर्णनं दृश्यते। एतच्च पाशुपतास्त्रं नित्यादिकर्मणि विघ्नोच्चाटनार्थं शिवा-स्त्रेण सह प्रयोक्तव्यम्। दीक्षायां शिखया सह पाशवियोगार्थं स्पर्शने प्रयोक्तव्यम्। पाश-च्छेदे तु केवलस्य पाशुपतास्त्रस्य विनियोगः। सकलीकरणे शिवास्त्रस्यैव विनियोगः, न पाशु-पतास्त्रस्येति सूचनम्। 'सहयुक्तेऽप्रधाने' इति सूत्रेण विहिता तृतीयात्र शिखाशिवास्त्रयोरर्थगतं प्राधान्यं न बाधत इति सदृष्टान्तं प्रतिपाद्यते। एवं च शिखाशिवास्त्रयोरेव प्राधान्यसिद्धिरिति वर्णनम्।

विद्याङ्गास्त्रस्योद्धारवर्णनादपरेषां विद्याङ्गानामप्यत्रोद्धारशङ्का स्यादित्युद्धृतानां मन्त्राणां परि-संख्याकरणम्। परिसंख्याकरणे "शिवं साङ्गम्" इत्यनेनैव नेत्रस्य सिद्धेः पुनर्नेत्रपदोपादानं तस्य पृथग्विनियोगदर्शनार्थमिति विशेषकथनम्। अस्मिन् प्रकरणे मन्त्रोद्धारो न सर्वात्मना वर्णितः। द्वितीयप्रकरणे पृथिव्यादिधारणामन्त्रस्य वर्ण्यमानत्वात्। किं त्वत्रोपवर्णिताः सर्वे मन्त्राः शुद्ध-मार्गविभासकत्वाच्छुभाः। द्वितीयप्रकरणे प्रतिपाद्यमानानां मन्त्राणां पृथिव्यादिधारणार्थत्वादशुद्ध-त्वम्। एवमेकोनविंशप्रकरणे वक्ष्यमाणानां सकलादीनां शिवभेदाष्टकानाम्, एकविंशप्रकरणे वक्ष्य-माणानामष्टविधप्रत्ययसाधकानां मन्त्राणां चाणिमाद्यष्टसिद्धिविषयकत्वान्न शुभत्वमिति विवेक-प्रदर्शनम्॥

उद्धृतानां मन्त्राणां सर्वेषामप्याद्यन्तयोः प्रणवनमस्कारयोगः कार्य इति प्रत्यक्षयजनप्रकरणे वक्ष्यत इति सूचनम्।

षट्पदार्थचक्रवर्णनपूर्वकं मन्त्रसंक्षेपप्रदर्शनद्वारेण विद्यापदार्थस्य वर्णनादनन्तरं षष्ठस्योपाय-पदार्थस्य तन्त्रात्मनः संक्षेपेण कथनाय मुद्रास्वरूपवर्णनं क्रियत इति व्याख्यातस्य विषयस्योप-संहारो व्याख्येयविषयस्योपक्रमश्च सूच्यते।

उद्धृतस्य मन्त्रगणस्य हर्षजननीं, तथा साधकानां च हर्षजननीं मुद्रां वक्ष्यामीति मुद्राशब्दार्थवर्णनम्। तत्र महामुद्राया लक्षणप्रतिपादनम्। महामुद्रा काम्यादिकर्मणि प्रयोक्तव्येति प्रदर्शितम्।

करेषु मन्त्राणां न्यासं करैश्च स्वदेहे मन्त्राणां न्यासं कृत्वा ततो मुद्राबन्धं कारयेदिति मुद्राबन्धानुष्ठाने क्रमनिरूपणम्।

करन्यासविधिवर्णनम्। अत्र हस्तशोधनविषये शिवास्त्रस्यैव विनियोगः कार्यः, न पाशुपतास्त्रस्येति प्रतिपादनम्। अत्र ब्रह्ममन्त्राणां विन्यासविषये मूर्तिन्यासक्रमेण ईशानादिसद्यान्तं न्यासः कार्यो नोद्धारक्रमेणेति प्रतिपादनम्। महामुद्राप्रयोगे इवात्रापि संहारक्रम इति व्याख्याया अनौचित्यकथनम्। एवं **प्रथमपटलार्थसंग्रहः**।

द्वितीये पटले भूतशुद्धेरन्तःकरणन्यासस्य च विधिर्निरूप्यते। अत्र च प्रथमं "करेषु मन्त्राणां न्यासः पूर्वं करन्यासविधौ प्रोक्तः। कराभ्यां देहे मन्त्रन्यासप्रकारोऽत्र वर्ण्यते" इति प्रकरणसंबन्धकथनम्।

अथात्र प्रकरणे प्रतिपाद्यमानानां विषयाणां प्रथमं निर्देशः। भूतशुद्धेरारभ्याग्निकार्यपटलान्तं प्रोक्तानि सर्वाण्यपि कर्माणि दीक्षितानां नित्यकर्माणीति सप्तमपटलोपक्रमे वक्ष्यते। अतोऽत्र दीक्षितानामेवाधिकार इति सिद्धम्। दीक्षा च फलभेदेन द्विविधा सद्योनिर्वाणा, असद्योनिर्वाणा चेति। तत्र सद्योनिर्वाणदीक्षया सर्वपाशक्षयो भवेत्। असद्योनिर्वाणदीक्षया तु संचितागाम्यादिसर्वान्यकर्मणां क्षयेऽपि प्रारब्धकार्याणां कर्मणामपरिक्षयः। तेषां भोगेनैव क्षय इति तद्भोगसमाप्ति यावत् प्रत्यहं भूतशुद्धिक्रमेणान्तःकरणशुद्धिः कर्तव्येति तयोरत्रोद्देशः। भूतशुद्धिरित्यनेन न भूतानां क्षयो मतः। किं तु भूतानां तत्कारणे त्यागमात्रमेवात्र कर्तव्यत्वेन बोध्यत इति सूचितम्। मन्त्राणां तस्मिन्पुर्यष्टकरूपे देहे न्यासः, बाह्यदेहे च मन्त्राणां न्यास इति द्विविधो न्यासोऽत्र कर्तव्यत्वेनोद्दिष्टः।

अथ भूतशुद्धेरन्तःकरणशुद्धयर्थत्वाद्भूतशुद्धिं कृत्वान्तःकरणन्यासं कुर्यादिति क्रमविधानम्। शुद्धयर्थापीयं भूतशुद्धिः शुद्धयर्थस्य स्नानादेर्न बाधिका। स्नानादिना त्वात्मनो बाह्यमलसंशुद्धिः क्रियते। भूतशुद्धया तु तस्यैवानात्मन्यात्मभावनात्मकं बन्धत्वं शोध्यत इत्युक्तिः। स्नानात् पूर्वं भूतशुद्धयादेर्मुद्रान्तस्य साधनकलापस्य निरूपणं तस्य संध्यार्थतामपि दर्शयितुमिति प्रतिपादनम्।

ततो मन्त्रोद्धारपुरःसरं भूतशुद्धिविधानप्रकारनिरूपणम्। तत्र "दीक्षायां तु यथा वत्स तत्प्रयोगं समाचरेत्" इत्यतिदेशसूत्रमनुसृत्य दीक्षाप्रकरणोक्तवाक्यान्युद्धृत्य व्याख्यानकरणम्। धारणापञ्चकविधाननिरूपणम्। अत्र चित्तस्य धारणा हृत्प्रदेशात्प्रभृत्येव विधेया, न कन्दस्थानात्प्रभृति ततोऽन्यतो वेति दीक्षाप्रकरणे वक्ष्यत इति सूचनम्। तत्र स्वगुरुविरचितपद्धतिवचनस्य प्रमाणतया निरूपणम्। "अस्त्रं च शिवसंयुक्तम्" इत्यस्य शिवास्त्रमित्येवार्थः, न तु पाशुपतास्त्रमिति व्याख्येयमित्युक्तिः। एवमत्र "अस्त्रं शिवसंयुक्तं कृत्वा" इति व्याख्यानस्यायुक्तत्वप्रदर्शनम्।

"ऊर्ध्वं घातो वायोरुद्घातः, द्वादशान्तं यावन्नादवृत्त्या प्रेरणम्" इत्युद्घातशब्दार्थवर्णनं, तत्र त्रयोदशशतिककालोत्तरवचनस्य प्रमाणतया निरूपणं च।

धारणापञ्चकनिर्वर्तनानन्तरमुद्घातेन भित्त्वा द्वादशान्तं विशेदित्यनेन सकारणभूतत्याग एवात्र कर्तव्यः। न तूत्क्रान्त्यादाविव तद्विच्छेदः संभवति। अतोऽत्र परमाग्निक्षोभतत्क्लेशदाहोत्पूयनच्छेदाख्यानमयुक्तमेवेति प्रतिपादनम्। अत्र पृथिव्यादिभूतशुद्धेरत्रोपक्रान्तत्वात् "पञ्चदशभिरुद्घातैः पञ्चदशपुरुषकला एव शोध्याः" इत्यादि व्याख्यानमयुक्तमिति कथनम्।

एवं कारणत्यागमात्रेण भूतपञ्चकत्यागात् तद्विषयात्मभावनाज्ञाननिवृत्तौ भूतानां बन्धतः शुद्धेस्तद्भोगसंवेदनस्याप्युपशमाद् द्वादशान्तोपारूढचित्तवृत्त्यात्मकं विज्ञानं ग्राह्यभूतैः शून्यत्वात् तदनालम्बनं स्वचिन्मात्रमेवात्मस्वरूपं भवति। न मूर्च्छाद्यवस्थायामिव निरुद्धं भवतीति कथनम्।

अथ भूतशुद्ध्यनन्तरमन्तःकरणन्यासविधानप्रकारवर्णनम्। अत्र द्वादशान्तस्थपुर्यष्टकेऽमृतस्राव-चिन्तनं, हृत्पुण्डरीके सदाशिवभावनाप्रकारः, धारणासमाध्योर्निरूपणं, मूर्तिन्यासाङ्गन्यासप्रकारयोर्वर्णनम्, अन्तर्यजनप्रकारः, बाह्येऽपि शरीरे मन्त्रन्यासप्रकार इत्येते विषयाः संक्षेपेण प्रतिपादिताः। एवं **द्वितीयपटलार्थसंग्रहः**॥

तृतीये पटले वारुणस्नानविधिरुच्यते। अत्र प्रथमतः "संध्यार्थत्वेनानुष्ठितात् करन्यासादेरन्तर्न्यासपर्यन्तात् कर्मसमूहादनन्तरं ब्राह्मणादिजातिभेदेन सामान्यविशेषशास्त्रसिद्धाच्छौचादेः परं कर्तव्यं स्नानमुच्यते" इति प्रतिज्ञाकरणम्। वारुणस्नानस्य चण्डालादिस्पर्शजातपापहरत्वेन नैमित्तिकत्वं, शुभहेतुत्वात् काम्यत्वं च भवतीत्युक्तिः। वारुणस्नानस्याधिकरणभेदेन चतुर्विधत्वप्रतिपादनम्। तत्र "नदीषु, देवखातेषु पल्वलप्लवनेषु दीक्षितस्य स्नानमुत्तमं, तथा पुष्करिण्यां स्नानं मध्यमं, कूपे स्नानमधमं, गृहे लिप्तायां भुवि शिवमन्त्रप्रकल्पितैर्नवाष्टपञ्चभिः कुम्भैः स्नानं श्रेष्ठम्" इति पौष्करागमवचनप्रदर्शनेनोत्तममध्यमाधमश्रेष्ठानां स्नानानां चतुर्विधानां निरूपणम्।

अथ वारुणस्नाने पुरा कर्तव्यस्य मलस्नानविधेः प्रकारः। सकृदुच्चारितशिवास्त्रसमन्वितया मृदा मलस्नानं कुर्यात्। नात्र पाशुपतास्त्रस्य विनियोग इति कथनम्। संहितान्तरात् सामान्यशास्त्रतोऽपि वा ज्ञात्वात्रानुक्तो विशेषः कटिपादकरादिशौचादिकोऽनुष्ठेय इति दर्शयितुमत्र तस्यानुपादानं, नाविस्मृतत्वात् सर्वज्ञस्य तदभावात्। एवमन्यत्राप्यनुक्तस्य विशेषस्य संहितान्तरात् सामान्यशास्त्रतोऽपि वानुष्ठेयत्वं ज्ञेयमिति सूचनम्। ततः स्नानत्वादेव प्राप्तस्य पश्चात् कर्तव्यस्याचमनस्य शास्त्रप्रसिद्धस्यात्रानुष्ठेयत्वप्रदर्शनम्।

ततो वारुणस्नाने विधिस्नानप्रकारकथनम्। तत्र शिवास्त्रजप्तां मृत्तिकां सकृन्मन्त्रसंहितोच्चारणेनाभिमन्त्रयेदिति विधिः। संहितामन्त्रप्रयोगविषये "क्रमेण संहिताप्रयोगः इत्येके। देहन्यासविनियोगक्रमेण इत्यपरे। उद्धारक्रमेण इत्यस्मद्गुरवः" इति मतत्रयमुपन्यस्य, स्वगुरूक्तक्रमेणैव संहिताप्रयोग इति सिद्धान्तवर्णनम्। ततोऽभिमन्त्रिताया मृदो भागत्रयं कृत्वा, एकं सकृच्छिवास्त्रमन्त्रेणाभिमन्त्रयेत्। द्वितीयं ब्रह्ममन्त्रेणाभिमन्त्रयेत्। तृतीयं शिवमन्त्रेणाभिमन्त्रयेत्। ततः सशिवास्त्रेण पाशुपतास्त्रेण विघ्नोत्सारणं कृत्वा, प्रोत्सारितानां विघ्नानां पुनरप्रवेशायास्त्रजप्तेन भागेन दिग्बन्धकरणं, शिवजप्तेन शिवतीर्थकरणं, ब्रह्मजप्तेन शरीरे समालेपनं, ततः शिवतीर्थमध्ये स्नानम्" इति विधिस्नाने क्रियाक्रमो वर्ण्यते। तत्र तीर्थस्य मध्यतः स्वशरीरतो बाहुभ्रमणप्रमाणं शिवतीर्थं कुर्यात्। तस्यैव मत्स्यादिजन्तुप्रयुक्तदोषोपशमनकर्तृकत्वादिति शिवतीर्थकरणस्य प्रयोजनकथनम्। अथ यथासंभवं चक्रवर्त्युपचारेण सुगन्धामलकादिभिर्गीतलास्यवाद्यादिभिश्च स्नायादिति विशेषस्नानप्रकारवर्णनम्। तत्र 'चक्रवर्त्युपचारेण" इत्यनेनैव गन्धद्रव्याणां सिद्धेः, सुगन्धामलकादिभिरिति पुनर्गन्धद्रव्याणां निर्देशस्तेषामवश्योपभोगार्थमिति सूचनम्। अथाचमनविधेः संध्यावन्दनविधेश्च निर्देशः। संहितान्तरे सामान्यशास्त्रे वा प्रोक्तेन विधानेन तयोः कर्तव्यत्वेन कथनम्। संध्यावन्दनस्य संध्याकालेऽपि विनियोगदर्शनार्थं संध्यासमाख्ययास्य कर्मणो निर्देश इत्युक्तिः। उपस्थानविषये शिवरूपकायादित्याय जलाञ्जलिजपैरभिमुखमुपस्थानं सिद्धमेवेत्युपस्थानशब्दार्थविवरणम्। मन्त्रोद्धारप्रकरणोक्तैः सर्वैर्मन्त्रैर्युगपदेव कलशमुद्रया शिरःसेचनमभिषेके, संध्यायां तु प्रतिमन्त्रं जलबिन्दुप्रक्षेप इति विशेषप्रदर्शनम्। संध्यायामभिषेके च सर्वमन्त्रश्रुतेः, मृत्तिकाभिमन्त्रणे मन्त्रसंहितायाश्च विधानात् तेषु सर्वत्र पाशुपतास्त्रस्यापि प्रयोगे प्राप्ते तस्य प्रतिक्षेपविधानम्। विघ्ननिवारणे पाशच्छेदे च तस्य विनियोज्यत्वेनोक्तिः। "अस्त्रं न योजयेद्देहे" इति सूत्रस्य सर्वमेवास्त्रं न योजयेद्देहे इति नार्थः। किं तु यत् पाशच्छेदे विघ्ननिवारणे च विहितं पाशुपतास्त्रं तदेव देहे न योजयेदित्येवार्थः। अतो मलस्नानभस्मस्नानकरन्यासादिषु शिवास्त्रस्य विनियोगः सिद्ध एवेत्यस्त्रमन्त्रव्यवस्थापनम्।

ततो देवपितृतर्पणविधिः। अत्र देवतर्पणमुत्तराभिमुखेन कार्यं, तथा तत्र हृदयमन्त्रेण सह नमस्कारपदप्रयोगः कार्य इत्येतदुभयमत्रैव ग्रन्थे प्रतिपाद्यते, तथा पितृतर्पणं दक्षिणाभिमुखेन कर्तव्यं, तत्र च हृदयेन सह स्वधाकारप्रयोगः कर्तव्य इत्येतदुभयं संहितान्तरात् सामान्यशास्त्रतोऽपि वा ज्ञात्वा विधेयमिति प्रदर्श्यते। तिलादीनां विषये कामचारः, मन्त्रत एव तदर्थसिद्धेरित्युक्तिः। पितृतर्पणविषयेऽदृष्टार्थत्वादनार्द्रः शुद्धमनास्तर्पणं कुर्यादिति विशेषस्य सूचनम्। ततः शिवतीर्थस्य प्रासादमन्त्रेण विसर्जनश्रुतिर्दृश्यते। एवं **तृतीयपटलार्थसंग्रहः** ॥

चतुर्थे पटले भस्मस्नानविधिः प्रोच्यते। जले इव निमज्जनासंभवाद्भस्मना स्नानमात्रेण शुद्धित्वमित्युक्तिः। भस्मस्नानं जलस्नानादूर्ध्वं कर्तव्यमिति विधिः। चशब्दादादौ च विधीयत इत्युक्तम्। अतः साधारणतो जलस्नानादूर्ध्वं भस्मस्नानम्। आतुरविषये तु जलस्नानं विनाप्यादावेव भस्मस्नानं सिद्धमिति वर्णनम्। अत्र निश्वासागमतः प्रमाणं प्रदर्श्यते।

अत्र केचित् संहितान्तरप्रोक्तमन्त्रविशेषेण गोमयाहरणशोषणशिवाग्न्युत्पादनतद्दहशैत्यजननादिना भस्मोत्पाद्यमित्याहुः। तदयुक्तम्। अत्र "उत्पाद्य" इति श्रुत्यश्रवणान्न संहितान्तरापेक्षा वर्तत इति युक्तिपुरःसरं तन्मतखण्डनं दृश्यते। अत्र प्रसङ्गात् "पद्धतिः प्रतिशास्त्रं, विक्षिप्तस्य श्रुतस्य तत्सामर्थ्यात् क्षिप्तस्य च मन्त्रतन्त्रानुष्ठानाय संक्षेपेणाभिधानाद्यजुर्वेदादौ यज्ञसूत्रादिवत्। न तु तच्छ्रुतिसामर्थ्याभ्यामसिद्धस्य पुरुषेच्छयोपस्थितस्य" इत्युक्तमस्माभिः" इत्युपक्रम्य वृत्तिकृता स्वरचितग्रन्थान्तराच्छ्लोकाः प्रदर्शिताः। अत्र भस्माभिमन्त्रणविधौ "सर्वैर्मन्त्रैरभिमन्त्र्य" इति श्रुतेः पाशुपतास्त्रस्यापि प्राप्तौ तत्प्रतिषेधः प्रागुक्तोऽवगन्तव्यः, मन्त्रप्रयोगश्चोद्धारक्रमेण कर्तव्य इति च सूच्यते।

वारुणस्नाने इवात्रापि विधिस्नानात् पूर्वं कर्तव्यस्य मलस्नानविधेर्वर्णनम्। अत्र कर्तव्यस्यैव बीजात्मकत्वाद्भस्मरज एव मलत्वेन ग्राह्यमिति सूचनम्। मलस्नानं शिवास्त्रेण कार्यमित्युक्तिः।

ततो विधिस्नानविधानम्। ईशानेन शिरः, तत्पुरुषेण मुखम्, वामदेवेन गुह्यं, सद्योजातेन सर्वाङ्गानि च मन्त्रजप्तभस्मना स्नायादिति विधीयते। अत्राविभागेन ब्रह्ममन्त्राणां प्राप्तौ विभागेन भस्मस्नानविधिरनेन बोध्यते इति सूत्रार्थकथनम्। यतेरुद्धूलनं, गृहस्थानां तिलकैस्त्रिपुण्ड्रकैर्वा यथाङ्गमालभनमिति भस्मस्नानस्य द्वैविध्यप्रदर्शनम्, अत्र पौष्करागमतः प्रमाणवचनकथनम्। अथेशानादिभिः पञ्चभिर्मन्त्रैरभिषेकः कार्य इति विधानेन भस्मस्नानविषये सर्वमन्त्राणां प्रतिषेध इति सूच्यते। संध्याकाले प्रासादेन भस्मस्नानं कुर्यादिति विशेषविधिः। यद्यातुरो जलस्नानं कर्तुमशक्तः सन् भस्मस्नानमेव करोति, तदा जलस्नानानन्तरं कर्तव्यत्वेन विहितं देवपितृतर्पणं न कुर्यादिति सूच्यते। एवं **चतुर्थपटलार्थसंग्रहः** ॥

पञ्चमे पटले नित्यार्चनं वर्ण्यते। तत्र प्रथमं पूर्वमन्तःकरणन्यासपटलान्ते सूचितस्य यजनस्य विधानं यथाविधि साङ्गं वक्ष्यामीति प्रतिज्ञाकरणम्। तत इदं यजनप्रकरणं प्रकृतिभूतं, मण्डलयागादिकं विकृतिभूतमित्युक्तिः। बाह्ययजनस्याधारं विनानुपपत्तेरत्र चावाहनादनन्तरं स्नपनस्य श्रुतेश्च लिङ्गाविनाभावः सिद्धः। तच्च लिङ्गं चलात्मकं प्रसिद्धमिति तल्लक्षणादिकमत्र नोपात्तम्। तथा च स्नाननिकटदेशे नदीतटाकादौ यजनोपपत्तिरिति यजनस्थाननिर्देशः। द्वारपालविघ्नेशपूजनमत्र नोपात्तमपि संहितान्तरतो ग्राह्यमिति पौष्करागमवचननिरूपणद्वारा प्रतिपादनम्।

अथात्र "दीक्षितः स्नातो गृहीतवासाः सुनिर्वर्तिताग्नेयस्नानो यजनाधिकार्येव शुचिस्थाने एकान्ते सशिवास्त्रेण पाशुपतास्त्रेण विघ्नानुत्सार्य, शिवास्त्रेण दिग्बन्धनं कृत्वा, कृतद्वारपालविघ्नेशपूजनः प्रविश्य, उत्तराभिमुखमासीनः करन्यासभूतशुद्धिपूर्वमन्तर्यागसंतर्पणबाह्यन्यासं च कृत्वा मुद्रां बध्नीयात्" इति यजनविषये लिङ्गस्यासनकल्पनात्प्राक् कर्तव्यस्य यजनाङ्गभूतस्य प्राक्प्रतिपादितस्य स्नानाद्यङ्गजातस्य क्रमेण वर्णनम्।

ततो लिङ्गशुद्धिकथनपूर्वकमासनकल्पनाप्रकारवर्णनम्। तत्र लिङ्गं सपीठमस्त्राभिमन्त्रिते पात्रे हृदयेन अस्त्रेण च क्षालयित्वा, पीठाद्यमारभ्य प्रणवेन समस्तजगद्बीजस्य मायातत्त्वस्य योऽङ्कुरो वसुधादिकलातत्त्वान्तः, तं त्रिंशत्तत्त्वात्मकं विन्यस्य तं कन्दनालादिवद्भावयेत्। ततोऽनन्तस्य विद्येश्वरस्य साक्षादधिष्ठायकत्वाद् आनन्तं मायातत्त्वरूपमासनं प्रणवेन विन्यसेत्। तच्चानन्तासनत्वेनानेकस्रोतोरूपत्वात् सहस्रदलपद्मतया अभिध्येयम्। तस्य चानन्तस्यासनस्य मध्यगमनन्तं प्रणवेन विन्यसेत्। अत्र यद्यपि वक्ष्यमाणविद्यापद्मदलत्वेन विद्येश्वराणां स्थितिरर्थसिद्धा। तथापि अनन्तस्यात्र प्रपञ्चव्याप्त्या स्थितिरुक्तेति विरोधपरिहारवर्णनम्। ततः शुद्धविद्यातत्त्वरूपं पद्मं, तत्र कर्णिकां, तत्रैव कोणेषु वह्नित आरभ्येशकोणान्तं धर्मज्ञानवैराग्यैश्वर्याणि चत्वारि च हृदयेन विन्यसेदिति षडुत्थासनकल्पनाप्रकारवर्णनम्। षडुत्थासनन्यासविषये हृदयेन कर्तव्यमिति विशेषविधिसद्भावाद् "ओमित्यनेन कमलं योगपीठं तदा भवेत्" इति सूत्रप्रोक्तस्य बाध इति प्रदर्शनम्। "धर्मादयस्त्वेतेऽनन्तस्य सामर्थ्यविशेषाः, यैः सर्वं धत्ते, जानाति, न केनचिदनुरज्यते, सर्वेश्वरश्च भवतीति। न तु बुद्धिधर्माः, तेषामत्र प्रगमाभावात्। यतो न चेह पशवः पाशाश्चेज्यन्ते" इति अनन्तसामर्थ्यरूपाणां धर्मादिशब्दवाच्यत्वे निमित्तत्वकथनम्। अनन्तसामर्थ्यानुकारित्वेनैव संहितान्तरेषु धर्मादयः सिंहरूपा अभिध्येया इति वर्ण्यन्त इत्युक्तिः। ततः पूर्वादिकेसरेषु सकर्णिकेषु हृदयमन्त्रेण वामादिशक्तिनवकस्य व्यूहमावरणतया विन्यसेदित्युच्यते। शक्तिव्यूहस्यैव नित्यार्चने आवरणत्वेन विन्यास इति प्रतिपादनम्।

"ततश्चान्तःकरणन्यासप्रकरणोक्तक्रमेण 'ओम्' इत्यनेन मूर्तिं दत्त्वा, तां ब्रह्मभिर्नेत्रसहितैः सकलीकृत्य, सदाशिवभट्टारकं प्रासादेन सहृदयेन विन्यस्य हृदयादीनि यथास्थानं न्यसेत्। ततो देहो जीववद्भवेत्" इत्यावाहनप्रकारवर्णनम्। ततः स्थापनपाद्यार्घ्याचमनस्नपनपूजनानि हृदयेन कारयेदित्यावाहनानन्तरकरणीयानां क्रियाविशेषाणां वर्णनम्। एतच्च धूपसमालभनादेर्मुद्रायाश्चोपलक्षणमिति तेषामपि कर्तव्यत्वसूचनम्। यद् उक्तं मुद्रादानादिकं, यद् अनुक्तं नैवेद्यध्यानजपनिवेदनादिकं तत् सर्वं हृदयेन कुर्यादिति परिभाषासूत्रार्थविवरणम्। सर्वमेव कर्मोत्तराभिमुखेन कर्तव्यमिति प्रासादलक्षणप्रकरणस्थसूत्रप्रदर्शनपुरःसरं प्रसाधनम्। तद्वाक्यं तत्प्रकरणेनावरुद्धं नात्रान्वेतुं शक्यमित्याशङ्क्य, सर्वमेव वाक्यं प्रकरणेनावरोद्धुं न शक्यत इति वक्ष्यत इति सूचनम्। परं त्वत्र ग्रन्थे तादृशवक्ष्यमाणवृत्तेर्मातृकयोरुपलभ्यमानयोरुभयोरपि लुप्तत्वादयं सूचितो विषयो नोपलभ्यते।

पौष्करे 'बिन्दुरूपः शिवो ध्येयः' इत्युक्तत्वाद् ध्यानमन्त्रे लिङ्गाकारादिशिवमूर्तिरूपकविधौ च ध्येयं रूपं बिन्दुस्वरूपमेव। तदेव पारमार्थिकं भवति। ईशानादिसमस्तशक्तिप्रसरात्मकत्वात् तस्य सकलनिष्कलत्वमप्युपपद्यते इति प्रतिपादनम्।

मण्डलयागे वक्ष्यमाणानां गर्भावरणादीनामत्र विन्यासविधिः कार्यो वा न वेत्याशङ्क्य गर्भावरणादीनामत्र विन्यासो नेति समाधानवर्णनम्। अत्र "वामाद्यनेकशक्त्यावरणेनैकेनैव युक्तमेतद्यजनं दृष्टफलसाधकम्। प्रकृतिभूतेऽस्मिन्यजने विकृतिभूतमण्डलयागप्रोक्तधर्मप्राप्तिर्नैव युज्यते। सर्वागमेष्वेतन्नित्यार्चनं सर्वाङ्गपरिपूर्णत्वेन श्रूयत इति प्रकृतिभूतमेवेदं नित्यार्चनम्। ततो नित्यार्चनस्य वक्ष्यमाणविकृतियागापेक्षासंभवः। किं च निष्कलस्यार्चनं सकलादिज्ञानं विना नोपपद्यते। अतः सकलादिज्ञानं तस्योपायो भवति। उपायभूतसकलादिज्ञानजननायावरणज्ञानादिकमुपदिश्यते, न तु विनिवेश्यत्वेन। शक्त्यावरणं त्वत्र तत्पूर्वं विनिवेश्यत्वात् तत्रोपायतां गच्छतीति तद्विषयज्ञानमुपपादितम्। गर्भावरणादीनां तदर्चनोत्तरकालविनिवेश्यत्वेन तदुपायत्वासंभवात् तेषां नात्र विन्यासः" इति वर्णनम्। आवाहनश्रुतेरत्र सद्भावात्पूजानन्तरं विसर्जनं कार्यमित्युक्तिः। एवं **पञ्चमपटलार्थसंग्रहः**॥

षष्ठे पटले अग्निकार्यं वर्ण्यते। अर्चनानन्तरमग्न्युत्पादनाय कर्तव्यं विधिं, तस्मिन्नग्नौ करणीयं होमात्मकं विधिं च प्रयोगक्रमेण वक्ष्यामीति प्रतिज्ञा। अथ कुण्डसंस्कारविषये "अस्त्रेणोल्लेखनं कवचेनाभ्युक्षणम्" इति द्वावेव संस्कारौ विहिताविति वर्णनम्। अत्रानुक्तं कुण्डलक्षणं होमपात्रादिलक्षणं च सामान्यविशेषशास्त्रतो ग्राह्यमित्युक्त्वा, किरणागमवचनस्य तथा यज्ञसूत्रस्य च प्रमाणतया प्रदर्शनम्। ततः कुण्डसंस्कारविषये दृष्टार्थानां हि शोधनतत्क्षालनादीनाम् इदं सर्वं संपन्नमिति यद्यपि वक्तुं शक्यते। तथाप्यदृष्टार्थानां तदुद्धारशुद्धमृदापूरणसमीकरणकुट्टनसेचनादीनामिदं सर्वं संपन्नमिति नैव वक्तुं युज्यते। अतस्तेऽवश्यं कर्तव्या एव। अतो द्वावेवात्र संस्काराविति कथनं कथं युक्तं भवेदित्याशङ्क्य, तेऽपि संस्काराः कवचाभ्युक्षणेनैव संपन्नाः कार्याः। अतो द्वावेवात्र संस्कारौ कर्तव्यौ नान्ये कर्तव्या इति समाधानवर्णनम्।

ततः कुण्डे दर्भैर्विष्टरं कृत्वा, पुष्पादिना वागीश्वर्या न्यासो हृदयेन कार्य इत्युक्तिः। ततोऽग्निं संप्रोक्ष्य परं पारमेश्वरमेतद्वीर्यमिति हृदा शक्तिगर्भे न्यसेदित्युक्तिः। पश्चादग्निजननविषये गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकरणाख्यानां पञ्चसंस्काराणां प्रतिपादनम्। अत्र सूत्रे निष्कृतिशब्दस्य निःशेषेण संव्यवहारार्थतया करणमित्यर्थकरणेन नामकरणमित्यर्थवर्णनम्। उक्तानि गर्भाधानादीनि, अनुक्तानि दर्भास्तरणादीनि, घृतसमिद्धोमपात्रसंस्कारादीनि च सर्वकर्माणि हृदयेन कार्याणीति कथनम्। तत्र दृष्टार्थानां घृतहोमपात्रादिसंस्काराणां सामान्यसंस्कारेण सिद्धत्वेऽपि घृतविषये येऽदृष्टार्था ग्रहणपरितापोपप्लवनोद्वीक्षणादिकाः, तथा पात्राणां विषये येऽदृष्टार्थाः क्षालनपरितापनसंमार्जनरूपाः संस्काराः, ते हृदयेन कर्तव्या इति विधीयन्ते। होम्यं तावदाज्यं तदभावात्तिलादि च सिद्धमेवेति पौष्करागमतः प्रमाणमुद्धृत्य प्रतिपादनम्।

अग्नेर्गर्भाधानादिसंस्कारं कृत्वा, ततस्तत्र सासनस्य भगवतो न्यासः कार्य इति विधानम्। ततोऽग्नौ शिवादिमन्त्राणां होमप्रकारः, गर्भाधानादिसंस्काराणां होमेन संपादनप्रकारः, वैश्वदेवविधानादन्ते संसिद्धान्नहोमः, दीक्षाप्रकरणोक्तोत्सर्गवाक्यात् पूर्णाहुतिविधानमित्यादिकर्मविशेषाणां प्रतिपादनम्। यज्ञविधिं चैनं होमात्मकं सुसमिद्धे हुताशने कुर्यान्नाल्पतेजसीत्यनन्तरप्रकरणोक्तस्य सूचनम्।

एतदनन्तरं केषुचित्पुस्तकेषु प्रश्नपूर्वकमग्नेर्वक्त्रभेदेन कर्मविशेषप्रतिपादकं प्रकरणं दृश्यते। कैश्चिद्व्याख्यातं च। कुतोऽत्र तत्प्रकरणं त्यक्तमित्याशङ्क्य, त्रयोदशशतिककालोत्तरेऽप्येतदाक्षेपसमाधानभूतं पटलं न दृश्यते। वस्तुश्रद्धालुभिरत्र चतुःशतिककालोत्तरात् प्रक्षिप्तत्वादुपेक्ष्यमिति तदत्र त्यक्तमिति समाधिः। अत्र त्रयोदशशतिककालोत्तरश्लोकप्रदर्शनेन द्विशतिकालोत्तरचतुःशतिकालोत्तरयोः सद्भावे प्रमाणं निरूप्यते। एवं **षष्ठपटलार्थसंग्रहः**॥

सप्तमे पटले मण्डलयागविधानप्रकारो वर्ण्यते। तत्र प्रथमं करन्यासविधेरारभ्याग्निकार्यान्तं यत् प्रोक्तं तत् सर्वं दीक्षितानां नित्यकर्मेति विज्ञेयम्। अधुना तेषु दीक्षितेषु मध्ये कस्यचित् साधकस्य काम्यविधिः प्रोच्यत इति प्रकरणसंगतिकथनम्। मण्डलयागस्य सर्वकामप्रदत्वात् काम्ययागाङ्गत्वमिति वर्णनम्। ननु "पूर्वोक्तं यजनमपि सर्वकामार्थसाधनम् इत्येवाभिहितम्। कथमनयोर्भेदः" इत्याशङ्क्य, पूर्वोक्तो यागो यद्यपि सर्वकामार्थसाधनाय विहितस्तथापि दर्शपूर्णमासविधिवन्नित्योऽपि भवति। अयं तु मण्डलयागः काम्य एव। अत एव तीर्थस्नाननित्यस्नानयोरिव तयोस्तन्त्रेणैवानुष्ठानसिद्धिः। नित्यार्चने लिङ्गार्चनम् अत्र तु लिङ्गार्चनाद्भेदेन देवतार्चनम् इत्युभयोरनुष्ठाने विशेषनिरूपणम्।

अत्र मण्डलकरणाय भूमिशोधनं न लोकसिद्धेनोपलेपादिना सिद्धं भवति। किं तु शास्त्रदृष्टेन कर्मणेति विशेषविधानाद् यथा शल्यशङ्कानिवृत्तिः स्यात्तथा जलान्तं महीं शोधयेदित्यभिधीयते।

ततोऽधिवासविधिः। तत्र पूर्वेद्युरधिवासः कार्यः। गुरुणान्विते नक्षत्रेऽधिवासः कार्य इति

कालविधिः। कुम्भस्थापनप्रकारोऽस्त्रयागप्रकरणोक्तवत् कार्य इति तत्रत्यसूत्रप्रदर्शनम्। द्वावेव कलशौ स्थाप्याविति कथनम्। ततो वास्तुमध्ये देवतार्चनमग्निकर्म च कुर्यादित्यधिवासे कर्तव्यानां क्रियाविशेषाणां प्रतिपादनम्।

ततो द्वितीये दिवसे मण्डललेखनप्रकारवर्णनम्। तत्र समन्ततश्चतुरश्रं मण्डलं द्वाविंशद्भागैः कार्यम्। मध्येऽष्टपत्रं पद्ममेकहस्तादिभेदभिन्नं कार्यम्। पद्मादीनां रजसां च लक्षणं संहितान्तरादेव ग्राह्यम्। तच्च मण्डलं वीथित्रयेणावरणत्रयेणाष्टद्वारैश्च संयुक्तं, बाह्यावरणद्वये षोडशस्वस्तिकयुतं च कर्तव्यम्। तत्र प्रवेशाय द्वारं पश्चिमे कल्पयेदिति निगदितम्। मण्डलमिदं फ्रेंच्भाषोपोद्घाते एतत्पटलसंग्रहे दत्तमस्ति।

ततो "आग्नेय्यां कारयेत्कुण्डं हस्तमात्रप्रमाणतः। यज्ञकर्मविधिं कुर्यात् सुसमिद्धे हुताशने।" इति सूत्रस्यात्राग्निकर्मणोऽश्रुतत्वात् प्रकृतेऽसंबद्धत्वमाशङ्क्य "अनारभ्याधीतानां प्रकृतिगामित्वम्" इति न्यायेन तस्याग्निकार्यप्रकरणसंबन्धो बोधितः।

ततः मण्डलमालिख्य, तत्र पद्मे नित्यार्चनोक्तवदासनं शक्त्यावरणान्तं विन्यस्येश्वरमर्चयेदित्युक्तिः। ततश्च गर्भावरणलोकपालावरणतदस्त्रावरणानां न्यासप्रकारस्तेषां पूजाप्रकारश्चाभिधीयते।

ततो मण्डलयागविधानं संक्षेपेण परिकीर्तितम्। अत्रानुक्तं स्नानाद्यङ्गजातं सर्वं प्रकृतितः कर्तव्यम्। प्रकृतिश्चात्र नित्यार्चनं तस्यैव सर्वेतिकर्तव्यतायुक्तत्वात्, तत एव सर्वमपेक्षणीयमित्यभिधीयते। अत्र न वातुलादपेक्षणीयमिति व्याख्येयं, तस्यातिविस्तृतत्वादुपक्रमे एवोपसंहृतत्वाच्चेति व्याख्यान्तरखण्डनं दृश्यते।

ततो "योऽस्य मण्डलस्य विधिं जानाति, स एव दीक्षाकर्म समाचरेत्" इत्यभिधानेन दीक्षायामपि मण्डलं कर्तव्यमित्यर्थः सिद्धः। अत एव व्याख्यातस्य प्रकरणस्योपसंहारो, व्याख्येयस्य चोपक्रमसिद्धिरिति प्रतिपादनम्।

ततो मण्डलयागे साधकः कलशस्नानं कुर्यादित्युक्त्वा, तत्र प्रमाणतयास्त्रयागान्ते प्रोक्तस्य सूत्रस्य प्रदर्शनम्। एवं **सप्तमपटलार्थसंग्रहः**॥

अष्टमे पटले दीक्षाविधिरभिधीयते। अत्र प्रथमं "एतावता दीक्षितानुष्ठेयं क्रियाकाण्डमुक्तम्। अधुना तेषामेव दीक्षितत्वसंपत्त्यर्थमाचार्यानुष्ठेयं दीक्षाकाण्डमुच्यते" इति प्रकरणसंबन्धवर्णनम्।

ततः समयदीक्षोपक्रमः। तत्र पूर्वम् "अल्पायुषस्त्विमे मर्त्याः" इत्यादिहेतूपन्यासेन मनुष्याणामेवानुग्रहाय शास्त्रस्योपक्रान्तत्वान्मलपरिपाकवशाच्छक्तिपातयुक्ता ये पुमांसः, ते एव दीक्षया संस्कार्या भवन्ति। तेषां च सा दीक्षा समयदीक्षा निर्वाणदीक्षेति द्विविधैवात्र वक्ष्यते। यद्यप्यत्र ज्ञानदीक्षापि प्रतिपाद्यते। तथापि तस्यां निर्वाणदीक्षोक्तकर्मणामाचार्येण मनसा योगाभ्यासमार्गेण कर्तव्यत्वेन विधानात्तस्या निर्वाणदीक्षायामेवान्तर्भाव इत्याशयेन दीक्षाया अत्र द्विविधत्वोक्तिरिति प्रतीयते। द्विविधदीक्षयोर्मध्ये समयदीक्षा प्रथमं वर्ण्यते। "सा च मलपरिपाकशक्तिपातयुक्तानां बाह्यशरीरारम्भकेषु पृथिव्यादितत्त्वेषु विशेषतः संस्कारतयावस्थिता, न तूत्क्रान्तिवत् तद्विच्छेदकत्वेन स्थिता। इयमशुद्धात्मनां भूतसंबन्धिनोऽस्य शरीरस्य शुद्धमन्त्रसंस्कारादज्ञत्वलक्षणबन्धत्वनिवृत्तिं, तेषां सर्वशास्त्रानुष्ठानाधिकारित्वं च जनयति। समयदीक्षाया अनन्तरमेव तेषामात्मनां निर्वाणदीक्षायामधिकारः संभवति। तथा चास्याः प्रथमत्वं सिद्धम्। इयं च पञ्चतत्त्वावस्थिता" इति समयदीक्षास्वरूपवर्णनम्।

ततः पृथिव्यादिपञ्चतत्त्वैर्जगद् व्याप्तमित्युच्यते। जगच्च न केवलं पृथिव्यादिपञ्चतत्त्वैरेव व्याप्तम्। किं तु तत्र पृथिव्यादिकलान्तानि त्रिंशत्तत्त्वानि पुर्यष्टकतयावस्थितानि। मायापि तदापूरकतया वर्तते। पुरुषस्तु बध्यत्वेन स्थितः। शुद्धविद्यापि वागात्मनावस्थिता। एवं विद्येश्वरसकल-निष्कलास्त्वधिष्ठातृकतया स्थिताः। तथा चैवं सर्वतत्त्वानि तत्र वर्तन्ते इति दीक्षासाधकैरा-

चार्यैरवगन्तव्यानि। एवं जगतः सर्वतत्त्वव्याप्तिप्रकारनिरूपणम्। तत्र शुद्धविद्या यद्यपि शुद्धाध्वनि विद्येशेभ्योऽप्यूर्ध्वं निवृत्त्यादिभुवनात्मना क्रमेण सद्योजाताद्युपासकानां भोगप्रदत्वेनावस्थितेति प्रासादनिर्णयप्रकरणे वक्ष्यते। तथापि वागात्मना सर्वत्र स्थितेत्युक्तिर्न विरुध्यत इति विरोधपरिहारः।

ततो वागात्मना सर्वत्रावस्थितापि शुद्धविद्या न पुर्यष्टकादिवत् सर्वत्रैकरूपेण वर्तते। किं तु निवृत्त्यादिकलाभेदेन वर्तत इत्युक्तिः। सा च ब्रह्माण्डे निवृत्तिकलात्मना शतरुद्रावधौ वाग्रूपेण स्थिता। तदूर्ध्वं गुणतत्त्वेश्वरश्रीकण्ठभुवनं यावत् प्रतिष्ठाकलात्मना स्थिता। गुणतत्त्वादूर्ध्वे शुद्धविद्येश्वरभुवनं यावत् शुद्धाशुद्धभुवनेषु विद्याकलात्मना स्थिता। तदूर्ध्वे ईश्वरसदाशिवपदे शान्तिकलात्मना स्थिता। अध्वान्ते परमे पदे शान्त्यतीतकलात्मना तच्छक्तिरूपेणावस्थिता। एवं शुद्धविद्यायाः सर्वतत्त्वव्याप्तिरवगन्तव्येति प्रतिपादनम्। एवं शुद्धविद्याकलाधिष्ठितानि तत्त्वानि ज्ञात्वैव आचार्येण दीक्षा कर्तव्या। अन्यथा तस्य वृथा श्रमः स्यादित्युक्तिः।

ततो यथात्मनां तत्त्वानि शुद्धविद्याकलाधिष्ठितानि तथा तद्देहारम्भकाणि भूतान्यपि तत्कलाधिष्ठितानीत्युक्त्वा, तत्र पृथिव्या निवृत्तिकलात्वं, जलस्य प्रतिष्ठाकलात्वं, तेजसो विद्याकलात्वं, वायोः शान्तिकलात्वं, व्योम्नः शान्त्यतीतकलात्वं च यथा संभवेत् तथा सयुक्तिकं प्रतिपादनम्।

आचार्यः पूर्वोक्ततत्त्वज्ञानं संपाद्य "श्वपचानपि दीक्षयेत्" इत्युच्यते। तत्रापिशब्दः परेऽतिशयप्रतिपादनार्थे वर्तते। न तु विधिविषये। अतः "अपि पर्वतं शिरसा भिन्द्यात्" इत्यत्र शिरसा पर्वतभेदवन्म्लेच्छश्वपचादिदीक्षणमत्रापि कर्तुं शक्यमित्येवार्थः। न तु कुलाचार्यैरिव बलात् तत् कर्तव्यमिति बोध्यते।

एवं दीक्षाविषयवस्तुव्याप्तिप्रदर्शनानन्तरं दीक्षोपक्रमः। तत्र स्नानादिमण्डलतर्पणान्तं कर्म कृत्वा गुरुः, दीक्षाविधौ गुरोः शिवस्य च द्वयोरपि कर्तृत्वश्रुतेः तत्सिद्धचर्थं मण्डलस्थं शिवमेवं विज्ञापयेदित्युक्त्वा तद्विज्ञापनप्रकारकथनम्। तत्र आचार्यः स्वां तनुं शिवस्य तनुवद्भावयेत्। ततः स शिव एव भवेत्। तद्द्वारेणोभयोरपि कर्तृत्वसिद्धिरिति प्रोच्यते।

ततः शिवीभूतः स आचार्यो गृहीतव्रतान् अदृष्टनिवेदितशुभस्वप्नान्, दन्तकाष्ठसूचितशुभलक्षणान्, तथाशुभस्वप्नेऽशुभलक्षणे च कृतप्रायश्चित्तान् दीक्षयेद् इति दीक्षाकर्मणः पूर्वं कर्तव्यानां क्रियाविशेषाणां संक्षेपेण निरूपणम्। ततो व्रतस्वप्नदन्तकाष्ठादिविषया अत्रानुक्ताः। नाप्यतिदेशतः प्राप्ताः। तेषामनुष्ठानं कथमित्याशङ्क्य, व्रतं तावत् सामान्यविशेषशास्त्रप्रसिद्धत्वान्नोक्तम्। न त्वननुष्ठेयतयेत्युक्तम्। स्वप्नादयस्तु प्रायश्चित्तस्य वक्ष्यमाणत्वात् कर्तव्या एवेति समाधिः।

ततः समयदीक्षाविधौ कर्तव्यस्य होमस्य समन्त्रकं यथावत्प्रतिपादनम्। तत्र एकैकस्य पृथिव्यादितत्त्वस्य शुद्धचर्थं तदधिष्ठात्र्यात्मककलाविशेषमुद्दिश्योद्दिश्य हृदयादिमन्त्रैराहुतिशतं होम्यम्। एकैकस्य शतस्यान्ते प्रासादेन पूर्णाहुतिरित्याहुतीनां पञ्चशतान्यस्यां दीक्षायां होमयेदित्युक्तिः। ततः प्रायश्चित्तहोमविधानम्।

ततः संयोजनसंजननादिकर्मविवर्जितेयं समयदीक्षा संस्कारमात्रा, निर्वाणदीक्षा तु संयोजनसंजननादियुक्तेति समयदीक्षानिर्वाणदीक्षयोर्भेदवर्णनम्। 'अनया दीक्षया होममात्रेणैव जन्मबन्धनान्मुच्यन्ते' इति समयदीक्षायाः प्राशस्त्यबोधनम्। सर्वसंहिताप्रसिद्धविषयेयं दीक्षा आत्मनः प्रथमः संस्कार इति समयदीक्षोपसंहारः।

अथ निर्वाणदीक्षास्वरूपजिज्ञासया प्रतितत्त्वं योन्युपस्थापनाद्युद्धारान्तानां सप्तदशकर्मणां यथाविधि संपादनप्रकारं ब्रूहीति कार्तिकेयप्रश्नः। तथा पृष्टानां सप्तदशकर्मणां यन्मन्त्रबीजं भगवता परमेश्वरेण प्रोक्तं, तेन मन्त्रेण सह तेषां कर्मणां निर्वर्तनप्रकारमुक्त्वा, तानि कर्माणि

नामतो निर्दिश्य, एतानि सप्तदशकर्माणि परमेश्वरप्रोक्तान्येवेति ईश्वरेण समाधनं निगद्यते।

अथ गुरुः समयदीक्षावन्मण्डलस्थशिवविज्ञप्त्यर्थं स्नानादिमण्डलतर्पणान्तं कर्म कृत्वा, नित्याग्निसमीपे शिष्येण सहोपस्थाय, योन्युपस्थापनाद्युद्धारान्तं कर्म कुर्यादिति तत्कर्मनिर्वर्तनप्रकारस्य प्रतिपादनम्। तत्र तत्तत्कर्मणां स्वरूपवर्णनपुरःसरं तानि कर्माणि यथा कर्तव्यानि तथा बोध्यन्ते। तत्र उद्धारः, प्रोक्षणं, ताडनं, संधानम् एतानि चत्वारि कर्माणि पाशुपतेन कर्तव्यानि। पाशच्छेदश्च तेनैव कर्तव्यः। शिष्टानि द्वादश हृदयेन विधेयानि। ग्रहणनिक्षेपयोर्विषये संस्कार्यसंज्ञासहितशिवपदस्यापि विनियोगो वक्ष्यते इति सूच्यते। एवं सप्तदशकर्मणां मन्त्राः परिगणिताः। एतानि सप्तदशकर्माणि षट्त्रिंशत्तत्त्वेष्वपि करणीयानीत्युक्तत्वादियं तत्त्वदीक्षेति प्रोच्यते। तत्र पशुतत्त्वे जननभोगयोरसंभवः, शिवतत्त्वादुद्धारश्च नेति प्रतितत्त्वं सप्तदशकर्मकरणे विशेषः प्रतिपादितः। इयमेव निर्वाणदीक्षेत्युपसंहारः।

ततो दीक्षयैव तदानीं तस्य सर्वकर्मसंक्षयात् तन्निमित्तानामिन्द्रियाणामप्यभावेन तस्य पञ्चत्वप्रसङ्ग इति सौगतमतानुसारेण प्रश्नः। एवं प्रतितत्त्वं शोधनेनैवायं विधिः पूर्णो भवति। अन्यथा विधिहीना न मुच्यन्ते। अनया दीक्षया यानि शरीरान्तरभोग्यानि कर्माणि, तान्येव क्षपितानि, न वर्तमानफलान्यपि, तेषां भोगेनैव क्षपणीयत्वात्। ततश्चारब्धकार्यकर्माक्षिप्तत्वाद्दीक्षितानामस्य शरीरस्य कुतः पञ्चत्वप्रसङ्ग इति समाधिः।

अथ सर्वदीक्षाकर्मणामन्ते कर्तव्यस्य पूर्णाहुतिप्रदानस्य विधानम्। दीक्षितशरीरस्य स्थिरीकरणाय पूर्णाहुतिप्रदानेन शान्तिः क्रियत इत्युक्तिः। न केवलमयं पूर्णाहुतिप्रयोगो दीक्षायामेवेति मन्तव्यम्। अपि तु नित्यादिकर्मसु लिङ्गोद्धारविधाने च कार्य इति सूच्यते।

ततो दीक्षायामेव कर्मविशेषानुपपत्त्याशङ्कया प्रश्नपञ्चकवर्णनं, तेषां क्रमेण सोपपत्तिकं समाधानवर्णनं च दृश्यते। तत आत्मनां विज्ञानकेवलत्वप्राप्तये मार्गप्रदर्शनम्।

ततो बहुद्रव्यभूमिमण्डलतिलाद्याहरणादिविस्तरं त्यक्त्वा येन विज्ञानमात्रेणैव दीक्षाप्रयोगेण पशूनाचार्यो मोचयति, तं प्रयोगं कथयेति ज्ञानदीक्षाविषयकः प्रश्नः। अभ्यस्तयोगेनैवाचार्येणायं दीक्षाप्रयोगो विधेय इति समाधिः। आचार्यो योगशास्त्रदृष्टेन ध्यानधारणादियोगाभ्यासमार्गेण पुर्यष्टकाख्यं जीवं साक्षात्कृत्य, तं शिवशक्तिविषुवत्प्रयोगेण कर्माक्षिप्तत्वादवश्यभोग्यपदे तत्त्वात्मके योजयेदिति दीक्षाप्रयोगवर्णनम्। अत्राचार्येण ज्ञातव्यान्तराणां च प्रदर्शनम्। निरहंकारेण आचार्येण मनसा क्ष्माद्यान् शुद्धानालोक्य, तदूर्ध्वं तन्मात्रादिक्रमेण शिष्याः पूर्वतत्त्वाद्वियुक्ताः सन्तः, प्रतितत्त्वं योक्तव्या इति तत्त्वदीक्षाप्रयोगप्रकारो निरूपितः। अत्र प्रागुक्तसप्तदशदीक्षाकर्माणि मनसा दीक्ष्याणां विधेयानीति सूच्यते। ज्ञानदीक्षाविषये सप्तदशसु कर्मसु मध्ये, ग्रहणे निक्षेपे च कर्मणि कर्तव्यो विधिविशेषो बोध्यते। **एवमष्टमपटलार्थसंग्रहः**॥

नवमे पटले आचार्यस्य मण्डलाभिषेकः प्रोच्यते। तत्रादौ समयदीक्षानिर्वाणदीक्षात्मकः संस्कारो वर्णितः। तद्दीक्षादीक्षितस्यैव साधकस्य मण्डलाभिषेकात्मकः संस्कार इति प्रकरणसंबन्धकथनम्। ततोऽधुना तथाभूतस्याचार्यस्याभिषेको विधीयत इति प्रकरणप्रतिपाद्यमानविषयकथनम्। आचार्याभिषेकश्च विप्रैकविषय इति स्वायंभुवागमवचनतः प्रतिपादनम्। आचार्याणां दीक्षयैव हिते सिद्धेऽपि तदूर्ध्वं तेषां स्वप्रयोजनाभावेऽपि परानुग्रहस्यैवाभिप्रेतत्वात्तत्र हितकरणायाभिषेक इत्यभिषेकप्रयोजनवर्णनम्।

अथाभिषेकप्रकारकथनम्। तत्र कुम्भस्थापनविषयेऽल्पवित्तानां मृन्मयमेकं कलशमिति संक्षेपेण कुम्भविधिः। अत्र संहितान्तरोक्तप्रकारेण विद्येशाष्टकलशैरप्यभिषेकः कार्य इति सूच्यते। कलशाभावे पलाशपत्रनिर्मितमथवा पद्मपत्रनिर्मितं पात्रं विधीयते। सप्तमपटलोक्तवन्मण्डलयागं कृत्वा, मण्डलस्थशिवे विज्ञापनं विधाय, तदनुज्ञां संपाद्याभिषेकं कुर्यादिति क्रियाक्रमवर्णनम्। अत्र

प्रधानकलशमौपदेशिकमस्मिन्प्रकरणे विहितम्। अतिदेशतो मण्डलयागाङ्गत्वेनोपात्तं कलशमातिदेशिकमन्यदिति कथनेन मण्डलविधानस्य, तत्रोक्तवत्कुम्भस्थापनप्रकारस्य चात्र कर्तव्यत्वसूचनम्।

अथ शुभनक्षत्रयुक्ते शुभकरणान्विते दिवसे, शुभे मुहूर्ते, वेदघोषैः, बहुविधमङ्गलघोषैः, शङ्खवादित्रनिःस्वनैर्नृत्तगीतैश्च सहाभिषेकः कार्यः। तदनन्तरमभिषिक्तं प्रति गुरुणा "मयाद्य त्वयि संक्रामितोऽयमधिकारस्त्वया यावता कालेनान्यत्र समर्प्यते, तावत्कालं परिपालनीयः" इत्यनुज्ञा कार्या। तथानुज्ञातोऽभिषिक्त आचार्यः पाशच्छेदं कर्तुमर्हतीति प्रोच्यते। ततोऽभिषिक्तस्याचार्यस्य संहितान्तरोक्ताचार्यव्रतानुष्ठानं नोपयुज्यत इति सूच्यते। एवं **नवमपटलार्थसंग्रहः**॥

दशमपटले नाडीचक्रं प्रतिपाद्यते। तत्र प्रथमं साधकस्याणिमादिसिद्धिहेतुभूताया भावनाया उपयोगाय नाडीचक्रोपदेश इति प्रक्रान्तस्य फलवर्णनम्। ततः परं सूक्ष्ममिति प्रधानाप्रधानभेदेन नाडीचक्रस्य द्वैविध्यप्रदर्शनम्। ततोऽनन्तनाड्यारब्धाप्रधाननाडीचक्रस्य प्रतिपादनम्। तत्र नाडयः सुषिररूपा वायुरसशोणितप्रवाहाय नाभेरधस्तात्कन्दस्थानादङ्कुरा इव निर्गताः। नाभिमध्ये तिर्यगूर्ध्वमधश्च चक्रवत् स्थिताः। नाभेरूर्ध्वं प्राणवहाभिरधश्च रेतोमूत्रपुरीषवहाभिर्नाडीभिः सर्वमेवैतच्छरीरं रोमकूपान्तं व्याप्तम्। नाडीनां संख्या द्वासप्ततिसहस्रम्। तासु मध्ये "इडा, पिङ्गला, सुषुम्ना, गान्धारी, हस्तिजिह्वा, पूषा, यशाः, अलम्बुषा, कुहूः, शङ्खिनी" इति दश नाडयः प्रधानाः। एवं नाडीनां स्वरूपवर्णनम्।

प्रसङ्गादत्र दशानां वायूनां स्वरूपं, तेषां व्यापारः, तत्र दशानां मध्ये प्राणाख्यस्य वायोर्वाय्वन्तरप्रभुत्वं च वर्ण्यते। तत्र प्रथमं "प्राणः, अपानः, समानः, उदानः, व्यानः, नागः, कूर्मः, कृकरः, देवदत्तः, धनंजयः" इति दशानां वायूनां नामतो निर्देशः।

अथ तेषां मध्ये प्राणाख्यस्य वायोर्व्यापारवर्णनम्। प्राणो जीवनमयः, यतः शरीरे तस्मिन् प्राणे हि सति जीवतीति व्यवहारो वर्तते। अन्नपानादीनामापूरणं प्राणवायोः कर्म। ततश्च बलमित्यभिधीयते। यत उच्यते "प्राणो बलं समाख्यातम्" इति। प्राणिनां संबन्धिनो ये निश्वासोच्छ्वासकासादयोऽन्ये वायवस्ते प्राणवायोर्व्यापारेणैव व्याप्रियन्ते। प्राण एव जीवमाश्रितः। नासापुटमार्गेण बहिरन्तश्चरतः प्राणप्रवाहस्य प्राणात्मकत्वात्स्वात्मनि क्रियाविरोधान्न प्राणव्यापारत्वम्। एवं प्राणाख्यवायोर्व्यापारनिरूपणम्।

अथ वाय्वन्तराणां व्यापारो निरूप्यते। तत्र अपानवायुः प्राणिनामाहारं मूत्रशुक्लमलांश्चाधो नयति। समानो वायुः पीतं भक्षितमाघ्रातं रक्तपित्तकफादिकं गात्रेषु समं नयति। उदानो नाम वायुरधरं तथा वक्त्रं च स्पन्दयति। नेत्रं गात्रं च प्रकोपयति। मर्माणि उद्वेजयति। व्यानो नाम वायुर्व्याधिप्रकोपनः। अङ्गं विनामयति। शरीरं व्यापयति। प्रीतेर्विनाशकरणः। तथा नागो नाम वायुरुद्गारं, कूर्मो नाम वायुरुन्मीलनं, कृकरः क्षुतं, देवदत्तो विजृम्भणं च करोति। धनंजयो घोषं जनयति। स मृतं चापि न जहाति। अत्र "धनंजय एव नाहंकारिकः" इत्युक्तिः। एवं दशानां वायूनां तदीयव्यापारकथनेन प्रतिपादनम्।

अथ प्रधाननाडीचक्रवर्णनम्। अत्र इदं प्रधाननाडीचक्रं दशारकम्। इदं प्रधाननाड्यारब्धत्वान्मुख्यमित्यभिधीयते। दशसु नाडीस्थानेषु पुर्यष्टकसमायुक्तो जीवो भ्रमति। पृथिव्यादिकलान्तस्य भुवनात्मनो जीवः पुर्यष्टकाख्य एव। अविद्यामोहिता एतन्न जानन्ति। एतन्नाडीचक्रं हृत्पङ्कजमेव। तस्य पङ्कजस्याष्टदलत्वेऽपि नाडीद्वयस्योर्ध्वाधोगतत्वेन दशारकत्वोपपत्तिः सिध्यति। हृत्पङ्कजे शिवसंबन्धिन्यः चतस्रः शक्तयो निवृत्तिप्रतिष्ठाविद्याशान्तयः प्रतिपुरुषं भेदेन स्थिताः। तत्र निवृत्तिः पृथिवीतत्त्वत्वेन कर्णिकात्मना सुवर्णप्रकाशतया भाति। प्रतिष्ठा तु जलात्मकत्वेन सोमप्रकाशात्मना प्रकाशते। विद्या तु तेजस्तत्त्वत्वेन वह्निवद्भासते। शान्तिस्त्वाकाशतत्त्वत्वादाकाशगतसूर्यप्रकाशत्वेन द्योतते। एतासां चतसृणां शक्तीनां कारणत्वेन पञ्चमी शिवशक्तिः

शान्त्यतीता शुद्धवाक्स्वरूपा पङ्कजादुपरि प्रतिपुरुषं भेदाभावेन विलसति। अत एव निवृत्त्यादिशक्तिचतुष्टयमेव हृत्पङ्कजम्। तन्मध्ये पुरुषः सूक्ष्मदेहाभिव्यक्तो दृक्क्रियामात्रस्वरूपो भ्रमर वल्लीनो वाक्च्छक्तेरपि व्यतिरिक्तमात्मानं न मन्यते। तस्मिन्पङ्कजमध्ये कलाचतुष्करूपपाशसंरुद्धः पुर्यष्टकाख्यो जीवो हेलाभिहतं कन्दुकमिवोत्पतनं पतनं च कुरुते। अकस्मात्पङ्कजदलादध ऊर्ध्वमपि यदा गच्छति तदा नरकं ब्रह्मलोकं वा प्राप्नोति। पुर्यष्टकाख्यो जीवो धर्माधर्मात्मना कर्मणा हृत्पङ्कजदलेषु देहान्तरे च मारुतेन शुष्कदलमिवानीयमानः पर्यटति। हृत्पङ्कजरूपे नाडीचक्रे प्रागाद्यष्टदिग्दलेषु भ्रमतो जीवस्य तत्तद्दिक्पतिलोकप्राप्तिः। ऊर्ध्वाधोगमने ब्रह्मलोकनरकप्राप्तिः। पत्रान्तरालयोगे जीवस्य भानाभानत्वं भवति। एवं पुर्यष्टकाख्यजीवस्य हृत्पङ्कजमध्यभ्रमणवर्णनं दृश्यते। जीवस्य नाडीसंचारो देहाद्देहान्तरे देशाद्देशान्तरे च अणिमाद्यात्मिकायाः सिद्धेर्हेतुः। यत्नतः सा सिद्धिः साधयितव्येति प्रतिपादनम्। एवं **दशमपटलार्थसंग्रहः**॥

एकादशे पटले जीवज्ञान प्रतिपाद्यते। तत्र प्रथमं पूर्वप्रकरणप्रोक्तस्य जीवस्य, आध्यात्मिकस्य कालस्य च स्वरूपजिज्ञासया कार्तिकेयस्य प्रश्नः। द्वयस्यापि समाधानाय तेषां नामतो निर्देशः। तत्राध्यात्मिककालभेदानां प्रतिशरीरं प्राणसंचारविशेषात्मकत्वात् तेषां स्वरूपज्ञानेन तत्कर्ता जीवः सुलभतया ज्ञायत इति प्रथमं प्रसिद्धास्ते प्रोच्यन्त इत्युक्तिः। बाह्यकालविशेषेषु लोकप्रसिद्धेष्वाधिभौतिकेषु सवितुर्गमनागमनरूपेषु रात्र्यादिषु यद्यत्कर्म विहितं, निषिद्धं च तत्तत्कर्म प्राणवृत्त्यात्मकेषु अध्यात्मगतेष्वपि कालेषु दशसु तथैवानुष्ठेयमिति ज्ञापनाय संक्रान्त्यादीनामाध्यात्मिककालविशेषाणां प्राणवृत्त्यात्मकानां नाम्ना निर्देश इति नाम्ना निर्देशस्य हेतुकथनम्।

ततस्तेषां स्वरूपवर्णनम्। तत्र ऊनरात्रं क्षुतमिति ज्ञेयम्। ऊनरात्रस्य अपानवृत्त्यात्मकरात्रिभागपरिक्षयरूपत्वात्, तस्मिन्सति न किंचित्कर्मानुष्ठेयमिति बोध्यते। अधिमासो विजृम्भणम्, विजृम्भणस्य प्राणापानवृत्त्यात्मनोरहोरात्रयोरधिकरूपत्वात् तस्मिन्नपि सति मलमासेनैव निषिद्धत्वान्न किंचित् कर्मानुष्ठेयमिति ज्ञाप्यते। ऋणं कासः, तच्च प्राणापानवृत्तिद्वयोरुपरुद्धत्वात् कालच्छिद्रं तदपमृत्युभूतमिति ऋणेऽपि सति नैव किंचित्कर्मानुष्ठेयम्। धनं निश्वासः, निश्वासस्तु प्राणायामात्मकः, तस्य शुभफलत्वात्, तस्मिन्सति कर्मानुष्ठेयमित्यभिधीयते। एवमूनरात्राधिमासऋणधनानां प्राणवृत्त्यात्मकानामाध्यात्मिककालभेदानां स्वरूपं निरूप्यते। तेषामिह कथने फलं च प्रतिपाद्यते।

अन्ये तु "ऊनरात्रं तिथिच्छिद्रम्। अधिमासो बाह्यकाले इव ज्ञेयः। शरीरापचयहेतुत्वात् कासः ऋणम्। शरीरोपचयहेतुत्वान्निश्वासो धनम्" इति तेषां लक्षणं वर्णयन्ति।

अपरे "रात्रेर्वक्ष्यमाणाया ऊनत्वादूनरात्रं क्षुतं ज्ञेयम्। दिवसस्याधिक्याद् विजृम्भणमधिमासः। अहोरात्रयोरूनत्वाच्च कासः ऋणम्। अहोरात्रयोराधिक्ये च निश्वासो धनम्। अतस्ते ऊनरात्रादिभिः शब्दैरभिधीयन्ते" इति व्याचक्षते। उभयमपि व्याख्यानं प्रकृते निष्फलत्वादुपेक्ष्यमेवेत्युक्तिः।

"वामस्थं प्राणस्वरूपमुत्तरायणम्। दक्षिणस्थं प्राणस्वरूपं दक्षिणायनम्" इत्ययनयोः प्राणसंचारात्मकयोर्लक्षणकथनम्।

अथ "यदा नासापुटद्वयेन प्राणस्वरूपं प्रवृत्तं तदा विषुवद्" इत्याध्यात्मिकस्य प्राणसंचारात्मकस्य विषुवतो लक्षणं प्रतिपादितम्।

तत "इडापिङ्गलासुषुम्नाख्यानां नाडीनां क्रमेण वामदक्षिणमध्याङ्गानि स्थानानीत्युक्त्वा, एतेषु स्थानेषु दक्षिणादुत्तराद्वा नाड्यन्तरे प्राणवृत्तेः संक्रान्त्या संक्रान्तिः" इति संक्रान्त्या लक्षणं वर्ण्यते।

ततो "हृदयपुण्डरीकादूर्ध्वं नासिकापुटक्रमेणैवोदयन्नादित्योऽह्नः प्रोक्तः, अपानवृत्त्या त्वस्तमयन्नादित्यो रात्रिः" इत्याध्यात्मिककालस्वरूपयोः सूक्ष्मयोरहोरात्रयोर्लक्षणवर्णनम्। एवमाध्यात्मिककाल-

विशेषाणां प्राणसंचारविशेषात्मकानां दशानां कालविभागानां लक्षणकथनम्। एतद्दशप्राणविभागानां वेत्ता वेदविदित्युक्तिः।

"हृदयपुण्डरीके कुम्भकाख्यप्राणायामः सोमग्रहणं, द्वादशान्ते कुम्भकाख्यप्राणायाम आदित्यग्रहणम्" इति सोमग्रहणादित्यग्रहणरूपयोः प्राणविभागयोः पुण्यकालविशेषयोर्लक्षणवर्णनम्। ततः प्राणप्रवाहसमसंख्याया योगीन्द्रजपसंख्याया निरूपणम्।

"प्राणो जीवः" इति भ्रमापनुत्तये प्राणाद्भेदेन जीवस्वरूपविज्ञानाय प्राणायामोपदेश इति प्राणायामलक्षणप्रतिपादनस्य हेतुकथनम्। "शुद्धेन वायुना यावच्छक्ति उदरं पूरयित्वा प्रणवमेकश्रुत्योच्चारयेत्" इति पूरकप्राणायामलक्षणवर्णनम्। "सर्वद्वाराणि पिधाय निश्वासोच्छ्वासवर्जितः संपूर्णकुम्भवत्तिष्ठेत्" इति कुम्भकप्राणायामलक्षणकथनम्। हृदयपुण्डरीकादूर्ध्वं नासिकापुटेन वायोः प्रेरणम्" इति रेचकप्राणायामलक्षणवर्णनम्। एवं प्राणायामत्रयवर्णनम्।

ततः सर्वदाधोमुखमविकसितं हृत्पद्मं पूरकेण विकासं समायाति। विकसितं च कुम्भकेन निरोधमेति। रेचकेन प्राणहरेण अभ्यासतो मध्यनाडीवर्तिना यदा रेचितं भवति, तत ऊर्ध्वत्वमायाति। तदा जीवस्तथाभूतेन रेचकेन स्वसंबन्धिना रेचितो हंसवद् हृत्पद्मं परित्यज्य, हृदयग्रन्थिं भित्त्वा, मध्येनोर्ध्वं ब्रह्मरन्ध्रं निर्भिद्य सदाशिवपदं यातीत्युत्क्रान्तिनिरूपणम्।

ततो येन तस्याहंकारवृत्तेरान्तरस्य च प्राणाख्यस्य वायोरायामोऽत्र शरीरे क्रियते, स जीव इति प्रोक्तः। अत एव स जीवः प्राणव्यतिरिक्त एवेति जीवस्वरूपो बोधितः। **एवमेकादशपटलार्थसंग्रहः**॥

द्वादशे पटले शुद्धविद्या वर्ण्यते। तत्र चादौ "एतावता ग्रन्थेन माया, तद्गर्भफलं, साधकस्य नाडीचक्रं, जीवप्राणयोर्भेदश्च प्रतिपादिताः। अत्र साधकस्य शुद्धविद्योच्यत इति प्रकरणसंबन्धो निरूपितः। तत "आद्या शुद्धविद्या कुण्डलिनीति व्यपदिश्यमाना निवृत्त्यादिशक्तिचतुष्टयसंयुक्ता सृष्ट्यारम्भकाले पुंसां हृत्प्रदेशे संबद्धा। ततः पुर्यष्टकं संबध्यते। एवं च पुंसां मायेयपुर्यष्टकसंबन्धात् पूर्वमेव नादात्मकसंबन्धः सिद्ध इति फलितम्। सा च शुद्धविद्याविकृतेन व्यापकेन च रूपेण तत्र स्थितापि, प्रतिपुरुषं कार्यात्मना भिन्नेन रूपेण कालाद्यङ्कुरात्मना मायादिवत्संबद्धेति पुंसां शुद्धविद्यासंबन्धो न्यरूपि।

तस्यां शुद्धविद्यायां प्रागुक्तस्थूलशब्दात्मिकाया मन्त्रसृष्टेर्बिन्दुनादात्मनाकारेण न्यासं मनसा धमनादिनादवदत्यन्तसूक्ष्ममुत्पादयेत्। एतेनैव न्यासेन सा शुद्धविद्या कार्यद्वारेण साधकेन ज्ञाता भवेत्। प्राणगमागमस्य परमकारणभूतक्रियाशक्त्या प्रेरितः स तं न्यासं कुर्यादिति शुद्धविद्यायां मन्त्रसृष्टिन्यासप्रकारकथनम्।

एवं मन्त्रसृष्टिन्यासेन कुण्डलिनीस्वरूपं ज्ञात्वा, तस्यां शुद्धविद्यायां द्वादशान्ताधिष्ठातृशिवचन्द्रमसोऽमृतं स्रवन्तं चिन्तयेत्। एतेनामृतस्रावचिन्तनेनैव साधकः सिद्धिफलभाग्भवेत्। यद्यपि विद्याप्रतिष्ठाख्यकलाधिष्ठितत्वात् पुर्यष्टकसंबन्धि सर्वं जगदग्नीषोमात्मकं, तथापि तद् विपरीतं सोमात्मकममृतपूर्णं दिव्यरूपं चिन्तयेत्। एवममृतरूपचिन्तनस्याभ्यासेन साधकः क्षिप्रेण सिद्धिफलभाग्भवेदिति प्रतिपाद्यते।

एवं शुद्धविद्यायां स्थूलशब्दात्मकमन्त्रसृष्टिन्यासज्ञानमवश्यं साधकेन संपादनीयम्। अन्यथा साधकोऽशक्यानुष्ठाने निष्फले कर्मणि प्रवृत्तो भवतीति कथ्यते। एवं **द्वादशपटलार्थसंग्रहः**॥

त्रयोदशे पटले मन्त्रलिपिसृष्टिरुच्यते। तत्र प्रथमम् "अल्पायुषस्त्विमे मर्त्याः" इति पूर्वमुद्दिष्टेषु मध्ये येऽल्पबुद्धयोऽत्राधिकारिणः शुद्धविद्यासंबन्धिनीमेतामाध्यात्मिकीं मन्त्रसृष्टिं ज्ञातुमुत्सुकाः, तेषां मन्त्रलिपिसृष्टिर्विस्तरेण वक्ष्यत इति प्रतिज्ञा।

प्रतिज्ञानन्तरमाध्यात्मिकस्य प्रणवोत्पत्तिक्रमस्य सूचनद्वाराधिभौतिकप्रणवोत्पत्तिक्रमो वर्ण्यते— "आदिदेवः सकलः सदाशिवो महाप्रलयादनन्तरं सर्गप्रारम्भे समुपहृतसमस्तवाक्यप्रपञ्चात्मन

ओंकारस्य मूर्ध्नि, तमेव व्याप्य नादात्मना स्थितः, स निष्कलेनाधिष्ठितः सन् बाह्येऽपि स्थूलभेदेन तदनुकार्यात्मनो रेखागवयन्यायेन रेखारूपस्याधिभौतिकस्य प्रणवस्योत्पत्तिनिमित्तं प्रथमामकाररेखां सृजति। स एव स्थूलशब्दात्मनो मन्त्रस्य, तदनु संसारभाग्भिनो लिपिप्रबन्धस्य च कर्ता" इति सृष्टिक्रमवर्णनम्।

"प्रथमं सृष्टा अकारात्मिका रेखा विद्याकला। उकाराभा रेखा प्रतिष्ठाकला। यासौ मूर्ध्नि मकारानुकारिण्यर्धचन्द्राभा रेखा सा निवृत्तिकला" इत्यकारोकारमकाररेखाणां विद्याप्रतिष्ठानिवृत्तिकलात्वप्रतिपादनम्। तत्राकाररूपकलायाः शान्तित्वमथवा शान्त्यतीतत्वं भवितव्यम्। न विद्याकलात्वं भवितुमर्हति। एवं सति, अकारादिकलानामुत्तरत्र निवृत्त्यादिक्रमबोधकसूत्राणां विरोधः स्यादित्याशङ्क्य समाधानवर्णनम्। तत्र प्रसङ्गात् प्रणवस्य मातृकायामकारादिभ्योऽपि पूर्वं न्यासः, सर्वमन्त्राणां चादौ तस्य प्रयोग इति प्रतिपादनम्। अनन्तरं चतुर्थी शान्तिकलैव प्रणवे शिखारूपा रेखा। सा च बिन्दुना संयुक्ता। सैव बिन्दुकलान्तर्भावेन शान्त्यतीतकलारूपेणापि विलसति। एवं प्रणवस्याधिभौतिकस्योत्पत्तिक्रमो निरूपितः।

ततः, आधिदैविकप्रणवोत्पत्तिक्रमोऽपि वर्ण्यते यथा — परमेश्वरेण नादोपादानकारणभूताया महामायायाः कुण्डलिन्याः क्षोभात् प्रथमं नादात्मकसूक्ष्मशब्दप्रादुर्भावः। तस्य च शब्दस्य शान्त्यतीतत्वेऽपि शान्तित्वमेव। शान्त्यतीताया उत्तरपरिणामस्यैव बिन्दुरूपत्वात्। सा च शान्तिकला कार्याय प्रभवन्ती मकार-उकार-अकारात्मकैः शिवविद्यात्मलक्षणैर्भेदैरनेकत्वं याति। तथा च सृष्टिक्रमेण शान्तिर्नादबिन्द्वात्मिका, विद्या मकारः, प्रतिष्ठा उकारः, निवृत्तिश्च अकार इत्युच्यते। एवमाधिदैविकस्य प्रणवस्योत्पत्तिक्रमप्रतिपादनं, तत्र नादबिन्द्वादीनां शान्त्यतीतादिकलात्वप्रतिपादनं च दृश्यते।

तदनन्तरमाधिभौतिकप्रणवविषये विशेषान्तरप्रदर्शनम्। तत्र शिखारूपाया रेखायाः शान्तिकलात्वेनोक्ताया अधिष्ठाता सविद्येशः सदाशिवः। तदधस्तु रेखात्रये ब्रह्मविष्णुरुद्रा अधिष्ठातारो ज्ञेया इति प्रणवकलाधिष्ठातृनिरूपणम्। ततो मकारमात्रानुकारभूतायामर्धचन्द्राकाररेखायां मध्ये शिखारूपो बिन्दुर्विलसति। प्रान्ते कोटिद्वये शिखारूपबिन्दोर्वामभागे, दक्षिणभागे च बिन्दुद्वयं प्रकाशते। तत्र वामस्थो बिन्दुरुकाराधिष्ठातृत्वेनोक्तस्य विष्णोः कारणं भवति। दक्षिणस्थो बिन्दुरकाराधिष्ठातृत्वेनोक्तस्य ब्रह्मणः कारणं भवति। मध्यबिन्दुर्मकाराधिष्ठातृत्वेनोक्तस्य रुद्रस्य हेतुर्भवति। तथा दक्षिणस्थो बिन्दुर्ज्ञानशक्तिः, वामस्थो बिन्दुः क्रियाशक्तिः। तत्रोभयत्रापि क्रमेण विष्णुर्ब्रह्मा च विलसतः। एवमेकमेव बिन्दुरूपं त्रिधा स्थितमिति वर्णनम्।

ततः प्रणवस्योर्ध्वरेखाया मध्यमे सर्वमन्त्रादेः कारणमीश्वरो वर्तत इति यः प्रोक्तः, स चेश्वरो न परमेश्वरः, किंतु परमेश्वरेण विसृष्टः, परमेश्वरस्य शान्त्यतीतत्वात्। तस्मादेव विसर्गशब्दवाच्यादीश्वरात्सर्गो जायते। न केवलं सृजत्येवायम्। किंतु सृष्टिसंरक्षणादानतिरोभावानुग्रहलक्षणं पञ्चविधं पतिकृत्यं स करोतीति मन्तव्यम्। एवं **त्रयोदशपटलार्थसंग्रहः**॥

चतुर्दशे पटले गतिभ्रंशविषये प्रायश्चित्तविधिः प्रोच्यते। तत्र चादौ सृष्टिः संहारश्च प्रतिपादितौ। अधुना प्रमादान्मायाव्याद्यनधिकारिणि दीक्षिते सति, आचार्यस्य गतिभ्रंशकरे दोषे प्राप्ते तद्दोषनिवारणाय विधेयं प्रायश्चित्तविधिं ब्रूहीति कार्तिकेयप्रार्थना। ईश्वरेण तत्र कर्तव्यं प्रायश्चित्तविधिं वक्ष्यामीति प्रतिज्ञाकरणम्।

तत्प्रायश्चित्तविधिः प्रोच्यते—ज्ञानदीक्षाप्रोक्तप्रयोगवद् योगमार्गेण मनसा अध्वमूर्धन्यवस्थितं शिवमालोक्य, तदानीं दीक्षणे यथावृत्तं स्खलितं विज्ञाप्य, तत्प्रतिविधानभूतेऽस्मिन्प्रायश्चित्तकर्मण्याज्ञां संपाद्य, विपरीतक्रमेणैककस्य तत्त्वाक्षरस्य तन्नामद्वारेण क्षकारमादावन्ते च संयोज्य, प्रतितत्त्वं तत्त्वेश्वरोपस्थापनपूर्वकं पृथक् पृथग्होमं कृत्वा, पृथिवीतत्त्वं यावत् तद्गतिं निवर्तयेत्। एवं कृते

प्रायश्चित्तं कृतं भवेत्। अन्यथा अज्ञानिनामभक्तानां च दीक्षाकरणे गुरोर्नरकप्राप्तिः, दीक्षितस्य च न शिवत्वप्राप्तिरिति वचनाद् गतिभ्रंशो दीक्षाकर्तुर्दीक्षितस्योभयोरपि दुर्वारो भवेदिति कथ्यते। एवं **चतुर्दशपटलार्थसंग्रहः** ॥

पञ्चदशपटले प्रासादमन्त्रजपभेदाः प्रतिपाद्यन्ते। तत्रादौ प्रणवमन्त्रसृष्टिप्रतिपादनसमाप्तौ संहार-प्रस्तावात्प्राप्तस्य गतिभ्रंशस्यानुषङ्गिकस्य कथनादनन्तरं प्रकृतं मन्त्रमेवाधिकृत्य प्रासादमन्त्रविषयः प्रोच्यत इति प्रकरणसंबन्धनिरूपणम्। ततः प्रणवोच्चारणपूर्वकं प्रासादमन्त्रमनुरणद्घण्टानिनाद-वद्यथाशक्त्यन्ते नमस्कारयुक्तं तारं जपतः साधकस्य शुद्धविद्यासिद्धिः शीघ्रं संभवतीति स्थूल-नामकस्य भाष्यप्रकारस्य प्रासादमन्त्रजपविधेः प्रतिपादनम्।

प्राणायामकालमात्रापरिच्छेदेनात्यन्तं सूक्ष्मतया मनसैव यदि प्रासादमन्त्रजपः क्रियते, स एव सूक्ष्मनामको मानसप्रकार इति सूक्ष्मप्रासादमन्त्रजपविधेर्निरूपणम्। अस्य प्रायश्चित्तार्थमनुष्ठाने सर्वपापक्षयः, सिद्ध्यर्थमनुष्ठानेऽणिमाद्यष्टसिद्धिरिति फलं वर्ण्यते।

प्राणायामकाले उच्चार्यमाणमन्त्रनादं जानन् यः प्रासादमन्त्रं जपति, स मुमुक्षुश्चेद्बन्धनान्मुच्यते। साधकश्चेत्सिद्धिमाप्नुयादिति परनामकस्योपांशुप्रकारस्य प्रासादमन्त्रजपविधेः प्रतिपादनम्।

उपायज्ञानं विनोपेयज्ञानासंभवात्प्रासादमन्त्रज्ञानं विना परमेश्वरज्ञानं न संभवेदित्युक्तिः। इति **पञ्चदशपटलार्थसंग्रहः**।

षोडशपटले प्रासादमन्त्रस्यैव लक्षणान्तरं प्रतिपाद्यते। अत्र ह्रस्वदीर्घप्लुतभेदेन प्रासादमन्त्रस्य प्रकारत्रयं वर्ण्यते। ह्रस्वादिभेदान्यथानुपपत्त्या प्रासादमन्त्रोऽत्र हकार एव विवक्षितः। अतो ह्रस्वो ब्रह्ममन्त्रः, दीर्घोऽङ्गमन्त्रः, प्लुतस्तु दीर्घमात्राद्वययोगेन द्वादशान्तं यावदुच्चार्यमाणो मूलमन्त्र एवेति ह्रस्वदीर्घप्लुतानां त्रिविधानां लक्षणं वर्ण्यते।

अन्ये त्वत्र "प्रासादो मूलमन्त्र एव। तस्यैव गमागमेन प्राणायामेन सहोच्चारेण ह्रस्वत्वं, विषुवत्प्रयोगेण सहोच्चारेण दीर्घत्वम्" इति लक्षणं वदन्ति। तदयुक्तम्। एवं सत्यत्र प्लुत-प्रकारो नोक्त इति दोषो दुर्वार एव। किं च गमागमेन प्रासादमन्त्रजपस्य विधानं पूर्वप्रकरण एव प्रतिपादितमित्यत्र पुनः कथनमनर्थकमेव स्यादिति तन्मतखण्डनं दृश्यते।

अथ बिन्दुभूषितह्रस्वदीर्घप्लुतानां प्रासादमन्त्राणां जपेन क्रमेण पापक्षय-मोक्ष-आप्यायनानि सिध्यन्ति। एवं फट्कारेण सहितस्य प्लुतस्य जपेन वश्यता, तथा तादृशेन दीर्घेणोच्चाटनम्, आदावन्ते च फट्कारयुक्तेन ह्रस्वेन मारणं च संभवन्ति। साध्यनाम्न आदावन्ते च हृदय-मन्त्रप्रयोगेण साध्यस्याकर्षणं सिध्यति। एवं ह्रस्वदीर्घप्लुतानां प्रासादमन्त्राणां जपस्य फलप्रतिपादनम्।

अथ ब्रह्माङ्गेभ्योऽन्यतमस्यात्र प्रकरणे प्रोक्तस्य मन्त्रस्य, तथा "सकलं निष्कलं शून्यम्" इत्या-दिना एकोनविंशप्रकरणे विधीयमानानां शिवभेदाष्टकानां मन्त्राणाम्, एकविंशप्रकरणे वक्ष्यमाणा-नामष्टविधप्रत्ययमन्त्राणां च सिद्धिप्रदत्वसंपादनाय कर्तव्यमनुष्ठानं विधीयते। तथा हि— "परमेश्वरं लिङ्गादौ संपूज्य, तस्य दक्षिणदिग्भागे साध्यमन्त्रस्य प्रत्यहं संख्योपचयेन पञ्च-लक्षसंख्याकं जपं कृत्वा, अन्ते मण्डलपूजापूर्वं साध्यमन्त्रस्य तर्पणान्ते स्रुवा घृतेन सहस्रदशकं जुहुयात्। ततो मन्त्रः सिद्धिप्रदो भवेत्" इति।

ततः प्रासादमन्त्रस्य दशलक्षात्प्रभृति पञ्चलक्षगुणनेन पञ्चाशल्लक्षपर्यन्तं जपकरणेन साध्यानां फलविशेषाणां प्रतिपादनं दृश्यते। एवं **षोडशपटलार्थसंग्रहः**।

सप्तदशे पटले विज्ञानस्वरूपं प्रोच्यते। तत्र प्रथमं कार्तिकेयस्य प्रश्नः "भगवन् ज्ञानविज्ञानयोः स्वरूपं स्पष्टं नावगम्यते। करणभूतेन ज्ञानेन विज्ञानमात्मस्वरूपं ज्ञेयमिति चोक्तम्। उभयोरपि देवदत्तयज्ञदत्तज्ञानयोरिव परस्परसंवेदनस्योक्तत्वात् कर्तृत्वमेवेह प्रतीयते। एकस्य करणत्वम-परस्य कर्मत्वं कथमुपपद्यते" इति।

तत्रेश्वरेण "आधीयते व्यवस्थाप्यते अनेनेति करणरूपमुपायज्ञानमाधारः, तेन व्यवस्थाप्यमाधेयमुपेयभूतं विज्ञानमात्मस्वरूपं ज्ञात्वा नित्यादिकर्मसु सर्वोऽधिकृतो भवति। अनात्मविदः पशोरत्राधिकारो न संपद्यते। किं च व्यवस्थापनात्मकस्य आधारस्य बुद्धिसंबन्धित्वाद्भोगकरणत्वाच्च पुरमिति व्यपदेशः। आधेयस्तु व्यवस्थाप्यस्तद्भोक्तृत्वादीश्वरः आत्मैव विज्ञानमित्यभिधीयते। बुद्ध्यादिना पुर्यष्टकेन संबद्धो ज्ञानी ईश्वरं ज्ञात्वा सिद्ध्यर्थं मुक्त्यर्थं च प्रयतते। अतोऽनात्मविदः पशोरत्राधिकारो न संभवति इति समाधिरुच्यते।

ततो बाह्यशरीरात्मिकायां पुरि, अष्टकं कार्यवर्गादिपरप्रकृतिवर्गान्ताष्टकं वर्तत इति पुर्यष्टकं वेद्यम्। तत्र भूतानां तन्मात्राणां च वर्गो द्विविधः कार्यवर्गः। कर्मेन्द्रियबुद्धीन्द्रियवर्गो द्विविधः करणवर्गः। बुद्ध्यहंकारमनसां वर्गोऽन्तःकरणवर्गः पञ्चमः। तत्प्रकृतिवर्गो गुणाव्यक्तलक्षणः षष्ठः। भोक्तृत्वस्वरूपोपकारकवर्गो रागविद्याकलानियतिकालाख्यः कञ्चुकाख्यवर्गः सप्तमः। मायामहामायाख्यः परप्रकृतिवर्गोऽष्टम इति वर्गाष्टको विज्ञेयः। एतैश्च सर्वैरपि तत्त्वैर्व्याप्तित्वेन पुर्यष्टकस्वरूपं साधकैरवश्यमवगन्तव्यमिति पुर्यष्टकस्वरूपं वर्ण्यते।

यद्यपि पूर्वोक्तेभ्यः सर्वेभ्यः पाशेभ्यो दीक्षयासौ साधको मोचितः। तथाप्यारब्धकार्यकर्मोपरोधेनैतेभ्योऽनिर्मोचितः। ततस्तैरारब्धस्यास्य शरीरस्य यावत्कालमवस्थितिस्तावत्कालमसौ बद्ध एव। ततश्च तेभ्योऽपि मोक्षायैतज्ज्ञानं तस्योपयुज्यते। एवं ज्ञात्वा साधकेन पुर्यष्टकस्थानां पूर्वोक्तानां सर्वेषां तत्त्वरूपाणां पाशानां विशुद्धये तेषां तत्तत्कारणेषु त्यागः कार्यः। तदा स तेभ्यो मुक्तः शिवं व्रजेदिति साधकस्य मोक्षोपायो न्यरूपि।

तत्र ब्रह्मस्थाने हृदये स्पर्शशब्दयोः, केशवस्थाने कण्ठे रसस्य, रुद्रस्थाने तालुनि रूपगन्धयोः, ईश्वरे बुद्ध्यहंकारमनसां, शिवे परप्रकृतिवर्गस्य विद्यात्मकस्याष्टमवर्गस्य च त्यागः कार्यः। तथा कार्यात्मनो वर्गद्वयस्य स्वस्थाने, करणादिवर्गपञ्चकस्य ईश्वरे त्यागः कार्यः। ततस्तेभ्यः साधको मुक्तो भवेदिति त्यागप्रकारो वर्णितः। एवं **सप्तदशपटलार्थसंग्रहः**।

अष्टादशे पटले कालचक्रं निरूप्यते। अत्र कालचक्रमित्यस्य "बहूनामरिष्टजनककालविशेषाणां समूहः" इत्यर्थो वेद्यः।

पूर्वं दीक्षाप्रकरणे दीक्षितैः कदाचित् सिद्धेरन्यत्रारब्धकार्यकर्मक्षयाय जीवनस्योत्क्रान्तिः कर्तव्यत्वेनोक्ता। ततो नरेण प्राप्तकालेनोत्क्रान्तिः कर्तव्येति तदानुगुण्येनारिष्टकालविशेषप्रतिपादनायेदं प्रकरणमारभ्यत इति प्रकरणसंबन्धनिरूपणम्।

तत्रेडानाड्या त्र्यहोरात्रं प्राणसंचारे सति वर्षत्रयं जीवनकालः, तथैव द्व्यहोरात्रं प्राणसंचारे वर्षद्वयं जीवनकालः, एकाहोरात्रं प्राणसंचारे वर्षमेकं जीवनकाल इत्यरिष्टकालनिरूपणम्। एवमकस्मात्प्राणायामकालेऽह्नः सूक्ष्मीभावे मासषट्कजीवनं, तथा तस्यैवातीव दीर्घीभावेऽहोरात्रं जीवनकाल इति वर्णनम्। एवं नाडीत्रयप्राणसंचारविशेषेणापि जीवनकालविशेषो ज्ञेय इत्युक्तिः। मध्यमाचारस्तु विषुवत्प्रवाह इति प्रदर्शितम्। एवमरिष्टकालविशेषः प्रोक्त इत्युक्तार्थस्योपसंहारः।

इतः परं केषुचित्पुस्तकेषु बृहत्कुमारीसंवादप्रकरणं दृश्यते। तच्चात्र श्लोकसंख्यातिरेकप्रसङ्गात् प्रकृतग्रन्थोक्तप्रकरणानन्वयाच्च नात्र ग्रन्थे परिगणितुं शक्यते। चतुःशतिकालोत्तरात्प्रक्षिप्तमिति षष्ठप्रकरणे सूचितमित्युच्यते। **एवमष्टादशपटलार्थसंग्रहः**॥

एकोनविंशे पटले मन्त्रविषये शिवभेदाष्टकं प्रतिपाद्यते। तत्र प्रथमं पञ्चदशे प्रकरणे 'अणिमादिगुणैश्वर्यं षण्मासैस्तु न संशयः' इत्यत्र प्रासादमन्त्रजपाच्छिवश्रेयस्सिद्धेरणिमादेरष्टधा संज्ञाभेदो निरूपितः। मन्त्रभेदेनापि सा सिद्धिर्भवेद्वा इति कार्तिकेयप्रश्नः। तत्र भगवता सा सिद्धिर्मन्त्रभेदेनापि संभवत्येवेति समाधानवर्णनम्। ततस्तेऽष्टमन्त्रभेदाः "सकलं, निष्कलं, शून्यं, कलाढ्यं,

खमलंकृतं, क्षपणम्, अन्तस्थं, कण्ठोष्ठचम्" इति नामनिर्देशपूर्वकं सलक्षणं प्रतिपादिताः। लक्षण-प्रतिपादनप्रकार : —

सकलम्—"हूम्" इत्येव सकलमन्त्रलक्षणं सिद्धं भवति।

निष्कलम्—"यतोऽसौ ध्वन्यात्मको देवः प्राणवृत्त्या सकलं देहं त्यक्त्वा निष्क्रामति, ततः स निष्कलः" इति तत्स्वरूपवर्णनम्। स च मन्त्रोद्धारपटले प्रतिपादितः शिवसंज्ञकः प्रासादमन्त्र एव ऊकाररहित इति सिद्धम्।

शून्यम्—निश्वासोच्छ्वासौ हित्वा देहे काष्ठवत्स्थितो शून्यमन्त्र इति तल्लक्षणं विधीयते। तत्र कुम्भकप्राणायामकाले जप्यमानो हकार एव शून्यमन्त्र इति निर्णीतम्।

कलाढचम्—प्रियतमापरिचुम्बनादाविव बहिः पुटद्वयमुकुलाकारेण वक्त्रेणोच्चार्यमाणः कलाढच इति तल्लक्षणम् भण्यते। तत्र "अघोरबीजमेव तथोच्चार्यमाणं कलाढचमन्त्र इत्येके। ईशानबीजमेव तथा-भूतमित्यपरे" इति मतद्वयप्रदर्शनम्। "प्रासादमन्त्र एव तथोच्चार्यमाणः कलाढच इति सच्छास्त्र-विदो वदन्ति" इति वृत्तिकृता स्वमतप्रतिपादनम्।

खमलंकृतम्—प्राणवृत्त्या सह नादस्य प्रक्षयेण द्वादशान्ताख्ये आकाशे उच्चार्यमाणमिति तत्स्वरूपं विहितम्। तत्र "केचित् तत्सद्योजातबीजमिति वदन्ति। अपरे हृदयबीजमेवेति ब्रुवन्ति" इति मतद्वयप्रदर्शनम्। ततः "सच्छास्त्रविद्भिः शिरोबीजमेव तथोच्चार्यमाणं खमलंकृतं भण्यत" इति वृत्तिकृता स्वमताविष्करणम्।

क्षपणम् — उद्घाटितास्येनोच्चार्यमाणः क्षपणमन्त्र इति तल्लक्षणं विधीयते। तत्र तथोच्चार्यमाणो हकार एव क्षपणमन्त्र इत्येके वदन्ति। अन्ये तथोच्चार्यमाणमघोरबीजमेव क्षपणमन्त्रमित्याहुः। हृद्बीजमेव तथोच्चार्यमाणं क्षपणमन्त्र इति सच्छास्त्रविद्भिरुच्यत इति वृत्तिकृता मतद्वयं स्वमतं च निरूपितम्।

अन्तस्थम् — अपानवृत्त्या बाह्याकाशवाय्वाकाशपूर्वमन्तःप्रविशतोऽनुच्चार्यमाणत्वादन्तस्थत्वमित्यन्त-स्थमन्त्रलक्षणं वर्ण्यते। तत्र बिन्दुयुक्तो हकार एव पूर्वोक्तप्रकारेण विद्यमानोऽन्तस्थमन्त्र इति मतान्तरं तथा अन्तस्थशब्दस्य तन्त्रेणोभयार्थतया 'हः' इति विसर्गयुक्तमस्त्रबीजमेव तथाभूतमन्तस्थमन्त्र इति सच्छास्त्रविद्भिरभिधीयत इति वृत्तिकृता स्वमतं च निरूपितम्।

कण्ठोष्ठचम् — हकार-सकार-रेफ-क्षकार-मकार-लकार-वकार-यकार-अर्धचन्द्रबिन्दुयुक्तऊकारैर्नवभि-रक्षरैर्युक्तः कण्ठोष्ठचमन्त्रः। स चैकप्रयत्नेनोच्चारणेन साध्य इति प्रतिपाद्यते।

अन्ते चैते मन्त्रा विद्येशाधिष्ठातृशक्तिभेदप्रतिपादकत्वाच्छक्तिपक्षे ब्रह्माङ्गादिवदाख्याताः। एते चाणिमाद्यष्टसिद्धिप्रदा इत्युक्तम्। ततो यत्स्थूलशब्दतामनापन्नं सूक्ष्मं नादस्वरूपं पूर्वं मन्त्रोद्धारे प्रोक्तं तन्मोक्षप्रदमिति स्मारितम्। **एवमेकोनविंशपटलार्थसंग्रहः**॥

विंशे पटले नादस्य शब्दकारणस्य व्याप्तिर्वर्ण्यते। तत्र प्रथमं पूर्वपटले नादविषयप्रसङ्गाद-त्रापि तद्विषयविचारोऽभिधीयत इति प्रकरणसंबन्धनिरूपणम्। ततो मन्त्रोद्धारप्रकरणे "नादाख्यं यत्परं बीजं सर्वभूतेष्ववस्थितम्" इत्यत्र नादो व्यापकः प्रोक्तः। पूर्वप्रकरणे तु "अधोनादस्य, ऊर्ध्वनादस्य" इत्युक्तेस्तस्योर्ध्वाधस्तिर्यक्स्थितिः प्रतीयते। ऊर्ध्वाधस्तिर्यगवस्थानं चाव्यापक-धर्मः। अव्यापकधर्मस्थितिर्नादे व्यापके कथं संगच्छते। आत्मविषये त्वस्य प्रश्नस्य 'पुर्यष्टक-समायुक्तो ह्यध ऊर्ध्वं स गच्छति' इत्यनेन समाधानं वर्णितम्। नादविषये त्वत्रोपपत्तिर्वक्त-व्येति कार्तिकेयप्रश्नः।

प्रतिपुरुषं मायावत् कार्यभेदेनाव्यापकेन रूपेणैव स्थितत्वान्नादोऽधश्चोर्ध्वं तिर्यक् च संस्थित इत्युक्तम्। यदा तु कार्यावस्थातोऽयं निर्गतः कारणस्वभाव एव स्थितः, तदा त्रिषु ऊर्ध्वाधस्ति-र्यग्लक्षणेषु मार्गेष्वभेदेनावस्थितो व्यापक एवेत्युच्यते। किं च यद्यपि दीक्षयासौ पुरुषो नादसं-

बद्धः, तथापि योऽसौ नादः सर्वदेहेषु कार्यद्वारेण वर्तत इत्युक्तः, तस्य त्रयाणां मन्त्रमन्त्रेश्वरतदीश्वराणामधिष्ठानरूपं मार्गं यो वेत्ति स एव दीक्षितो मुच्यते। यो नादव्याप्तिं वेत्ति, तस्य गर्भसंभूतिर्न भवति। नादव्याप्तिज्ञानादेवात्मव्याप्तिज्ञानं संभवति। एवं नादस्य व्याप्तिर्वर्णिता। ततो जीवो यावत्कालमात्मानं व्यापिनं न जानाति, तावत्कालं संसारे भ्रमति। व्यापकत्वेनात्मस्वरूपवेदनाद्दीक्षितो मुच्यत इत्यात्मव्याप्तिज्ञानस्यावश्यकत्वं बोधितम्। एवं **विंशपटलार्थसंग्रहः**।

एकविंशे पटलेऽणिमाद्यष्टविधसिद्ध्याविर्भावसूचका अष्टप्रत्यया निरूप्यन्ते। अत्र प्रथमं प्रासङ्गिकं नादविषयं परिसमाप्य प्रागुक्ताणिमाद्यैश्वर्यसाधकस्य सिद्धिप्रादुर्भावसूचकाः प्रत्यया वक्ष्यन्त इति प्रकरणसंबन्धनिरूपणम्।

अत्र प्रकरणे विहितानां मन्त्रप्रयोगाणां यथाविध्यनुष्ठानेनानग्निज्वलनादिफले सिद्धे सति साधकस्याणिमाद्यष्टसिद्धिरवश्यं भाविनीति ज्ञानमुत्पद्यते। अतोऽनग्निज्वलनादिप्राप्तिः साधकस्याणिमाद्यष्टसिद्धिसूचिकेति वर्णिता। ततोऽनग्निज्वलने, वृक्षस्यालभने तथा तत्रैव वृक्षस्याप्यायने, पाशानां स्तोभने तथा तत्रैव पाशानामुत्थापने, महापातकनाशने तुलापुरुषयोगेन पापपरिच्छेदकरणेन पापसमीकरणे तथा पापक्षपणे, विषसंहरणे, निर्बीजकरणे, ग्रहनाशने, ज्वरनाशने च प्रयोक्तव्या मन्त्राः, तत्प्रयोगनिर्वर्तनप्रकाराश्च प्रतिपादिताः। त्रिलोचनशिवाचार्यकृते सिद्धान्तसारावलीव्याख्याने (क्रियापादे श्लो ३८) तथा अघोरशिवाचार्यकृते द्विशतिकालोत्तरव्याख्याने (पटल १६) च अनग्निज्वलनादौ प्रयोक्तव्यानां मन्त्राणां स्वरूपं निर्दिष्टमस्ति, परं मुद्रिते मातृकासु च पाठा अशुद्धभूयिष्ठाः। अथापि सार्धत्रिशतिकालोत्तरोक्तलक्षणानुसारेण तन्मन्त्रस्वरूपमेवं स्यादित्यभ्यूह्यते —

१. **अनग्निज्वलने** ओं ह्रीं रं ह्रों रं ह्रीं नमः।

२. **वृक्षस्यालभने** ओं ह्रीं रं ह्रों रं ह्रीं नमः।

वृक्षस्याप्यायने ओं ह्वीं वं ह्वौं वं ह्वीं नमः।

३. **पाशस्तोभने** ओं ह्रीं रं ह्रौं रं ह्रीं नमः।

पाशस्तोभान्निपतत उत्थापने विसंज्ञोत्थापने च ओं ह्यीं यं ह्यौं यं ह्यीं नमः।

४. **महापातकनाशने पूर्वं कर्तव्ये** ओं ह्लीं लं ह्यौं लं ह्लीं नमः।

महापातकनाशने पापक्षपणे ओं हं यं ह्यौं यं हं नमः।

५. **विषसंहरणे** ओं हं वं ह्यौं यं ह्रीं नमः।

६. **निर्बीजकरणे** प्रथमवत्

७. **ग्रहनाशने** ओं ह्रू ह्रौं ह्रू फट् नमः।

८. **ज्वरनाशने** ओं हुं फट्, हुं फट्, हुं फट्, फट् फट् फट् फट् फट्। इति॥

अन्ते चैते लोकपालाधिष्ठातृशक्तिभेदप्रतिपादकत्वाच्छक्तिपक्षे स्थिता इत्युक्तम्। **एवमेकविंशपटलार्थसंग्रहः**।

द्वाविंशे पटले प्रासादमन्त्रनिर्णयः प्रतिपाद्यते। तत्रादौ "प्रासादस्य शरीरं कीदृशं, तस्य व्याप्तिश्च कीदृशी" इति कार्तिकेयस्य प्रश्नवर्णनम्। ततः पूर्वं मन्त्रोद्धारप्रकरणे एव प्रासादमन्त्रो वर्णितः पुनराक्षेपसमाधानाभ्यां निर्णीतश्च। तेनैवात्र निर्णयः सिद्धः। अतः किमर्थमयं प्रश्न" इत्याशङ्क्य "शिवं तत्तु विजानीयान्मन्त्रमूर्तिं सदाशिवम्" इति प्रासादस्य सदाशिवत्वं प्रोक्तम्। तस्य सदाशिवत्वं कथं भवतीति तत्स्वरूपज्ञानाय प्रश्न इति प्रश्नतात्पर्यविवरणम्। तत्र सिद्धान्तकथनाय "प्रासादं पञ्चमन्त्रमहातनुत्वेनाष्टत्रिंशत्कलोपेतत्वेन च यो जानाति स एव आचार्यः। प्रासादं सम्यगज्ञात्वा यो दीक्षां करोति गुरुः, स आत्मानं शिष्यं चाधो नयति" थकम्नदइत्यादि ततः प्रासादमन्त्ररूपः शिवः, सदाशिवरूपेण देहेन सर्वं करोति। ब्रह्मादयो देवा अन्ये प्राणिनश्च सर्वेऽपि प्रासादजा एवेत्युक्तिः। मुमुक्षवो मुनयः, साधकाश्च हंसरूपं प्रासादं प्रासादबीजेन नाम्ना,

अष्टत्रिंशत्कलादिना रूपेण च ध्यायन्ति इत्युक्त्वा सर्वज्ञानोत्तरतोऽष्टत्रिंशत्कलानां प्रतिपादनम्। "सद्योजातादिपञ्चमन्त्राः प्रासादस्य शरीरत्वेन संभवन्ति" इति कथनेन प्रासादस्य पञ्चमन्त्र-महातनुत्वं प्रतिपाद्यते।

प्रासादमन्त्रादन्येषां निरञ्जनानां मन्त्राणां संख्या दशसहस्रकोटिरित्युक्तम्। साञ्जनानां मन्त्रा-णामपि निर्देशः क्रियते। सद्योजातादीनां शब्दजातत्वेन, ब्रह्मादिकारणेश्वरत्वेन च वर्णनम्। षष्ठं तु परं तत्त्वं शब्दपरिकल्पनातीतमित्युक्तिः। एवं ब्रह्मादिस्थानारोहणसोपानपदपङ्क्तिं ज्ञात्वा तस्मिन्नेव काले मुक्तो भवेदित्युक्तिः। एवं **द्वाविंशपटलार्थसंग्रहः**।

त्रयोविंशे पटले ज्ञानामृतं प्रतिपाद्यते। अत्र ज्ञानामृतमित्यनेन प्रासादमन्त्रप्रभावो वर्ण्यते। तत्रादौ प्रासादनिर्णयप्रकरणस्य शेषभूतमेवेदं प्रकरणमिति प्रकरणसंबन्धकथनम्। ततो यावद्दीक्षाकर्ता गुरुर्देहसंविदावस्थितो भवति, तावत्स सकलः पशुधर्मैव। यदा तु सिद्धप्रासादः स प्लुतोच्चारणे नादशिखावृत्त्या देहातीताविच्छिन्नद्वादशान्तसंविद् भवति, तदायं निष्कलः, शिवसमानधर्मा पाशच्छे-दादि कर्तुं समर्थो गुरुर्भवतीति गुरोः सकलनिष्कलत्ववर्णनम्।

ततः सकलो निष्कलश्च भगवान् कथं, केन च ज्ञेय इति च प्रतिपादनम्। तत्र "यः प्राण-गमागमप्रवृत्त्यैव प्रतिक्षणं 'योऽहं सोऽहं सः' इत्याम्रेडितपदेन सदाशिवं ब्रुवन्नेव (जपं कुर्वन्नेव) वर्तते, तेन वागात्मप्राणशक्तिद्वयज्ञानवता विशिष्टेन पुरुषेणैव सकलः सदाशिवो ज्ञायते। निष्कलः सर्वतोमुखः परमशिवस्तु कथंचिद् गुरुवक्त्रादागमार्थश्रवणेन सर्वोपाधितिरस्कारद्वारेणावगम्यते। अथवा योगबलाद् प्रत्यक्षेण ज्ञायते" इति भगवतः सकलनिष्कलत्वेन ज्ञानलाभप्रकारो न्यरूपि।

प्रत्यक्षेण भगवत्स्वरूपज्ञानतः शरीरेऽपि प्रतिपत्तिर्विलीना भवतीत्युक्तिः। उल्काहस्तः कश्चि-द्यथा द्रव्यमालोक्य, ततस्तां त्यजति, तथोपायेनोपेयं ज्ञात्वा उपायस्त्याज्य इति सदृष्टान्तं कथनम्। तत्र "उपादायापि ये हेयास्तानुपायान् प्रचक्षते" इत्युपायशब्दार्थप्रदर्शनम्। उपायः सकलः, उपे-यस्तु निष्कल इति सकलनिष्कलयोः स्वरूपमुपवर्ण्य तत्र पुष्पगन्धयोर्वृक्षतच्छाययोर्दृष्टान्तप्रदर्शनम्।

सकलेऽप्युपाये सकलान्तरमुपायः, एवं निष्कलेऽपि कदाचिन्निष्कलान्तरमुपायो भवतीत्युक्त्वा, सार्धषण्मात्रः सकलप्रासाद उच्चार्यमाणक्रमे निष्कलीभवद् ध्वनिमात्रावशेष एव संवेद्यते। ततः परं शुद्धसंविदुदयात् तत्परात्परमेव भवतीति मात्राक्रमेण सकलप्रासादस्य निष्कलीभावक्रमनिरूपणम्। कारणपरित्यागक्रमेणापि सकलप्रासादस्य सकलनिष्कलभावो भवेदित्युक्तिः।

ब्रह्मादीनां हृदयादिस्थानं प्रतिपाद्य, एतानि स्थानानि क्रमेणान्यत्र जाग्रत्स्वप्नसुषुप्तितुर्यतुर्या-तीतपदान्युच्यन्ते इति प्रतिपादनम्। एवं सकलप्रासादस्योच्चारणकाले एतत्पञ्चस्थानस्पर्शन-मात्मनः सिद्धमेवेति द्वादशान्ते तस्य गमागमौ भवतः। ततश्च द्वादशान्ते शुद्धसंविदुदये पर-प्राप्तिहेतुकं ज्ञानं तत्र संभवतीत्युक्तिः। तत्र "शक्त्या तु जीवो द्वादशान्तं नीयते। ततश्च द्वादशान्तं प्राप्य पुनर्निवर्तते" इति जीवस्य द्वादशान्तगमागमप्रतिपादनम्। नासाग्राद् द्वादशा-ङ्गुले द्वादशान्तस्थानं विद्यते। तदेव निष्कलशिवस्थानं, तत्रैव शुद्धसंविदुदय इति चोक्तमिति द्वादशान्तस्थाननिरूपणम्। प्रासादशिवज्ञानिनां योगिनां विषयेषु संनिहितेष्वपि व्यापकात्मप्रति-पत्तियोगोऽभ्यासत एवाविच्छिन्नो वर्तत इत्युक्तिः।

प्रासादनिर्णयप्रकरणे ज्ञानामृतप्रकरणे च प्रोक्तानि सूत्राणि सर्वाण्यपि परमेश्वरप्रोक्तान्येव, न मया प्रतिपादितानि। त्वयाप्येतत्परमशिवोक्तमतितमां गोप्यं नानधिकारिणे प्रदातव्यमिती-श्वरेण कार्तिकेयं प्रति विशिष्य कथनम्।

एतत्प्रासादमन्त्ररूपशिवामृतज्ञानी जीवन्मुक्तो भवेत्। आश्रमचतुष्टयमध्ये यः परमाक्षरवि-च्छिवामृतज्ञानीत्यभिधीयते स सर्वकर्मफलं त्यक्त्वा शरीरान्ते शिवं प्रयाति। एवमेव समयादि-दीक्षायुक्तः शिवामृतज्ञान्यपि देहान्ते शिवं व्रजतीति शिवामृतज्ञानफलप्रतिपादनम्।

प्रसङ्गात् "कल्याणमित्रादिर्मार्गप्रदर्शकः चोदकः, शास्त्रव्याख्याता बोधकः, दीक्षाकर्ता मोक्षदः" इत्याचार्यत्रयप्रतिपादनम्। एवं **त्रयोविंशपटलार्थसंग्रहः** ॥

चतुर्विंशे पटले प्रासादज्ञानिभिः कर्तव्यः प्रत्यक्षयजनप्रकारो वर्ण्यते। तत्र च प्रथमं "किमेभिः प्रासादज्ञानिभिरपि परमेश्वरयजनं कार्यम्। कर्तव्यं चेत् तत्प्रकारः कीदृशः" इति प्रश्नः। शाश्वतपदप्रापकं यजनं तैरपि कर्तव्यमेव। तत्प्रकारश्च संक्षेपेण वक्ष्यत इति प्रतिज्ञा।

ततः आत्मनां हृत्पङ्कजमीश्वरसंबन्धिशक्तिभूतार्भिर्निवृत्त्यादिभिश्चतुर्भिः कलाभिर्बद्धमिति नाडीचक्रप्रकरणे प्रोक्तम्। अतस्तत्कलाद्वारा योगाभ्यासक्रमेण प्रासादज्ञानी, वाक्शक्तिकुण्डलिन्याभिव्यक्तं हकारौकारोकारबिन्दुप्लुतोपक्षिप्तेकाररूपशिखामात्रायुक्तं चतुष्कलं प्रासादमन्त्रं साक्षात्कृत्य यजनं कर्तुमारभेत। प्रासादज्ञानिना तत्साक्षात्कारः कर्तुं शक्य एव। यतोऽयं पूर्वोक्तमिडादिनाडीत्रयं सदा प्रत्यक्षतः पश्यतीति यजनोपक्रमवर्णनम्।

अथ यजनप्रकारवर्णनम् — कुम्भकादिभेदभिन्नं प्राणायामं कृत्वा, पूर्वं प्रणवं, ततः प्रासादाक्षरं नमस्कारमन्ते चोच्चार्य प्रत्यक्षीभूतबिन्दुरूपं परमेश्वरं मूर्ध्नः प्रभृत्यर्चनाप्रकरणोक्तप्रकारेण मूर्तिन्यासाङ्गन्यासादिकं कृत्वार्चयेत्। ततो बहिर्द्वादशान्ते यजनं कार्यम्। तत्रैव नादशक्तीनां परिक्षयान्निष्कलसंविदुदयो ज्ञानिनां संभवतीत्युक्तमिति सूचनम्। एवमत्र प्रकरणे विहितो मन्त्रस्याद्यन्तयोः प्रणवनमस्कारयोगः सर्वमन्त्रेष्वपि संबध्यत इति पूर्वं प्रदर्शितमित्यस्यापि सूचनम्। एवं **चतुर्विंशपटलार्थसंग्रहः**।

पञ्चविंशे पटले जटादिलिङ्गोद्धारः प्रोच्यते। "गृहस्थाद्याश्रमिषु मध्ये ज्ञानिनां, तथा नैष्ठिकेषु मध्ये भैक्षुकवानप्रस्थानां जटादिलिङ्गधारिणां केषांचिदज्ञानिनामकस्माद्यदि विषयभोगेषु प्रवृत्तिर्दृश्यते, तदा तल्लिङ्गाश्रमपरित्यागाय प्रायश्चित्तविधिरत्र बोध्यते" इति प्रकरणप्रतिपाद्यविषयनिर्देशः।

ततो नैष्ठिकानां विषये लिङ्गोद्धारप्रकारकथनम्। तत्र विषयेषु प्रवृत्तं जटादिलिङ्गधारिणमज्ञानिनं नैष्ठिकं तं यथाशक्ति पञ्चरात्रं त्रिरात्रं वा उपोष्य, प्रायश्चित्तकरणायाधिवासयेत्। अधिवासार्थं सप्तमप्रकरणोक्तप्रकारेण मण्डलयागविधिं कृत्वा, तेन प्राक् संन्यासाश्रमस्वीकारकाले यो विषयेन्द्रियान्तःकरणादीनां वाक्शक्तेश्च संन्यासः कृतः, तं परिवर्तयेत्। एवं परिवर्तनादेव समयोल्लङ्घनात्प्राप्तस्य शतवर्षक्रव्यादत्वरूपदोषस्य निवृत्तिः स्यादित्युक्त्वा, तत्परिवर्तनप्रकारनिरूपणम्। ततः परिवर्तनेन नैष्ठिकं भौतिकमिव जनयित्वा प्रायश्चित्तवियुक्तं कुर्यात्। एवं जटादिलिङ्गसांहारिकीमिष्टिं कुर्यादित्युक्तस्य विषयस्योपसंहारः।

ततो नैष्ठिकेतरविषये प्रायश्चित्तप्रकारवर्णनम्। तत्र "सोऽपि प्रत्यहं सृष्टिसंहारक्रमेण मण्डलयागविधिना परमेश्वरमर्चयेत्। तेन विषयासक्तोऽपि न विषयैर्बाध्यते" इत्युक्तिः। एवं **पञ्चविंशपटलार्थसंग्रहः**।

षड्विंशे पटले अन्त्येष्टिर्वर्ण्यते। तत्र प्रथमं प्रायश्चित्तप्रसङ्गेनान्त्येष्टिरुच्यत इति प्रकरणसंबन्धकथनम्।

ततोऽन्त्येष्टिकरणप्रकारवर्णनम्। तत्र "प्रागुक्तेन क्रमेणैव शिवमिष्ट्वा, शिवाग्निं जनयित्वा, ततस्तं मृतं प्राग्वत् सुमृद्गोमयजलैः भस्मना च स्नापयित्वा, वस्त्रपुष्पादिभिरलंकृत्य, अस्त्रमन्त्रेण संप्रोक्ष्य, दर्भोपरि उदक्पादं निवेशयेत्" इति संक्षेपेण गृहे कर्तव्यस्य क्रियाकलापस्य कथनम्। ततोऽग्नौ सांहारिकीमिष्टिं प्राग्वत् कृत्वा, दीक्षायामिव पुर्यष्टकरूपान्तःकरणसंयोगादात्मनो ग्रहणं कृत्वा, चितौ अस्त्रमन्त्रेण दर्भैरास्तीर्य, तत्रैनमुदक्शिरसं सामान्यशास्त्रप्रसिद्ध्या निवेश्य, आग्नेयधारणया अस्त्रमन्त्रेण तत्र समन्तादग्निमुज्ज्वालयेत्। अग्निज्वलने वित्तवतां चन्दनागरुकाष्ठैरितरेषां यथासंभवं सामान्यकाष्ठादिनैवाग्निज्वलनं कार्यमित्युक्तिः। ततोऽस्त्रपटं

दग्ध्वा, भगवन्तं विसृज्य स्नायाद् इति मृतदहनविषये श्मशाने कर्तव्यस्य क्रियाकलापस्य संक्षेपतः प्रदर्शनम् ।

ततो दीक्षानन्तरं ये प्रमादाच्छास्त्रविहितान् नित्यानुष्ठानादीनुल्लङ्घयन्त्याचार्यादयः, ये च समस्तसंशयच्छेदहेतोः शास्त्रस्याश्रवणात् संदेहेनापि तानवश्यं परिपालयन्ति पुत्रकादयः, येऽपि चापरिक्षीणभोगाधिकारमलाः साधकाः, तेषामेव शुद्ध्यर्थमियं प्रायश्चित्तरूपान्त्येष्टिविधिरुच्यते। न समलानामकृतदीक्षाणां परिशुद्ध्यर्थमित्यत्राधिकारिणां निर्देशः। अनया चान्त्येष्ट्या समयोल्लङ्घनप्रयुक्तदोषस्य प्रायश्चित्तविधानात् तद्दोषविनिर्मुक्ता आचार्यसाधकपुत्रका दीक्षाफलं प्राप्नुवन्तीति प्रोच्यते। एवं **षड्विंशपटलार्थसंग्रहः** ॥

सप्तविंशे पटले विघ्ननिवृत्त्यर्थमस्त्रयागः प्रोच्यते। विघ्नैरुपसृष्टस्य साधकस्य विघ्ननिवृत्त्यर्थमस्त्रयागो वक्ष्यत इति प्रतिज्ञा।

ततो मण्डलयागविधानप्रोक्तवच्छास्त्रदृष्टेन कर्मणा भूमिशोधनं कृत्वा, शुद्धे भूतले गोमयेनोपलेपिते ऐशान्यां कुम्भद्वयं स्थापयेदिति कुम्भस्थापनप्रकारवर्णनम्। ततो रजसा मण्डलमालिख्य, तत्रास्त्रयागः कार्यः। अथवा स्थण्डिले पद्ममालिख्य तत्रास्त्रयागः कार्य इति पक्षद्वयनिरूपणम्। रजस्सु यागकरणे बहवो विघ्नाः संभवेयुः। स्थण्डिलेऽस्त्रयागकरणे नैव विघ्नाः संभवन्ति। अतः स्थण्डिलेऽस्त्रयागकरणमुत्तममिति वर्णनम्।

ततो यागकरणप्रकारो वर्ण्यते। तत्र सप्तमपटलप्रोक्तमण्डलयागापेक्षयास्मिन्यागे कर्तव्यस्य विशेषविधेः प्रदर्शनम्। मण्डलयागे नित्यार्चनवद् हृदयमन्त्रेण षडुत्थासनकल्पनम्। अत्र प्राकारास्त्रेण षडुत्थासनकल्पनम्। तथावरणविषये मण्डलयागे गर्भावरणलोकपालावरणतदस्त्रावरणानां त्रयाणां पूजाकरणम्। अस्त्रयागे गर्भावरणास्त्रावरणयोरुभयोरेव पूजाकरणमिति विशेषो निरूपितः। एवमग्निकार्येऽपि मण्डलयागास्त्रयागयोर्विषये विशेषः प्रदर्श्यते। मण्डलयागे आग्नेय्यां दिशि कुण्डकल्पनम्। अस्त्रयागे पूर्वस्यां दिशि कुण्डकल्पनम्। मण्डलयागे कुण्डशोधनमस्त्रकवचाभ्याम्। अस्त्रयागे प्राकारेण कुण्डशोधनम्। अग्निजननविषये मण्डलयागे हृदयमन्त्रः प्रयोक्तव्यः। अस्त्रयागे प्राकारेणाग्निजननादिकं कर्तव्यमिति। ततो होमविधिकथनम्। अत्र हुंफडा वौषडन्तेन पूर्णाहुतिः कार्येति विशेषो निरूपितः। ततो मण्डलयागस्येवास्त्रयागस्यापि दीक्षाङ्गत्वं सूच्यते। ततोऽस्त्रदीक्षाविधिनिरूपणम्। तत्र निर्वाणदीक्षाप्रोक्तसप्तदशकर्मणां कर्तव्यत्वेन विधानं, तत्र विशेषविधिप्रदर्शनं च दृश्यते। ततोऽस्त्रदीक्षां समाप्यान्ते कुम्भेनाभिषेकः कार्य इत्युक्तिः।

अनेन कर्मणा विनायकादिग्रहप्रयुक्तदोषशान्तिरिति फलविधिः। एवं **सप्तविंशपटलार्थसंग्रहः**।

अनुबन्धाः

कालोत्तरभेदेषूपलब्धान् समानजातीयश्लोकान् संगृह्य उपोद्घातान्ते समानजातीयश्लोकपट्टिका दत्तास्ति। तत्र सार्धत्रिशतिश्लोकार्धान् प्रथमतो निर्दिश्य तदधो द्विशतिकालोत्तरात् (द्वि० का०) बृहत्कालोत्तरात् (बृ० का०) तथा कालोत्तराच्च (का०) तादृशार्धानां स्थानसूची दत्ता। पाठान्तरे सति तादृशपदानामधः पाठान्तराणि निर्दिष्टानि। यदि श्लोकार्धाः समानास्तदा केवलं अङ्कनमात्रेण तादृशार्धाः समानास्तत्र तत्र ग्रन्थेषूपलभ्यन्त इति निर्दिश्यते। एतदनन्तरं ग्रन्थस्यास्य संपादनाय उपयुक्तानां मातृकाणां सूची, तथा वाचकसौकर्याय सार्धत्रिशतिकालोत्तरस्य मूलमात्रं चानुबध्येते।

एवमेव ग्रन्थावसाने अनुबन्धे १ त्रयोदशशतिककालोत्तरम्, २ षट्सहस्रकालोत्तरम्, ३ स्कन्दकालोत्तरम् इति शीर्षकं दत्त्वा तत्तत्कालोत्तरेभ्यो ग्रन्थान्तरेषूद्धृताः श्लोकाः संगृहीताः।

एवमेव सार्धत्रिशतिश्लोकार्धानां, तत्र वृत्तावुदाहृतश्लोकार्धानां, तथा अनुबन्धस्थश्लोकार्धानां चानुक्रमणिका दत्तास्ति। तदनन्तरं वृत्तावुदाहृतग्रन्थग्रन्थकर्तृसूची, मूलस्य वृत्तेश्च संपादनावसरे उपयुक्तानां ग्रन्थानां सूची च निर्दिष्टा। उपोद्घातोदाहृतानां ग्रन्थानां विवरणं तत्तत्स्थले टिप्पण्यां वा प्रदर्शितम्।

यथापूर्वं संस्कृतोपोद्घातस्य संग्रहः फ्रेंच्भाषायाम्, तथा आङ्गलभाषायां संक्षिप्तसंग्रहश्च तत्तद्भाषाविज्ञानिनां सौकर्याय प्रदत्तोऽस्ति।

कृतज्ञतानिवेदनम्

एतद्ग्रन्थसंपादनाय मातृका दत्त्वोपकृतवतां मद्रपुरीराजकीयप्राच्यतालपत्रकोशागाराध्यक्षाणां, तथा तिरुवण्णामलै शिवश्री-चिन्नगुरुक्कल्-रामलिङ्गशिवाचार्याणाम्, एतत्पुस्तकसंपादनकार्ये सर्वात्मना सर्वास्ववस्थासूपकृतवतां श्रीरामानुजय्यङ्गार्-श्रीसंबन्धशिवाचार्य-श्रीसुब्रह्मण्यमहाशयानां, नातिचिरेण ग्रन्थं सुष्ठु मुद्रितवतां श्रीमदरविन्दमुद्रणालयाध्यक्षाणां तथैतादृशागमसंशोधनप्रकाशनादिकार्येष्वनुस्यूतमादरं प्रोत्साहं च ददतामस्मदध्यक्षवर्याणां च हार्दिकीं कृतज्ञतां समर्पयामः।

श्रीमतो रामकण्ठस्य व्याख्यया सुपरिष्कृतः।
सार्धत्रिशतिकालाख्यो वातुलागमसंग्रहः॥
प्रकाशितोऽधुना भूयात्प्रसादाय सतामयम्।
कालोत्तरस्य देवस्य महतः प्रीतयेऽनिशम्॥

ENGLISH SUMMARY

The present text *Sārdhatriśatikālottarāgama* (meaning *Kālottara*, a text containing 350 *śloka*-s) is one of the numerous recensions of *Kālottarāgama* and is an abridged version of the same. It is an *upāgama* or a supplement of *Vātulāgama* one of the 28 Śaivāgama-s belonging to the Śiddhānta śaiva school. In our edition of *Rauravāgama* (vol. 1) a table of Āgama-s and *upāgama*-s, which is based on the information available in the Āgama-texts, is attached to the Introduction. Though we do not find the name *Kālottara* in the list of *upāgama*-s of *Vātulāgama*, we find instead the name *Kālajñāna* which is a synonym of *Kālottara*. This is established from the fact that in the colophons of the *Kālottara* manuscripts, we find sometimes *Kālajñāna* and sometimes *Kālottara*. The name *Kālottara* seems to indicate that this text deals with one who is beyond time and *Kālajñāna* that it deals with the knowledge of the Supreme, the destroyer of bondage.

There are many recensions of this *Kālottarāgama* which are known either by the availability of the manuscripts or from quotations. Those known so far are enumerated below.

1. *Kālottara*
2. *Bṛhatkālottara*
3. *Ayutatrayasaṃhitākālottara* (or *Tryayutagranthasaṃhitākālottara*).
4. *Devīkālottara* (or *Caturviṃśatisahasrakālottara*)
5. *Dvādaśasahasrasaṃhitākālottara*.
6. *Ṣaṭsahasrasaṃhitākālottara*.
7. *Trayodaśaśatikakālottara*
8. *Saptaśatikakālottara*
9. *Catuśśatikakālottara*.
10. *Sārdhatriśatikālottara*
11. *Triśatikālottara*
12. *Dviśatikālottara*
13. *Skandakālottara*

Manuscripts of Nos. 1, 2, 7, 8, 10 and 12 and two manuscripts containing *paṭala*-s of Nos. 3, 4 and 5 are available in different Mss. Libraries. The rest are known through quotations only. Relating to No. 9 we know the existence of this recension as it is mentioned by Rāmakaṇṭha in his commentary quoting in support two verses from the recension named *Trayodaśaśatika*.

That *Devīkālottara* is another name of the recension *Caturviṃśatisahasrakālottara* is indicated in the colophon of that text. It is quoted in texts under

both names. All the recensions are dialogues between Kārtikeya and Śiva; but in *Devīkālottara*, it is a dialogue between Devī and Śiva.

Regarding the recension named *Triśatikālottara* we find it quoted once only by Anantaśambhu, in his commentary on *Siddhāntasārāvali* (See Madras Govt. Oriental mss. Library Bulletin vol. XVII, No.2 pp. 41-42).

Normally in Śaivāgama texts we find names such as *Raurava* and *Rauravottara*, *Makuṭa* and *Makuṭottara*, *Vātula* and *Vātulottara*, *Śivadharma* and *Śivadharmottara*, etc. So, one could suppose that there could be a *Kālāgama* which might be the previous part of *Kālottara*; but we do not find any such text named *Kāla* among the *upāgama*-s of *Vātulāgama*.

One should not confuse this *Kālottara* text with the *Kālākhya*, an *upāgama* of *Rauravāgama*, or *Śrīkālajñāna*, an *upāgama* of *Prodgītāgama*, because the commentator states that this is an abridged recension of *Vātulāgama*.

Kālottarāgama is an *upāgama* of *Vātulāgama* or, as the commentator states, an abridged version of *Vātulāgama*, and all the other recensions noted in the list given above are supposed to be different abridged versions. Thus it seems reasonable that sometimes the same verses are found in different recensions of *Kālottara*. See for example the table of similar verses attached at the end of the sanskrit introduction.

From the evidence of the commentator Rāmakaṇṭha we understand that the present text *Sārdhatriśati* (350 *śloka*-s) is an abridged version of *Trayodaśaśatika* (1300 *śloka*-s). So also from the evidence of Aghoraśiva, the commentator on *Dviśatikālottara* (a text in 200 *śloka*-s) we understand that *Dviśati* is an abridged version of *Catuśśatikakālottara* (a text in 400 *śloka*-s).

It is interesting to note the statement of Trilocanaśiva in his commentary on *Somaśambhupaddhati* in which he mentions about two schools, of which one is following *Sārdhatriśati* and the other *Dviśati*. *Aghoraśivapaddhati* follows *Sārdhatriśati* and *Somaśambhupaddhati* follows *Dviśati*. Aghoraśiva has commented on *Dviśati*, but he has adopted other readings for the *Dviśati* verses which verses are also found in *Sārdhatriśati*; the readings here are based on Bhaṭṭa Rāmakaṇṭha's commentary.

The present edition is based on two manuscripts containing commentary and three manuscripts and one printed edition containing text only. As we are publishing this text with the commentary, we are adopting the readings supported by the commentator. The description of these manuscripts is given in the list of Mss. used which is attached at the end of the sanskrit introduction.

The commentary by Bhaṭṭa Rāmakaṇṭha (for details of whom see our Introduction to *Mataṅgapārameśvarāgama* vol.1, IFI No.56) is very brief, and its style

makes it difficult to understand.

It seems there were other commentaries on this text previous to this one, which fact is indicated in this commentary. In one place statements from four different commentaries have been refuted.

Small portions of commentaries seem to be missing in some places; for example see verses 2-8 in *paṭala* 16 and verses 19-20 in *paṭala* 21. References in previous *paṭala*-s stating that it would be explained in later *paṭala*-s indicate according to the subject matter that there should have been the concerned commentary on these verses. See for example *śloka* 5 *paṭala* 5.

Information relating to the authors and works cited and some special features of this text and the differences between other texts and this one have been detailed in the sanskrit introduction. A few examples of such differences are given below.

1. According to all other texts the netramantra is *Hauṃ*; but as per this text it is *Haṃ*.
2. Other texts give prescription about the preparation of ashes used for ash-bath (*bhasma-snāna*); but the commentator of this text states that as per this text such ceremonial preparation is not necessary.
3. During daily worship this text prescribes one enclosure (*āvaraṇa*) which is called *śaktyāvaraṇa* (enclosure with nine *Śakti*-s), while other texts prescribe *garbhāvaraṇa* (enclosure with *brahman*-s and *aṅga*-s).
4. During occasional worship, this text prescribes three more enclosures *garbhāvaraṇa*, *lokapālāvaraṇa* and *astrāvaraṇa*; while other texts have four, five or six enclosures.
5. As per this text the ceremonies for the preparation of *kuṇḍa* are two only; other texts prescribe eight, thirteen, fourteen, seventeen or eighteen; as per this text the ceremonies for the preparation of fire for fire ritual are five; while as per other texts they are six, seven or ten.

The special feature of this text is that it is not divided into the four traditional sections named as *jñāna*, *kriyā*, *yoga* and *caryā*, but the subject matter of these sections has been distributed and dealt with in short in the 27 *paṭala*-s.

Summary of *paṭala*-s.

Paṭala 1. Formation of mantra-s (*mantroddhāra*).

This is an introductory chapter. *Vātulāgama* containing one crore of verses was first revealed by the Supreme. Later a condensed version in one lakh of verses was revealed by Śiva to his son Kārtikeya. Again being requested by his

son for the benefit of those who are unable to grasp this big version, an essence of this version in 350 verses was given which is called *Sārdhatriśati*. After the introduction, details about the *nāda*, the subtle sound, the gross sound, the syllable Oṃ, the alphabet, the formation of mantra-s, the most necessary formulas, and *mudrā* are explained.

Paṭala 2. Placing of mantra-s on subtle and gross body (*antaḥkaraṇavinyāsa*).

Before performing any ritual, one should purify both of his subtle and gross bodies. This purification is different from the purification of the body by bath. This is done by a certain method of breath-control (*prāṇāyāma*) together with recitation of mantra-s, and also by placing mantra-s on different parts of the body.

Paṭala 3. Water-bath (*snāna*).

A bath with water is a daily rite (*nitya*); but one could also have to take baths occasionally (*naimittika*) during eclipses etc, or to purify from impurity caused by deaths of relations, or by touching what is not to be touched. The bath could be *kāmya* (for desired purposes) when it is taken, as prescribed in texts, for the purpose of obtaining some desire. Then details of purificatory bath (*malasnāna*), ceremonial bath (*vidhisnāna*), the morning rite (*sandhyāvandana*), oblations of water (*tarpaṇa*) to Gods, sages, and ancestors are given.

Paṭala 4. Bath with ashes (*bhasmasnāna*).

Normally after a bath with water, one should have a bath with ashes. In case of inability due to age, or sickness, this could be performed, even without taking previously a water-bath. Though daily rites could be performed after such bath, the water oblations which are prescribed after the water-bath are not to be performed.

Paṭala 5. Śiva-worship (*arcana*).

The details of Śiva-worship are the subject matter of this chapter. It is to be performed after the two baths and the purification of bodies explained in *paṭala-s* 2, 3 and 4. These rules of worship are to be followed in case of worship in a diagram (maṇḍala) dealt with in chapter 7. The Śiva-worship is of two kinds, internal and external. The internal worship is done by mental process, and external worship on some symbol such as a liṅga. The procedure is same for both.

In the daily worship there is worship of one *āvaraṇa* (enclosure) only; it is the worship of Śiva in the centre of a lotus seat surrounded by nine *śakti*-s i.e.

eight *śakti*-s on lotus petals in directions and sub-directions and the ninth one by his side. The Supreme is invoked (*āvāhana*) in the beginning and is allowed to go (*visarjana*) after the completion of the ritual.

Paṭala 6. Fire-worship (*agni-kārya*).

After daily worship, the ceremonial details for preparation of *kuṇḍa* and also of fire, and rituals to be performed therein are given. The practical rules for the preparation of *kuṇḍa* not found here are to be supplemented from other texts.

Paṭala 7. The diagram (*maṇḍala*).

In the previous *paṭala*-s the daily duties pertaining to an initiated one have been described. In this chapter, some special rituals to be performed for desired purposes by a *sādhaka* are enjoined. Selecting a place, having purified it, one is to prepare a square diagram with an eight petalled lotus in its centre. Two pots with consecrated water are to be placed in the north-east. Lord Śiva and the nine *śakti*-s are to be worshipped in the lotus as detailed in the chapter 5. Around the lotus one should worship three more *āvaraṇa*-s (enclosures), eight deities in directions and sub-directions in each enclosure. They are *garbhā-varaṇa* (Brahman-s and aṅga-s), *lokapāla*-s (lords of directions) and *astra*-s (weapons). All these deities could be represented in the diagram by *svastika* marks. There should be *vīthi*-s (ways) around each enclosure and eight *dvāra*-s (entrances), two in each direction of the diagram.

Such a diagram and the connected rituals are also prescribed during initiation ceremony (*paṭala* 8).

On completion of this ritual the *sādhaka* is to take a bath with the water of the two pots mentioned above.

Paṭala 8. Initiation (*dīkṣā*).

The rituals to be performed by an *ācarya* to initiate a disciple are explained in this chapter.

The *dīkṣā* is of two kinds *samaya* and *nirvāṇa*. The *tattvadīkṣā* and the *jñānadīkṣā* are included in the second variety.

द्वि० का० ७.२३ पू० ,,
बृ० का० पत्र २१२ तत्र

सार्धत्रि० २३.२४ पू० विषयी विषयासक्तो याति देहान्तके शिवम्।
द्वि० का० ७.२३ उ० ,,
बृ० का० पत्र २१२ विशयी विषयाशक्तो देहान्तिके

सार्धत्रि० २३.२४ उ० ज्ञानादेवास्य शास्त्रस्य सर्वावस्थोऽपि मानवः ।
बृ० का० पत्र २१२ ,,
द्वि० का० ७.२४ पू० पापासक्तोऽपि

सार्धत्रि० २३.२५ पू० ब्रह्महत्याश्वमेधाद्यैः पुण्यपापैर्न लिप्यते ।
द्वि० का० ७.२४ उ० ,,
बृ० का० पत्र २१२ मेधाभ्यां

सार्धत्रि० २३.२५ उ० चोदको बोधकश्चैव मोक्षदश्च परः स्मृतः ।
द्वि० का० ७.२५ पू० ,,

सार्धत्रि० २३.२६ पू० इत्येवं त्रिविधो ज्ञेय आचार्यस्तु महीतले ।
द्वि० का० ७.२५ उ० इत्येते त्रिविधा ज्ञेया आचार्यास्तु

सार्धत्रि० २३.२६ उ० चोदको दर्शयेन्मार्गं बोधकः स्थानमादिशेत् ।
द्वि० का० ७.२६ पू० ,,

सार्धत्रि० २३.२६ तृ० मोक्षदस्तु परं तत्त्वं यज्ज्ञात्वामृतमश्नुते ।
द्वि० का० ७.२६ उ० यद्गत्वा न निवर्तते ।

सार्धत्रि० २४.४ उ० सूर्यस्य ग्रहणे वत्स प्रत्यक्षयजनं स्मृतम् ।
बृ० का० पत्र २१२ प्रत्यक्षं

सार्धत्रि० २५.१ पू० लिङ्गोद्धारं प्रवक्ष्यामि नैष्ठिकानां तु षण्मुख ।
बृ० का० पत्र २१२ नैष्ठितानां

सार्धत्रि० २५.१ उ० पञ्चरात्रं त्रिरात्रं वा क्षपयित्वाधिवासयेत् ।
बृ० का० पत्र २१२ त्रिरात्रं पञ्चरात्रं वा

सार्धत्रि० २५.४ उ० पञ्चपञ्चाहुतीर्दत्त्वा अरकेषु यथाक्रमम् ।
बृ० का० पत्र २१२ र्दद्यात्प्रतिव . . यथाक्रमात् ।

सार्धत्रि० २५.५ पू० हृन्मन्त्रेण तु तं दद्यात्संहारेण तु बुद्धिमान् ।
बृ० का० पत्र २१२ कर्तव्यं संहारेणाथ

सार्धत्रि० २५.५ उ० एवं कृत्वा यथापूर्वं जनयेदत्र नैष्ठिकम् ।
बृ० का० पत्र २१२ – जनयेत्तत्र

सार्धत्रि० २५.६ पू० इष्टिं सांहारिकीं स्कन्द कुर्याद्वै नैष्ठिकस्य तु ।
बृ० का० पत्र २१२ इष्टिसंहारिणीं कृत्वा वै

सार्धत्रि० २५.६ उ० सृष्टिसंहारन्यायेन इष्ट्वा सिध्यति नैष्ठिकः ।
बृ० का० पत्र २१२ योगेन कृत्वा शुध्यन्ति नैष्ठिकाः ।

सार्धत्रि० २५.६ तृ० आसक्तो विषयेष्वेव कर्मदोषैर्न लिप्यते ।
बृ० का० पत्र २१२ विषयेष्वेवं

एतद्ग्रन्थसंपादनायोपयुक्तमातृकासूची

अ. अस्मद्ग्रन्थालयपत्रात्मकहस्तलिखितमातृकायां विद्यमानो वृत्तिसहितो भागः। अङ्कः टि० ७४ बि। इयं मातृका मद्रपुरीराजकीयप्राच्यतालपत्रकोशागारे विद्यमानाया आर्. १४४४५ अङ्किताया मातृकायाः प्रतिकृतिः।

आ. अस्मद्ग्रन्थालयपत्रात्मकहस्तलिखितमातृकायां विद्यमानो वृत्तिसहितो भागः। अङ्कः टि० ३१७। इयं मातृका तिरुवण्णामलै रामलिङ्गशिवाचार्यस्य गृहाल्लब्धाया ग्रन्थाक्षरतालपत्रमातृकायाः प्रतिकृतिः।

इ. अस्मद्ग्रन्थालयपत्रात्मकहस्तलिखितमातृकायां विद्यमानो मूलमात्रो भागः। अङ्कः टि० ७४ ए। इयं मातृका मद्रपुरीराजकीयप्राच्यतालपत्रकोशागारे विद्यमानाया आर्० १४४४४ अङ्किताया मातृकायाः प्रतिकृतिः। अस्यां मातृकायां २७ तमे पटले दशमश्लोकपर्यन्तमेव विद्यते।

ई. अस्मद्ग्रन्थालयपत्रात्मकहस्तलिखितमातृकायां विद्यमानो मूलमात्रो भागः। अङ्कः टि० ३१७। इयं मातृका तिरुवण्णामलै रामलिङ्गशिवाचार्यस्य गृहाल्लब्धाया ग्रन्थाक्षरतालपत्रमातृकायाः प्रतिकृतिः।

उ. अस्मद्ग्रन्थालयपत्रात्मकहस्तलिखितमातृकायां विद्यमानो मूलमात्रो भागः। अङ्कः टि० ६०। इयं मातृका मद्रपुरीराजकीयप्राच्यतालपत्रकोशागारे विद्यमानाया आर्० १६८०५ अङ्किताया मातृकायाः प्रतिकृतिः। अस्यां मातृकायामष्टमपटलसप्तमश्लोकस्य चतुर्थपादप्रभृत्येव विद्यते।

मु. मुद्रितम् सार्धत्रिशतिकालोत्तरागमः। "राफैलतोरल्ला" इत्याख्येन विदुषा रोमापुर्यां स्थितस्य विश्वविद्यालयस्य प्राच्यविमर्शपत्रिकायां (संपुट ५० सञ्चिका ३–४ १९७६, २७९–३१८ पृष्ठेषु) प्रकाशितः। (मूलमात्रम्)

सार्धत्रिशतिकालोत्तरम्

(मूलमात्रम्)

सार्धत्रिशतिकालोत्तरम्

प्रथमः पटलः

भगवन् देवदेवेश लोकनाथ जगत्पते ।
मन्त्रतन्त्रं त्वया प्रोक्तं विस्तराद्वस्तुसाधनम् ॥१॥
अल्पायुषस्त्विमे मर्त्या अल्पवीर्याल्पबुद्धयः ।
अल्पसत्त्वाल्पवित्ताश्च लोभमोहासमन्विताः ॥२॥
अल्पग्रन्थं महार्थं च पदार्थानीकसंकुलम् ।
वक्तुमर्हसि देवैषां प्रसादार्थं मम प्रभो ॥३॥
अथातः संप्रवक्ष्यामि शास्त्रं परमदुर्लभम् ।
नाम्ना तु वातुलात्तन्त्राद्दध्नो घृतमिवोद्धृतम् ॥४॥
नादाख्यं यत्परं बीजं सर्वभूतेष्ववस्थितम् ।
मुक्तिदं परमं किंच दिव्यसिद्धिप्रदायकम् ॥५॥
तद्विदित्वा महासेन देशिकः पाशहा भवेत् ।
आगोपालाङ्गना बाला म्लेच्छाः प्राकृतभाषिणः ॥६॥
अन्तर्जलगताः सत्त्वास्तेऽपि नित्यं ब्रुवन्ति तम् ।
स्थूलं सूक्ष्मं परं ज्ञात्वा कर्म कुर्याद्यथेप्सितम् ॥७॥
स्थूलं शब्द इति प्रोक्तं सूक्ष्मं चिन्तामयं भवेत् ।
चिन्तया रहितं यत्तु तत्परं परिकीर्तितम् ॥८॥
सान्तं सर्वगतं शून्यं मात्राद्वादशके स्थितम् ।
ब्रह्माणि ह्रस्वाः प्रोक्तानि दीर्घा ह्यङ्गानि षण्मुख ॥९॥
अनुस्वारो भवेन्नेत्रं सर्वेषां चोपरि स्थितः ।
सविसर्गं भवेदस्त्रमनुस्वारविवर्जितम् ॥१०॥
षष्ठं त्रयोदशान्तं च पञ्चमे विनियोजयेत् ।
शिवं तत्तु विजानीयान्मन्त्रमूर्ति सदाशिवम् ॥११॥
षष्ठमस्य द्वितीयं तु चतुर्थाद्येन संयुतम् ।
द्वितीयात्पञ्चमाच्चैव आदिमं योजयेत्पुनः ॥१२॥
हन्ति विघ्नाञ्शिवास्त्रेण शिखया मुक्तिदं स्मृतम् ।
एतत्पाशुपतं दिव्यं सर्वपाशनिकृन्तनम् ॥१३॥
ब्रह्माणि च शिवं साङ्गं नेत्रं पाशुपतं च यत् ।
समासात्कथितः सर्वो मन्त्रोद्धारस्त्वयं शुभः ॥१४॥
अस्य मुद्रां प्रवक्ष्यामि साधकानां हिताय वै ।
हस्ताभ्यां संस्पृशेत्पादादूर्ध्वं यावत्तु मस्तकम् ॥१५॥
एषा मुद्रा महामुद्रा सर्वकामार्थसाधिका ।
करन्यासं पुरा कृत्वा मुद्राबन्धं तु कारयेत् ॥१६॥
तलिकां हस्तपृष्ठं च अस्त्रबीजेन शोधयेत् ।
कनिष्ठामादितः कृत्वा अङ्गुष्ठं चाप्यपश्चिमम् ॥१७॥

S.Ar.V. 3/10, p. 102

ब्रह्माणि विन्यसेत्तत्र तथैवाङ्गानि यत्नतः ।
प्रासादं विन्यसेत्पश्चाद्व्यापिनं सर्वतोमुखम् ॥१८॥

इति प्रथमः पटलः

द्वितीयः पटलः

अन्तःकरणविन्यासो भूतशुद्धिस्तथैव च ।
भूतशुद्धि पुरा कृत्वा ततोऽन्तःकरणं कुरु ॥१॥
हृद्बीजं पार्थिवे युक्तं पार्थिवीं धारयेत्क्रमात् ।
शिरोऽप्सु तेजसि शिखां कवचं वायुना सह ॥२॥
अस्त्रं च शिवसंयुक्तमाकाशं धारयेत्सदा ।
हुंफडन्तेन पटलं भित्त्वा चोर्ध्वं विशेत्ततः ॥३॥
पञ्चोद्घाताश्च चत्वारस्त्रयो द्वावेक एव च ।
द्वादशान्ते निरालम्बं विज्ञानं केवलं स्थितम् ॥४॥
दीक्षायां तु यथा वत्स तत्प्रयोगं समाचरेत् ।
प्रक्रियान्तस्थममृतं स्रवन्तं चिन्तयेत्ततः ॥५॥
ओमित्यनेन कमलं योगपीठं तदा भवेत् ।
सूर्यमण्डलसंकाशमकारं ह्यात्मसंभवम् ॥६॥
विद्यातत्त्वमुकारं तु शिवतत्त्वं मकारजम् ।
पुर्यष्टकं च तन्मात्रं तुर्यातीतं सदाशिवम् ॥७॥
चिन्तयेत्परमं धाम सुषुम्नाभिन्नमस्तकम् ।
तेनाप्लावितमात्मानं परिपूर्णं विचिन्तयेत् ॥८॥
योऽभ्यसेदीदृशं मर्त्यः समाधिं मृत्युनाशनम् ।
न तस्य जायते मृत्युरिति शास्त्रस्य निश्चयः ॥९॥
पश्चाद्गुरोः साधकानां मूर्तेस्तु ग्रहणं भवेत् ।
ईशानाद्यास्तु सद्यान्तं मूर्ध्न आरभ्य विन्यसेत् ॥१०॥
नेत्रं दत्त्वा तदावाह्यो देवदेवः सदाशिवः ।
सर्वज्ञं च तदात्मानं चिन्तयेत्तु विचक्षणः ॥११॥
हृदयं च शिरश्चैव शिखां कवचमेव च ।
न्यसेदस्त्रं च मन्त्रज्ञो यथास्थानेष्वनुक्रमात् ॥१२॥
हृदयेऽर्चाविधानं तु नाभौ होमं प्रकल्पयेत् ।
ललाटे त्वीश्वरं ध्यायेद्वरदं सर्वतोमुखम् ॥१३॥
यथार्चने तथाग्नौ च ध्याने स्नाने तथैव च ।
यथा देवे तथा देहे चिन्तयेत्तु विचक्षणः ॥१४॥
कृत्वान्तःकरणं ह्येवं पश्चाद्बाह्यं तु षण्मुख ।
सबाह्याभ्यन्तरं कृत्वा पश्चाद्यजनमारभेत् ॥१५॥

इति द्वितीयः पटलः

तृतीयः पटलः

अतः परं प्रवक्ष्यामि स्नानं पापहरं शुभम्।
सकृज्जप्तेन संगृह्य मृदा अस्त्रेण मन्त्रवित् ॥१॥
मलस्नानं पुरा कृत्वा सकृज्जप्त्वा तु संहिताम्।
तामेव मृत्तिकां पश्चादभिमन्त्र्य सकृत्सकृत् ॥२॥
भागत्रयं ततः कृत्वा एकमस्त्रेण मन्त्रयेत्।
द्वितीयं ब्रह्मभिर्वत्स शिवजप्तं तृतीयकम् ॥३॥
अस्त्रजप्तेन भागेन दिशां बन्धं तु कारयेत्।
शिवजप्तेन तीर्थं तु ब्रह्मजप्तेन विग्रहम् ॥४॥
कुण्ठयित्वा ततः स्नायाच्छिवतीर्थस्य मध्यतः।
चक्रवर्त्युपचारेण सुगन्धामलकादिभिः ॥५॥
उपस्पृश्य विधानेन सन्ध्यां वन्देत साधकः।
मन्त्रैः सर्वैः सकृद्वत्स उपस्थानं तु कारयेत् ॥६॥
अभिषेकं पुरा कृत्वा ततः संध्यां समाचरेत्।
अस्त्रं न योजयेद्देहे क्षिपेत्तद्बहिरेव च ॥७॥
शरीरं शोषयेद्वत्स तेनात्मनि न योजयेत्।
विघ्नेषु पाशजालेषु सदा योज्यं विचक्षणैः ॥८॥
हृदयेन ततो विद्वान् पितृदेवांश्च तर्पयेत्।
संहारं तस्य तीर्थस्य प्रासादेनैव कारयेत् ॥९॥

इति तृतीयः पटलः

चतुर्थः पटलः

भस्मस्नानं प्रवक्ष्यामि तदूर्ध्वं च षडानन।
मन्त्रैः सर्वैः सकृद्भस्म अभिमन्त्र्य यथाक्रमम् ॥१॥
जलस्नानं पुरा कृत्वा अस्त्रबीजेन षण्मुख।
विधिस्नानं ततः कुर्यान्मूर्ध्न आरभ्य मन्त्रवित् ॥२॥
ईशानेन शिरः स्नायान्मुखं तत्पुरुषेण तु।
हृदयं बहुरूपेण गुह्यं वै गुह्यकेन तु ॥३॥
सर्वाङ्गानि त्वजातेन अभिषेकं तु पञ्चभिः।
उपरिष्टात्प्रसादेन स्नानं कुर्वीत षण्मुख ॥४॥

इति चतुर्थः पटलः

पञ्चमः पटलः

यजनं संप्रवक्ष्यामि यथाविध्यनुपूर्वशः।
बीजाङ्कुरं पुरा शक्त्या पश्चादानन्तमासनम् ॥१॥

अनन्तं चान्तगं कुर्यात्क्रमेणैव षडानन।
हृदयं कर्णिका पद्मं धर्मं ज्ञानादिमेव च ॥२॥
वैराग्यं च तथैश्वर्यमीशान्तं वह्नितो न्यसेत्।
शक्तिभिः केसरव्यूहं हृदयेन च कल्पयेत् ॥३॥
आवाहयेत्ततो देवं हृदयेन तु षण्मुख।
स्थापनं पाद्यमर्घ्यं च तथाचमनमेव च ॥४॥
स्नपनं पूजनं चैव हृदयेन तु कारयेत्।
उक्तानुक्तं च यत्किंचित्तत्सर्वं हृदयेन तु ॥५॥
एकावरणमेतत्तु सर्वकामार्थसाधनम्।
सर्वतन्त्रेषु सामान्यं सर्वज्ञानेषु चोत्तमम् ॥६॥

इति पञ्चमः पटलः

षष्ठः पटलः

अतः परं प्रवक्ष्यामि अग्निकार्यविधिं क्रमात्।
अस्त्रेणोल्लेखनं कुर्याद्वर्मणाभ्यक्षणं ततः ॥१॥
शक्तिन्यासं ततो दर्भैर्हृदयेनैव कारयेत्।
हृदा वै शक्तिगर्भे तु प्रक्षिपेज्जातवेदसम् ॥२॥
गर्भाधानादिकं कृत्वा निष्कृतिं चाप्यपश्चिमाम्।
हृदयेनैव मन्त्रज्ञः सर्वकर्माणि कारयेत् ॥३॥
पश्चात्पद्मविधानं तु प्रागुक्तं परिकल्पयेत्।
शिवादिसर्वमन्त्रांश्च होमयेदनुपूर्वशः ॥४॥

इति षष्ठः पटलः

सप्तमः पटलः

अतः परं प्रवक्ष्यामि मण्डलं सार्वकामिकम्।
भूमिसंशोधनं कृत्वा शास्त्रदृष्टेन कर्मणा ॥१॥
अधिवासं ततः कृत्वा नक्षत्रे गुरुणान्विते।
आलिखेन्मण्डलं प्राज्ञः सर्वसिद्धिप्रदं शुभम् ॥२॥
सूत्रेण सुमितं कृत्वा चतुरश्रं समन्ततः।
मध्ये पद्मं प्रतिष्ठाप्यमष्टपत्रं सकर्णिकम् ॥३॥
एकहस्तं द्विहस्तं वा चतुर्हस्तमथापि वा।
स्वतन्त्रविहितं प्राज्ञो लिखेदावरणत्रयम् ॥४॥
वाहयेत्पश्चिमद्वारमाचार्यः सुसमाहितः।
आग्नेय्यां कारयेत्कुण्डं हस्तमात्रप्रमाणतः ॥५॥
यज्ञकर्मविधिं कुर्यात्सुसमिद्धे हुताशने।

पूर्वादारभ्य वक्त्रादीन्विन्यसेदनुपूर्वशः ॥६॥
पवित्राणि पुरा न्यस्य शिवाङ्गानि न्यसेत्ततः।
आग्नेय्यां हृदयं न्यस्य ऐशान्यां तु शिरस्तथा ॥७॥
नैर्ऋत्यां तु शिखा ज्ञेया कवचं वायुगोचरे।
अस्त्रं दिक्ष्वथ विन्यस्य कर्णिकायां सदाशिवम् ॥८॥
गर्भन्यासविधिः प्रोक्तो द्वितीयावरणे शृणु।
हृदा पूर्वं समारभ्य लोकपालान्प्रपूजयेत् ॥९॥
[तृतीयावरणेऽस्त्राणि स्वमन्त्रेण प्रपूजयेत्।]
संक्षेपेण मया स्कन्द विधानं परिकीर्तितम् ॥१०॥
अनुक्तं यद्भवेत्किंचित्तत्सर्वं मूलमाश्रयेत्।
एवं विधिविधानज्ञो दीक्षाकर्म समाचरेत् ॥११॥

इति सप्तमः पटलः

अष्टमः पटलः

अथ दीक्षां प्रवक्ष्यामि पञ्चतत्त्वव्यवस्थिताम्।
पृथिव्यापस्तथा तेजो वायुराकाशमेव च ॥१॥
पञ्चैतानि च तत्त्वानि यैर्व्याप्तमखिलं जगत्।
सर्वतत्त्वानि तत्रैव द्रष्टव्यानि तु साधकैः ॥२॥
ब्रह्माण्डे तु निवृत्तिर्वै शतरुद्रावधिस्थिता।
तदूर्ध्वे तु प्रतिष्ठा स्याद्यावदव्यक्तगोचरम् ॥३॥
ततो विद्या नियुक्ता सा यावद्विद्येश्वरान्तिकम्।
शान्तिस्तदूर्ध्वमध्वान्ते शक्तिरेव शिवे पदे ॥४॥
अज्ञात्वैतानि तत्त्वानि यो दीक्षां कर्तुमिच्छति।
वृथा परिश्रमस्तस्य नैव तत्फलमाप्नुयात् ॥५॥
निवृत्तिः पृथिवी ज्ञेया प्रतिष्ठा आप उच्यते।
विद्यां तेजो विजानीयाद्वायुः शान्तिः प्रकीर्तितः ॥६॥
शान्त्यतीता भवेद्व्योम तत्परं शान्तमव्ययम्।
तं विदित्वा महासेन श्वपचानपि दीक्षयेत् ॥७॥
निर्वृत्तिं हृदयेनैव प्रतिष्ठां शिरसा गुरुः।
शिवो विद्यां तु शिखया शान्तिं वै कवचेन तु ॥८॥
शान्त्यतीतं परं व्योम प्रासादेन तु होमयेत्।
एकैकस्य शतं होम्यमित्येवं पञ्च होमयेत् ॥९॥
पञ्च पूर्णाहुतीर्दद्यात्प्रासादेन तु षण्मुख।]
प्रायश्चित्तविशुद्ध्यर्थमष्टावेकैकयाहुतीः॥१०॥
अस्त्रबीजेन मन्त्रज्ञो होमयेदनुपूर्वशः।
एवं समाप्यते दीक्षा जननादिविवर्जिता ॥११॥
हुतेनैव तु मुच्यन्ते साधका जन्मबन्धनात्।

इयमिष्टिर्न प्रकाश्या गोपनीया प्रयत्नतः ॥१२॥
रहस्यं सर्वतन्त्राणामेष संस्कार उत्तमः।
योनिन्यासादिकं कर्मोद्धारणं चाप्यपश्चिमम् ॥१३॥
शोधनानुक्रमं देव कथयस्व यथाविधि।
दश सप्त च ये शोध्याः पृष्टाश्चात्र त्वया गुह ॥१४॥
यस्य यद्बीजमुक्तं तु तद्वक्ष्याम्यनुपूर्वशः।
योनिबीजं तु हृदये कल्पयेच्च यथाक्रमम् ॥१५॥
अर्चनं प्रोक्षणं चैव ताडनं च तथा परम्।
संधानं चैव संयोगं निक्षेपं तदनन्तरम् ॥१६॥
अर्चनं च ततः कुर्याद्गर्भाधानं तथैव च।
जननं चाधिकारं च भोगं चैव लयं तथा ॥१७॥
स्वतत्त्वे चाहुतिशतं हृदयेन तु षण्मुख।
पाशच्छेदं तथास्त्रेण दद्यात्पूर्णाहुतिं ततः ॥१८॥
हृदयेनात्र तूद्धारः कर्तव्यश्चाप्यनुक्रमात्।
उद्धारे प्रोक्षणे चैव ताडने च तथैव च ॥१९॥
हुंफट्कारसमायुक्तं कर्तव्यं चानुपूर्वशः।
संधानं चैव तत्त्वानां कर्तव्यं तु यथाक्रमम् ॥२०॥
तत्त्वे तत्त्वे त्विदं कर्म एष एव विधिक्रमः।
एभिस्तु शोधितैर्वत्स विधिं प्राप्नोति पुष्कलम् ॥२१॥
अन्यथा नैव मुच्यन्ते विधिहीनाः षडानन।
पूर्णाहुतिप्रदानं च कर्तव्यं धारणायुतम् ॥२२॥
अमृतं यत्परं वत्स स्रवन्तं मनसा स्मरेत्।
दीक्षाप्रकरणे ह्येतद्योज्यं सर्वत्र सर्वदा ॥२३॥
लिङ्गोद्धारविधाने च नित्यसंस्कारकर्मसु।
पशोर्ग्रहणमोक्षं तु यत्त्वयोक्तं पुरानघ ॥२४॥
पाशा आभ्यन्तरा बाह्याः कस्मिन्स्थाने कथं स्थिताः।
कस्मिन् स्थाने तु विच्छेद्याः सद्य उत्क्रमणं कथम् ॥२५॥
पशूनां चैव निर्देशं कथयस्व महेश्वर।
आदिमस्य द्वितीयेन गृहीत्वात्मानमात्मना ॥२६॥
मुष्टिना यावत्स्थानं तन्नयेत्तं सुविचक्षणः।
विषुवत्संप्रयोगेण ब्रह्माद्यास्ते शिवान्तकाः ॥२७॥
एकत्र समतां यान्ति अन्यथा तु पृथक् पृथक्।
द्वादशान्ते तु ते छेद्याः शरेणास्त्रेण संयुताः ॥२८॥
तदा सायुज्यतां यान्ति समयैः परिवर्जिताः।
अनिर्दिष्टमसंज्ञं च यत्कृतं तद्वृथा भवेत् ॥२९॥
तमुद्दिश्य कृतं कर्म मोक्षदं तन्न संशयः।
सूर्यस्य ग्रहणे वत्स विषुवद्योगसंयुतम् ॥३०॥
आयामान्ते यदा छिन्नं तदा चोत्क्रमते ध्रुवम्।
मनसि ग्रथिताः पाशाः सूत्रे मणिगणा इव ॥३१॥

हृत्पद्माद्यावत्तत्पद्मं मनस्तन्तुवितानितम् ।
तद्दृष्ट्वा छेदनं कुर्यान्मनोवृत्त्या मनश्छिदा ॥।३२ ॥
मनसा मनसि छिन्ने जीवः केवलतां व्रजेत् ।
विस्तरं त्यज देवेश संक्षेपात्कथयस्व मे ॥३३॥
येन विज्ञानमात्रेण पशून् मोचयते क्षणात् ।
शृणु षण्मुख तत्त्वेन येन मोक्षो ध्रुवं भवेत् ॥३४ ॥
प्रयोगेणातिसूक्ष्मेण योगदृष्टेन मन्त्रवित् ।
दिव्येन योगमार्गेण शक्तिं यः प्रेरयेत्तु ताम् ॥३५॥
तं विदित्वा महासेन जीवं प्राणमयं बुधः ।
विषुवत्संप्रयोगेण योजयेच्छाश्वते पदे ॥ ३६ ॥
योगं तु विषुवं प्राप्य को न मुच्येत बन्धनात् ।
पृथिव्याद्यब्जनाडीवैं शब्दादिगुणवायुभिः ॥३७॥
आत्माधिदेवता मन्त्राञ्ज्ञात्वा मुक्तस्तु मोचयेत् ।
नाडीविवरसंबन्धा ऊर्ध्वनाला ह्यधोमुखाः ॥३८॥
ग्रन्थिद्वययुताः सर्वे हुंफडन्तेन योजिताः ।
ततश्चोर्ध्वत्वमायान्ति उद्घातैः पूर्ववद्गुह ॥३९॥
क्ष्माद्यानालोक्य मनसा सबाह्याभ्यन्तरं पुनः ।
तत्त्वे तत्त्वे नियोक्तव्या वियुक्ता निरहंकृता ॥४०॥
ब्रह्माद्यान्श्रावयेद्वत्स न पुनर्जन्मतां व्रजेत् ।
तेजश्चेतो द्विरभ्यस्य आयामो भास्करस्य तु ॥४१॥
ताडयित्वा पुरा वत्स ग्रहणं पूर्ववद्भवेत् ।
भित्त्वार्गलां न्यसेद्योनिं तत्त्वं तत्त्वेन संधयेत् ॥
शक्तिभिः संपुटीकृत्य वौषडन्तेन निक्षिपेत् ॥४२॥

इत्यष्टमः पटलः

नवमः पटलः

अभिषेकं प्रवक्ष्यामि संक्षेपान्न तु विस्तरात् ।
हिताय साधकेन्द्राणां परमेशेन भाषितम् ॥१॥
मृण्मयं कलशं ह्येकं चन्दनेन विलेपितम् ।
ब्रह्मपत्रपुटं वाथ पद्मपत्रमथापि वा ॥२॥
सर्वौषधियुतं कृत्वा सर्वगन्धोपशोभितम् ।
शतमष्टोत्तरं जप्त्वा प्रासादं सर्वतोमुखम् ॥३॥
यागं कृत्वा तु पूर्वोक्तमभिषेकं तु कारयेत् ।
शुभनक्षत्रदिवसे मुहूर्ते करणान्विते ॥४॥
बहुमङ्गलनिर्घोषैः शङ्खवादित्रनिःस्वनैः ।
ब्रह्मघोषैश्च विविधैर्नृत्तगीतसमन्वितैः ॥

अनुज्ञातोऽभिषिक्तश्च आचार्यः पाशहा भवेत् ॥५॥

इति नवमः पटलः

दशमः पटलः

नाडीचक्रं परं सूक्ष्मं प्रवक्ष्याम्यनुपूर्वशः ।
नाभेरधस्ताद्यत्कन्दमङ्कुरास्तत्र निर्गताः ॥१॥
द्वासप्ततिसहस्राणि नाभिमध्ये व्यवस्थिताः ॥
तिर्यगूर्ध्वमधश्चैव व्याप्तं नाभेः समन्ततः ॥२॥
चक्रवत्संस्थिता नाड्यः प्रधाना दश तासु याः ।
इडा च पिङ्गला चैव सुषुम्ना च तृतीयिका ॥३॥
गान्धारी हस्तिजिह्वा च पूषा चैव यशास्तथा ।
अलम्बुषा कुहूश्चैव शङ्खिनी दशमी स्मृता ॥४॥
दश प्राणवहा ह्येता नाडयः परिकीर्तिताः ।
प्राणोऽपानः समानश्च उदानो व्यान एव च ॥५॥
नागः कूर्मोऽथ कृकरो देवदत्तो धनंजयः ।
प्राणस्तु प्रथमो वायुर्नवानामपि स प्रभुः ॥६॥
प्राणः प्राणमयः प्राणो विसर्गः पूरणं प्रति ।
नित्यमापूरयत्येष प्राणिनामुरसि स्थितः ॥७॥
निश्वासोच्छ्वासकासैस्तु प्राणो जीवसमाश्रितः ।
प्रयाणं कुरुते यस्मात्तस्मात्प्राणः प्रकीर्तितः ॥८॥
अपानयत्यपानस्तु आहारं च नृणामधः ।
मूत्रशुक्लमलान्वायुरपानस्तेन कीर्तितः ॥९॥
पीतं भक्षितमाघ्रातं रक्तपित्तकफादिकम् ।
समं नयति गात्रेषु समानो नाम मारुतः ॥१०॥
स्पन्दयत्यधरं वक्त्रं नेत्रगात्रप्रकोपनः ।
उद्वेजयति मर्माणि उदानो नाम मारुतः ॥११॥
व्यानो विनामयत्यङ्गं व्यानो व्याधिप्रकोपनः ।
प्रीतेर्विनाशकरणो व्यापनाद्व्यान उच्यते ॥१२॥
उद्गारे नाग इत्युक्तः कूर्म उन्मीलने स्मृतः ।
कृकरस्तु क्षुते चैव देवदत्तो विजृम्भणे ॥
धनंजयः स्थितो घोषे मृतस्यापि न मुञ्चति ॥१३॥
इत्येतद्वायुवृन्दं हृदि [च वि]निहितं नाभिचक्रप्रतिष्ठं
निश्वासोच्छ्वासकासैः श्वसनपुरमधः कम्पिताघूर्णितैश्च ।
नित्यं-नित्याल्पजन्मा व्यसनयति पशुं यौवने बालभावे
आक्रान्तो वायुरेकः स जननमरणैः क्रीडति भ्रान्तसत्त्वैः ॥१४॥
नाडीचक्रं यथावस्थं प्रवक्ष्याम्यनुपूर्वशः ।
दशारं चक्रमेतत्तु विभागो जायते यथा ॥१५॥

चक्रे भ्रमत्यसौ जीवो दशस्थानेष्वनुक्रमात् ।
स जीवो जीवलोकस्य बुध्यन्ते नैव मोहिताः ॥१६॥
जीवः प्रयाति दशधा तेन चक्रं प्रकीर्तितम् ।
नाडीचक्रमिति प्रोक्तं येन संक्रामति ह्यसौ ॥१७॥
हृद्व्योममध्ये पङ्कजमष्टदलं कर्णिका च तस्यान्तः ।
हृदये पङ्कजमर्केन्द्वग्निहिरण्यद्योताभाः शक्तयस्तस्मिन् ॥१८॥
उपरिचरी खलु शक्तिस्तासां प्राग्भाविनी शिवस्य ततः ।
शक्तिचतुष्टयपङ्कजमध्ये पुरुषोऽलिरिव स लीनः ॥१९॥
शून्यमरुत्संदंशकगृहीतकरणात्मको हृदुभयतोऽपि ।
संयाति यत्र नेयः शुष्कदलं मारुतेनेव ॥२०॥
भ्राम्यति पङ्कजमध्ये कलाचतुष्कात्मपाशसंरुद्धः ।
गोलकमिव हेलाभिहतमुत्पतनं निपातनं कुरुते ॥२१॥
ईश्वरयोगाद्विषुवत्संक्रान्तिश्चैव सिद्धिसंयोगात् ।
सौरनियोगाद्दक्षिणमुदगयनं चान्द्रसंयोगात् ॥२२॥
अयने सव्यासव्ये द्वौ पुटकौ युग्मतो विषुवदाहुः ।
संक्रान्तिरितश्चेतश्च गच्छतस्तेन समाख्याता ॥२३॥
सौरः सव्यो मार्गश्चान्द्रमसश्चेतरः समाख्यातः ।
धन्योऽभिषेक इन्दुः सौरः खलु वह्निसंधाने ॥२४॥
ध्यानाद्यो विषुवति च प्राग्दलसंस्थो नृपावलेपी स्यात् ।
तेजस्वी च बुभुक्षा पीडा वा संजायतेऽग्निदिक्पत्रे ॥२५॥
याम्ये याम्यो भावो नैर्ऋते नैर्ऋतो विनिर्दिष्टः ।
वारुणपत्रे वरुणो मारुतपत्रे गतो मरुद्भावम् ॥२६॥
सौम्ये सौम्यो भावस्त्वैशे त्वैशः समाख्यातः ।
यां यां दिशमभिगच्छति तद्भावं निखिलमायाति ॥२७॥
पत्रान्तरालयोगाच्छून्यमिवात्मा ततो भाति ।
इति खलु पुद्गलचारो नाडीसंधानमण्डलं मुख्यम् ॥
कथितमिह सिद्धिहेतोर्बोद्धव्यं यत्नतः सिद्धम् ॥२८॥

इति दशमः पटलः

एकादशः पटलः

स जीवो जीवलोकस्य ज्ञायतेऽध्यात्मगो यथा ।
संशयो मे महादेव प्रसादीभव शूलधृक् ॥१॥
जीवस्य पुरुषाख्यस्य दर्शनं शृणु षण्मुख ।
कथयामि न संदेहः पुत्रस्नेहाद्विशेषतः ॥२॥
संक्रान्तिं विषुवं चैव अहोरात्रायनानि च ।
अधिमासमृणं चापि ऊनरात्रं धनं तथा ॥३॥
ऊनरात्रं क्षुतं ज्ञेयमधिमासो विजृम्भिका ।

*

ऋणं च कासो विज्ञेयो निश्वासो धनमुच्यते ॥४॥
उत्तरं दक्षिणं ज्ञेयं वामदक्षिणसंस्थितम् ।
मध्ये तु विषुवत्प्रोक्तं पुटद्वयविनिःसृतम् ॥५॥
संक्रान्तिः पुनरस्यैव स्वस्थानात्स्थान एव च ।
इडा च पिङ्गला चैव अमा चैव तृतीयिका ॥६॥
सुषुम्ना मध्यमे ह्यङ्गे इडा वामे प्रकीर्तिता ।
पिङ्गला दक्षिणे ह्यङ्गे एषु संक्रान्तिरुच्यते ॥७॥
ऊर्ध्वं प्राणो ह्यहः प्रोक्तः अपानो रात्रिरुच्यते ।
विभागा दश प्राणस्य यो वेत्त्येवं स वेदवित् ॥८॥
आयामो देहमध्यस्थः सोमग्रहणमिष्यते ।
देहातीतं तु तं विद्यादादित्यग्रहणं बुधः ॥९॥
अयुते द्वे सहस्रं तु षट्शतानि तथैव च ।
अहोरात्रेण योगीन्द्रो जपसंख्यां करोति सः ॥१०॥
प्राणायामं समासेन कथयामि तवाखिलम् ।
उच्चारयेत्तु प्रणवं स्वरेणैकेन योगवित् ॥११॥
उदरं पूरयित्वा तु वायुना यावदीप्सितम् ।
प्राणायामो भवेदेष पूरको देहपूरकः ॥१२॥
पिधाय सर्वद्वाराणि निश्वासोच्छ्वासवर्जितः ।
संपूर्णकुम्भवत्तिष्ठेत्प्राणायामः स कुम्भकः ॥१३॥
मुञ्चेद्वायुं ततश्चोर्ध्वं श्वासेनैकेन योगवित् ।
निश्वासयोगयुक्तस्तु यावदूर्ध्वं स रेचयेत् ॥१४॥
रेचकस्त्वेष विख्यातः प्राणसंशयकारकः ।
यत्तद्धृदि सदा पद्ममधोमुखमवस्थितम् ॥१५॥
विकसत्येतदूर्ध्वं तु पूरकेण तु पूरितम् ।
ऊर्ध्वस्रोतो भवेत्पद्मं कुम्भकेन निरोधितम् ॥१६॥
रेचकेन तथा क्षिप्तं सद्यः प्राणहरेण तु ।
मुक्त्वा हृदयपद्मं तु ऊर्ध्वस्रोतोव्यवस्थितम् ॥१७॥
रेचितो गच्छति हृचूर्ध्वं ग्रन्थि भित्त्वा क्षणेन तु ।
भित्त्वा कपालद्वारं तु जीवो हृचूर्ध्वं तु रेचितः ॥१८॥
सदाशिवपदं गत्वा न भूयो जन्म चाप्नुयात् ।
आयामः क्रियते तस्य नान्यस्य तु कदाचन ॥
स जीवो जीवलोकस्य मया प्रोक्तः समासतः ॥१९॥

इत्येकादशः पटलः

द्वादशः पटलः

चन्द्राग्निरविसंयुक्ता आद्या कुण्डलिनी तु या ।
हृत्प्रदेशे तु सा ज्ञेया अङ्कुराकारवत्स्थिता ॥१॥

सृष्टिन्यासं न्यसेत्तत्र द्विरभ्यासपदेरितम् ।
स्रवन्तं चिन्तयेत्तस्मिन्नमृतं साधकोत्तमः ॥२॥
अग्नीषोमात्मकं सर्वं जगत्स्थावरजङ्गमम् ।
चिन्तयेद्विपरीतं तु सिद्धिकामः समाहितः ॥३॥
स्वदेहं चिन्तयेद्विद्वान्दिव्यरूपमनौपमम् ।
यस्य यत्कर्म चोद्दिष्टं तत्कर्म परिचिन्तयेत् ॥४॥
इदं च योऽभ्यसेदेवममृतं सर्वतोमुखम् ।
अचिरेणैव कालेन स सिद्धिफलभाग्भवेत् ॥५॥
सृष्टिन्यासमविज्ञाय कथं युञ्जीत साधकः ।
हन्यान्मुष्टिभिराकाशं तुषान्कुट्टयतीव सः ॥६॥

इति द्वादशः पटलः

त्रयोदशः पटलः

अथातः संप्रवक्ष्यामि सृष्टिं मन्त्रलिपेः क्रमात् ।
यथा तु सकलो देवो निष्कलेन समन्वितः ॥१॥
कलामुत्पादयामास सर्वमन्त्रप्रवर्तिकाम् ।
ओंकारमूर्ध्नि मध्यस्थ ओंकारव्यापकस्तथा ॥२॥
ओंकारप्रथमां रेखामकारं सृजति प्रभुः ।
विद्या नाम कला सा तु वर्णे वर्णे व्यवस्थिता ॥३॥
ओंकारस्य उकाराभा रेखा या संप्रदृश्यते ।
प्रतिष्ठा नाम सा ज्ञेया उकाराक्षरसंभवा ॥४॥
मूर्ध्नि तस्य भवेद्यासौ सूक्ष्मरेखा निरञ्जना
मकारो ह्यभवत्तत्र निवृत्तिर्नाम सा कला ॥५॥
ओंकारमूर्ध्नि संयुक्ता लय ओंकारमूर्धनि ।
रेखेयं व्योम्नि निर्वाणा सा कला शान्तिरुच्यते ॥६॥
संयोगात्संप्रकाशेत निष्कले सकले स्थिता ।
मूर्धन्याक्रान्त ओंकारे शब्दस्तत्र तु जायते ॥७॥
सा शक्तिः परमा सूक्ष्मा बिन्दुना सहिता मता ।
दीपादिव महत्तेजो विष्फुलिङ्गशिखान्वितम् ॥८॥
निपतन्ती त्रिधा याति शिवविद्यात्मकैर्यथा ।
शान्तिर्विद्या प्रतिष्ठा च निवृत्तिश्चेति ताः कलाः ॥९॥
या कला रेखिनी तत्र पतिता बिन्दुना सह ।
सविद्येशः शिवः प्रोक्तो देवदेवः सदाशिवः ॥१०॥
प्रथमं तस्य तद्बीजं नादबिन्दुरितीरितम् ।
न जहाति परं स्थानं शाश्वतं ध्रुवमव्ययम् ॥११॥

बिन्दुं तदुदरे क्षिप्त्वा मातृवत्परिरक्षति।
तस्योर्ध्वं वामपार्श्वेऽथ विष्णुबीजं प्रतिष्ठितम् ॥१२॥
दक्षिणं ब्रह्मयोनिस्थमेकमेव त्रिधा स्थितम्।
पार्श्वबिन्दुद्वयोपेता सा रेखा मध्यतः स्थिता ॥१३॥
तत्र देवः शिवः सूक्ष्मो गूढस्तिष्ठति शंकरः।
तद्बीजं परमं देवः शक्तिगर्भो महेश्वरः ॥१४॥
यतः प्रवर्तते सर्वं मन्त्रतन्त्रं चराचरम्।
अव्यक्तं परमं सूक्ष्मं शक्तिदेहं निरञ्जनम् ॥१५॥
शिवं त्वनादिनिधनं यं बुद्ध्वा नाभिजायते।
दक्षिणस्थं हि यद्बीजं ज्ञानशक्तिः परा हि सा ॥१६॥
तद्बीजमपरं ब्रह्मा यत्र गूढः स तिष्ठति।
वामगोऽथ परो बिन्दुः क्रियाशक्तिः परा हि सा ॥१७॥
तत्र विष्णुः स्वयं बीजे गूढः सूक्ष्मो निरञ्जनः।
एष देवोऽपि सर्गस्थो विसृष्टो यः स शम्भुना ॥१८॥
निगूढत्वान्न पश्यन्ति येन सृष्टं चराचरम्।
विसर्गाज्जायते सृष्टिरीश्वरः प्रभुरेव सः ॥१९॥
विसृष्टं येन तद्बीजं विसर्गस्तेन चोच्यते।
तेन चापूरितमिदं जगत्सर्वं च तन्मयम् ॥२०॥
शक्तिरश्मिसमूहेन शतशोऽथ सहस्रशः
सृजति ग्रसति ह्येष संयोजकवियोजकः ॥२१॥
ज्ञानशक्त्या च भगवाननुगृह्णाति वै शिवः।
विसर्गाच्च भवेत्सृष्टिः संहारो बिन्दुना सह ॥
निर्वाणं तत्त्वविज्ञानं तन्त्रविस्तारगोचरः ॥२२॥

इति त्रयोदशः पटलः

चतुर्दशः पटलः

संहारश्चैव सृष्टिश्च सर्वं निगदितं प्रभो।
दीक्षितानां गतिभ्रंशं [संक्षेपात्] कथयस्व मे ॥१॥
मायाविनि शठे क्रूरे निःसत्त्वे कलहप्रिये।
गतिभ्रंशकरे योगे तत्त्वं तच्छृणु षण्मुख ॥२॥
विधाय मूर्ध्नि क्षिप्तस्य आयामे शशिनः क्रमात्।
पूर्ववन्मनसालोक्य गतिं तस्य निवर्तयेत् ॥३॥
संहारसंपुटं कूटमादावन्ते षडानन।
मातृकायां शतं हुत्वा एकैकस्य पृथक् पृथक् ॥४॥

इति चतुर्दशः पटलः

पञ्चदशः पटलः

प्रासादं नादमुत्थाप्य जपेद्यः सततं नरः।
षण्मासात्प्राप्नुयात्सिद्धिं योगयुक्तो न संशयः ॥१॥
गमागमस्य जपतः सर्वपापक्षयो भवेत्।
अणिमादिगुणैश्वर्यं षण्मासैस्तु न संशयः ॥२॥
गमागमं विदित्वा तु मुच्यते नात्र संशयः।
तन्मयस्तल्लयो भूत्वा षण्मासात्सिद्धिमाप्नुयात् ॥३॥
स्थूलः सूक्ष्मः परश्चैव प्रासादः कथितो मया।
प्रासादं ये न बुध्यन्ति ते न बुध्यन्ति शंकरम् ॥४॥

इति पञ्चदशः पटलः

षोडशः पटलः

अतः परं प्रवक्ष्यामि प्रासादस्य तु लक्षणम्।
ह्रस्वं दीर्घं प्लुतं चैव लक्षयेन्मन्त्रवित्सदा ॥१॥
ह्रस्वो दहति पापानि दीर्घो मोक्षप्रदो भवेत्।
आप्यायने प्लुतश्चैव बिन्दुना मूर्ध्नि भूषितः ॥२॥
स्थूलभेदास्त्रयः प्रोक्ता वश्योच्चाटनमारणे।
प्लुतेन तु सदा वश्यं कुरुते नात्र संशयः ॥३॥
दीर्घस्तूच्चाटयेत्क्षिप्रं फट्कारेण न संशयः।
आदावन्ते च ह्रस्वस्य फट्कारो मारणे स्मृतः ॥४॥
आदावन्ते च हृदययोग आकर्षणे स्मृतः।
आकर्षयेद्ध्रुवं युक्तो योजनानां शते स्थितम् ॥५॥
एवमाकर्षयेत्साध्यं नाम विज्ञाय तत्त्वतः।
साधकस्य भवेद्वृद्धी न्यूना साध्यस्य कीर्तिता ॥६॥
एवं विदित्वा मेधावी आकर्षं कुरुते ध्रुवम्।
अविज्ञाय त्विदं सम्यङ्ग नैव सिध्यति सर्वदा ॥७॥
यागं कृत्वा तु पूर्वोक्तं मन्त्रस्यार्घ्यं च दापयेत्।
अर्घ्यं दत्त्वा तु मन्त्रस्य जपं कुर्याद्विचक्षणः ॥८॥
देवस्य दक्षिणे भागे पञ्चलक्षं स्थितो जपेत्।
जपान्ते घृतहोमस्तु दशसाहस्त्रिको भवेत् ॥९॥
एवमाप्यायितो मन्त्रः कर्मयोग्यो भवेत्ततः।
उक्तानुक्तानि कर्माणि सिद्धिं यान्ति न संशयः ॥१०॥
दशलक्षाणि जपतो जनाः स्वस्थानवासिनः।
वशमायान्ति ते क्षिप्रमिति शास्त्रस्य निश्चयः ॥११॥
त्रिपञ्चलक्षं जपतो दशग्रामनिवासिनः।
ते जना वशमायान्ति आत्मना च धनेन च ॥१२॥

एवं विंशतिभिर्लक्षैः प्रासादस्य षडानन।
देशदेशाधिपान्मन्त्री नियतं वशमानयेत् ॥१३॥
लक्षाणां पञ्चविंशत्या विषयं वशमानयेत्।
त्रिंशल्लक्षजपादस्य वशो वै मण्डली भवेत् ॥१४॥
पञ्चत्रिंशच्च लक्षाणि जपन्पृथ्वीं वशं नयेत्।
चत्वारिंशज्जपाद्देवमीक्षते हाटकेश्वरम् ॥१५॥
लक्षाणि जप्त्वा पञ्चाशद्विद्याधरसमो भवेत्।
तत्रैव मोदते मन्त्री यावदाभूतसंप्लवम् ॥१६॥

इति षोडशः पटलः

सप्तदशः पटलः

अद्यापि संशयो देव ज्ञानविज्ञानयोः स्फुटम्।
कथं वा ज्ञायते ज्ञानं कथं वा ज्ञेयमुच्यते ॥१॥
विज्ञाय पूर्वमाधारं पश्चादाधेयमेव च।
आधाराधेयवित्प्राज्ञः समर्थः सर्वकर्मसु ॥२॥
आधारः पुरमित्युक्तमाधेयस्त्वीश उच्यते।
ईशं विज्ञाय मेधावी सदा यो नन्दति स्वयम् ॥३॥
पुर्यष्टकसमायुक्तो ह्यध ऊर्ध्वं स गच्छति।
शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चकम् ॥४॥
बुद्धिर्मनस्त्वहंकारः पुर्यष्टकमुदाहृतम्।
यावदेतैर्न निर्मुक्तः कथं मुच्येत बन्धनात् ॥५॥
ब्रह्मणि स्पर्शशब्दौ तु रसं वै केशवे त्यजेत्।
रूपगन्धौ त्यजेद्रुद्रे बुद्ध्यहंकारमीश्वरे ॥
मनो बिन्दुं शिवे त्यक्त्वा एभिर्मुक्तः शिवं व्रजेत् ॥६॥

इति सप्तदशः पटलः

अष्टादशः पटलः

कालचक्रविधानं तु प्रवक्ष्याम्यनुपूर्वशः।
कालचक्रमिति ख्यातं येन कालः प्रबुध्यते ॥१॥
त्र्यहोरात्रप्रचारेण त्रीण्यब्दानि स जीवति।
द्व्यहोरात्रप्रचारेण जीवेद्वर्षद्वयं तु सः ॥२॥
अहोरात्रप्रचारेण अब्दमेकं स जीवति।
अहरेकं व्रजेद्यस्य रात्रिमेकां तथैव च ॥३॥
षण्मासाज्जायते मृत्युरिति शास्त्रस्य निश्चयः।
द्वितीयस्यानुचारेण अहोरात्रं स जीवति ॥४॥

यथा चाद्या तथा वामा मध्यमा च तथैव च।
कालचक्रं समाख्यातं पुत्रस्नेहाद्विशेषतः ॥५॥

इत्यष्टादशः पटलः

एकोनविंशः पटलः

पूर्वमेवं प्रतिज्ञातं शिवभेदोऽष्टधा स्थितः।
कथं भिद्येत देवेश तत्त्वतः कथय प्रभो ॥१॥
सकलं निष्कलं शून्यं कलाढ्यं खमलङ्कृतम्।
क्षपणं च तथान्तस्थं कण्ठोष्ठ्यं चाष्टमं विदुः ॥२॥
प्रासादं षष्ठसंयुक्तं षडन्तेन समन्वितम्।
सकलं सर्वभूतस्थं शिवतत्त्वं प्रकीर्तितम् ॥३॥
निष्क्रामति स्वयं देवो देहं त्यक्त्वा समारुतः।
निष्कलं तं विजानीयात्षड्वर्णरहितं शिवम् ॥४॥
निश्वासोच्छ्वसने हित्वा स्थितो देहे तु काष्ठवत्।
शून्यं तं तु विजानीयाद्धृदयेन तु भावयेत् ॥५॥
चुम्बाकारेण वक्त्रेण यत्तत्त्वं परिकीर्तितम्।
कलाढयं तं विजानीयादाकाशस्थमथ शृणु ॥६॥
ऊर्ध्वनादस्य क्षीणस्य यदन्तं परिकीर्तितम्।
तत्रस्थं तं विजानीयादाकाशेन त्वलंकृतम् ॥७॥
व्यावृतेनैव वक्त्रेण ब्रूयाद्देवं जगद्गुरुम्।
दुःखक्षपणमित्युक्तं तत्क्षयात्क्षपणं स्मृतम् ॥८॥
अधोनादस्य क्षीणस्य यदन्तं परिकीर्तितम्।
अन्तस्थं तं विजानीयादनुच्चार्यं प्रकीर्तितम् ॥९॥
सप्तवर्गाष्टमं कोटिः सप्तमस्य द्वितीयकम्।
वर्गातीतं षडन्तं च सप्तमात्त्रिचतुर्थकम् ॥१०॥
आदिमं तु पुनर्योज्यं षष्ठं वै प्रथमस्य तु।
खशेखरसमायुक्तं कण्ठोष्ठ्यं चाष्टमं स्मृतम् ॥११॥
एते भेदाः समाख्याता अणिमादिप्रसाधने।
अनुच्चार्यमसंदिग्धं मोक्ष इत्यभिधीयते ॥१२॥

इत्येकोनविंशः पटलः

विंशः पटलः

कथं व्यापी अधश्चोर्ध्वं तिर्यक् चैव कथं भवेत्।
एतन्मे ब्रूहि तत्त्वेन कारुण्यात्त्वं महेश्वर ॥१॥
यावद्देहे स्थितो जन्तोरधस्तावद्व्यवस्थितः।

निर्गतो व्यापयेत्तिर्यगन्तस्थः सर्वतः स्थितः ॥२॥
त्रिमार्गावस्थितो देवः सर्वदेहेषु वर्तते।
अविदित्वा न मुच्येत यद्यप्येतल्लयो भवेत् ॥३॥
तत्त्रिमार्गं त्र्यधिष्ठानं सर्वदेहेषु वर्तते।
यो वेत्त्येवमिमां व्याप्तिं सर्वव्यापी न संशयः ॥४॥
न तस्य गर्भसंभूतिर्यथा देवः प्रभाषते।
तावद्भ्रमति संसारे यावद्व्याप्तिं न विन्दति ॥५॥
विदित्वा व्यापिनं जीवं मुच्यते नात्र संशयः।
यथा तृणजलूका नु तृणाग्रं यावदागता ॥६॥
उपरिष्टान्निरालम्बा तद्वज्जीवोऽत्र संस्थितः।
ऊर्ध्वशून्यमधःशून्यं शून्यं देहान्तरस्थितम् ॥७॥
त्रिशून्यं यो विजानाति मुच्यते स ध्रुवं गुह।
व्याप्तिश्चास्य मया प्रोक्ता संक्षेपान्न तु विस्तरात् ॥
अतः परतरं नास्ति व्यापकं व्यापकस्य तु ॥८॥

इति विंशः पटलः

एकविंशः पटलः

अतः परं प्रवक्ष्यामि अष्टधा प्रत्ययो यथा।
अनग्निज्वलनं चैव वृक्षस्यालभनं तथा ॥१॥
पाशानां स्तोभनं चैव महापातकनाशनम्।
विषसंहरणं चैव निर्बीजकरणं तथा ॥२॥
ग्रहज्वरविनाशश्च प्रत्ययोऽष्टविधः स्मृतः।
एवं ज्ञात्वा तु विधिवत्ख्यातिः सर्वत्र जायते ॥३॥
प्रणवेनाग्निमध्यस्थो हकारो ह्रीं तथैव च।
आदिरों च नमश्चान्ते अनग्निज्वलने हितम् ॥४॥
अग्निं स्रोतसि संयोज्य सहस्रोद्घातसंयुतम्।
पञ्चाक्षरप्रयोगेण ज्वलत्येव न संशयः ॥५॥
ओंकारः सर्वतोऽधस्ताद्रेफस्तस्योर्ध्वतः स्थितः।
पूर्ववत्संप्रयुक्तोऽयं प्रयोगो भुवि दुर्लभः ॥६॥
शतैः सप्तभिरुद्घातैरालब्धो म्रियते द्रुमः।
भूयश्चाप्यायनं तस्य वारुणे स्रोतसि स्थितम् ॥७॥
स जीवति पुनर्वृक्षो यथापूर्वं तथैव सः।
तादृगेव पुनश्चासौ किं तु रेफविवर्जितः ॥८॥
आप्यायनविधौ ह्येष पञ्चधा बिन्दुदीपितः।
औकारमध्यसंयुक्तः प्रणवेनान्तदीपितः ॥९॥
ईकारादिः स हौ मध्ये वह्निमध्यं ततः परम्।
प्रयोगो विषुवत्काले पाशानां स्तोभकारकः ॥१०॥

शतैः पञ्चभिरुद्घातैः पतत्येव न संशयः।
पुनश्चोत्थापनं तस्य यथा भवति तच्छृणु ॥११॥
ईकाराद्यन्तसंयुक्तं ह्रौ च मध्ये नियोजितम्।
प्राणानुस्वारसंदीप्तं नमोऽन्तं प्रणवं पुनः ॥१२॥
उत्थापने प्रयुञ्जीत सर्वभूतेषु तत्त्ववित्।
तावद्भिरेव चोद्घातैर्योजनीयः प्रयत्नतः ॥१३॥
लबीजं जीवसंविष्टं हकाराद्यन्तसंस्थितम्।
पूर्ववन्मध्यसंस्थं च वायुबिन्दुसमन्वितम् ॥१४॥
यदस्यारोहणे प्रोक्तं गुरुत्वं जायते यथा।
भूय एव प्रवक्ष्यामि लघुत्वं जायते यथा ॥१५॥
ओंकारो हं यकारेण ह्यौकारो हं नमस्तथा।
तुलापुरुषयोगोऽयमुद्घातैरयुतेन तु ॥१६॥
स हकारो वकारेण यकारेण च दीपितः।
ह्यौ मध्ये ह्लीं नमश्चान्ते वारुणेन तु बुद्धिमान् ॥१७॥
उद्घाताष्टशतेनैव विषं संहरति ध्रुवम्।
यथाग्निज्वलने दृष्टो निर्बीजकरणे तथा ॥१८॥
शतैः पञ्चभिरुद्घातैर्विशेषोऽत्र विधीयते।
ओंकारमादितः कृत्वा ह्लूंकारं तदनन्तरम् ॥१९॥
ह्लौं ह्लूं च फण्णमश्चान्ते ग्रहाणां नाशने मतः।
प्रयोगे वारुणं मार्गे उद्घाताष्टशतेन तु ॥२०॥
प्रणवादि ततो हुं फट् हुं फट् हुं फट् तथैव च।
फट् फट् फट् फट् फडेवं स्याद्वारुणेन तु बुद्धिमान् ॥
उद्घाताष्टशतेनैव क्षिप्रं नाशयति ज्वरम् ॥२१॥

इत्येकविंशः पटलः

द्वाविंशः पटलः

प्रासादः कीदृशो ज्ञेयो व्याप्तिस्तस्य च कीदृशी।
शरीरं कीदृशं तस्य कथयस्व महेश्वर ॥१॥
प्रासादं यो न जानाति पञ्चमन्त्रमहातनुम्।
अष्टत्रिंशत्कलोपेतं नासावाचार्य उच्यते ॥२॥
प्रासादं सम्यगज्ञात्वा यो दीक्षां कुरुते गुरुः।
अधस्ताच्छिष्यमात्मानं नयत्यत्र न संशयः ॥३॥
प्रासादाब्जशिखान्तस्थो यस्तु दीक्षां करोति सः।
आचार्यः सह शिष्येण शिवसायुज्यमाप्नुयात् ॥४॥
ब्रह्मा विष्णुश्च रुद्रश्च इन्द्रश्चन्द्रो बृहस्पतिः।
प्रजापतिस्तथादित्यः शुक्रः स्कन्दो भृगुस्तथा ॥५॥
ये चान्ये प्राणिनो देवाः सर्वे प्रोक्ताः प्रसादजाः।

एते चान्ये च बहवो मुनयः संशितव्रताः ॥६॥
ध्यायन्ति परमं हंसं प्रासादं नामरूपतः।
विभागं चास्य वक्ष्यामि यं ध्यात्वामृतमश्नुते ॥७॥
सद्यः कलाष्टसंयुक्तमकाराक्षरजं विदुः।
विद्यादुकारजं वाममघोरं च मकारजम् ॥८॥
बिन्दुजः पुरुषो ज्ञेय ईशानस्तु शिखात्मजः।
एवं मन्त्रास्तु पञ्चैते प्रासादात्संभवन्ति ये ॥९॥
दशकोटिः सहस्राणां मन्त्राणाममितौजसाम्।
इष्टेन तु प्रसादेन सर्वं इष्टा न संशयः ॥१०॥
मारुता नव शक्त्याद्या ये मन्त्राः परिकीर्तिताः।
प्रासादाब्जसमुत्पन्नाः सर्वे चामोघशक्तयः ॥११॥
सद्यस्तु पृथिवी ज्ञेयो वामो ह्यापः प्रकीर्तितः।
अघोरस्तेज इत्युक्तो वायुस्तत्पुरुषः स्मृतः ॥१२॥
आकाशस्तु भवेदीशः स्वयं देवो महेश्वरः।
सद्योजातस्तु ऋग्वेदो वामदेवो यजुः स्मृतः ॥१३॥
अघोरः सामवेदः स्यादथर्वः पुरुषः स्मृतः।
पञ्चमस्तु परः सूक्ष्मो व्योमव्यापी सदाशिवः ॥१४॥
सद्योजातस्तु वै ब्रह्मा वामो विष्णुः प्रकीर्तितः।
अघोरो रुद्रदैवत्य ईश्वरः पुरुषः स्मृतः ॥१५॥
ईशानः शिवदैवत्यो हृदयादाववस्थिताः।
षष्ठं तु यत्परं तत्त्वमसादृश्यगुणैः स्थितम् ॥१६॥
तस्य देहो न वक्तव्यः प्राकृतैर्गुणसंभवैः।
ज्ञात्वा परमनिःश्रेणीं पञ्चसंस्थानगामिनीम् ॥१७॥
ज्ञातमेव सकृद्येन विस्तृतं तु तदेव तत्।
तत्काल एव मुक्तोऽसौ यदा ज्ञातं हि तत्पदम् ॥१८॥

इति द्वाविंशः पटलः

त्रयोविंशः पटलः

शृणु षण्मुख तत्त्वेन ज्ञानामृतमनुत्तमम्।
यन्न कस्यचिदाख्यातं नाख्येयं कथयामि तत् ॥१॥
देहस्थः सकलो ज्ञेयो निष्कलो देहवर्जितः ॥
आप्तोपदेशगम्योऽसौ सर्वतः किमपि स्थितः ॥२॥
हंस हंसेति यो ब्रूयाद्धंसो देवः सदाशिवः।
गुरुवक्त्रात्तु लभ्येत प्रत्यक्षं सर्वतोमुखः ॥३॥
तिलेषु च यथा तैलं पुष्पे गन्ध इव स्थितः।
पुरुषस्तु शरीरेऽस्मिन्सबाह्याभ्यन्तरे स्थितः ॥४॥
उल्काहस्तो यथा कश्चिद्द्रव्यमालोक्य तां त्यजेत्।

ज्ञानेन ज्ञेयमालोक्य तथा ज्ञानं परित्यजेत् ॥५॥
पुष्पं तु सकलं विद्याद्गन्धस्तस्य तु निष्कलः।
वृक्षं तु सकलं विद्याच्छाया तस्य तु निष्कला ॥६॥
सकले निष्कलो भावः सर्वत्रैव व्यवस्थितः।
उपायः सकलस्तद्वदुपेयश्चैव निष्कलः ॥७॥
सकले सकलो भावो निष्कले निष्कलस्तथा।
त्रिमात्रश्च द्विमात्रश्च एकमात्रस्तथैव च ॥८॥
अर्धमात्रा परा सूक्ष्मा तस्या ऊर्ध्वं परात्परम्।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरः शिव एव च ॥९॥
पञ्चधा पञ्चदैवत्यः सकलः परिपठ्यते।
ब्रह्मणो हृदयं स्थानं कण्ठे विष्णुः समाश्रितः ॥१०॥
तालुमध्ये स्थितो रुद्रो ललाटस्थो महेश्वरः।
नादान्ते तु शिवं विद्यात्तस्यान्ते तु परं पदम् ॥११॥
परस्मात्तु परं नास्ति इति शास्त्रस्य निश्चयः।
गमागमः कथं तस्य केन वा नीयते तु सः ॥१२॥
संशयो मे महादेव कथयस्व यथार्थतः।
शक्त्या तु नीयते जीवस्तस्मिन्प्राप्य निवर्तते ॥१३॥
अस्यान्तं ते प्रवक्ष्यामि शृणु षण्मुख तत्त्वतः।
देहातीतं तु तद्विद्यान्नासाग्रे द्वादशाङ्गुलम् ॥१४॥
तदन्तं तद्विजानीयात्तत्रस्थो व्यापयेत्प्रभुः।
मनोऽप्यन्यत्र निक्षिप्तं चक्षुरन्यत्र पातितम् ॥१५॥
तथापि योगिनां योगो ह्यविच्छिन्नः प्रवर्तते।
एतत्तत्परमं गुह्यमेतत्तत्परमाक्षरम् ॥१६॥
नातः परतरं किंचिन्नातः परतरं शिवम्।
नातः परतरं ज्ञानमित्याह भगवाञ्छिवः ॥१७॥
शिवज्ञानामृतं प्राप्यं संक्षेपान्न तु विस्तरात्।
कथितो देवदेवेन परमाक्षरनिर्णयः ॥१८॥
एतत्ते शिवसद्भावं शिववक्त्राद्विनिःसृतम्।
गुह्याद्गुह्यतमं गुह्यं गूहनीयं प्रयत्नतः ॥१९॥
नाशिष्याय प्रदातव्यं नापुत्राय कदाचन।
गुरुदेवाग्निभक्ताय नित्यं मुक्तिरताय च ॥२०॥
प्रदातव्यमिदं शास्त्रं नेतरेभ्यः प्रदापयेत्।
दातास्य नरकं याति सिध्येच्च न कदाचन ॥२१॥
शिवामृतं मया ख्यातं सत्यं सत्यमिदं तव।
एवं ज्ञात्वा तु मेधावी विचरेत्तु यथासुखम् ॥२२॥
गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भैक्षुकः।
यत्र यत्र स्थितो ज्ञानी परमाक्षरवित्सदा ॥२३॥
विषयी विषयासक्तो याति देहान्तके शिवम्।
ज्ञानादेवास्य शास्त्रस्य सर्वावस्थोऽपि मानवः ॥२४॥

ब्रह्महत्याश्वमेधाद्यैः पुण्यपापैर्न लिप्यते ।
चोदको बोधकश्चैव मोक्षदश्च परः स्मृतः ॥२५॥
इत्येवं त्रिविधो ज्ञेय आचार्यस्तु महीतले ।
चोदको दर्शयेन्मार्गं बोधकः स्थानमादिशेत् ॥
मोक्षदस्तु परं तत्त्वं यज्ज्ञात्वामृतमश्नुते ॥२६॥

इति त्रयोविंशः पटलः

चतुर्विंशः पटलः

प्रत्यक्षयजनं वक्ष्ये संक्षेपान्न तु विस्तरात् ।
येनेष्ट्वा ते नरा यान्ति शाश्वतं पदमव्ययम् ॥१॥
स्वयमेव तु तं पश्येद्देवं बिन्दुं च[तुष्कलम्] ।
अयने द्वे च विषुवत्सदा पश्यति मार्गवित् ॥२॥
कृत्वायामं पुरा वत्स कुम्भपूरकरेचकम् ।
पूर्वं चोभयमुच्चार्य अर्चयेच्च यथाक्रमम् ॥३॥
नमस्कारेण योज्यान्ते मूर्ध्न आरभ्य चार्चयेत् ।
सूर्यस्य ग्रहणे वत्स प्रत्यक्षयजनं स्मृतम् ॥४॥

इति चतुर्विंशः पटलः

पञ्चविंशः पटलः

लिङ्गोद्धारं प्रवक्ष्यामि नैष्ठिकानां तु षण्मुख ।
पञ्चरात्रं त्रिरात्रं वा क्षपयित्वाधिवासयेत् ॥१॥
पूर्वोक्तं तु विधिं कृत्वा संन्यासं परिवर्तयेत् ।
समयोल्लङ्घनात्प्रोक्तं क्रव्यादत्वं शतं समाः ॥२॥
योनिचक्रं न्यसेत्तत्र विधिदृष्टेन कर्मणा ।
अष्टारं चक्रमालिख्य नाभिनेमिसमन्वितम् ॥३॥
विपरीतं योजयित्वा जनयेत्तत्र नैष्ठिकम् ।
पञ्च पूर्णाहुतीर्दत्त्वा अरकेषु यथाक्रमम् ॥४॥
हृन्मन्त्रेण तु तं दद्यात्संहारेण तु बुद्धिमान् ।
एवं कृत्वा यथापूर्वं जनयेदत्र नैष्ठिकम् ॥५॥
इष्टिं सांहारिकीं स्कन्द कुर्याद्वै नैष्ठिकस्य तु ।
सृष्टिसंहारन्यासेन इष्ट्वा सिध्यति नैष्ठिकः ॥
आसक्तो विषयेष्वेव कर्मदोषैर्न लिप्यते ॥६॥

इति पञ्चविंशः पटलः

षड्विंशः पटलः

अन्त्येष्टिं संप्रवक्ष्यामि यथावदनुपूर्वशः ।
शिवाग्निं जनयित्वा तु शिवं पश्चाद्विशोधयेत् ॥१॥
मृद्गोमयेन संशोध्य भस्मस्नानं यथा पुरा ।
वस्त्रपुष्पैरलंकृत्य अस्त्रबीजेन शोधयेत् ॥२॥
इष्टिं सांहारिकीं कृत्वा उदक्पादं निवेशयेत् ।
दर्भास्तरं पुरा कृत्वा अस्त्रं विन्यस्य सर्वतः ॥३॥
अस्त्रेण ज्वालयेदग्निं समन्तात्सुसमाहितः ।
चन्दनागरुकाष्ठैश्च तिलैश्चाज्यसमन्वितैः ॥४॥
वित्तवतां च तत्सर्वमितरेषां तदिच्छया ।
आग्नेयधारणां ध्यात्वा दहेदस्त्रेण मन्त्रवित् ॥५॥
चितश्चित्तस्य संयोगाद्ग्रहणं पूर्ववद्भवेत् ।
दीक्षातस्तूत्तरे काले समयांस्तु न लङ्घयेत् ॥६॥
देवस्य च गुरूणां च महापातकभाग्भवेत् ।
अमुक्तसंशया ये च ये चान्ये समलात्मकाः ॥७॥
तेषां पापापनोदार्थमन्त्येष्टिर्विहिता गुह ।
स्वसंज्ञालयमाप्नोति समयाद्येषु लङ्घनात् ॥८॥

इति षड्विंशः पटलः

सप्तविंशः पटलः

अस्त्रयागमविच्छिद्रं प्रवक्ष्याम्यनुपूर्वशः ।
पूर्वोक्ते भूतले शुद्धे गोमयेनोपलेपिते ॥१॥
मन्त्रद्रव्यसमायुक्तं कलशं वारिपूरितम् ।
दिश्यैशान्यां स्थापयेत्तन्निश्छिद्रं करकं परम् ॥२॥
ततः पद्मं समालिख्य स्थण्डिले वा समर्चयेत् ।
रजस्सु बहवो विघ्ना निर्विघ्नाः स्थण्डिले गुह ॥३॥
तस्मात्सर्वप्रयत्नेन कार्योऽस्त्रस्य महात्मनः ।
सर्वत्र विहितः शस्तः स्थण्डिले याग उत्तमः ॥४॥
प्राकारं कर्णिका पद्मं धर्मज्ञानादिरेव च ।
वैराग्यं च तथैश्वर्यं शक्तयश्च यथाक्रमम् ॥५॥
गन्धपुष्पोपहाराद्यैर्यजेत शिववत्परम् ।
मूर्तिं कुर्वीत मतिमान्प्राकारेण सुयन्त्रितः ॥६॥
अस्त्रं पाशुपतं दिव्यं स्थापयेत्कर्णिकोपरि ।
अष्टत्रिंशत्कलोपेतं पुरा कृत्वा तु विन्यसेत् ॥७॥
मूर्त्यस्त्रं दिक्षु विन्यस्य प्राकारं विदिशां क्रमात् ।
दिक्षु मूर्तिं विदिक्ष्वस्त्रं प्राकारं सार्वहोमिकम् ॥८॥

अस्त्रबीजमिदं श्रेष्ठं निश्छिद्रकरणं परम् ।
बाह्ये कुर्वीत वज्रादीन् सर्वदिक्षु समन्ततः ॥९॥
वज्रं शक्तिं च दण्डं च खड्गं पाशं तथाङ्कुशम् ।
गदां त्रिशूलं चक्रं च पद्मं चैव यथाक्रमम् ॥१०॥
न्यसेत्पाशुपतास्त्रेण प्राकारेण च संयुतान् ।
पूजने चाग्निकार्ये च दिग्विभागः प्रकीर्तितः ॥११॥
वृत्तं कुर्वीत कुण्डं तु तस्योर्ध्वं चतुरङ्गुलम् ।
चतुर्नेमिसमायुक्तं हस्तमात्रं समन्ततः ॥१२॥
पूर्वे कामप्रदं वृत्तमस्त्रयागे विशेषतः ।
स्थण्डिले वा रजःपाते कुण्डं कुर्यात्सुलक्षणम् ॥१३॥
शोधनं तस्य कुर्वीत प्राकारेण तु षण्मुख ।
जननं निष्कृतिं चैव विधिं कुर्याद्यथेप्सितम् ॥१४॥
होमं कुर्वीत मतिमाञ्शास्त्रदृष्टेन कर्मणा ।
बीजं पाशुपतं पूर्वं पश्चात्प्राकारमेव च ॥१५॥
वज्राद्यांश्च ततो हुत्वा भागैः पूर्वोपकल्पितैः ।
हुंफडा वौषडन्तेन पूर्णामन्ते प्रदापयेत् ॥१६॥
न्यसेत्प्राकारजां योनिं बिन्दुस्थाने विचक्षणः ।
तत्र चाकर्षयेज्जीवं प्राकारेण न संशयः ॥१७॥
अधिकारादिहोमे च आहुतीर्द्वित्रयोदश ।
शतमष्टोत्तरं पूर्णां महास्त्रेण प्रदापयेत् ॥१८॥
अस्त्रदीक्षां समाप्यैवं सर्वच्छिद्रनिकृन्तनीम् ।
योजनीं शिवतत्त्वे तु निर्वाणकरणीं पराम् ॥१९॥
ततोऽभिषेचयेत्तत्र कुम्भेन प्राक्प्रकल्पिते ।
विनायकग्रहादीनि नश्यन्त्येव न संशयः ॥२०॥

इति सप्तविंशः पटलः

इति सार्धत्रिशतिकालोत्तरम्

SĀRDHATRIŚATIKĀLOTTARĀGAMA

Texte

et

Commentaire

सार्धत्रिशतिकालोत्तरम्

भट्टरामकण्ठवृत्तिसहितम्

प्रथमः पटलः

मन्त्रोद्धार[1]प्रकरणम्

सार्धत्रिशतिकालोत्तर[2]वृत्तिः[3]

[4]शिवं [5]कालोत्तरं नत्वा कालोत्तर[6]फलाप्तये ।
कालोत्तरार्थं [7]वक्ष्येऽहं कालोत्तरदृशैव तम् ॥
कालोत्तर[8]बहुत्वेऽपि मूलं सार्धशतत्रयम् ।
[9]तत्कर्त्रा क्षिप्रसिद्ध्यर्थं [10]यत्त्रयोदशभिः शतैः ॥
तत्रान्यसूत्रपटला[11]सक्त्या [12]विक्षेपतः कृतम् ॥
शास्त्रेष्वन्यत्र [13]संस्कारात्तदज्ञैरर्थतस्तथा ।
[14]व्याख्यातमन्यदृष्ट्चैव त्यक्त्वा मार्गं शिवोदितम् ॥
पदार्थं ग्रन्थसंसिद्धमत [15]एष समुद्यमः ।
यथा तत्सूत्रपटलक्रमसंख्यार्थनिश्चये ॥
प्रागस्य [16]गतिभिर्गीर्भिर्निगदेनैव च क्वचित् ।
सम्यङ् निरूप्य व्याख्यातं संक्षेपेण तथोच्यते ॥

पुरा किल भगवतः श्रीकण्ठनाथाद् विद्येशानामिव साक्षात्परमेश्वरादायातस्य कोटिसंख्याकस्य **वातुलाख्यस्य** तन्त्रस्य [17]लक्षसंख्यातं संग्रह[18]मानुपूर्विकं श्रुत्वा कार्तिकेय[19]स्तावति मनुष्याणां परिणत-

---

[1] पटलः — अ
[2] ०व्याख्यानम् — आ
[3] 'वृत्तिः' इत्यस्यानन्तरं 'कालोत्तरव्याख्यानम्' इत्यधिकम् — अ.
[4] 'शिवं' इत्यतः पूर्वं 'हरिः ओम्' इत्यधिकम् — अ
[5] कालोत्तर त्वा कालो० — आ
[6] ऋगाप्तये — आ
[7] विक्षेहं — आ
[8] बहुत्वैक्य साध्यशत० — आ
[9] तत्कर्ता क्षिप्र० — अ, आ
[10] य आयो दशभिः — आ
[11] ०सत्या — आ
[12] विक्षेपितं — अ
[13] संसारं तानतिज्ञोर्थतस्तथा — अ; संस्कारतानभिज्ञै० — आ
[14] व्याख्यानमन्य० — अ, आ
[15] एव — अ
[16] तद्वीयैर्गुरुभिर्निगदे० — आ
[17] लक्षणसं० — अ
[18] ०मनुपूर्वकं — आ
[19] ०देवस्तावति — अ

मलत्वेन केषांचिदधिकारे सत्यपि वक्ष्यमाणहेतुभि[१]रसामर्थ्यतः परापरफलासिद्धिमाकलय्य, तद्विध-करुणावांस्तदुपायजिज्ञासया तमेव भगवन्तं पूजावचनैः [२]संबोधनपूर्वं प्रश्नयति —

[३]भगवन्देवदेवेश लोकनाथ जगत्पते ।

तत्र [४]**भगवन्** इति [५]समस्तैश्वर्यादिधर्म[६]योगादेतद्भगवतः । यदुक्तम् —

[७]ऐश्वर्यस्य [८]समग्रस्य वीर्यस्य यशसः श्रियः ।
वैराग्यस्य च बोधस्य षण्णां भग इति [९]श्रुतिः ॥" [इति]

[१०]तच्चाणिमादिगुणाष्टकाभिवृद्धितो भूरादिलोकेश्वर[११]सप्तकातिशयक्रमेण ब्रह्मणः सत्यलोकोर्ध्ववर्तिनश्चतुष्षष्टिगुणत्वात् समग्रत एव तत्संबोधनं स्यादिति ततोऽप्यतिशय[१२]प्रतिपादनाय संबोधनान्तरं **देवदेवेश** इति । देवानां लोकेशानां [१३]सप्तानां यो देवः क्रीडादिमान् प्रभु[१४]र्ब्रह्मा, तस्येश्वर इति । एवमपि दर्शितत्वाद्ब्रह्माण्डमध्याधिकारिणो[१५]ऽनन्तशिष्यस्य[१६] श्रीकण्ठ[१७]स्यैतत्संबोधनं स्यादिति, [१८]तद्विवेकाय [१९]ततोऽपि प्रकर्षप्रतिपत्तये [२०]संबोधनान्तरं **लोकनाथ** इति । लोकानां साक्षात्परमेश्वरानुगृहीतत्वेन सर्वज्ञत्वा[२१]द्दर्शनसंपद्युक्तानां [२२]दशदिङ्नियुक्तानां ब्रह्माण्डाधारकत्वेन तदूर्ध्वाधिकारिणां नाथ इति । यदुक्तं श्रीमद्**रौरवे**[२३] —

"श्रीकण्ठानु[२४]मताः सर्वे शतरुद्राः प्रकीर्तिताः ।" [२५]इति ।

तर्हि तन्नाथत्वान्मायोर्ध्वं शुद्धविद्यासुभुवनस्थस्यानन्तादिमध्यवर्तिनो विद्येशश्रीकण्ठस्यैतत्संबोधनं स्यादिति तद्विवेकाय तत्सं[२६]बोधनान्तरं **जगत्पते** इति । जगच्छब्देन चात्र सामान्यविशेष[२७]शास्त्रसिद्ध-

---

[१] वक्ष्यमाणहेतुभिः=द्वितीयश्लोके; ०रसामर्थ्यं परापरफलसिद्धिमाकल्प्य तद्व्यधिकरणं वा तदुपाय० — अ

[२] संसेवनपूर्वं — अ

[३] इतः पूर्वं 'इ'मातृकायां मुद्रिते च "हरिः ओं, शुभमस्तु, श्रीदक्षिणामूर्तये नमः, श्रीसरस्वत्यै नमः, श्री शिवकामसुन्दरीसमेतचिदम्बरेश्वराय नमः ओं" इत्यधिकम्

[४] भवन् — अ

[५] समस्तैरैश्वर्यादि — अ

[६] ०योगादेतत् । भगवत्पादैर्यदुक्तम् — अ

[७] एतत्सदृशार्थकश्लोको विष्णुपुराणे (६.५.७४) दृश्यते —
"ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ।"

[८] च धर्मस्य — अ

[९] स्मृतः — अ

[१०] तद्वाणिमादिगुणाद्यष्टकाभि० — अ

[११] ०सप्तकादतिशय० — आ

[१२] ०व्रतसाधनाय सुबोधनानन्तरं — अ

[१३] वा सप्तानां — आ

[१४] ब्रह्म तस्येश इति — आ

[१५] नानन्तः शिष्यस्य — आ

[१६] ०शिष्टस्य — अ

[१७] ०स्येतत्सं० — आ

[१८] 'तद्विवेकाय' इति नास्ति — आ

[१९] तपोविप्रकर्षप्रति० — अ; ततो विप्रकर्ष्य प्रति० — आ

[२०] संबोधनानन्तरं — अ, आ

[२१] ०द्दर्शनं सपाद्युक्तां — आ

[२२] दशदिग्युक्तानां — अ

[२३] मुद्रितरौरवे विद्यापादे एवमानुपूर्वी नोपलभ्यते । परं त्वेवं पाठ उपलभ्यते —
"शतरुद्रा इति ख्याता वीरभद्रपुरःसराः ।
श्रीकण्ठाधिष्ठिताः सन्तः" ४.१० उ०–११ पू०

[२४] ०मिताः — अ, आ

[२५] इति हि तन्नाथ० — अ

[२६] ०बोधनानन्तरं — अ, आ

[२७] शास्त्रसिद्धगुणत्वमेवोक्तम् — अ; शास्त्रगुणतत्त्वमेवोक्तम् — आ

गुणतत्त्वमेवोक्तत्म् । यदुक्तं [1]श्रीमन्**मतङ्गे** — "गुणाः [2]सर्वे जगत्प्रोक्तम्" इति । तत्रैव कार्तिकेयादीनामवस्थेति । यदुक्तं श्रीमत्[3]**पौष्करे** —

"अकृतं च कृतं चैव भैरवं ब्राह्ममेव च ।
वैष्णवं [4]चैव कौमारमौमं [5]श्रैकण्ठमेव च ॥
भुवनानि गुणेष्वष्टौ" इति ।

इहापि तच्च [6]श्रीकण्ठत्रयाध्वव्याप्त्यैव कलादीक्षेति वक्ष्यति[7] —

"ब्रह्माण्डे तु[8] निवृत्तिर्वै शतरुद्रावधि स्थिता ।
तदूर्ध्वे तु प्रतिष्ठा स्याद्यावदव्यक्त[9]गोचरम् ॥
ततो विद्या नियुक्ता सा यावद्विद्ये[10]श्वरान्तिकम् ।" इति ।

ततश्च गुणपर्वावस्थितस्य श्रीकण्ठनाथस्य शिव[11]स्यैतत्संबोधनमित्यनेन ज्ञाप्यते" इति । [12]तन्न । निष्प्रयोजनत्वादामन्त्रणबहुत्वस्य वक्तुरकुशल[त्व]मेव परो दोष इति ।

[13]अन्ये तु "वेदचतुष्टय[14]संस्कृतार्थत्वादेव हि चतुर्भिरेव पदैरत्रास्य संबोधनमित्याहुः । यदेतद्यजुर्वेदे तावद् [रुद्रैकादशिनी संहिता श्रूयते । यस्यां] भगवन्तो [15]रुद्राः [सर्वाभिप्रेतसाधकाः पठ्यन्ते] । तैर्भगवत्स्वरूपमेवास्य श्रूयते । [16]ऋग्वेदे तु "इमा रुद्राय स्थिरधन्वने गिरः" इत्यादिभिः सूक्तैर्देवदेवत्वं, साम[17]वेदेषु [18]"आवो राजानम्" इत्यादिदेवव्रतान्तैरेकादशभिः सामभिर्लोक[19]नाथत्वम्, अथर्ववेदे [20]तु अथर्वशिरःप्रभृतिभिर्जगत्पतित्वमिति । इहापि [21]वक्ष्यति — "सद्योजातस्तु ऋग्वेदः" इत्यादि ।

अपरे "पुनर्गुणद्रव्य[22]कर्माभिजनकभेदेन चतुर्विधत्वात्स्तुतेरित्याहुः । [23]यदाहावधूतगुरुः —

"[24]अथवापि गुणद्रव्यकर्म[25]जातिस्तवैरलम् ।
वरदादिपदैः सद्भिः स्तुवानैरुदितो विधिः ॥" इति ।

केचिदत्र "तात्पर्यतो हेयतद्धेतुत्वस्वभावेनादेयतद्धेतुयोगतः स्तुतिश्चतुर्विधा । तस्य चत्वार्या[26]मन्त्रणानि" इति वर्णयन्ति ।

---

[1] श्रीमतङ्गे — अ, आ; 'गुणाः सर्वं यतो विप्र ततस्तेषां प्रवृत्तयः' मतङ्ग० विद्या० १६. १३उ०
[2] सर्वजगत् — आ
[3] मुद्रितपौष्करे विद्यापादे नोपलभ्यते ।
[4] च कौमार० — आ
[5] श्रीकण्ठ० — अ
[6] श्रीकण्ठत्र्यद्धवव्याप्त्येव — अ
[7] सार्धत्रि० ८.३, ४ पू०
[8] ब्रह्माण्डेति — अ
[9] ०गोचरः — अ
[10] ०श्वरान्तकम् — अ
[11] ०स्यैतद्बोधन० — अ
[12] तन्निष्प्रयोजन० — अ
[13] अन्येषु — अ
[14] संस्कृतार्थत्वाद्देहिभिश्चतुर्भिरेव — अ; संस्कृतत्वार्थत्वदेहिश्चतुर्भिरेव — आ
[15] रुद्रास्ते भगवत् — आ
[16] ऋग्वेदेति मा रुद्राय स्थिरधनानेभिरित्यादिभिः — अ; ऋग्वेदे ७.४६.१
[17] ०वेदेषु नारायणा साम्या देवादिः देव० — अ; वेदेष नारा जम्या देहादिभिः देव० — आ
[18] सामविधानब्राह्मणम् १.४.१७
[19] नाथम् अथर्व० — आ
[20] इत्यर्थर्वशिरः — अ
[21] वात्र . . . त्यो जातस्तु—अ; सार्धत्रि० २२.१३उ०
[22] ०कर्मजनक० — आ
[23] यद्य भावाधूत० — अ
[24] आकरो न लभ्यते ।
[25] ०जातस्तवै० — अ
[26] ०मन्त्रणानिरतः इति — आ

तदपरे तु [1]सौगतच्छायया तात्पर्यतोऽत्रास्य

[2]साध्यसंयुक्तसद्धेतुः पर[3]संपत्सकारणा ।
वाच्या [4]स्तुताविति प्रोक्ता चतुर्थ्यामन्त्रणैः स्तुतिः ॥

इति स्तुतिः[5] सा इति कथयन्ति ॥

तत्पक्ष[6]चतुष्टये पुत्रस्येयं स्तुतिरित्यज्ञानादयुक्तता ।

ननु कार्तिकेय[7]पिता श्रीकण्ठ[8]नाथश्च [9]सेव्येषु मध्यात् कः स्यादिति न निश्चितमस्माभिः । व्याख्यानादौ पूज्योऽभिवन्द्यश्चावतारको [10]गुर्वन्तरवदित्यवश्यज्ञातव्यतदर्थज्ञापिका[11] भवतीति[12] पूर्वैव व्याख्या युक्ता । श्रीमद्**रौरवादौ** [13]त्ववतारकोऽनन्तशिष्य एव श्रीकण्ठः । यदुक्तम्[14] —

"जगतः कारणं देवमनन्तेशं [15]जगद्गुरुम् ।
तेनोक्तं परमेशेन श्रीकण्ठाय [16]महात्मने ॥" इति ।

[17]इहानन्तवच्छिवशिष्य एवेति विशेषः ॥

[18]तदेवं भगवन्तमभिमुखीकृत्य [19]प्रश्नस्याप्रस्तुताभिधानत्वदोषनिवृत्तये तत्प्रसङ्गोपक्षेपः[20] —

मन्त्रतन्त्रं त्वया प्रोक्तं [21]विस्तराद्वस्तुसाधनम् ॥१॥

[22]"मननं सर्ववेदित्वं त्राणं संसार्यनु[23]ग्रहः" इति मननत्राणधर्मयोगान्**मन्त्राः** । शिवत[24]च्छक्ति-

---

[1] सौगतश्च तात्पर्यतो — अ; सौगतश्चि यया तात्पर्यतो — आ

[2] साध्यसदृक् सद्धेतुः — अ; सार्धसम्यक् सद्धेतुः — आ

[3] ०संपत्करणा — अ

[4] स्तुतापीति — आ

[5] 'इति स्तुतिः' इति नास्ति — अ, आ; "एतेन स्तुतिरुक्ता; असाधारणानां स्वपरार्थसंपत्तितदुपायानामुपदर्शनात् । सर्वत्र नमःशब्दप्रयोगाच्चतुर्थी" —प्रमाणवार्तिकमनोरथनन्दिवृत्तिः — पृ० २

[6] ०चतुष्टये पुत्रसेधं स्तुतीत्यज्ञानात् . . . युक्तता — अ; चतुष्टयेऽप्यत्र सेयं स्तुतिरित्यज्ञानाद् अयुक्तता — आ

[7] पितुः — अ, आ

[8] नाथस्य — अ, आ

[9] सेवेष्टमध्यात् — आ

[10] गुर्वन्तरादित्यवश्यं ज्ञातव्यं । तदत्य ज्ञापिता —आ

[11] ०ज्ञापिता — अ

[12] इतिशब्दो नास्ति — अ, आ

[13] त्वौतारकानन्त० — अ; त्ववतारकानन्त० — आ

[14] यद्रत्नम् — आ; रौरवागमे विद्यापादे ३, ६ उ०–७ पू०

[15] परं गुरुम् — आ

[16] महात्मनः — अ

[17] बहु . . न्तव शिष्येण वेति विशेषतः — अ

[18] तद्देवं भीमगवन्तमभि० — आ

[19] प्रश्नस्याप्तस्तुता० — अ

[20] निवृत्तये प्रसङ्गे पक्षे — अ

[21] विस्ताराद्वस्तु — अ, आ

[22] **कामिकागमे** पूर्वभागे २.२ पू०; 'मननं सर्ववेदित्वं त्राणं संसारसागरात्' इति **सुप्रभेदागमे** क्रियापादे मन्त्रोद्धारपटले श्लो. २ पू०; मननं सर्वपक्षेषु त्राणं संसारसागरात्' इति **वातुलशुद्धाख्ये** मन्त्रभेदपटले श्लो. ७ पू०

[23] ०ग्रहम् — अ

[24] ०च्छक्ति विद्याः विद्येश्वरांश्च—अ; ०च्छक्ति विद्याविद्येश्वरांशरूपाश्चाणवः — आ

विद्याविद्येश्वराश्च, तत्स्वरूपाश्चाणवः, तदभि[1]धायकाश्च [2]शब्दास्तद्वचक्तिस्थानत्वाद् मन्त्रा इत्युच्यन्ते । [3]**तन्त्रं** च परापरपुरुषार्थाधिकारिणां विशिष्टसंस्कारप्रतिपादनपूर्व[क]मीश्वराराधनाय [4]नियतविधिनिषेधं तदाज्ञात्मकं वाक्यजातम् । तत् **त्वया** विस्तरं कृत्वा वातुलाख्यं मम [5]**प्रोक्तं वस्तुनः** परापरपुरुषार्थलक्षणस्य **साधनम्** । तथा हि — [6]शिवात्मनो मन्त्रस्यैकत्वेऽपि तद्वाचकस्य व्योमव्याप्यादेर्मन्त्रस्यानेकवचनशतैः सर्वव्याप्याद्यैस्तद्वर्णसहस्रैरारब्धत्वाद्विस्तारत्वम् । शक्त्याः परं तथा[7]स्वरूपत्वेन । विस्तारस्त्वेष पुनर्वाच्यापेक्षया ब्रह्म[8]तत्कलातदङ्गानां भेदेन । अङ्गापेक्षया च विद्याङ्गसकल[9]निष्कलभेदेन चातिविस्तारत्वम् । एवमाणवानामपि, यतस्तेऽपि [10]मन्त्रा अनन्तादिविद्येश्वरविद्याविग्रह[11]राज्यङ्गरुद्रव्यूहकम् । अतः शुद्धविद्याभुवनेश्वर[12]त्वेन परेणैषु पूजादौ विस्तरेण न्यस्ताः, मायाभुवनेश्वराश्च शुद्धा अपि तदधिष्ठिता[13] अशुद्धभुवनेश्वर[14]पूजाधिकरणत्वेन [15]विस्तरत एव न्यस्ता[16] अस्यासनत्वेन परमेश्वरपूज्याः [17]प्रेष्याश्च पशवो [18]यत इत्युक्तम् ।

तथा [19]तन्त्रमपि तद् अनेकेतिहासानुवादार्थवादा [दि] नियोगेन विस्तारमेव कृत्वा [20]लक्षसंख्यया वस्तुनः परस्य दीक्षाद्युपदेशद्वारेण साधनमुक्तम् । अपरस्याप्यनेकहोमादिसाधनकर्पूरचन्दनादिद्रव्यविस्तरं कृत्वा [21]तथा युक्तमेव तथा [22]पण्डितानुष्ठितं चाभ्युदयाय भवतीति [23]सामर्थ्यादिपर्यालोचनया[24] रुद्राणां देवानां तत्राधिकारो यतः ॥१॥

किमर्थं तर्हीदं [25]वक्तुमुपक्रान्तं त्वयेति [26]प्रश्ननिमित्तकथनम् —

अल्पायुषस्त्विमे मर्त्या अल्पवीर्याल्पबुद्धयः ।
अल्पसत्त्वाल्पवित्ताश्च लोभमोहासमन्विताः[27] ॥२॥

सामान्येनात्र मनुष्याणां नाधिकार इति दर्शयितुमिदमा विशेषिताः । ये त्विमे मलपरिपाकवशाच्छक्तिपातपवित्रीकृतत्वेनात्राधिकारिणः कथंचित्संपन्नाः, [28]तेषामल्पकालजीवितत्वादतिविस्तीर्ण-

---

[1] ०धायकश्च — अ
[2] शब्दांस्तद्वचनक्ति — अ
[3] मन्त्रश्च परपुरुषार्था० — अ
[4] नियुतविनिषेधं तदाज्ञात्यकम् — अ; नियतविधि निषेधविधि तदाज्ञात्मकं — आ
[5] प्रोतं — अ
[6] शिवात्मने — आ
[7] ०स्वरूपत्वेनाविस्तरस्त्वेष — आ
[8] तत्कलामम्भानि भेदेन नाम्भापेक्षया — अ; तत्कलादङ्गानि भेदेनाङ्गापेक्षया — आ
[9] निष्कलाभेदेन चादिविस्तार० — अ
[10] तन्त्रानन्तादि० — अ, आ
[11] राज्याङ्गरुद्र० — अ, आ
[12] ०त्वेनापरेणेष्ठपूजादौ — आ
[13] तदधिष्ठा — अ
[14] पूजादिकरण०—अ; पूजा तदधिकरण०—आ
[15] विस्तारत एव — अ
[16] न्यस्यास्ताः — आ
[17] पोष्याश्च — अ, आ
[18] यश्च — अ
[19] मन्त्रमपि — अ, आ
[20] लक्षणसंख्या वस्तुनः — अ
[21] तत्तु — अ
[22] पिण्डितानुष्ठितं—अ; पण्डितमनुष्ठितम्—आ
[23] सान्वादि — अ
[24] ०लोचनयो — आ
[25] 'वक्तुं' इति नास्ति — आ
[26] प्रश्नस्य निमित्त० — आ
[27] लोभमोहसमन्विताः – इति पाठः सर्वत्र
[28] तेषामल्पकालमपि तत्रादिविस्तीर्णे — अ; तेषामल्पकालजीवितत्रादिविस्तीर्णे — आ

ऽध्ययन[१]श्रवणादिकमेव तावन्न संभवति। केषांचित्संभवे च **अल्पवीर्यत्वाद् अल्पबुद्धित्वाच्च** न तदर्थानुष्ठाने विस्तीर्णे [२]सामर्थ्यम्। यदाहुः — "[३]अर्थी शक्तो विद्वा[४]न्शास्त्रेणापर्युदस्तः [५]कर्मण्यधिक्रियते" इति। तथा सिद्धा [६]वर्षास्तत्र तेषां नाधिकार इति। [७]**अल्पसत्त्वाल्पवित्ताश्च** तत्र सत्त्वं [८]चित्तवृत्त्युपचीयमानं स्वविरुद्ध[९]रजस्तमोनिवर्तनेन रागादी[१०]नुज्ज्वलयत् [११]साधकानां तत्सिद्धिहेतुरिति तत्रोक्तम्। तच्चाल्पं येषां ते तथाभूताः; [१२]सर्वथानुन्मीलितरागादिदोषत्वात्। [बहुवित्तसाध्यं] तत्साधनं तत्रोक्तम्। [तच्चाल्पं येषां ते तथाभूताः] अनेन कर्पूरचन्दनेन होमाद्यनुष्ठातुं यतो न शक्नुवन्तीति। यद्येवमनधिकारिण एव तेऽत्र [१३]तिर्यगादिवदधिकारावगमानुत्पादात्, तदुत्पादे वा वेदादौ शूद्रादय इव तच्छास्त्रेण पर्युदस्तत्वात्। [१४]न, यतः **लोभमोहासमन्विताः** चित्तं चेल्लोभादिभिरनुरचितम्[१५]; संजात[१६]संसारवैराग्याः परिणतमला इत्यर्थः। यदुक्तं **श्रीमतङ्गे**[१७] —

"संसारात्स विरज्येत [१८]प्रध्वस्तकलुषः सदा॥" इति।

श्रीमत्स्वायम्भुवे[१९] —

"क्षीणे [२०]तस्मिन्यियासा स्यात्परं निःश्रेयसं प्रति।" इति।

[२१]ततश्चैते रुद्रविशेषवदत्र संप्राप्ताधिकारा [२२]वा केवलं [२३]विस्तरेऽस्मिन्छास्त्रे [२४]तदर्थानुष्ठाने यतो [२५]न वाधिकारिणः प्रोक्तहेतुभिः[२६]। ततोऽयं [२७]प्रश्न इति हेत्वर्थः॥२॥

अथ प्रश्नः —

[२८]अल्पग्रन्थं महार्थं च पदार्थानीकसंकुलम्।
वक्तुमर्हसि [२९]देवैषां प्रसादार्थं मम प्रभो॥३॥

---

[१] श्रवणादि कुतो वा नायं न संभवति — अ

[२] न सामर्थ्यम् — आ

[३] 'अर्थी समर्थो विद्वानधिक्रियते' इति न्यायः लौ. न्या. साहस्री ७१९

[४] ०न्शास्त्रेण पर्युदास्तः — अ, आ

[५] कर्माण्यधि० — अ; कर्मा ह्यधिक्रीयते –आ

[६] वर्ष्या तत्र — आ

[७] रुच्यल्पसत्त्वा० — अ, आ

[८] चित्रवत्युपचीय — अ, आ

[९] ०निजस्तमो० — अ

[१०] ०नुज्ज्वलयन् — अ; नुकूलयन् — आ

[११] साधकानन्तसिद्धि० — आ

[१२] सर्वानुन्मीलित० — अ; सर्वधानुमीलित० — आ

[१३] निर्यादीवाधिकारावहानु० — अ; तिथ्यगादिवदधि० — आ

[१४] नियतं लोभमोह० — अ; नियतः लोभमोह० — आ

[१५] ०रनुचिताः — अ; ०रनचिताः — आ

[१६] ०संस्कार० — अ

[१७] मतङ्ग० विद्या० १०.२५ उ०

[१८] वृद्धः सकलुषस्तदा — अ, आ

[१९] स्वायंभुवे ३२.१७ उ०

[२०] तस्मिन् यथा सा—अ; तस्मिन् यया सा —आ

[२१] ततश्च ये ते — आ

[२२] पाव केवलं — आ

[२३] विस्तरे सच्छास्त्रे — अ

[२४] तदर्थेऽनुष्ठाने — अ

[२५] नावधि० — अ

[२६] ०हेतुभ्यः — आ

[२७] प्रश्नमिति — अ

[२८] अल्पग्रहमहा० — अ;

[२९] देवैष — अ; 'देवेश' इति पाठोऽप्यस्तीति व्याख्याने निर्देशाज्ज्ञायते। 'देवेश' इति मु. पाठः

अल्पग्रन्थः[1] यस्मिन्मन्त्रतन्त्रात्मके शास्त्रे तद् **वक्तु**[2]**मर्हसि** इति। [3]न त्वेवमल्पप्रयोजन[4]मपीत्याह — **महान्** [5]**अर्थः** सिद्धिमुक्तिलक्षणे यस्मात् तत्प्रयोजनेनैव युक्तमित्यर्थः। [6]तथाभिधेयेनापि [7]तेनैव युक्तमित्युच्यते — **पदार्थाः** अर्थराशयः, [8]तेषाम् **अनीकः** [9]समूहः षट्संख्यात्मकम्। यदुक्तं श्रीमत्-**पौष्करे**[10] —

"पतिर्विद्या तथाविद्या पशुः पाशश्च कारणम्।
तन्निवृत्ताविति प्रोक्ताः पदार्थाः षट् समासतः॥" इति।

तत्र पतिपदार्थे शिवसदाशिवेश्वरलक्षणस्य तत्त्वात्मनोऽर्थराशेः [11]सह भुवनादिभिः संग्रहः। विद्यापदार्थे मन्त्र[12]मन्त्रेशात्मन[स्त]त्त्वद्वयस्य सह तद्भुवनभूतादिभिः, अविद्या[13]पदार्थे तु मायातत्त्वस्य सह भुवनभूतैः कर्मात्मकैश्च भावैः, पशुपदार्थे [14]च सर्वेषामात्मनामपि [15]विज्ञानकेवलप्रलयकेवलसकलानां पशुत्वमलसंबन्धयोगात् तेन सह [16]पशुतया संग्रहः। पाशपदार्थे तु पृथिव्यादि[17]कलान्तस्य त्रिशत्तत्त्वात्मनो मायेयस्य सह तद्भुवनैर्मायागर्भाधिकारिभिश्च, तन्निवृत्तिकारणपदार्थे तु सर्वस्य दीक्षादिकर्मणो[18] मोक्षोपायस्येति [19]पदार्थोदितेन **संकुलं** च व्याप्तं तदभिधेयमित्यर्थः। तदेवं विशिष्टस्वरूपप्रयोजनाभि[20]धेयैर्युक्तं शास्त्रं **वक्तुमर्हसि देव एषाम्** अधिकारिणां[21] मर्त्यानां [22]**प्रसादार्थं** ममेति प्रार्थना। अहमेषामनुग्रहं कर्तुमिच्छामीत्यर्थः। अत एव चावश्याधि[23]कारिणश्चैतच्छास्त्रं प्रवृत्तम्। यद्वक्ष्यति[24] —

"तद्विदित्वा [25]महासेन देशिकः पाशहा भवेत्।" इति।

"देवेश" इति पाठे, अत्रोपक्रमोपसंहारयोरसंबन्ध एव। [26]यतोऽल्पायुष्यादिधर्मयुक्ता[27] इमे[28] मर्त्यास्ततो ममाल्पग्रन्थं शास्त्रं वक्तुमर्हसीति[29] किं केन संगतमिति पूर्व एव पाठो युक्तः। अन्ये तु [30]वक्ष्यमाणस्य

---

[1] अल्पग्रहो — अ
[2] ०मर्हतीति — अ
[3] नास्त्येव ० — अ
[4] ०मितीत्याह — अ
[5] अर्थसिद्धि० — अ, आ
[6] योगे येनापि — अ
[7] तेनैवमुक्त० — अ
[8] तेषां समूहः — अ
[9] स आह षट्० — आ
[10] यद्यपि मुद्रितपौष्करे विद्यापादे १.८ "पतिः कुण्डलिनी माया पशुः पाशश्च कारकः। इति प्रोक्ताः पदार्थाः षट् शैवतन्त्रे समासतः।" इति पाठो दृश्यते। तथाप्यन्यत्र ग्रन्थेषूद्धृतस्यास्य श्लोकस्यैवं पाठः॥
[11] सभुवनादीः संग्रहः — अ
[12] ०मन्त्रेशाना भूतवद्वधस्य — अ
[13] ०पदार्थैस्तु — अ, आ
[14] चशब्दो नास्ति — अ
[15] विज्ञानं केवलं — अ
[16] बहुधा संग्रह पशुपदार्थे तु — अ
[17] ०कल्पान्तत्वस्य — अ
[18] ०कर्मणा — अ
[19] पदार्थे इति तेन सकलमपि व्यस्तं — अ
[20] ०धेयै नृत्तं शास्त्रं — आ
[21] ०कारिणे — अ
[22] प्रासादार्थं — आ
[23] ०करणं चैतच्छास्त्रं — अ
[24] सार्धत्रि० १.६ पू०
[25] महांस्ते देशिकपाशभाक् चेति — अ
[26] ततो — अ
[27] युक्तो — आ
[28] इतो — अ
[29] इतिशब्दो नास्ति — आ
[30] सार्धत्रि० १५, १६ पटलयोः।

[1]प्रासादस्य मन्त्रनाथस्यार्थप्रकाशकत्वा[2]द्योऽल्पो ग्रन्थस्तमल्पग्रन्थं महार्थं च वक्तुमर्हसीति [3]प्रष्टव्य-[4]विशेषणमेवैतदित्याहुः ॥३॥

तदेवं [5]प्रार्थनास्वरूपमवगम्य भगवानाह —

अथातः संप्रवक्ष्यामि शास्त्रं परमदुर्लभम् ।

[6]**अथ** इति न [7]प्रश्नादनन्तरम् । अस्योक्तस्यैक[8]कालीनत्वादिव्यापकत्वादित्युक्तमन्यत्र[9] । [10]एवं च पतिपदार्थस्य प्रथममुद्देशः सिद्धः । **अतः** इति भेदेन । यतोऽमी परिणतमलत्वेन शक्ति[11]पाता-वृतत्वादवश्यमनुग्राह्याः । न च तत्र विस्तरे शास्त्रेऽधिकारिणः, [12]तद्वच्च साक्षादनुग्राह्यत्वेन स्थिताः, ततो [13]भेदः । **शास्त्रं** मन्त्रतन्त्रात्मकं संक्षेपप्रकर्षतो **वक्ष्यामि** । यावत्संक्षेपः संभवतीत्यर्थः । तच्च **परमदुर्लभं** न ह्यल्पग्रन्थं महार्थं च शास्त्रं क्वचिदस्ति दशाष्टादशसंख्येषु[14] पारमेश्वरेषु । यत-स्तेषामनेकग्रन्थत्वं [15]लक्षसहस्रसंख्यात्वात् ।

कथं तर्हि परमेश्वर[16]कर्तृकमेतदित्युक्तम्[17] —

नाम्ना तु वातुलात्तन्त्रा[18]द्दध्नो घृतमिवोद्धृतम्[19] ॥४॥

[20]वाधृ लोडने [21]इत्यर्थाद्धातोर्बाहुलकत्वादौणादिकेन [22]ण्वुल्प्रत्ययं[23] कृत्वा [24]यत्सिद्धरूपं नाम ; तेन नाम्ना [25]वातुलं लोडनं समस्तज्ञान[26]प्रतिपाद [न] रूपं [27]पारमेश्वरतन्त्रमिति विचित्र[28]प्रकाश्यार्थधारणाच्च [29]शास्त्रमेवं प्रसिद्धम्, तस्मात्प्रकृतिभूतात्तदाज्ञयैव मया [30]स्वबुद्ध्या[31]मथ्य **दध्नो घृतमिव** ताभिरेव शब्दा-

---

[1] प्रसादार्थस्य — अ
[2] ०द्योऽल्पग्रन्थं महार्थं — अ
[3] पृष्टस्य — अ
[4] विशेषेण० — आ
[5] प्रश्नास्वरूप० — आ
[6] 'अथ इति' इति नास्ति — अ
[7] प्रश्नानन्तरस्योक्त० — अ; प्रश्नादनन्तर-स्योक्त० — आ
[8] कलनात्वव्यापकत्वादित्युक्तमत्र — अ
[9] त्वादव्यापकत्वादित्युक्तमन्यत्र — आ
[10] पञ्च पतिपदार्थं चास्य — अ
[11] ०पातान्नतत्वादवश्य० — अ; पातापृक्त्वा-दवश्य० — आ
[12] तद्वचस्साक्षादनु०—अ; तद्वचसाक्षादनु०—आ
[13] भेदः शास्त्रमन्त्र० — अ; भेदशास्त्रं मन्त्र० — आ
[14] ०समेषु — अ
[15] लक्षणसहस्र० — अ
[16] ०कर्तृत्वमेत० — अ
[17] यतः नाम्ना तु — अ
[18] ०द्दध्ना घृत० — अ
[19] अत्र इतिशब्दोऽधिकः — अ
[20] धातुपाठे 'बाधृ विलोडने' इति पञ्चमो धातुः । वाध्रलोचन — अ; बाधृ लोगन — आ
[21] इत्यर्थाश्चातो बाहुल्यादौणा० — अ; इत्यर्था-द्धातो बाहुलत्वादौणा — आ
[22] हृचुलप्रत्ययं — आ
[23] प्रत्ययः — अ
[24] यत्सिद्धं . . . नाम — आ
[25] वातुल . . . क्तं लोकनं — अ
[26] ०प्रतिघातरूपं — आ
[27] परमेश्वर० — अ, आ
[28] ०प्रकाश्य धार० — अ
[29] शास्त्रमेव प्र० — अ
[30] स्वबुद्ध्याग्नि मध्ये अग्निर्घतमिव — अ
[31] मत्थ्य अग्ने घृतमिव — आ

र्थं[1]मात्राभिरभिधीयते। यत [2]एतद् **उद्धृतम्** इति [3]संगृहीतं, ततस्तत्कर्तृकमित्यदोषः। एतेन परोऽप्यस्य संबन्धः [4]सिद्धः। ततश्चात्रैतदेवादिसूत्रम्। अभिधेयप्रयोजनयोरप्यत्र परम[5]दुर्लभपदेनोक्तत्वात्सकलं शास्त्रार्थं प्रतिज्ञारूपेण परिपूर्णं यतः॥४॥

[6]अथ मन्त्रसंक्षेपमेव तावद्वक्तुमल्पग्रन्थस्यैव विद्यापदार्थोपक्षेपपूर्वं[7] शास्त्रस्योपक्रमः —

नादाख्यं यत्परं बीजं सर्वभूतेष्ववस्थितम्।

नादः इति **आख्या** यस्य, [8]तत्तावदान्तरध्वनिरूपमेव स्थान[9]भेदतोऽनेकवर्णतामुपगच्छत्। यदुक्तम्[10] —

"आकाशवायुप्रभवः शरीरात्समुच्चरन्वक्त्रमुपैति नादः।
स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः॥" इति।

[11]किं तदेवात्र विवक्षितम्। नेत्याह — "**यत्परं बीजम्**" इति, तस्य नोदनाद्यवस्थास्वपि भावात्तदभिधेयबुद्धिबीजमभिधानं यत्नेन **सर्वभूतेष्ववस्थितं**[12] सिद्धमेव [13]पदस्य वक्ष्यमाणनये[14]नाभिधायकत्वानुपपत्तेरित्यन्येन तत्कारणेन भवितव्यम्। तच्च न बुद्ध्यादिभ्यो[15]ऽन्यतमं तत्त्वम्। किं तु परं [16]नादाख्यमेवेत्युच्यते[17] —

[18]"बुद्ध्यस्मितामनोभ्यो [19]विद्यातो रागतः कलायाश्च।
[20]मायापुंशक्तिभ्यो नादोऽन्यो दृश्यते ध्वनिभ्योऽपि॥अ॥
[21]श्रोत्रग्राह्या वर्णा उच्चरितध्वंसिनः क्रमस्थितयः।
[22]अपरस्परोपकारादविशिष्टा नार्थवाचका [23]युक्ताः॥आ॥
न च वर्णव्यतिरिक्तं पदमन्यच्छ्रूयतेऽथ वाक्यं वा।
यच्चाक्षमिति निषिद्धं [24]तत्सदिति निषिध्यतेऽन्यतो ज्ञातुम्॥इ॥

---

[1] ०मात्राभिर्धार्यते — अ, आ
[2] एव तदुद्धृत० — अ
[3] संगृहीतः — आ
[4] सिद्धिः — अ
[5] ०दुर्लभवदनेनोक्तत्वात् — अ
[6] असंक्षेपमेव तावदल्पग्रन्थत्वेन विद्या० — अ
[7] ०पूर्वः — अ
[8] तत्तत्पदान्तर० — अ
[9] ०भेदात्तैनैकवर्णता० — अ
[10] पाणिनीयशिक्षायां (वृद्धपाठे) आपिशलिशिक्षायां चादौ दृश्यते।
[11] किमन्ते वात्र — अ
[12] ०स्थितः — आ
[13] 'पदस्य' इति नास्ति — आ
[14] ०नाभिधेयकानुपपत्तेरित्यनेन — अ; ०नाभिधायकानुपपत्तेरन्येन — आ
[15] ऽन्यतत्त्वम् — अ
[16] नाय : मेवेत्युच्यते — अ
[17] उपलब्धमातृकाद्वयेऽपीतः परम् अष्टप्रकरणेष्वन्यतमतया मुद्रिताया भट्टरामकण्ठकृतनादकारिकायाः श्लोका उपलभ्यन्ते। एषा नादकारिका ग्रन्थस्यास्यैकदेशीभूतेति द्वादशपटले प्रथमश्लोकव्याख्यानुरोधेनाभ्यूहितुं शक्यते॥
[18] बुद्ध्यसिमता — अ; बुध्यस्थितो — आ
[19] विद्यतो — अ
[20] महापुंशक्तिभ्यो — अ; मायापुङ्गशक्तिभ्यो — आ
[21] श्रोतृग्राह्या — आ
[22] परस्योपकारादवशिष्टा — अ; परस्परोऽधिकारा० — आ
[23] युक्ता — अ, आ
[24] इति तत्सदिति न शक्यतोऽन्यतो — अ

गौरिति [१]नामादिपदं [२]श्रोत्रग्राह्यं [३]सदस्ति चेन्नैवम् ।
[४]न गकारौकारविसर्जनीयबाह्यं[५] यतोऽन्यदत्रास्ति[६] ॥ई॥
[७]तेषां [८]युगपदभावात्परोपलम्भेन पूर्वयोर्भावः[९] ।
[१०]प्राप्ताद्विसर्जनीयात्खुरकम्बल[११]लक्षणा न चिद्व्यक्तिः ॥उ॥
अथ चेद्विसर्जनीयात्पूर्वाक्षर[१२]जातसंस्कृतिसहायात् ॥
इष्टैव वाच्यबुद्धि[१३]रविशिष्टतो यन्न संभवति ॥ऊ॥
नैतत्संस्कारा अपि यैर्बुद्धौ पूर्वमाहितास्तेषु[१४] ।
[१५]विज्ञानहेतवः स्युर्न ततोऽर्थे धीः प्रकल्प्यते येन ॥ऋ॥
[१६]तद्बुद्धयधिरोहितपदं क्रम[१७]वृत्तस्य क्रमेण [१८]विज्ञानम् ।
वाचकमिष्ट[१९]मदुष्टं हेतुश्चेत् स्थूलशब्दजातस्य ॥ॠ॥
[२०]अस्त्वित्थं वाचकता वाच्येभ्यो नैव भिद्यते येन ।
तद्वस्तु [२१]निरवशेषमविशेषेणैव बुद्धयुपारोहि ॥ऌ॥
वाचकतैव [२२]विशेषो [२३]वाच्याच्चेत्तद्विमर्शरूपत्वात् ।
अस्य [२४]विमृश्या वाच्या भेदाभेदैरिदं [२५]च सत्किं[२६]तु ॥ॡ॥
रूपरस[२७]गन्धशब्दाद्यर्था[२८] येनावमृश्यतां नीताः ।
सोऽन्तः संजल्पात्मा नादः सिद्धो न विषयभावेन[२९] ॥ए॥

---

[१] नामपदं — अ
[२] श्रोतृग्राह्यं — अ
[३] समस्तं च नैवम् — अ; समस्तं चेन्नैव — आ
[४] नकारो नास्ति — अ
[५] विसर्जनीयं बाह्यं—अ, विसर्जनीयस्यायं—आ
[६] ०दत्रास्ताम् — अ; यदतोऽन्यदत्रास्ति — मु. ना. पाठः ।
[७] नैषां — अ
[८] युगपदभावात्परोऽल्पं भेदेन — अ; युगपदभावात्परोऽल्पमभेदेन — आ; युगपद्भावात् — मु. ना. पाठः
[९] पूर्वे युगपत् — अ; पू . . योर्भाव — आ
[१०] प्राप्ता विसर्ज० — अ
[११] लक्षणान्न चिद्व्यक्तिः — अ; लक्षणा न च तद्व्यक्तिः — आ
[१२] ०जातिसंस्कृति० — अ
[१३] ०रवशिष्टतोऽन्यन्न — अ; — आ; ०रविशिष्टाद्या न — मु. ना. पाठः
[१४] ये बुद्धौ न पूर्वमाहितास्तेषु — अ; ये बुद्धौ पूर्वमाहितास्ते — आ
[१५] विज्ञानवेतसीर्न ततोत्येधीः — अ, अज्ञानहेतवस्युर्न ततोऽन्ये धीः — आ
[१६] तद्बद्धया तिरोहितपादक्रम० — अ; तद्बुद्धयाधिरोहितपदक्रम०—आ; तद्बुद्धयधिरोहपदं क्रम० — मु. ना. पाठः
[१७] प्रत्ययस्य — अ, आ
[१८] विज्ञाप्य — अ
[१९] ०मदृष्टहेतुश्चेत् — अ; ०मदृष्टं हेतुश्चेत् — आ
[२०] अस्त्वर्थवाचकता — अ; अस्त्वर्थमवाचकता — आ
[२१] निरावरणेनै बु० — अ; निरवशेषेणैव बु० — आ
[२२] विशेषतो — अ
[२३] वाच्याच्च तद्विमर्श० — अ, आ
[२४] विभ्रश्या वाच्या — अ
[२५] तु — अ, आ
[२६] च — अ, आ
[२७] गन्धस्पर्शशब्दा . . अस्य तां नित्यतः सोऽन्तः — अ
[२८] शब्दार्था — आ
[२९] विनयभावेन — आ

विषयीकुर्वन्सर्वाञ्शब्दार्थानेष वाचको नान्यः ।
दृष्टं सदप्य[1]सत्तद्यस्मादेतेन [2]यदा परामृष्टम् ॥ऐ॥
बुद्ध्याकारो [3]नास्मान्न मनोऽहंकारयोः कृतिर्येन ।
तत्कार्यशरीरेन्द्रियविकृतेः पृथगेवमव्यक्तम्[4] ॥ओ॥
[5]अव्यक्तत्वान्नादः सूक्ष्मः शब्दस्तु वाचकत्वेन ।
वाक्य[6]पदे प्रविभिन्नः पदार्थबुद्धेरसंकरो[7] यस्मात् ॥औ॥
[8]संवेद्यते न तद्वच्चागोपालाङ्गनादिपशुवृन्दैः ।
बालैर्भिन्ना [9]नादा उत्पत्त्यपवर्गयोगिनस्तेन ॥अं॥
[10][ततश्चैषां[11] कार्यत्वेनोपादानकारणं [12]वाच्यम् ।
तत्सिद्धो[13] नादः परः सुमङ्गला [14]मालिनी महामाया ॥अः॥
समनानाहतबिन्दुरघोषा वाग्ब्रह्म[15]कुण्डलीतत्त्वम् ।
विद्याख्यं [16]चेत्युक्तं तैस्तैः शब्दैस्तदागमेष्वेवम्[17] ॥क॥]
सेयमवस्था कैश्चित्पदविद्भिर्वर्ण्यते [18]क्रियाशक्तेः ।
इह पुनरन्यैवोक्ता [19]पुरुषासमवायिनी च [20]वाग्यस्मात् ॥ख॥
अविकार्यत्रात्मोक्त[21]स्तच्छक्तिश्चाप्यतो न योग्यौ तौ ।
बहुधा स्थातुं यद्वा चैतन्यविनाकृतौ विकारित्वात् ॥ग॥
[22]तत्पुंशक्तेर्भिन्नो नादोपादानकारणत्वेन ।
अचिदपि [23]शुद्धात्मत्वान्मायातोऽन्या तदूर्ध्वगा कथिता ॥घ॥

---

[1] सत्तस्मादेतेन — अ; सक्तस्तस्मादेतेन—आ; सत्तद्यस्मादेते सदा — मु. ना. पाठः
[2] यदपो मृष्टम् — अ, आ
[3] नास्तां न मनो०—अ; नास्थां न मनो०— आ
[4] पृथगेवमुक्तम् — अ, आ
[5] अव्यक्तान्नादसूक्ष्मशब्दस्तु — अ; अव्यक्तान्नादः सूक्ष्मशब्दस्तु — आ
[6] ०पदेन प्र... दार्थ — अ; पदेन प्रविभिन्नः पदार्थ० — आ
[7] बुद्धेरहंकारो — अ, आ
[8] संवेद्यन्ते तद्वच्च गोपा० — अ; संवेद्यन्ते तद्वच्चागोपा० — आ
[9] नाद्या उत्प० — अ; नाद उत्प० — आ
[10] इदं च [कोष्ठान्तर्गतं] कारिकाद्वयं मुद्रितवृत्तिसहितनादकारिकासु १५ तमकारिकावृत्तावन्ते दृश्यते ।
[11] 'ततश्चैषां' इति नास्ति — अ, आ; 'एषां' इति नास्ति—मु. नादकारिकावृत्तिः ।
[12] वाच्यमेषां तत्—अ, आ, मु. नादकारिकावृत्तिः ।
[13] नादपरः — अ; नादः वरः — आ; नादः स्वरः — मु. नादकारिकावृत्तिः ।
[14] मालिनिः — मु. नादकारिकावृत्तिः ।
[15] ०कुण्ठितत्वम् — अ, कुण्डलिनीतत्त्वं — मु. नादकारिकावृत्तिः ।
[16] तत्त्वमित्युक्तं तैस्तैस्तदागमेषु—मु. नादकारिकावृत्तिः
[17] ०स्तदात्यर्था—अ; ०स्तदागमेष्वित्यर्थः—आ
[18] क्रियाशक्तेस्त्वमेव पुनरन्यैवोक्ता — अ; क्रियाशक्तित्वमेव पुनरन्येवोक्ता — आ
[19] पुरुषसमवायिनी — अ; पुरुषासमवायिनी वाग्य० — मु. ना. पाठः ।
[20] या ह्यस्मादविकार्यत्रात्मोक्त० — अ; वाग्यस्मादविकार्यात्रात्मोक्त० — आ
[21] ०स्तच्छक्ति चाप्यतो न योग्योऽतो — अ
[22] तत्पुंशक्त्यै गर्भं नानोपकारित्वेन — अ, तत्पशक्तेः भिन्ननादोपकारकेन — आ
[23] शुद्धात्वा मायाप्यन्वितदूर्ध्वगा — अ; शुद्धात्ममायातोऽपि तदूर्ध्वगा—आ; शुद्धत्वा०—मु. ना. पाठः

[1]शुद्धं विद्यातत्त्वं विद्येशानां [2]तु भोगदं [3]भुवनम्।
[4]अध्वन्युक्तं चान्यैः [5]सदागमैः श्रेयसे च [6]बहुभिरिति ॥ङ॥
[7]वाग्ब्रह्मणि [8]निष्णातश्चिद्ब्रह्माप्नोति येन कथयन्ति।
[9]सिद्धिर्मुक्तिश्च परा नादज्ञानक्रिया च [10]सफलेति ॥च॥
[11]मन्त्रादिकारण[12]त्वाद् विद्यारागादिकञ्चुकाद्भिन्नम्।
[13]तत्कार्यमभिष्वङ्गाद् दृक्क्रिययोर्मीलनाच्च भिन्नं यत् ॥छ॥
[14][स महामायाजन्यो नादः परमार्थवाचको युक्तः।
येन [15]स्थूलः शब्दो मन्त्रतन्त्रात्मको भवेद्वापि ॥ज॥]
[16]सा प्रतिपुरुषं भिन्ना वाक्छक्तिर्वाचिका स्थितेति[17] ततः।
[18]वाचकजातं निर्मायान्तरेण तद्वचनक्ति बाह्येऽपि ॥झ॥
स्थूलैः [19]शब्दैर्व्यक्ताः [20]सूक्ष्मा [21]नादात्मकास्ततो ध्वनयः।
वाच्यविभिन्नां[22] बुद्धिं [23]कुर्वन्तो [24]वर्तयन्ति जनयात्राम् ॥ञ॥" इति।

अथास्य [25]प्राक्प्रतिज्ञातं प्रयोजनमुच्यते —

मुक्तिदं परमं किं च दिव्यसिद्धिप्रदायकम् ॥५॥

[26]**मुक्तिदं परमं**, तस्मिन्विदिते परमा मुक्तिः, [27]तदानीं मलनिवृत्त्यविनाभूतस्य महामायापुरुषविवेकस्याप्युदयात्। मायापुरुषविवेकोदयात्तु[28] कर्मनिवृत्त्यविनाभूताद् विज्ञानकेवलत्वमेव मलनिवृत्तेरित्युक्तं **गुरुभिः**[29] —

---

[1] शुद्धविद्या॰ — अ, आ
[2] च — मु. ना. पाठः।
[3] भवनं — अ
[4] अध्वर्युक्तं — आ
[5] सदहमैश्श्रेयसे — अ
[6] तद्धेतुः — मु. ना. पाठः
[7] वाग्ब्रह्मनिर्णात॰ — अ
[8] निष्णातश्चेद्ब्रह्मा॰ — अ, आ
[9] सिद्धि मिति च परान्वादज्ञाना॰ — अ; सिद्धिमुक्तिश्च परा नादात्क्रिया — आ
[10] त्वफलेति — अ, आ
[11] मन्त्राधिरण॰ — अ,
[12] त्वाच्च रागविद्यादि — अ, आ
[13] तत्कार्यं पुमभिष्वङ्गक्रियोन्मीलितत्वं च — अ; तत्कार्यं पुमभिष्वङ्गतत्क्रियोन्मीलितं च — आ
[14] कोष्ठान्तर्गतेयं कारिका मुद्रितनादकारिकाग्रन्थे परमुपलभ्यते।
[15] स्थूलं शब्दं मन्त्रं तन्त्रात्मकं प्रवर्तते वापि — मु. ना. पाठः।
[16] संप्रतिपुरुषमवभिन्न॰ — अ
[17] व्यापिका स्थितेति — अ, आ
[18] वाचकजातौ मायान्तरेण — अ; वाग्जात निर्मायान्तरेण — आ; वाचकजातं निर्मायान्तरतस्तद्वचनक्ति — मु. ना. पाठः
[19] शब्दैर्वाक् सूक्ष्मा — अ
[20] सूक्ष्मनादात्मिका॰ — आ
[21] नादाधिका॰ — अ
[22] ॰विभिन्नं — आ
[23] कुर्वन्तोऽनुवर्तयन्ति — अ
[24] वर्धयन्ति — मु. ना. पाठः।
[25] सार्धत्रि॰ — १.४ उ॰ वृत्तौ
[26] मुक्तिदं परं मन्दस्मन विदिते — अ
[27] तदा निर्मल निवृत्या विना॰ — अ
[28] तुशब्दो नास्ति — अ
[29] परमोक्षनिरासकारिकायां ५४.

"कलातत्त्वोर्ध्वभुवने[1] कैवल्यं संभवेत्पशोः।
विज्ञानयोगसंन्यासैर्भोगाद्वा कर्मणः क्षयात्॥" इति।

प्रकृतिविवेकोदयात्तु न तदपि, [2]तदूर्ध्वं[3]भोगानां [4]कर्मणामपरिक्षयादित्युक्तम्[5] —

"गुणतत्त्वोर्ध्वभोग्यस्य [6]कर्मणोऽनुपलब्धितः।
कैवल्यमपि सांख्यानां नैव [7]युक्तमसंक्षयात्॥" इति।

तदेव परममुक्तिदमिति वक्ष्यामः[8]। **किं च दिव्य[9]सिद्धिप्रदायकम्**[10] दिवि क्रीडास्थाने[11] निर्मले मन्त्रादीनां [12]तदीशानां तद्भुवनभेदभिन्ने [13]सर्वज्ञत्वेऽपि [14]याः क्रियाशक्त्यभिव्यक्ति[15]क्रमेण साध्याः सिद्ध[यः], [ताः] सर्वाः [16]सिद्धय[17]स्तावत्साधकेभ्यो ददाति। [18]तत्समाप्त्यैव तासां सिद्धेः। यदुक्तं **सूक्ष्मस्वायंभुवे**[19] —

"यो यत्राभि[20]लषेद्भोगान्स तत्रैव नियोजितः।
सिद्धि[21]भाङ् मन्त्र[22]सामर्थ्यात्तत्[23]द्वासिसमस्तथा॥" इति।

न तु दिव्या अणिमादिसिद्धयः। मायीयकार्यकरण[24]समाप्तिक्रमेणैव तासां सिद्धेरित्युक्तं श्रीमन्-**मतङ्गे**[25] —

[26]"त्रितयं कार्यतः सिद्धमैश्वर्यमणिमादिकम्।
[27]प्राप्त्यादयो गुणाः पञ्च योगिनः करणात्मजाः॥" इति॥५॥

न केवलमेतत्पुत्रकसाधकयोरुपकारकं यावद्गुरोरपीत्युच्यते —

तद्विदित्वा महासेन देशिकः पाशहा भवेत्।

[28]आचार्यो हि मन्त्रप्रयोगेण विष[29]निवृत्त्यादिवत् पाशच्छेदादिकं कर्म [30]करोति। तदा तदाश्रिता

---

[1] 'भुवने' इति नास्ति — अ; अङ्गुष्ठमात्र-भुवने — परमोक्षनिरासकारिकापाठः
[2] न तूर्ध्व० — अ
[3] भागानां — आ
[4] कर्मणां परि० — अ.
[5] परमोक्षनिरासकारिकायां ५२.
[6] कर्मणो न च लब्धितः — अ; कर्मणो-रचलस्थितम् — आ
[7] युक्तं तु संक्षयात् — अ
[8] सार्धत्रि० २०.३ उ० — ८पू०
[9] ०बलिप्रदायकम् — अ
[10] ०प्रदायकत्वं —आ
[11] 'स्थाने' इति नास्ति — आ
[12] तदीशानान्तभुवन०-अ; तदीशोऽनन्तभुवन०-आ
[13] सर्वज्ञेऽर्थेऽपि — आ
[14] या — अ
[15] ०क्रमे साध्यसिद्धः — अ; क्रमेण साध्या सिद्धः — आ
[16] सिद्धयो मतास्तावत्साधकेभ्यो दद्यात् तत्समा० — आ
[17] तत्साधकेभ्यो — आ
[18] तत्समाप्तैव — आ
[19] स्वायम्भुवे — ३९. २
[20] ०लषते भोगान् — आ
[21] ०भाज्यमन्त्र० — आ
[22] सामर्थ्यात्तत्तद्वाद्यसतस्तथा — आ; सामर्थ्या-त्स्यादत्रोक्तमविस्तरात्-स्वायंभुवमातृकापाठः।
[23] ०द्वाभ्यां समस्तथा — अ
[24] ०समापत्ति० — आ
[25] मतङ्ग० विद्या० १७. ११४.
[26] तृतीयं कार्यतासिद्ध० — अ
[27] प्राप्तोदयाः — अ
[28] आचार्योऽभि — अ
[29] ०निवृत्त्यादिपाश० — अ
[30] करोति न तत्रादीनां मन्त्रांश्च — अ

मन्त्राश्च तस्या[1]तिदूरवर्तिनः, [2]अशुद्धविद्याश्रितत्वात्। तस्मिंस्तु विदिते स्वकार्यकरणाश्रिताशुद्ध-[3]तत्त्वं, शुद्धमपि विद्यातत्त्वं [4]संनिकृष्टत्वेन विदितमेव भवतीति मन्त्रा अपि [5]तदाश्रित[6]त्वविदिताः सन्तोऽपि नियोज्या एवेति वक्ष्यामः[7] —

"न पुंसि न परे तत्त्वे शक्तौ मन्त्रं [8]प्रयोजयेत्।" इति।

शक्तिश्चात्र नादशक्तिरेव विवक्षिता। [9]तत्रैव मन्त्राणां [10]वस्तुतो विनिविष्टत्वादित्युपायपदार्थः [11]सह परा[12]विद्यापदार्थाभ्यामत्रोपक्षिप्तः॥

अथ [13]कथमेषां शुद्धाध्ववर्तिनां पुंसामेतत्संनिकृष्टमिति प्रतीयते। यतः —

आगोपालाङ्गना बाला [14]म्लेच्छाः प्राकृतभाषिणः॥६॥
अन्तर्जलगताः[15] सत्त्वास्तेऽपि [16]नित्यं ब्रुवन्ति तम्।

सकलपशुगतात् [17]प्रागुक्ताद्[18]बोध्यपरामर्शलक्षणात् कुर्यादेतत्सिद्धमित्यर्थः। [19]तदिदमुक्तम्[20] —

"न सोऽस्ति प्रत्ययो [21]लोके यः [22]शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन जायते॥" इति।

न चाशुद्धस्य शुद्धे इव शुद्धस्याप्यशुद्धेऽध्वन्यप्रगम इत्याशङ्कनीयम्, ईश्वरेण व्यभिचारात्। तस्य यथा पुरुषभोग[23]मोक्षकार्याभ्यामन्यथानुपपत्त्या प्रगमोऽत्र सिद्धः, [24]तथात्रापीत्युक्तमित्यविरोधः। तदिदमाहुः —

"[25]वाग्रूपता [26]चेदुत्क्रामेदवबोधस्य [27]शाश्वती।
न [28]प्रकाशः प्रकाशेत साभिप्रत्यवमर्शिनी॥" [29]इति।

एतेन पशुपदार्थोऽप्यत्रानेक[30]भेदेऽभेदित्वेनोपक्षिप्तः[31]॥

---

[1] ०तिरुद्रवर्तिनः अशद्धविद्याग्नितत्त्वात् — अ
[2] शुद्धविद्याग्नितत्त्वात् — आ
[3] ०तत्त्वमशुद्धमपि — अ; ०तत्त्वशुद्धमपि — आ
[4] 'सं' इति नास्ति — अ
[5] तदा तदाश्रित ०— अ
[6] ०त्वाविदिताः सन्तो विनियोज्या — अ
[7] अत्र ०याख्याने न लभ्यते।
[8] नियोजयेत् — आ
[9] तदत्रैव — आ
[10] वस्तुतोऽपि नि० — अ
[11] सा पराविद्या० — अ
[12] ०वित्यापादार्थाभ्या० — आ
[13] कथमेषा — अ
[14] म्लेच्छप्राकृतभाषणम् — अ,
[15] अन्तर्गतजलाः — अ
[16] इति इत्थं ब्रुवन्ती तं — अ
[17] पञ्चमश्लोकव्याख्यानोक्तात्
[18] ०बोधृपरामर्श० — अ
[19] तदिदं मुक्त्य० — अ
[20] वाक्यपदीये — १. १२४; रत्नत्रये — ८४
[21] लोको — अ; ऽणूनां — रत्नत्रयपाठः।
[22] शब्दार्थगतव्रतेः — अ; शाब्दार्थगतावृतेः — आ
[23] ०मोक्षणकार्यात्ययानुपपत्त्या — आ
[24] तथापीत्युक्त० — अ; तथास्यापीत्युक्त० — आ
[25] सद्रूपता० — अ; वमृपता — आ; वाक्यपदीये १. १२५
[26] चेत्क्रमादेव बोधस्य — अ;
[27] शाश्वति — अ,
[28] प्रकाशा प्रकाशा प्रकाशेत — अ;
[29] इतिशब्दो नास्ति — अ, आ
[30] भेदे भेदित्वेनोपक्षिप्तं — अ
[31] ०क्षिप्तम् — अ

यद्येवं पशुभ्यः स्यात्, शुद्धात्मन इति को विशेष इत्युच्यते —

स्थूलं सूक्ष्मं परं ज्ञात्वा कर्म कुर्याद्यथेप्सितम् ॥७॥

[1]तेषामेव वक्ष्यमाणलक्षणं ज्ञात्वा किं कुर्वन्ति? अयं तु त्र्यवस्थमेव नादस्वरूपं **ज्ञात्वा कर्म कुर्यात्**। एवमभ्यस्य मन्त्रसिद्धिरित्युक्तं "[2]सिद्धिदं [3]परमम्" इत्यादिनेति विशेषः ॥७॥

अथैषामेव लक्षणम् —

स्थूलं शब्द इति प्रोक्तं सूक्ष्मं चिन्तामयं भवेत्।
चिन्तया रहितं यत्तु तत्परं परिकीर्तितम् ॥८॥

[4]**स्थूलं शब्द इति प्रोक्तम्** यदेतन्नादस्वरूपमाकाशवायुप्रभवत्वेन स्थूलं तत् शब्द इत्युक्तम्। लोके [5]श्रोत्रग्राह्यत्वात् [6]श्रोत्रग्रहणेऽर्थे शब्दः प्रसिद्धो यतः। [7]**यत्तु** तस्यापि प्रवर्तकमित्यभिप्रायवशात् प्रतिपादनाभिप्रायवशात् परामर्शात्मक[8]मविभक्तं तद्वाच्यतदर्थमविभागशक्तिविशेषात्मकत्वान्मायूराण्डरसबिन्दुपद[9]व्यपदेश्यानेकमात्ररूपत्वतः क्वचिद्बिन्दुशब्देनोक्तं नादरूपं तत्, [10]**सूक्ष्मं चिन्तामयं भवेत्**। [11]अश्रोत्रग्राह्यं तत्परामर्शज्ञानरूपमेवानुभवतः सिद्धमित्यर्थः। **चिन्तया रहितं यत्** तस्यापि चिन्तामयस्य [12]कारणमसंजातवाग्विभागबुद्धीनां [13]यद् विज्ञेयं नाद [रूप] मेव, **तत् परं परिकीर्तितम्**। [14]प्रत्यक्षतोऽस्य सिद्धत्वेऽपि [15]कालाद्यङ्कुरात्मना मायादिवत् सिद्धम्।

अत्रोक्तमन्यैरपि[16] —

[17]"घोषिणी जातनिर्घोषा अघोषा च प्रवर्तते।
तयोरपि च [18]घोषिण्योर्निर्घोषैव गरीयसी॥" इति।

[19]श्रुतिरपि — "तिस्रो वाचः [20]प्रवद ज्योतिरग्रा" इति। तदपि च प्रति [पुरुषं] भिन्नमेव [21]बुद्ध्यादिवत्। अन्यथैकपुरुषविमर्शकाले सर्वेषां [22]तदुदयप्रसङ्ग इति तस्यापि यत् कारणं तत् परमाकाश-

---

[1] स्थूलमेव वक्ष्य० — आ
[2] सिद्धमिदं — अ; सिद्धिमिदं — आ
[3] मुक्तिदं परमम् — सार्धत्रि० १.५ उ०
[4] स्थूलशब्द इति — आ
[5] श्रोतृग्राह्य० — आ,
[6] श्रोतृग्रहणे — आ
[7] यत्... विप्रवर्तक० — अ
[8] ०मविभक्तं तद्वास्य तदर्थ० — अ; अविभक्ततद्वाच्यतदर्थ्य० — आ
[9] ०व्यपदेश्योऽनेक० — अ
[10] सूक्ष्मचिन्ता० — आ
[11] अश्रोतृग्राह्यं तत्तत्परामर्श० — आ
[12] कारणं संजात ० — अ
[13] यदपि ज्ञेयं — आ
[14] प्रत्यक्षत्वेऽस्य सिद्धेऽपि — अ; प्रत्यक्षतो सिद्धत्वेऽपि — आ
[15] कार्यादीन्मायादिवत्सिद्धं — अ, कार्यादिदियादिवत्सिद्धं—आ; द्वादशपटलप्रथमश्लोकव्याख्यानमनुसृत्य पाठः शोधितः।
[16] महाभा० १४.२१.१६
[17] घोषणी — अ, आ
[18] व्योमादिनिर्घोषा वै गरीयसी — अ,
[19] ऋग्वेदे ७. १०१. १; 'श्रुतिरिपि' इति नास्ति —अ, आ
[20] प्रवदन्त्यो त्रिरग्रा – अ, आ
[21] स बुद्ध्यादि — अ
[22] तदुभय० — अ

शुद्धविद्यात्मकं वाचः स्थानमित्युक्तम्। तत् **किरणे**[१] — "नादबिन्दु[२]खमन्त्राणु" इति। [३]श्रीमन्मातृकाज्ञान[४]वेदिभिरपि[५] —

"चतुर्थं [६]यद्वाह्यकर्म सर्ववर्णेष्ववस्थितम्।
[७]तत्सूत्रं कथितं वस्तु शेषा मणिगणा इव॥" इति।

श्रुतावपि[८] —

"चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥" [९]इति।

तत्तु [१०]परं वाक्स्वरूपं पुरुष[११]कलात्वेन तत्रोक्तम् —

[१२]"अविभागात्तु पश्यन्ती[१३] सर्वतः [१४]संहृतक्रमा।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी॥
[१५]तस्यां दृष्टस्वरूपायामधिकारो निवर्तते।
[१६]पुरुषे षोडशकले तामाहुरमृताह्वयाम्॥" इति।

[१७]तत्त्वयुक्तत्वाद्भ्रान्तिरेवेत्युक्तं [१८]नादसिद्धौ। [१९]प्रवृत्तं तत्तु [२०]तद्भेदप्रयुक्त इत्यसौ दर्शितोऽप्युभयमपि [२१]वाचः पदं चिन्तया रहितत्वात्पर[२२]रूपं [२३]तद्वैकमित्युक्तम्। [२४]तद्भेदस्यासर्वज्ञैरनव[२५]गाह्यत्वादिति त्रिविधमेव तद्रूपं दर्शितमिति नाव्याप्तिः॥८॥

संक्षिप्त एव स्थूलशब्दात्मनो मन्त्रस्योद्धारः —

सान्तं सर्वगतं शून्यं मात्राद्वादशके स्थितम्।

---

[१] किरणे विद्या० ३. २४ उ० वृत्तौ 'नादबिन्दुखमन्त्राणुशक्तिबीजकलां गतः'। तत्र नादः कुण्डलिन्यभिधानायाः परस्या वाक्छक्तेरव्यक्तशब्दात्मकः प्रथमक्षोभः। बिन्दुश्च तस्यैवेषत्स्थूलः। ततः संजल्पात्मकत्वं खं चात्र परमाकाशं महामायैव सर्वपुरुषसंयक्ता शक्तिः।

[२] ०खा मन्त्रा इति — अ; खमन्त्रा इति — आ

[३] श्रीमन्मात्रका० — अ

[४] ०वेदेऽपि — आ

[५] आकरो न लभ्यते।

[६] यद्वाह्ये कर्म सर्ववर्णे० — अ; यद्वाह्ये कं सर्ववर्णे — आ

[७] 'तत्सूत्रं कथितं' इति नास्ति — अ

[८] ऋग्वेदे १.१६४.४५

[९] इतिशब्दो नास्ति — अ, आ

[१०] परत्वात्स्वरूपं — आ

[११] ०कलात्वे तत्रोक्तम् — अ

[१२] वाक्यपदीये १. १४४ व्याख्याने; रत्नत्रये पृ० ३१, ३२; विभातु . . पश्यन्ती — अ; विभागा तु पश्यन्ति — आ

[१३] अविभागेन वर्णानां — रत्नत्रयपाठः

[१४] संहतिक्रमात् — रत्नत्रयपाठः

[१५] यस्यां — रत्नत्रयपाठः

[१६] पुरुषषोडश० — आ

[१७] तत्त्वयुक्ताद्भ्रान्ति० — अ, आ

[१८] नाथसिद्धौ — अ

[१९] प्रवर्तन्तत्तु — आ

[२०] तद्भेदो प्रयक्त — अ; तद्भेदौ प्रयुक्त० — आ

[२१] वाच पदञ्चितेया — अ आ

[२२] ०रूपतद्वैकं० — अ

[२३] तदैक० — आ

[२४] तद्भेदस्य सर्व० — अ

[२५] ०गाहित्वादिति — आ

तत्र **सान्तम्** इत्यनेन यथाव्यवस्थितं [१]पञ्चाशद्वर्णात्मकमातृकाक्रमानुवादेन तद्रूपं लक्षयति। अन्यथा वक्तुरिच्छामात्र[२]संनिवेशेषु "स [३]हंसः शुचिः" इत्यादिषु पदेषु वाक्येषु [च] वर्णानां [४]नियतक्रमानवस्थितेः [५]सकारादित्वमस्य भवेत्। वर्णान्तराणां च सान्तत्वमित्येतल्लक्षणानुपपत्तिरेतस्य। [६]मातृकाक्रमस्थितिरेतस्य[७] सकारस्यान्तं यद्वक्ष्यमाणशिवाद्यर्थप्रति[८]पत्तेश्च बीजं हकाराख्यमित्यर्थः।

अथ स्थूलानामत्राकारादि[९]बीजकानामन्येषामपि संभवात् किमिति सान्तमेवास्त्रमन्त्रत्वेनोच्यते। [१०]किमिति च सान्तत्वेनोपलक्ष्यते। [११]न पुनः क्षादित्वेनैव नान्तत्वेनैव [१२]वा तदन्तत्वपक्षे [१३]मातृकाया इति। तत्रोच्यते — **सर्वगतम्** इति। स्थूलत्वेऽप्येतत् सर्वेषां स्थूलानां [१४]वर्णान्तराणां मन्त्राणामुच्चारण[१५]हेतुत्वं गतं [१६]यतो हकारः। सकारश्रुत्यात्र प्राणशक्त्यवियोगाच्चास्येति वक्ष्यामः[१७]। हंसेति यो ब्रूयादित्यदोषः। [१८]न तु व्यापकमिति व्याख्येयम्। सान्तत्वादेवाव्यापकधर्मत्वा[१९]दादिमध्यान्ततायाः।

शून्यं च तत्, अकारादि[२०]मात्राशून्यत्वात्। [२१]तच्छून्यत्वं च **मात्राद्वादशके** स्थितत्वेन वक्ष्यमाणत्वात्। अत एव [२२]मातृकायामेषां योन्यक्षराणा[२३]मकार उच्चारणार्थ इत्युक्तं श्रीमत्**त्रयोदश**[२४]**शतिके कालोत्तरे** —

"अथैवं [२५]सर्ववर्णेषु अकार[२६]रहितः स्थितः। तन्नादः" इति।

यद्वा शून्याकाश[२७]वाचकत्वात् **शून्यम्**। यदुक्तं तत्रैव —

"यच्छून्यं [२८]तन्निरालम्बमाकाशं परिकीर्तितम्।
पञ्चमं तद्विजानीयान्नाद[२९]तत्त्वं द्विकुब्जकम्॥" इति।

[३०]तच्चाकारादिमात्राद्वादशके [३१]संस्थितिं कुर्यात्। तावतामेव मन्त्राणामुद्ध्रियमाणत्वादिति, [३२]ऋकारादिमात्राचतुष्टयनिरासः।

---

[१] पञ्चाशद्वर्णकमात्रकरक्रमानु० — अ
[२] संनिधावशेषु — आ
[३] हंस शुचिः — आ
[४] नियतिक्रमाः अनव० — अ; नियतक्रमाः अनवस्थितः — आ
[५] सकारित्व० — आ
[६] मात्रका० — अ
[७] ०रेकस्य — आ
[८] ०पत्तेश्चेद्बीजं—अ, आ; सार्धत्रि० १.११,१२
[९] बीजक्रमामन्येषा० — आ
[१०] किमतीव सान्तत्वे० — अ
[११] नकारो नास्ति — आ
[१२] पातकदन्तत्वपक्षे — आ
[१३] मात्रकाया — अ
[१४] अस्त्राणां मन्त्रा० — आ
[१५] हेतुत्वगतं — अ, आ
[१६] यतोऽहङ्कारः — अ
[१७] सार्धत्रि० २३.३ वृत्तौ ।
[१८] ननु व्यापकमिति व्याख्याया — अ
[१९] ०दामर्यान्तत्वयोः — अ
[२०] ०शून्यमात्रत्वात् — अ
[२१] तच्छून्यं च — अ
[२२] मात्रकायामेषामन्योन्यक्षराणा० — अ; मातृकायामयोन्यक्षराणा० — आ
[२३] ०मकारणा इत्युक्तम् — अ
[२४] ०शक्तिके — अ
[२५] 'सर्व' इति नास्ति — अ
[२६] ०रहितस्थितं तन्नाद — अ; ०रहितस्थितं नाद — आ
[२७] व्यापकत्वात् — अ
[२८] 'तद्' इति नास्ति — आ
[२९] तत्त्वंद्विकुब्ज० — अ, आ
[३०] तच्चाकाशादि — अ, आ
[३१] संस्थितं — आ
[३२] आकाशादिमात्रा० — अ

स त्वयुक्त इति केचित्। "पाठक्रमपरित्यागेनात्र तासां कारणाभावात्। "[1]ब्रह्माणि [2]ह्रस्वाः प्रोक्तानि" इत्येतच्छ्रुत्यन्यथानुपपत्तेश्च। एवं हि ब्रह्मपञ्चकार्थत्वेनोद्ध्रियमाणा ह्रस्वाः पञ्चमात्रा अकारादिलृकारान्ता [3]न संभवन्ति। तत्प्रतिक्षेपे हि तिस्र एव, यत एकारादीनां चतसृणां ह्रस्वत्वाभावात्। यदाहुः[4] — 'संध्यक्षराणां [5]ह्रस्वा न सन्ति' [6]इति। ततश्च [7]दीर्घा ह्यङ्गानि चतस्र [8]'एकार्थत्वेनोद्ध्रियमाणाः, ह्रस्वाः [9]पञ्चमात्राश्च लृकारान्ता भविष्यन्ति। यदाहुः[10] — 'लृवर्णस्य दीर्घा न सन्ति' इति। [11]शिष्टानां श्रुत्यैवात्र निरस्तत्वात्। यद्वक्ष्यति — [12]'अनुस्वारो भवेन्नेत्रम्', [13]'सविसर्गं भवेदस्त्रम्', [14]'त्रयोदशान्तं शिवं विजानीयात्।' [15]इति। ऋकारादिचतुष्टयव्युदासः इत्येतदत्रायुक्तं वक्तुम्" इति।

[16]सत्यमेतद् यद्यत्र 'मात्राद्वादशके' इति श्रुतिर्न भवेत्। सा हि तेषामकारादीनां न लोकसिद्धापि, करसंनिवेशेषु[17] मुद्रादिशब्द[18]वद्विशिष्टानामेव शास्त्रसिद्धा। यदुक्तं श्रीमत्**त्रयोदशशतिके** —

"मात्राद्वादशकाः सौराः प्रोक्ताः [19]षण्डविवर्जिताः।
अकाराद्यास्तु तद्युक्ता[20]श्चान्द्रास्ता एव षोडश॥"

इति ऋकारादिप्रति[21]क्षेपो युक्त इति॥

ब्रह्माणि ह्रस्वाः प्रोक्तानि [22]दीर्घा ह्यङ्गानि षण्मुख॥९॥
अनुस्वारो भवेन्नेत्रं सर्वेषां चोपरि स्थितः[23]।

तत्र तद्युक्तासु द्वादशमात्रासु मध्याद् **ब्रह्माणि ह्रस्वाः प्रोक्तानि**। यानि ब्रह्माणि सद्योजातादीनि पञ्च वक्ष्यमाणानि,[24] तान्यत्र ह्रस्वाः पञ्चमात्राः तदभिधायकत्वात्। [25]"वृद्धिरादैच्" इतिवदत्राभेदेन निर्देशः।

---

[1] सार्धत्रि० १.९ उ०
[2] 'ह्रस्वाः' इत्यारभ्य 'संध्यक्षराणाम्' इत्यन्तो भागो नास्ति — अ
[3] नः संभवति — आ
[4] आपिशलिशिक्षायां वृत्तिकारप्रकरणे ७; पाणिनीयशिक्षायां वृद्धपाठे वृत्तिकारप्रकरणे ७; लघुपाठे वृत्तिकारप्रकरणे ६
[5] निस्वा — अ
[6] इति। सत्यम्। ततश्च — अ, आ
[7] दीर्घाभ्यङ्गानि — अ
[8] एकार्थेनोद्ध्रिय० — अ
[9] पश्चात्र मात्रावा ऋकारा० — अ; पश्चात्र मात्राश्च ऋकारा० — आ
[10] आपिशलिशिक्षायां वृत्तिकारप्रकरणे ४; पाणिनीयशिक्षायां वृत्तिकारप्रकरणे वृद्धपाठे ४; लघुपाठे — ३
[11] शिष्टानां च श्रुत्यै — आ
[12] सार्धत्रि० १.१० पू०
[13] सार्धत्रि० १.१० उ०
[14] सार्धत्रि० १.११
[15] इच्छति – अ
[16] सत्यं नेदं क्रमाद् द्वादशक इति — अ
[17] संनिवेशनिवेशेषु — अ
[18] ०वद्विशिष्टो नाम शास्त्रसिद्धयाह — अ
[19] षष्ठविवर्जिताः — अ; 'ऋ, ॠ, लृ, ॡ च चत्वारो नंपुसका इति स्मृताः'॥ वातुलशुद्धे २.२६
[20] ०श्चास्त एव षोडशाशीति ऋकारा० — अ; ०श्चन्द्रास्ता एव षोडशीति ऋकारा० — आ
[21] ०क्षेपयुक्त इति — अ, आ
[22] दीर्घाभ्याङ्गानि—अ, आ; दीर्घाभ्यङ्गानि—इ
[23] स्थितम् – इ; मु०
[24] सार्धत्रि० २२.८, ९; १२–१६
[25] पा० सू० १.१.१.

ननु [1]नास्मिन्मात्राद्वादशके पञ्च ह्रस्वा मात्राः संभवन्तीत्युक्तं[2] — "संध्यक्षराणां ह्रस्वा न सन्ति" इति । सत्यम् । [3]केषांचिन्मतमेतदित्यनेन ज्ञाप्यते । यदाहुः शिक्षाकाराः[4] — [5]"**छन्दोगानां सात्य[6]मुग्रिराणायनीयाः** ह्रस्वमेकारं ह्रस्वमोकारं च पठन्ति। तेषामकारादि[7]वदेता अपि ह्रस्वदीर्घप्लुतभेदेन, प्रत्येकं चोदात्तानुदात्तस्वरितभेदेन, सानु[8]नासिकनिरनुनासिकभेदेन चाष्टादशधा [9]भिद्यन्ते" [10]इत्यदोषः ।

अथेह केन [11]क्रमेण ब्रह्माणि ह्रस्वा इत्याकाङ्क्षायामत्र क्वचिदपि क्रमान्तर[12]स्याश्रयाद्वर्णानां मूर्तिन्यासप्रकरण[13]पठित एव क्रमः कस्मान्न भवतीति। तथा च तत्रैव वक्ष्यति[14] —

"ईशानाद्यास्तु [15]सद्यान्तं मूर्ध्न आरभ्य विन्यसेत् ।" इति ।

भवेदेवं यदि **प्रासादनिर्णयप्रकरणे**[16] [17]"अकाराक्षरजः सद्यः" इत्यादिक्रमश्रुतिर्न स्यात् । तयैव तु तदाशङ्कानिवृत्तिरेषां तन्न्यासमात्रश्रुतिर्न तु [18]तदर्थिका विकल्पनीया। यदुक्तं श्रीमत्**त्रयोदशशतिके**[19] —

[20]"आदिमात्रो भवेत्सद्यस्तृतीयो वाम उच्यते"

इत्यादि तत्र दोष इति। तथा [21]**दीर्घा ह्यङ्गानि षण्मुख** दीर्घमात्रास्त्वङ्गानि[22] । तेषां च मूर्तिन्यास[23]पठित एव क्रमः, तद्बाधस्येह ब्रह्मणामिव क्रमान्तरस्याश्रवणात् । यद्वक्ष्यति[24] —

"हृदयं च शिरश्चैव शिखां कवचमेव च।" इत्यादि ।

प्रोक्तं च श्रीमत्**त्रयोदशशतिके** —

सद्योजाताद्द्वितीयं[25] यद्धृदयं [26]तत्प्रकल्पयेत् ।" इति ।

अत एव पञ्चम्या दीर्घमात्राया [27]नेत्रत्वे प्राप्ते प्रतिषेधः — **अनुस्वारो भवेन्नेत्रम्**[28] तद्युक्तो योऽनुस्वारो [29]मात्रा तन्नेत्रमन्त्रविशेषवत्, [30]स तु न तद्युक्ता पञ्चमी दीर्घमात्रेत्यर्थः[31] ।

---

[1] नावस्मिन् मात्रा० — आ
[2] आपिशलिशिक्षासू० ६,७; पा० शिक्षासू० वृद्धपाठे ६, ७; लघुपाठे ६.६
[3] केषांचिद्व्रतमेत० — अ
[4] आपिशलिशिक्षासू० ६.९, १०; पा० शिक्षासू० वृद्धपाठे ६.९, १०; महाभाष्ये १. १. २. ४
[5] छन्दोगा नम सात्य० – अ; छन्दोगा नाम सात्य० — आ
[6] ०मुश्री राणा० — आ
[7] ०देवता अपि – अ ; ०व देवता अपि — आ
[8] ०नासिनिरनु० — अ
[9] भिद्यत — अ, आ
[10] इत्येतेषाम् अथेह — अ
[11] क्रमणे — अ
[12] ०स्याश्रयाः वर्णाद्वचक्तिन्यास० — अ; ०स्याश्रयाः वर्णान्मूर्तिन्यास० — आ
[13] पदे एव — अ
[14] सार्धत्रि० २.१० उ०
[15] सद्यान्ता मूर्ध्ना आरभ्य — अ, आ
[16] सार्धत्रि० २२.८ पू०
[17] आकारा० — अ, आ
[18] तदर्थिकापि कल्प० — अ
[19] ग्रन्थोऽयं नोपलभ्यते ।
[20] आतिमात्रो — अ
[21] दीर्घाभ्याङ्गानि — अ, आ
[22] ०मात्रा स्वाङ्गानि — अ; ०मात्रा स्वङ्गानि — आ
[23] पठितक्रमः — आ
[24] सार्धत्रि० २.१२ पू०
[25] ०जाताद्वितीयं — आ
[26] तत्परिकल्पयेत् — आ
[27] नेतृत्वे — अ
[28] भवेन्नात्र — अ, आ
[29] मात्रत नेत्रमन्त्र — अ, मात्रान्तन्नत्रमन्त्र — आ
[30] स तुन्न — अ
[31] ०मात्रेऽर्थः — अ

[1]ननु सा द्वितीयं नेत्रमिति कैश्चिद्व्याख्यातम्। किं नाम न व्याख्यातमत्र तैः। [2]ये सामान्य-[3]विशेषविहितयो[4]स्तक्रकौण्डिन्य[5]न्यायेनागोपालकादिसिद्धमपि बाध्यबाधक[6]भावं नावबुध्यन्ते युक्ति-सिद्धमपि। यदाहुः [7]**पदविदः** —

"अतात्पर्यम[8]शब्दार्थः संदेहो[9]ऽस्फुरितार्थता।
चिह्नानि बाध्ये [10]बाधायां बाधके तद्विपर्ययः॥" इति।

किं च [11]**सर्वेषां चोपरि स्थितः** सर्वेषा[12]मुद्धृतानामङ्गब्रह्मणामुपरि स्थितः। एतदुक्तं भवति — अनुस्वार[13]मात्रैषाम्, अकारस्तत्रास्योच्चारणार्थः[14]। अत एवाजनेत्रयोरकार[15]मात्राभावाभावकृतो विशेषो[16]ऽप्युच्चारणद्वारेण तयोर्मन्तव्यः। यदाहुः [17]**शिक्षाकाराः** — [18]"अनुस्वारयमा नासिक्याः" इति। [19]अन्यथा कण्ठनासिक्य इति [20]वक्तव्यं स्यादिति॥

सविसर्गं भवेदस्त्रमनुस्वारविवर्जितम्[21] ॥१०॥

[22]सह विसर्गमात्रया तत् सान्तं बीजमिह **अस्त्रं भवेत्**। **अनुस्वार**[23]**विवर्जितम्** इति अङ्गत्वेन प्राप्तस्यानुस्वारस्य प्रतिषेधः। तदेवं पञ्च ह्रस्व[24]मात्राः, चतस्रो दीर्घ[25]मात्राः सहानुस्वारविसर्ग-मात्राभ्यां स्वरूपवाक्यभेदाभ्यां [26]विभक्ता [27]विशिष्टाः॥१०॥

तथैवाविभक्तमुच्यते[28] —

[29]**षष्ठं त्रयोदशान्तं च पञ्चमे विनियोजयेत्।**
[30]**शिवं तत्तु विजा**[31]**नीयान्मन्त्रमूर्तिं सदाशिवम्**[32] ॥११॥

---

[1] न तु सा — आ
[2] यैः — अ, आ
[3] विशेषे विहित० — आ
[4] लौ. न्या. साहस्री — २२२; महाभाष्ये १. १. ४७
[5] न्यायेन गोपाल० — अ, आ
[6] भवनामवपुल्यन्ते—अ, भावानामवबुध्यन्ते–आ
[7] पदवतः — अ; आकरो न लभ्यते।
[8] ०शब्दार्थसंदेहे — अ
[9] स्फुरितार्थतच्चिह्नानि — अ
[10] पाधायां — अ
[11] 'सर्वेषां चोपरि स्थितः' इति नास्ति — अ
[12] ०मुध्रुताना० — अ
[13] ०मात्रैषा अकार० — आ
[14] ०णार्थम् — आ
[15] ०मात्रभावाभाव० — अ
[16] ऽप्युच्चारेण — अ
[17] शीक्षाकाराः — आ
[18] आपिशलिशिक्षा० १.१४; पा० शिक्षा वृद्धपाठे १.१६; लघुपाठे १.१५; अनु-स्वारोऽयमनुनासिक्यः — अ, आ
[19] अन्यथा कर्णनासिक्य इति वक्तव्यः स्यादिति — अ; 'अन्यथा कण्ठनासिक्य इति' इति नास्ति — आ
[20] वक्तव्यादिति — आ
[21] ०विसर्जितम् — अ
[22] सविसर्ग० — अ
[23] विसर्जितम् इत्याहत्वेन — अ
[24] मात्रं — अ
[25] ०मात्रमहानुस्वार० — अ
[26] विमक्तविशिष्टाः — अ
[27] विशिष्टात् — आ
[28] ०भक्तामुच्यते — आ
[29] षट्त्रयो० — अ
[30] शिवान्तन्तु — अ; शिवं तं तु — इ, मु
[31] ०नीयात्पञ्चमूर्ति — अ, आ, मु; नीयात्-पञ्चमूर्तिः — इ, ई
[32] शिवः — इ

पञ्चदीर्घमात्रायुक्तत्वात् [1]**पञ्चमं** यत् **सान्तं** बीजं, [2]तस्मिन्नौकारयुक्ते[3] ऊकारं नियोजयेत्। त्रयश्च दश च त्रयोदश, [4]तेषां स्वराणाम् अन्तं **त्रयोदशान्तं** त्र्यन्तं दशान्तमित्यर्थः। तत्र [5]त्र्यन्तम् ई शिखा[6]रूपं दशान्तं च अनुस्वारं पूर्ववाक्येन [7]प्राप्तं चात्र नियोजयेत्। यद्वक्ष्यति **प्रासादनिर्णयप्रकरणे** तदात्मनि क्रमेण ब्रह्मव्याप्तिं दर्शयन्

[8]"बिन्दुजः पुरुषो ज्ञेय ईशानस्तु [9]शिखात्मजः।"

इति भाव्युक्तं [10]**शिवं तत्तु विजानी**[11]**यान्मन्त्रमूर्तिम्** इति। मन्त्रैः सद्योजातादिभिः पञ्च मूर्तिरस्येति। [12]सृष्टयादिकारणत्वाद्वक्ष्यति **सृष्टिप्रकरणे**[13] —

[14]"तस्योर्ध्वं वाम[15]पार्श्वेऽथ विष्णुबीजं प्रतिष्ठितम्।
[16]पार्श्वबिन्दुद्वयोपेता सा रेखा मध्यतः स्थिता॥" इति।

अस्यामपि [17]विवक्षायां [18]त्रेस्त्रय [19]आदेशो भवत्येव। संख्यायामुत्तरपद[20]भूतायाम् [21]"अबहुव्रीह्यशीत्योः" [22]इति तत्रानुवर्तते यत [23]इत्यविरोधः। प्रयत्नश्चात्र [24]युगपत्कलाचतुष्टययुक्तस्य हकारस्योच्चारणा[25]संभवाच्चोदनीयः। तत्संभवस्यानुभवसिद्धत्वात्तस्मिन्नेकप्रयत्नतः समुच्चार्यमाणे [26]निरन्तराव्यवहितहकारौकारोकार[27]बिन्दुप्लुतमात्रोपक्षिप्तेकाररूपशिखा[28]मात्राः संवेद्यन्त एव कूटाक्षर[29]वन्नवात्मवदिति वक्ष्यामः[30]

[31]"प्रासादाब्जशिखान्तस्थो[32] [33]यस्तु दीक्षां करोति सः।" इत्यदोषः।

अन्ये तु "**पञ्चमम्** आकाशं, [34]तद्वाचकत्वाद् यत् पञ्चमं हकारबीजमुक्तं,[35] तस्मिन् षष्ठम् ऊकारं

---

[1] पञ्चमी — आ
[2] तस्मिन्नौ क्लीकार० — अ
[3] ०युक्तेषु — अ, आ
[4] तेषां..ण न्तत्र त्रयोदश्यान्तं त्र्यन्तदशान्त० — अ
[5] त्र्यन्यमी — आ
[6] ०रूपदशान्तत्वानुस्वारं — अ
[7] प्रास्तञ्चात्र — अ; प्राप्तं नात्र — आ
[8] सार्धत्रि० २२.९ पू०; बिन्दुः पुरुषो — अ
[9] शिवात्मक — अ, आ
[10] शिवतन्तुं विजा० — अ
[11] ०यान्मन्त्रम् इति — अ
[12] सञ्चापि कारणाद्वक्ष्यति हृदिप्रकरणे — अ; सञ्चापि कारणवद्वक्ष्यति सृदिप्रकरणे —आ
[13] सार्धत्रि० १३.१२ उ०, १३ उ०
[14] तस्य वाम० — अ, आ
[15] ०पार्श्वे तु — अ, आ
[16] पार्श्वे बिन्दु — अ, आ
[17] च विवक्षायां — आ
[18] तेस्त्रय — अ, आ; पा० सू० ६.३.४८
[19] आवेशो भवन्त्येव — अ
[20] भूतायां बहुव्री — अ, आ
[21] द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः — पा० सू० ६.३.४७
[22] इत्यत्रेति तत्रानु० — अ, आ
[23] इत्य यमनश्चात्र — अ
[24] युगपन्मात्राचतुष्टय० — आ
[25] संभवति चोद० — अ; संभवाच्चाद० — आ
[26] निरन्तरव्यवहित — अ
[27] बिन्दु च तन्मात्रोपलक्ष्यतेकाररूप — अ
[28] मात्रा स्वसंवेद्यन्त — आ
[29] ०वन्तवात्म० — अ
[30] सार्धत्रि० १९.१० – ११ वृत्तौ
[31] सार्धत्रि० २२.४ पू०
[32] शिखावस्तो — अ
[33] गुरुर्दीक्षां — इत्यपि पाठः
[34] तद्वाचकाद्यत् — अ
[35] ०मक्तः — आ

त्रयोदशान्तं च षोडशकलासंख्येयौकारं नियोजयेत्। बिन्दुस्तत्र[१] [२]"सर्वेषां चोपरि स्थितः" इत्यनेनैव [३]सिद्धः" इति व्याचक्षते।

अपरे [४]पुनः "अन्तरपठित्वादङ्गेभ्यः **पञ्चमे** नेत्रबीजे **षष्ठं त्रयोदशान्तं** च पूर्ववद् **विनियोजयेत्।** अनुस्वारस्य [५]नेत्रत्वादेवात्र प्राप्तेः" इत्याहुः। तत्र पक्ष[६]द्वयेऽपि शिखामात्राया अनुपपत्तिरेवेति वक्ष्यमाणदर्शितग्रन्थविरोधः, [७]"मात्रा द्वादशके स्थितम्" इत्यर्थविशेषविधानाद् उत्सर्गप्राप्तानां षोडश-[८]मात्राणां त्यक्तत्वात्। [१०]पुनर्नेत्रपदानुपपत्तिश्च। [११]द्वादशमात्रासु मध्यादवशिष्टाया दीर्घपञ्चम-मात्राया [१२]अविनियुक्तत्वादव्याप्तिश्च[१३] दोष इति।

अत एव [१४]अन्येऽपि–"षष्ठं [१५]त्र्यन्तं दशान्तं [१६]च पञ्चमे आकाशबीजे हकारात्मनि विनियोजयेदिति चतुष्कलस्यैवात्र परमाक्षरस्योद्धाराद् **द्विशतिकालोत्तरादाविवेत्याहुः**। यद्वक्ष्यति **प्रत्यक्षयजनप्रकरणे**[१७]—

'स्वयमेव [१८]तु तं पश्येद्देवं बिन्दुं चतुष्कलम्।' इति।

[१९]**ज्ञानामृतप्रकरणे** च —

[२०]'एतत्तत्परमं गुह्यमेतत्तत्परमाक्षरम्।'" इति।

तदयुक्तम्। [२१]यतः **प्रासादनिर्णयप्रकरणे** तदात्मनि पञ्चकलात्मब्रह्मव्याप्तिं वक्ष्यति[२२]। प्रागुक्तश्चा-व्याप्तिदोषस्तदवस्थ[२३] एषः। स एव च यथा [२४]चतुष्कलत्वेन परमाक्षरतयोच्यते, तथा तत्रैव वक्ष्यामः। तदियता [२५]प्रासादमात्राद्वादशानामेवोद्धारः ॥११॥

[२६]अथावशिष्टेभ्यो [२७]मातृकावर्णेभ्यः [२८]केषांचिदेवोद्धारः कथ्यते —

[२९]षष्ठमस्य द्वितीयं तु [३०]चतुर्थाद्येन संयुतम्।
द्वितीया[३१]त्पञ्चमाच्चैव[३२] आदिमं योजयेत्पुनः ॥१२॥

---

[१] बिन्दुबस्तु — अ
[२] सार्धत्रि० १.१० पू०
[३] सिद्धे — अ
[४] पुररन्तर — आ
[५] नेत्रस्स्यादेवात्र — अ
[६] ०द्वये विशिखा — अ
[७] सार्धत्रि० १.९ पू०
[८] ०द्वादशके हि मित्यर्थविशेष० — अ
[९] ०मन्त्राणां चोक्तत्वात् — अ; ०मन्त्राणां त्यक्तत्वात् — आ
[१०] पुनस्तत्र पदानुपपत्तिश्च — अ; पुनस्तत्र पदानुनानुपपत्तिश्च — आ
[११] द्वादशा मन्त्रा सुमध्यादवशिष्टया — अ
[१२] अपि नियुक्त० — आ
[१३] ०दव्याप्तश्च — अ
[१४] वाक्येऽपि — अ
[१५] त्र्यन्तं च दशा — आ
[१६] च मे आकाश मे आकाशबीजे — अ
[१७] सार्धत्रि० २४.२ पू०
[१८] नुतं पश्येद्देहबिन्दुं — अ, आ
[१९] ज्ञाता मूलं० — अ; **ज्ञातात्मकप्रकरणे** — आ
[२०] सार्धत्रि० — २३. १६ उ०; एतत्परमं — आ
[२१] ततः — अ
[२२] सार्धत्रि० २२. ८, ९
[२३] ०स्तदवस्था — अ
[२४] चतुष्कूलत्वेन — अ
[२५] प्रमात्रा द्वादश नं बोद्धारः — अ
[२६] अथापि शिष्टेभ्यो — आ
[२७] मात्रका० — अ
[२८] केषांचिद्वोद्धारः—अ; केषांचिद्विवोद्धारः—आ
[२९] षष्ठस्य द्वितीयं तु — अ, ई; षष्ठस्य यद्द्वितीयं तु—आ
[३०] चतुर्थाद्यं न संयुक्तम् — अ
[३१] ०त्पञ्चमं चैव — इ; त्पञ्चमा चैव — आ
[३२] चैवम् — ई

[1]हन्ति [2]विघ्नाञ्शिवास्त्रेण शिखया मुक्तिदं [3]स्मृतम् ।
[4]एतत्पाशुपतं दिव्यं [5]सर्वपाशनिकृन्तनम् ॥१३॥

षष्ठस्य [6]पवर्गस्यात्रापि यद् **द्वितीयम्** अक्षरं [7]फकाराख्यं तत्, **चतुर्थस्य** [8]टवर्गस्य **आद्येन** [9]टकारेण युक्तं कुर्यात् । **पुनः** इति पश्चात्, **द्वितीयात्** [10]कवर्गाद् **आदिमम्** अक्षरं ककाराख्यं [11]**पञ्चमाच्च** तवर्गा[12]दादिमं तकारं च **योजयेत्** इति । एतदक्षरचतुष्टयं यथाकारमात्रया रहितं तथोक्तं प्राक्[13] । [14]फट्कारस्य त्वत्राप्यकार उच्चारणार्थ एवेति । यद्वक्ष्यति[15] — "हुंफडन्तेन" इति । एवं विशेषयुक्तम् **एतत्** पशुपतेः परस्य विद्येश्वरस्येदं **पाशुपतम्** अस्त्रमुच्यते; विद्याङ्गास्त्रमित्यर्थः । अत एवास्य [16]दिवि साधु **दिव्यम्** इति व्याख्येयम् । किं तु परस्यामेव शुद्ध[17]विद्यात्मिकायामिति [18]वक्ष्यमाणलोक[19]पालास्त्रेभ्योऽस्य विशेषः । एतच्च नित्यादिकर्मणि[20] विघ्नोच्चाटनार्थं शिवास्त्रेण सह प्रयोक्तव्यम् । दीक्षायां तु पाशवियोगार्थमालभते [21]शिखया सह । [22]पाशच्छेदे केवलमेव भवति । [23]न तु सकलीकरणादौ, अणुपक्षस्यैव स्थितत्वात् तत्र पूजानु[24]गमानुपपत्तितः शिवास्त्रस्यैवेति वक्ष्यामः[25] । अत एवात्र "पुत्रेण सहागतः पिता" इतिवत् [26]"सहयुक्तेऽप्रधाने" तृतीया भवन्ती "राज्ञा सह पुरुषः, सेनापतिना सह सैनिकः समागतः" इति नार्थगतं [27]प्राधान्यं च बाधितुं शक्नोति । शिखाशिवास्त्रयोरेव प्राधान्यमित्यविरोधः ॥१२-१३ ॥

अथेह विद्याङ्गास्त्रोद्धार[28]दर्शनाद् विद्याङ्गान्तराणामप्युद्धारशङ्का स्यादिति, तन्निवृत्तये मन्त्रोद्धारपरिसंख्या —

---

[1] हन्तिश्च वास्त्रेण शिखाया — अ; हन्ति विद्वाञ्छिवास्त्रेण — आ
[2] विघ्नं शिवास्त्रेण — इ; मु
[3] समस्तम् — अ
[4] वा तत्पाशुपतं — अ
[5] सर्वपापनिकृ० — अ, इ
[6] विसर्गस्यादत्राप्ययं द्वितीय० — अ
[7] पकारा० — अ
[8] भगस्याद्येन — अ
[9] गकारेण — अ
[10] कवर्गाः आदिमाक्षरं — अ
[11] पञ्चमा च — आ
[12] ०दादि मकारं च — अ
[13] सार्धत्रि० — १.९ पू० वृत्तौ
[14] ककारस्यात्व० — अ; फट्कारस्यात्वत्राप्यकार० — आ
[15] सार्धत्रि० २.३ उ०
[16] जीवि — अ
[17] विद्यात्मकाया० —अ
[18] सार्धत्रि० ७.९, १०
[19] ०पालास्तेभ्यो — अ
[20] कर्माणि — अ
[21] शिखाया सह — आ
[22] पाच्छेदे — आ
[23] ननु सकारणादावणु० — अ; न तु सकरणादावणु० — आ
[24] ०गमोपपत्तेः तत्र शिवास्त्र० — अ
[25] सार्धत्रि० १.१७
[26] संयुक्तेऽप्रधाने त्रिधा भवन्ति — अ; सयुक्तेऽप्रधाने त्रिधा भवन्ति — आ; पा० सू० २.३.१९
[27] प्राधान्यत्वं बाधितत्वं शक्नोति — आ
[28] दर्शना विद्यांशान्तराणामप्युदारशङ्का० — अ

ब्रह्माणि च [1]शिवं साङ्गं नेत्रं पाशुपतं च यत्।
समासात्कथितः सर्वो [2]मन्त्रोद्धारस्त्वयं शुभः[3] ॥१४॥

अत्र शिवाङ्गत्वेऽपि [नेत्रस्य] [4]पुनरुपादानं पृथग्विनियोगदर्शनार्थम्। यद्वक्ष्यति[5] —
[6]"नेत्रं दत्त्वा तदा[7]बाह्यो देवदेवः सदाशिवः।" इति।

[न] सर्वात्मनायं **सर्वो मन्त्रोद्धारः**, [8]"हृद्बीजं पार्थिवे युक्तम्" इत्यादिना धारणामन्त्रोद्धारस्य वक्ष्यमाणत्वात्। सत्यम्। **अयं तु शुभः सर्वः** प्रोक्तः। [9]शुभत्वं चास्य शुद्धमार्गविभासकत्वात्। [10]स त्वशुद्धः, पृथिव्यादिधारणार्थत्वात्। [11]"सकलं निष्कलं शून्यम्" इत्यादिना, [12]**प्रत्ययप्रकरणेन** च वक्ष्यमाणस्य सिद्धयर्थत्वात्, तदभिमुखीभावज्ञापनार्थत्वाच्च न तथोक्त इत्यदोषः। अत्र [13]च यथाद्यन्तयोः प्रणवनमस्कारयोगस्तथा वक्ष्यामः [14]**प्रत्यक्षयजनप्रकरणे** ॥१४॥

[15]तदियता मन्त्रसंक्षेपं [16]पदार्थचक्रदर्शनपूर्वमुक्त्वा, [17]अथ षष्ठस्यो[18]पायपदार्थात्मनस्तन्त्रस्य[19] संक्षेपः —

अस्य मुद्रां प्रवक्ष्यामि साधकानां हिताय वै।

उद्धारस्योद्ध्रियमाणनिष्ठत्वाद् **अस्य** उद्धृतस्य मन्त्रगणस्य **मुद्रां** मोदिकां [20]हर्षजननीं हर्षोत्पत्तये, [21]तथा **साधकानाम्** अपि मुद्रां हर्षजननीं हर्षोत्पत्तये, वक्ष्यामीति। अन्यथाने[22]न "मन्त्रन्यस्तो मयान्यस्तः" इति तयोर्विरागसंभावना स्यादिति हितयोगेऽप्यत्र [23]संबन्धषष्ठी, अथ मुद्रा[24]स्वरूपाणामपि नियोगविदाम्[25]।

[26]हस्ताभ्यां संस्पृशेत्पादादूर्ध्वं[27] यावत्तु मस्तकम् ॥१५॥
एषा मुद्रा महामुद्रा [28]सर्वकामार्थसाधिका[29] ॥

---

[1] शिवसाङ्गोऽस्त्रं पाशु० — अ; शिवः साङ्गोऽस्त्रं — मु
[2] मन्त्रोद्धारः स्वयं — अ, आ, इ, ई, मु; 'मन्त्रोद्धारस्त्वयं शुभः' इति व्याख्यातृसंमतः पाठः।
[3] शिवः — इ
[4] नोपादानं — अ, आ
[5] सार्धत्रि० २.११ पू०
[6] नेदं — अ, आ
[7] बाह्यो देवः — अ, आ
[8] सार्धत्रि० २.२ पू०
[9] शुभाञ्चास्या शुद्ध० — अ; शुभत्वं चास्या शुद्ध० — आ
[10] सत्यशुद्धः — आ
[11] सकलनिष्कलं — अ; सार्धत्रि० — १९.२
[12] एकविंशप्रकरणेन
[13] चाद्यन्तयोः — अ
[14] सार्धत्रि २४.३ पू० वृत्तौ।
[15] तदीयता — अ
[16] पदार्थं चक्र० — अ
[17] 'अथ षष्ठस्योपाय' इति नास्ति — अ
[18] ०पायं पदार्थात्मन० — आ
[19] ०स्तत्रास्य — अ
[20] हर्षजननीयं — अ
[21] 'तथा' इत्यारभ्य 'हर्षोत्पत्तये' इत्यन्तं नास्ति — आ
[22] ०नामन्त्र — आ
[23] संबन्धितः षष्ठी — अ; संबन्धितषष्ठी — अ
[24] ०स्वरूपा नाम विनियोगविषां — आ
[25] ०विष्टाम् — अ
[26] भस्ताभ्यां — अ
[27] ०त्पदादूर्ध्वं — अ
[28] सर्गकामार्थसाधकः — अ
[29] ०साधका — मु

आपादतलाच्छिखान्तं[1] यावन्न्यस्तसर्वमन्त्र[2]स्थानानि **हस्ताभ्यां संस्पृशेत्** इति। आत्मस्वरूपान्नाम्ना **महामुद्रा** इति। [3]काम्यत इति **कामः** सिद्धिफलं, तस्य सर्वार्थस्य [4]परस्य [5]मोक्षलक्षणस्य **साधिका** [6]काम्यादिकर्मणि प्रयोक्तव्येत्यर्थः ॥

तत्रानुष्ठाने तस्याः क्रमविधिः —

करन्यासं पुरा कृत्वा मुद्राबन्धं तु कारयेत् ॥१६॥

करेषु [7]**न्यासं** मन्त्राणां, [8]**करैश्च न्यासं** स्वदेहे **कृत्वा** [9]**मुद्रया** तत्र मन्त्राणां [10]**बन्धम्** अत्र निभृततापादनं [11]यावत्कुर्यात्। मन्त्रनिरोधे[12]ऽप्येष प्रयोक्तव्य इत्यर्थः। **कारयेत्** इति प्रागुक्तमेव [13]गुरुविषयत्वमपरोपदेशस्य दर्शयितुं णिचा निर्देशः ॥१६॥

अथ करन्यासः —

[14]**तलिकां हस्तपृष्ठं [15]च अस्त्रबीजेन [16]शोधयेत्।**
कनिष्ठामादितः कृत्वा अङ्गुष्ठं चाप्यपश्चिमम् ॥१७॥
[17]**ब्रह्माणि विन्यसेत्तत्र तथैवाङ्गानि यत्नतः।**
प्रासादं विन्यसेत्पश्चा[18]द्व्यापिनं सर्वतोमुखम् ॥१८॥

[19]**हस्त**पदसंनिधानात् **तलिकां** हस्ततलं, तत्**पृष्ठं** [20]**च अस्त्रबीजेन** इति बीजात्मना शिवास्त्रेण **शोधयेत्**। [21]न तु वर्ण[22]समूहेन पाशुपतास्त्रेणेत्यर्थः। न च [23]"अस्त्रं [24]न योजयेद्देहे" इत्यस्य निषेधस्य [25]प्राप्तिः, तस्य पाशुपतविषयत्वादिति तत्रैव दर्शयिष्यामः। अतश्च **कनिष्ठामादितः कृत्वा**, न विद्यते **पश्चिमं** यस्य, तत् तथाभूतं [26]ह्येवान्तिमं च अङ्गुष्ठं कृत्वा। **ब्रह्माणि विन्यसेत्** इति श्रुतेर्नोद्धारक्रमेण। अपि तु वक्ष्यमाणदेहन्यासक्रमेणैव। [27]यद्वक्ष्यति —

---

[1] ०च्छिरोन्तं — आ
[2] स्थानाद्धस्ताभ्यां — अ
[3] काम्यन्ति कामः—अ; काम्यतीति कामः—आ
[4] पदस्य — अ
[5] मोक्षः गुणस्य — अ
[6] काम्यामणि प्र० — अ
[7] न्यासमन्त्राणां—अ; करेण समन्त्राणां — आ
[8] करै . . . संस्पते ह्येकत्वमुद्रया — अ
[9] मुद्रय — आ
[10] बन्धमन्त्र — अ
[11] या यत्कुर्यान्मन्त्र० — अ
[12] ऽप्येष्ट प्रयोक्तव्ये — अ
[13] सार्धत्रि० १.६ पू० गुरू विषयत्यमवरेप . . दर्श० — अ
[14] तलिकाहस्तपृष्ठं — इ
[15] तु — इ
[16] रोधयेत् — अ
[17] ब्रह्माणि . . न्यस्य तथै० — अ
[18] ०द्व्यापिनः — अ; ०द्व्यापनं — आ
[19] हस्तपादनिधानान्तलिकां — अ; हस्तपादसंनिधानात्तलिकां — आ
[20] चात्र बीजेन — अ, आ
[21] 'न तु' इति नास्ति — अ
[22] ०सकुहेन — आ
[23] सार्धत्रि० ३.७ उ०
[24] नियोजयेद्दे इत्याह निषेधस्य — अ; नियोजयेद्देह इत्यस्य — आ
[25] 'प्राप्तिः' इत्यारभ्य 'अङ्गुष्ठं कृत्वा' इत्यन्तं नास्ति — आ
[26] सवान्तिमं — अ
[27] यद्वा वक्ष्यति — अ

[1]"ईशानाद्यास्तु [2]सद्यान्ता मूर्ध्न आरभ्य विन्यसेत्।" इति।

अत एव "मुद्राया इवात्रैषां संहारक्रम एव युक्तः" [3]इत्यव्याख्यैव। विन्यासश्रुतेरत्र तत्क्रमस्यैवापेक्षि[4]तत्वाद् न तु विद्यान्यासार्थे सिद्धिस्तस्याः। अत एव [5]बहिरङ्गन्यासोऽसाविति पूर्वैव व्याख्या युक्ता। **तथैवाङ्गानि** इति तेषामुद्धारविन्यास[6]क्रमो हृदयादिभिः सदृश [7]एवेत्युक्तः। अस्त्रं तु [8]प्राग्विशिष्टकर्मार्थित्वेनात्र विनियुक्तम्। अधुना [9]त्वङ्गान्तरवत्तत्कर्म हस्त[10]शाखाधिष्ठातृत्वेनेत्यविरोधः। **पश्चात् प्रासादं** सकलं हस्तव्यापकत्वेन [11]**विन्यसेत्**। न च तस्यां विन्यासगतिरस्ति इति। अत्र च—

[12]"नेत्रं दत्त्वा तदावाह्यो देवदेवः सदाशिवः।"

इति [13]वक्ष्यमाणश्रुत्या पूर्वं नेत्रं विन्यसेत्। पाशुपतस्याप्यत्र न्यासोपन्यासोऽनुपपन्न एव निषिद्धत्वादिति [14]दर्शितः॥१७–१८॥

इति भट्टनारायणकण्ठात्मजभट्टरामकण्ठविरचितायां[15] [16]श्रीमत् [सार्धत्रिशति] कालोत्तरवृत्तौ मन्त्रोद्धारप्रकरणं [प्रथमं समाप्तम्]

इति प्रथमः पटलः

---

[1] सार्धत्रि० २.१० उ०
[2] सद्यान्तानां — आ
[3] इति व्याख्यैव — अ
[4] ०तत्त्वात् . . . तस्यां विन्यासश्रुतिरस्तीति न तु विद्यान्यासार्थेस्सिद्धिः तस्याः। [5]अत एव — आ
[5] बहिरङ्गन्यासाविति प्रत्रेर्वव व्याख्या — अ; बहिरङ्गासाविति पूर्वैर्व्याख्या — आ
[6] क्रमे — अ, आ
[7] एवेत्युक्तम्—आ; सार्धत्रि० १.९ उ, १० पू०
[8] प्रविशिष्टाकर्मार्थत्वे० — अ सार्धत्रि० १.१३
[9] तु चाङ्गान्तर० — अ
[10] ०शाख्या . . . धिष्ठितमृत्वे० — अ
[11] विवसेदत्रवन्नेत्रं दत्त्वा तदा न च तस्यां विन्यासगतिरस्तीति बाह्ये देवः सदाशिव इति — अ
[12] सार्धत्रि० २.११ पू०
[13] वक्ष्यमाणं श्रुत्वा — अ
[14] दर्शितम् — आ
[15] ०रामविरचितायां — अ
[16] श्रीकालोत्तर० — अ, आ

द्वितीयः पटलः

अन्तःकरणविन्यासप्रकरणम्

करेषूक्तं कराभ्यां न्यासं वक्तुं प्रकरणान्तरम् —

[1]अन्तःकरणविन्यासो[2] भूतशुद्धिस्तथैव च ।

अन्तःकरण[3]शुद्धचै । एतच्च प्राधान्येनात्रोपलक्षणमन्तरा[4]भवशरीरस्य । यद्वक्ष्यति **विज्ञानप्रकरणे**[5] —

[6]"शब्दः स्पर्शश्च रूपं च रसो गन्धश्च [7]पञ्चकम् ।
बुद्धिर्मनस्त्वहंकारः[8] पुर्यष्टकमुदाहृतम्" । इति ।

तेन [9]विन्यासो मन्त्राणां बाह्यदेहे [10]देहे तस्मिंश्च **विन्यासः** इति न्यासो द्विविधोऽप्यत्र प्रकरणे [11]वक्तव्यः । **भूतानां** च बाह्यशरीरारम्भ[12]काणां **शुद्धिः तथैव** [13]कर्तव्यत्वेन **च** वक्तव्या । न पुनः क्षय इत्यर्थः । प्रागारब्धकार्य[14]कर्मभोगोप[15]रोधेन तस्य दीक्षा[16]यामप्यकृतत्वात् । तथा हि — [17]तावद्दीक्षितानामत्राधिकार इति वक्ष्यामः । [18]दीक्षा च द्विविधा सद्योनिर्वाणा, असद्यो[19]निर्वाणा चेति फलभेदेन । तत्र सद्योनिर्वाणया[20] सर्वपाश[21]क्षयो [22]दीक्षयास्येति दर्शयिष्यामः[23] । [24]असद्योनिर्वाणया तु सर्वान्यकर्मणां [25]क्षयेऽपि प्रारब्ध[26]कार्याणामपरिक्षय इति वक्ष्यामः[27] । प्रोक्तं च **श्रीमत्किरणे**[28] — "येनेदं [29]तद्धि भोगतः" इति । तद्भोगोपरोधेन विनास्य पञ्चभूतात्मनो देहस्य सपुर्यष्टकस्य क्षय इति तद्भोगसमाप्ति यावत्[30] प्रत्यहं [31]तच्छुद्धिक्रमेणैवासौ विधेय इत्यत्र तयोरुद्देशः ॥

---

[1] प्रथमश्लोकात्पूर्वं 'अन्तःकरण शुक्तिः' इत्यधिकम् — इ
[2] ०विन्यासा — अ, ऊ
[3] ०शुद्धचा तच्च — अ; बुद्धचा तच्च — आ
[4] ०भावशरीरस्य — अ
[5] सार्धत्रि० १७.४ उ०, ५ पू०
[6] शब्दस्पर्शरूपं च — अ, आ
[7] पञ्चमः — अ; पञ्च च — आ
[8] ०र्मनोह्यहंकारः — अ
[9] विन्यासो द्विविधोऽप्यत्र — अ
[10] देहे तस्मिश्च विन्यासे — आ
[11] वक्तव्यभूतानां — अ
[12] ०कारणं शुचिस्तथैव — अ
[13] कर्तव्यात्वेन — आ
[14] ०कामं भोगो० — आ
[15] ०योगेन — अ
[16] ०या अप्यकृत० — अ
[17] तावद्दीक्षितानपि अत्राधिकार — अ; तावद्दीक्षितानां मन्त्राधिकार — आ; सार्धत्रि० ५.१ उ०, २ पू० वृत्तौ ।
[18] दीक्षा द्विविधा — अ
[19] ०निर्वाणफलभेदेन — आ
[20] ०निर्वाणाया — अ
[21] ०क्षये दीक्षया दीक्षा यास्येति — अ
[22] दीक्षयेति दर्श० — आ
[23] सार्धत्रि० ८.२१ उ०, २२ पू० वृत्तौ ।
[24] सद्योनिर्वाणया — अ
[25] क्षये प्रारब्ध० — अ; क्षयेऽप्यारब्ध० — आ
[26] कार्याणां परिक्षय — अ
[27] सार्धत्रि० ८.२१ उ०, २२ पू० वृत्तौ ।
[28] किरणे विद्या० ६.१४ पू० (मुद्रितकिरणे 'येनारब्धमिदं वपुः') इति दृश्यते ।
[29] तद्धिभोगतः — अ
[30] समाप्तिर्यावत् — अ
[31] तच्छुद्धि क्रमेणैव सौविधेय — अ

अथानयोरेव तावदनुष्ठाने [1]क्रमः —

भूतशुद्धिं पुरा कृत्वा [2]ततोऽन्तःकरणं कुरु ॥१॥

[3]**अन्तःकरणस्य** कलादेरिव सर्गादावीश्वरकृतत्वेन [4]करणासंभवाद् "[5]गोमयात् कुरु" इत्यादाविव तत्-साध्यं कुरु अत्र न्यासमित्यर्थः। यद्येवं भूतशुद्धिरेवात्र [6]लब्ध्वर्थं पूर्वसूत्रे प्रथमोद्दिश्येति किं [7]तत्क्रमा-र्थेनानेन हि सूत्रान्तरेणैवेति। अन्तःकरणन्यासस्य तु प्राधान्यख्यापनार्थमेवमुक्तम्। तदर्थत्वाद्-भूत[8]शुद्धेरित्यदोषः। [9]शुद्धचर्थत्वेनैषा न शुद्धचर्थस्य [10]स्नानादेर्बाधिका च। [11]"सेनापतिं प्रणयेत्" इत्यस्यां भद्रप्रणयनस्य [12]"गोदोहनेन पशुकामस्य प्रणयेत्" इत्यादिवत्। यदाहुः[13] —

[14]"अर्थात्तुल्यार्थतां प्राप्य [15]बाधो गोदोहनादिवत्।" इति,

तुल्यार्थत्वाभावात्। तेन हि बाह्यमलसंशुद्धिः शरीरस्य क्रियते। [16]अनया तु तस्यैवानात्म-न्यात्मभावनात्मकं बन्धत्वं [17]शोध्यते इति वक्ष्यामः। किमर्थं तर्हि स्नानात्पूर्वमप्यस्य [18]शुद्धिः शुद्धयादेर्मुद्रान्तस्य साधन[19]कलापस्य पाश[बन्धशोधनार्थतां] संध्यार्थतामपि दर्शयितु[20]मित्यदोषः। यदुक्तमस्मद्गुरुभिः अत्र **पद्धतौ**[21] —

"स्नानात्पूर्वं [22]समाख्यानादस्य संध्यार्थतापि च।
सूचिता सूत्र[23]करणे तन्नात्र श्रुतिचोदना॥" इति॥१॥

अथ क्रमेण[24] समन्त्रोद्धारभूतशुद्धिः —

[25]**हृद्बीजं पार्थिवे युक्तं [26]पार्थिवीं धारयेत्क्रमात्।**

---

[1] क्रमाद् — अ
[2] तत्रान्तः — अ
[3] अतःकरणसकलादेव — अ
[4] कारणासं॰ — अ, आ
[5] योमयात् — आ
[6] लब्ध्वार्थं — अ, आ
[7] तत्कामार्थे तानेनाविति सूत्रा॰ — अ; तत्का-मार्थे नानेना हि सूत्रा॰ — आ
[8] ॰शुद्धिरित्य॰ — अ
[9] अशुद्धचर्थेनैषा न — अ; शुद्धचर्थे त्वेषा नु — आ
[10] स्नानादेः साधिका — अ
[11] सैनापतिप्रणयेत्यसंभद्र॰ — अ; सेनापति-प्रणये॰ — आ
[12] आपस्तम्बश्रौतसूत्रे १.१६.२
[13] श्लोकवा॰ २.५८ उ॰
[14] अर्था तुल्यार्थतां — अ
[15] वसुयो गोदोह॰ — अ
[16] अनु यदि कृतस्यैवात्मनात्म॰
[17] बोध्यते — अ
[18] शुद्धिर्यान्ति मुद्रान्तस्य — अ
[19] ॰कल..स्य पाशः सन्ध्या॰ — अ; कलापस्य पाशं सन्ध्या॰ — आ
[20] ॰मप्यदोषः — अ, आ
[21] ग्रन्थोऽयं न लभ्यते।
[22] समाख्य नादस्य सन्धार्थताविव — अ
[23] ॰करणेन तानत्र — अ; ॰करणेन तान्नात्र — आ
[24] 'क्रमेण' इति नास्ति — आ
[25] हृत...पार्थिवान् धारयेत्क्रमात् — अ; हृद्-बीजं...पार्थिवां धारयेत्क्रमात् — आ
[26] पार्थिवां — मु

अत्र च "दीक्षायां तु यथा वत्स तत्प्रयोगं समाचरेत्" इति [1]वक्ष्यमाणातिदेशबलाद् दीक्षा-[2]प्रकरणवाक्यैकवाक्यतया सूत्राणि [3]व्याख्येयानि। तत्र हि वक्ष्यति[4] —

"पृथिव्याद्यब्ज[5]नाडीर्वै शब्दादिगुणवायुभिः।
आत्माधि[6]देवता मन्त्राञ्ज्ञात्वा [7]मुक्तस्तु मोचयेत्॥
नाडीविवरसंबन्धा ऊर्ध्व[8]नाला ह्यधोमुखाः।
[9]ग्रन्थिद्वययुताः सर्वे हुंफडन्तेन [10]योजिताः॥
ततश्चोर्ध्वत्वमायान्ति [11]उद्घातैः [12]पूर्ववद्गुह।
[13]क्ष्माद्यमालोक्य मनसा [14]सबाह्याभ्यन्तरं पुनः॥
तत्त्वे तत्त्वे नियोक्तव्या [15]वियुक्ता निरहंकृता।" इति।

ततश्च [16]यदत्रत्यं हृदयाभिधानं यदत्र **बीजम्** उद्धृतं, तत् **पार्थिवे** [17]वर्णे लकारे **युक्तं** कुर्यात्। यदुक्तं **त्रयोदशशतिके** —

"यत्तु पार्थिवबीजं तद्वकारादौ प्रकीर्तितम्।" इति।

ततश्च तद्युक्तम्। [18]**पार्थिवीं** धारणां तेन मन्त्रेण **धारयेत्** [19]इडादिप्रधाननाडीत्रयग्रन्थिविवरविनिर्गताधोमुखाब्जपृथि[20]व्याकारदेवतादिविषयाम्। तत्र [21]चात्मा पुर्यष्टकमेव। न आत्मा अभिमानेन भोगसाधनत्वेन ध्येयतया विवक्षित इति दर्शयिष्यति[22]। अधिदेवता च ब्रह्मा। कला च निवृत्तिः। मन्त्रश्च सद्योजात एवेति। [23]एतावानेव बन्धः। चित्तस्य धारणा यथा हृत्प्रदेशात् [24]प्रभृति धार्या न तु कन्दस्थानाद्, यथान्यैर्वा तथा तत्र वक्ष्यामः[25]। प्रोक्तं चास्मद्**गुरुभिः** अत्र **पद्धतौ**[26] —

"[27][धारणा चे]डादिनाथग्रन्थिपञ्चकपङ्कजे।
हृत्कण्ठतालुभ्रू[28]मध्यद्वादशान्तव्यवस्थिता।" इति॥

---

[1] सार्धत्रि० २.५ पू०
[2] ०प्रकरणं वाक्यैक० — अ; प्रकरणे पठित-वाक्यैक० — आ
[3] व्याख्येया तत्र — अ
[4] सार्धत्रि० ८.३७ उ०–४०
[5] ०नासीर्वै — अ
[6] देवतान् मन्त्रान् — अ, आ
[7] शक्तस्तु — अ
[8] ०नालो ह्यधो० — अ; नाला स्यधो० — आ
[9] ग्रन्थीद्वय० — अ
[10] रेचिताः — अ; मोचिताः — आ
[11] उद्गतैः — अ
[12] पूर्ववद्गुहम् — आ
[13] क्ष्मान्य० — अ, आ
[14] सबाह्यान्तरत्वेन नियोक्तव्या — अ; सबाह्यान्तरत्वेन त्वेति नियोक्तव्या — आ
[15] व्यापि युक्तानि निरहं — अ; पियुक्ता निरहं — आ
[16] यममत्रमन्यं हृदयादिभिर्यानिं—अ; यमत्रत्यं–आ
[17] वर्णैर्लकार० — अ;
[18] पार्थिवं — आ
[19] शुद्धादि० —अ
[20] व्याकरा देवता — अ
[21] चात्मपुर्यष्टकं० — अ
[22] सार्धत्रि० ८.३७ उ०, ३८ पू० वृत्तौ।
[23] एतावदेव — अ
[24] प्रहृति धार्यान्न तु — अ
[25] सार्धत्रि० ८.३८उ–३९ वृत्तौ; यद्यप्यत्र मातृकाद्वयेऽपि "न तु कण्ठस्थानात्" इति पाठः, तथापि अष्टमप्रकरणस्थवृत्तिमनुसृत्य 'न तु कन्दस्थानात्' इति शोधितम्
[26] आकरो न लभ्यते।
[27] न मासाधिनाथ ग्रन्थिपङ्कजपङ्कजे — अ; इडादिनाथ ग्रन्थिपङ्कजपङ्कजे — आ
[28] ०मध्यं द्वादशव्यवस्थिता — अ; ०मध्यद्वचद्वादशान्तव्यवस्थित — आ

एवम् —

शिरोऽप्सु तेजसि [1]शिखां कवचं वायुना सह ॥२॥
अस्त्रं च शिवसंयुक्तमाकाशं धारयेत्सदा ।

शिरोबीजमपां [2]वाचके वकारे कृत्वा धारणां कण्ठस्थानात्कुर्यात्। तत्र च तद्भोगसाधकत्वे-[3]नात्मा। अधिदेवता च [4]विष्णुः। कला च प्रतिष्ठा। मन्त्रश्च वामदेव[5]भट्टारकोऽधिष्ठातृत्वे-नाभिध्येयः[6]। ततः **तेजसि** तेजोऽभि[7]धायके रेफे **शिखाबीजं** कृत्वा तेजसि [8]धारणां तालुस्थानात् कुर्यात्। तत्र [9]चासावात्मा तद्भोग[10]साधनत्वेन। अधिदेवता च रुद्रः। कला च विद्या। मन्त्र-श्चाघोराधिष्ठायकत्वेन चिन्त्यः। ततः **कवच**[11]बीजं वाय्वभिधायकेन यकारेण युक्तं कृत्वा **वायुना** विषयीकृतेन **सह** धारणां कुर्यात्। ललाटा[12]द्वायुधारणमित्यर्थः। तद्भोक्तृत्वेनात्मा। अधि-देवता च ईश्वरः। शान्ता च कला। मन्त्रश्च तत्पुरुषदेवताधिष्ठातृत्वेनाभि[13]ध्येयः। ततश्च **अस्त्रं च** [14]**शिवसंयुक्तम्** इति शिवास्त्रमेव। **आकाशं** [15]द्वादशान्ते पदे **धारयेत्**। न तु पाशुपता-स्त्रमित्यर्थः। "शिवसंयुक्तं कृत्वा" इति [16]तु व्याख्यानमयुक्तमेव। [17]तस्य साधारणमन्त्रनिषेधात्। यदुक्तं —[18] "मन्त्रोद्धारस्त्वयं शुभः[19]" इति। अत्र चात्मा तद्भोगसाधनत्वेन[20]। अधिदेवता सदा-शिवः। शान्त्यतीता च कला। मन्त्रस्त्वीशान[21]भट्टारकोऽधिष्ठातृत्वेनाभिध्येय इति॥

एवं बाह्यमपि भूतपञ्चकं यथा [22]स्वान्तैरेवाधिष्ठितमभिध्येयमिति [23]तदर्थमत्र धारणापञ्चकं निर्वर्त्य[24] —

[25]हुंफडन्तेन पटलं भित्त्वा चोर्ध्वं [26]विशेत्ततः ॥३॥
[27]पञ्चोद्घाताश्च चत्वारस्त्रयो द्वावेक एव च ।

ऊर्ध्वं घातो वायोः **उद्घातः** द्वादशान्तं [28]यावन्नादवृत्त्या प्रेरणम्। यदुक्तं **त्रयोदशशतिके** —

---

[1] शिखा — अ, मु
[2] वाचकेकारे —अ
[3] ०नाधिदेवता — अ
[4] विष्णुप्रतिष्ठा कला च — अ; विष्णुः प्रतिष्ठा कला च — आ
[5] भस्मराकोऽधि — अ; भस्नारकोऽधि — आ
[6] ०ध्येयम् — अ
[7] ०धायकरेफशिखा० — अ
[8] सा धारणा — अ
[9] वासाद्वात्मा — अ; वासवात्मा —आ
[10] साधनत्वेनात्याधिदेवता — अ; साधनत्वेनात्माधिदेवता — आ
[11] ०बीजवाय्वभिधाय० — अ
[12] ०द्वाधारण ० —अ
[13] ०धाय ततश्च — अ; ०धायकः — आ
[14] शिवं संयुक्त० — अ
[15] चादशान्ते — आ
[16] तुशब्दो नास्ति — अ
[17] इतरस्य साधारण० — अ
[18] सार्धत्रि० — १.१४ उ०
[19] ०स्त्वं शुभः — अ
[20] साधकत्वेन — अ, आ
[21] ०भट्टारकाधिष्ठातृ० — अ
[22] स्वन्तैरेवाधि० — अ
[23] तदर्थमत्र पञ्चधारणा० — अ, आ
[24] निवर्त — अ
[25] हुंफडन्ततत्पटलं — अ; हुंफडन्तपटलं — आ
[26] विशेषतः — इ, मु
[27] पञ्चोद्धातश्च — आ
[28] यन्नादपूजा . . . पूरणम् — अ; यन्नाद प्रत्या० — आ

"प्राणेनोच्चार्यमाणेन [1]अपानः पीडचते यदा ।
[2]गत्वा चोर्ध्वं निवर्तेत एतदुद्घातलक्षणम् ॥" इति ।

एतांस्तावत् **पञ्च** कुर्यात् । प्रत्युद्घातं प्राणायामास्त्रयोऽर्थसिद्धा अपि तत्रोक्ताः[3] —

"एवं पञ्चदश प्रोक्ताः [4]प्राणायामास्तु भूगताः ।
[5]वारुणस्य दश द्वे"

इत्यत्रोदितेन पञ्चकेन । **हुंफडन्तेन** इत्युपलक्षणं [6]पाशुपतास्त्रेण । एते सर्वे [7]एव पार्थिवधारणाविषयाः । [8]पद्मादय [9]ऊर्ध्वत्वमागताश्चिन्तनीयाः, ततश्च [10]नाडीग्रन्थिपुटकं तेनैव [11]**भित्त्वा ऊर्ध्वं** जलभावस्थानं भावनाकर्ता पुर्यष्टकद्वारेण **विशेत्** । यद्वक्ष्यति [12]**विज्ञानप्रकरणे** —

"पुर्यष्टकसमा[13]युक्तो ह्यध ऊर्ध्वं स गच्छति ।" [14]इति ।

एवं [15]तत्रोद्घातकेन भित्त्वा तदूर्ध्वं [16]द्वादशान्तमिति सकारणभूतत्याग एवात्र कर्तव्यत्वेन [17]श्रुतः । न [18]तदुत्क्रान्त्यादाविव तद्विच्छेदः । यद्वक्ष्यति तत्प्रकरणे[19] —

"आयामान्ते यदा छिन्नं तदा [20]चोत्क्रमते ध्रुवम् ।"

इति परमाग्निक्षोभतत्क्लेशदाहो[21]त्पूयनच्छेदाख्यान[मन्त्रा]युक्तमेव । प्रत्यक्षनिराकृतं च रोममात्रस्यापि विच्छेदादर्शनात् । सामान्यश्रुतिविशेषश्रुतिनिषिद्धं च । यदुक्तं श्रीमत्**स्वायंभुवादौ**[22] —

"अथात्मनो [23]वधं मन्त्री न कुर्यात्फलवाञ्छया ।
न च दुःखसमुत्पत्तौ कामतो [24]देहमुत्सृजेत् ॥" [इति] ।

श्रुतावपि[25] —

"असुर्या नाम [26]ये लोका [27]अन्धेन तमसावृताः ।
तांस्ते [28]प्रेत्याभिगच्छन्ति [29]ये वै आत्महनो [30]जनाः ॥" इति ।

अत एव यो ह्यत्र "एभिः पञ्चदशभिरुद्घातैः पञ्चदशपुरुषकला एव शोध्याः । [31]षोडशत्वमत्र

---

[1] 'अपानः' इति नास्ति — अ
[2] गत्वाध्ववन्निवर्तेत — अ
[3] तत्रोक्तः — अ
[4] प्राणायमस्तु भ्रूगताः — अ
[5] पूरणस्य देशे त्वे त्वन्येरदितेन — अ; वरुणस्य दशे द्वे त्यन्त्रोदितेन — आ
[6] पाशुपतानैते — अ
[7] एव धार पार्थिव० — आ
[8] पादादय — अ
[9] ऊर्ध्वमागता० — आ
[10] नासीग्रन्थपुटकं — अ
[11] हि त्वद्धवञ्चजलभा . . . स्थानं — अ; हित्वाध्वञ्जलभावस्थानं — आ
[12] सार्धत्रि० १७.४ पू०
[13] ०योगादयश्चोर्ध्वं–अ; ०योगादधश्चोर्ध्वं– आ
[14] इतिशब्दो नास्ति — आ
[15] तन्त्रोद्घातैकेन हित्वा — अ
[16] द्वयं शान्त० — अ
[17] श्रुतेः — आ
[18] तत्क्रान्त्या० — अ
[19] सार्धत्रि० ८.३१. पू०
[20] चोत्क . . ते — अ
[21] ०त्पूधनच्छेदख्यान — अ
[22] स्वायंभुवे – ३१.१. (टि. ३९)
[23] वयवं मन्त्री — अ
[24] गेहमु० — अ
[25] ईशावास्योपनिषदि — ३. (वाजसनेयिसंहिता ४०.३)
[26] ते — मु; ईशावास्योपनिषत्पाठः ।
[27] अण्डेन तमसा व्रताः — अ, आ
[28] प्रत्योऽभि० — आ
[29] ये के चात्महनो—मु; ईशावास्योपनिषत्पाठः ।
[30] जानाः — अ, आ
[31] षोडशित्वमत्यः ख्याताः — अ; षोडशित्वमत्यख्या तत्कला — आ

ख्यातं तत्कलामध्यनाडीप्रवेशेन"[१] इति व्याचष्टे तस्याप्युपक्रमविरोधः, पृथिव्यादिभूत[२]शुद्धेरत्रोपक्रान्तत्वात्। तासां च पुरुषव्यतिरेके कल्पितभेद[३]त्वात्तच्छुद्धयैव शुद्धेः पृथक्शुद्धेरसंभवात्। यदुक्तम्[४]—

[५]"करणस्थेन भेदेन स्वचित्या च चतुर्दश।
वाक्छक्ति[६]भेदौ द्वौ चेति पुंकलाः [७]षोडश स्मृताः॥" इति॥

अत्र च—

द्वादशान्ते[८] निरालम्बं विज्ञानं केवलं स्थितम्॥४॥

कारणत्यागक्रमेण भूतपञ्चकत्यागात् [९]तद्विषयात्मभावनाज्ञान[१०]निवृत्तौ भूतानां [११]बन्धतः शुद्धेः, तद्भोगात्मनः संवेदनस्याप्युपशमाद् [१२]द्वादशान्तोपारूढचित्तवृत्त्यात्मकं विज्ञानं वै ग्राह्य[१३]भूतैः शून्यत्वादनालम्बनं स्वचिन्मात्रनिष्ठमेवात्मस्वरूपं भवति। न तु [१४]मूर्च्छाद्यवस्थास्विव [१५]निरुद्धमेवेत्यर्थः॥४॥

[१६]दीक्षायां तु [१७]यथा वत्स तत्प्रयोगं समाचरेत्।

एतच्चातिदेशसूत्रं [१८]पूर्वं व्याख्यातार्थ[१९]मित्युक्ता भूतशुद्धिः॥

अथान्तःकरणन्यासस्तच्छुद्धि[२०]पूर्वकः—

प्रक्रियान्तस्थममृतं [२१]स्रवन्तं चिन्तयेत्ततः॥५॥

ततः अनन्तरं तेन ज्ञानेन शरीर[२२]प्रकरणस्थाद्यदवस्थितं पुर्यष्टकमिति संबन्धः, तद् **अमृतं**

---

[१] ०नाडि प्रवेशप्रवेशेन — अ
[२] शुद्धेरत्रोक्तत्वात् — अ
[३] ०त्वात्तु शुद्धयैव — अ
[४] आकरो न लभ्यते।
[५] करणस्ने . . . भेदो स्वचिन्त्य चतु० — अ
[६] वेदौ द्वौ — अ, आ
[७] षोडशि — अ
[८] 'द्वादशान्ते' इत्यनन्तरं 'सशून्यम्' इत्यधिकम् — अ; आ
[९] तद्विशेषधात्म० — अ
[१०] ०निवृत्तिभूतानां — अ
[११] बन्धतच्छुद्धेः — अ,
[१२] 'द्वादशान्त' इत्यारभ्य 'निरुद्धमेव' इत्यन्ता वृत्तिः क्रियाक्रमद्योतिकाव्याख्यायां (७४ तमे पृष्ठे) प्रभायामुद्धृता। यथा— "द्वादशान्ते ग्राह्यभूतैः शून्यत्वादनालम्बनं स्वचिन्मात्रनिष्ठमेवात्मस्वरूपं भवति। न तु मूर्छाद्यवस्थास्विव निरुद्धमेव" इति श्रीमता सार्धत्रिशतिवृत्तिकृता 'द्वादशान्ते निरालम्बं विज्ञानं केवलं स्थितम्' इत्येतत्सूत्रवृत्तौ समुपदिष्टम्।"; द्वादशान्तोर्ध्वारूढ — आ
[१३] ०भूत्यैश्शून्य० — आ
[१४] मूर्छाद्यवस्थात्ववन्निरुद्ध० — अ
[१५] निरूढमेवे० — आ
[१६] इदमर्धं नास्ति — इ, ई, मु
[१७] यथावत्ततत्प्रयोगं प्रसमा० —अ
[१८] पूर्वव्याख्यानार्थ० — अ, आ; सार्धत्रि० २. २ पू० वृत्तौ।
[१९] ०मित्युक्त्वा — अ
[२०] ०पूर्वकप्रक्रियान्तस्तममृतं स्रुवन्तं — अ
[२१] स्रुवन्तं — इ
[२२] ०प्रकरणस्य द्वयादव० — अ; प्रकरणस्याद्वायदव० — आ

स्रवन्तं चिन्तयेत्। तत्र [2]परामृतयोगात् [3]तत्संयोगोऽस्य [4]यत इत्यर्थः। [5]तदुक्तं **त्रयोदशशतिके** —

"नादान्ते त्वमृतं ज्ञेयं [6]यत्सङ्गादमृतीभवेत्॥" इति।

श्रुतावपि[7] —

[8]"अन्तःकलायां सहसोपसृत्य [9]बहिःकलायाममृतं चरित्वा।
[10]अनारम्भः संविशन्तीव हंसो जीवातवे जीवलोकस्य [11]जीवः॥" इति ॥५॥

ओमित्यनेन कमलं योगपीठं [12]तदा भवेत्।

तदा तदानीं च तस्मिन् [13]शरीरशुद्धया[14] विशुद्धे सति **ओमित्यनेन** अकारादिमात्रात्रययुक्तेन तावद्यत्तत् **कमलं** [15]हृत्पुण्डरीकं [16]विद्यात्। **योगः** सदाशिवो देवः, तस्य **पीठं** तत्कमलाधिष्ठितं **भवेद्** इति अन्तर्भावितणिजर्थत्वाद् भावयेदित्यर्थः॥

अथ कथमोमित्यनेन भावितं तद्योग[17]कमलाधिष्ठितं भावितं भवतीति। तत्रोच्यते —

सूर्यमण्डलसंकाश[18]मकारं [19]ह्यात्मसंभवम्॥६॥
विद्यातत्त्व[20]मुकारं तु शिवतत्त्वं मकारजम्।

यतस्तत्कमलात्मको[21] यस्तावदकारोऽत्र शुद्ध[22]प्रकाशोऽत्र [अशुद्धप्रका]शकत्वात् सूर्यप्रकाशादपि सातिशय उक्तः, स **आत्मसंभवः** आत्मतत्त्वाधिष्ठितः। तथैव भावयेदित्यर्थः। एवम् **उकारं तु** विद्यातत्त्वाधिष्ठितत्वादिति [तथैव] भावयेत्। [23]**शिवतत्त्वं** तु **मकारा**धिष्ठातृत्वेन [24]जातं प्रवृत्तमिति तथैव भावयेत्। एतानि चात्म [विद्याशिव] तत्त्वान्यत्र योगपदसंनिधानात् सद्योजातादी[25]न्येव

---

[1] स्रावन्तं — अ
[2] परमामृत० — आ
[3] तत्संयोगस्य — अ, आ
[4] यतवत्यर्थः — अ
[5] यदुक्तं — आ
[6] यस्तु सङ्गा० — आ
[7] आकरो न लभ्यते।
[8] अनन्तः कलायोगात्सहसो० — अ; अन्तःकला यावत्सहसो० — आ
[9] बहिस्तत्कलाया० — अ
[10] अरारम्भ संविशन्ति हंसो — अ; अनारम्भसं० — आ
[11] जीवात इति — अ
[12] तथा — ई
[13] चिरशुद्धये विशुद्धये इत्यामत्यानेनाकारमात्रत्रय० — अ
[14] शरीरशुद्धये — आ
[15] 'हृत्पुण्डरीकम्' इत्यारभ्य 'भावितं' इत्यन्तं नास्ति — आ
[16] विद्योगसदा — अ
[17] ०कलाधिष्ठितं — अ
[18] ०माकारं — अ
[19] स्यात्मसं — आ
[20] ०मकारं तु — अ
[21] ०कलात्मको — अ, आ
[22] ०प्रकारोऽत्र — अ, आ
[23] एतत् शिवं तु — अ
[24] जातः — अ
[25] ०न्येव त्रीण्यर्थत्वाच्च — अ; ०न्येव त्रीण्यर्थाच्च — आ

त्रीणि । अर्थाच्च नाल[1]पत्रकर्णिकालक्षणं, [2]तत्कमलावयवाधिष्ठातृत्वेनाभि[3]ध्येयानि । यदुक्तं **श्रीमत्त्रयोदशशतिके** —

[4]"सद्यं कलाष्टसंयुक्तमकारा[5]क्षरसंभवम् ।
आत्मतत्त्वं विजानीयाच्चतुर्विंशतिसंभवम् ॥
कन्दनालोद्भवं तेन [6]अकारः परिकीर्तितः ।
वाममुकारजं [7]विद्यात्त्रयोदशकलान्वितम् ।
विद्यातत्त्वं विनिर्दिष्टं शिवस्याधारसंस्थितम् ॥
पत्रकेसरमध्यं तु कर्णिकायां व्यवस्थितम् ।
शिवतत्त्वं मकारं तु बहु[8]रूपं प्रतिष्ठितम् ॥"इति ॥

कथं तर्हि **ज्ञानामृतप्रकरणे**[9] —

"ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरः शिव एव च ।
पञ्चधा पञ्च[10]दैवत्यः सकलः परिपठ्यते ॥"

इत्यनेन ब्रह्मादय एवात्राधिष्ठातृत्वेन वक्ष्यन्ते । उक्तं च **मन्त्रवार्तिके**[11] —

[12]"कमलजकेशवरुद्रा महेश्व[13]रोऽन्यः परः [14]शिवः सकलः ।
एते कारण[15]संज्ञाः स्वाध्वव्यापिनः स्वमात्रस्थाः ॥" इति ।

न ओंकारात्मकलाधिष्ठातृत्वेन । अपि तु [16]जाग्रदादिपदाधिष्ठातृतया । यदनन्तरं तत्रैव वक्ष्यति[17] —

"ब्रह्मणो [18]हृदयं स्थानं कण्ठे विष्णुः समाश्रितः ।"

इत्यादिदर्शनं भूतशुद्धौ । **श्रीमत्पौष्करे**ऽप्युक्तम्[19] —

"जाग्रत्पादगता ब्राह्म्यो वैष्णव्यः स्वप्नपादगाः ।
[20]रौद्र्यः सुषुप्तपादस्थाः" इति, तन्न [21]विरोध इति ॥

एवं **सृष्टिप्रकरणे** "पञ्चैवोंकारमात्रा वक्ष्यन्ते" इत्युक्तं **वार्तिके**[22] —

[23]"अवर्णोवर्णमकारा बिन्दुर्नादश्च तस्य तन्मात्राः ।" इति ।

---

[1] ०पत्रं कर्णिका० — अ, आ
[2] तत्कमलपत्राधि० — अ
[3] ०धेयानि — अ
[4] सद्यः — अ
[5] ०क्षरभावात्मतत्त्वं विजानीया० — अ
[6] आकारः — अ, आ
[7] विद्यान्त्रयोदश० — अ
[8] ०रूपप्रतिष्ठितम् — आ
[9] सार्धत्रि० — २३.९ उ०, १० पू०
[10] ०दैवत्यं सकल — अ
[11] ग्रन्थोऽयं न लभ्यते ।
[12] कमलकेशवरुद्र — अ
[13] ०रोऽन्योऽपरः — अ, आ
[14] शिवसकलः — आ
[15] ०संज्ञा स्वाध्वव्यापिनस्वमात्र० — आ
[16] जाग्राधिपदाधिष्ठात्मतया — अ
[17] सार्धत्रि० — २३.१० उ
[18] हृदयस्थानं — अ
[19] मुद्रिते पौष्करे नोपलभ्यते । तत्र विद्यापादमात्रं मुद्रितम् । क्रियायोगचर्यापादा न मुद्रिताः, नापि मातृका अद्यावध्युपलब्धाः । अत्र ग्रन्थे पौष्करादुद्धृताः श्लोकाः प्रायोऽमुद्रितभागे स्युः । एवमेवोत्तरत्रापि ।
[20] रौध्याः सुषुप्त० — अ
[21] विरोधयति — अ; विरोधयेद — आ
[22] ग्रन्थोऽयं न लभ्यते ।
[23] आर्णो वर्णमाकारा — अ, आ

तत्कथमत्रेति प्रोक्त इति। तत्रोच्यते —

पुर्यष्टकं च तन्मात्रं [1]तुर्यातीतं सदाशिवम् ॥७॥

[2]यासौ मात्रा बिन्द्वात्मिका तत्पुरुषाख्याधिष्ठातृत्वेन चतुर्थी। सा च योग[3]पीठात्मिका मात्रा। यस्य च **तन्मात्रं पुर्यष्टकं** च योगपीठं भावयेत्। तेनाकारेण कर्णिकायामवतीर्णं प्रकृतत्वादनेन भावयेदित्यर्थः। यदुक्तं श्रीमत्**त्रयोदशशतिके** —

[4]"पुर्यष्टकं समाख्यातं कर्णिकान्ते प्रतिष्ठितम्।
सुषिरं तत्र चाख्यातं यत्र बिन्दुर्व्यवस्थितः॥
चतुष्कलं तु जानीयात्पुरुषं लोकपावनम्।" इति।

तस्मिश्च पीठे [5]**तुर्यातीत**स्तु यः, तस्य प्रणवस्य वक्ष्यमाणः शिखारूपो मात्राविशेषः पञ्चमः, तं च [6]मध्यमनाड्यात्मना [7]अधिदेवतेशानपञ्चमकलाभेदसदाशिवाधिष्ठितत्वात् **सदाशिवम्** इति भावयेत्। यद्वक्ष्यति **सृष्टिप्रकरणे**[8] —

"या कला रेखिनी तत्र पतिता बिन्दुना सह।
सविद्येशः शिवः प्रोक्तो देवदेवः सदाशिवः॥" इति।

मन्त्रलिङ्गमप्यस्ति — [9]"शिवो मेऽस्तु [10]सदाशिवः" इति।

ततश्च "[11]यदत्रात्मतत्त्वमकाराभिधेयो [ब्रह्मा]; विष्णुर्विद्यातत्त्वं तु [12]'विद्यादर्शितगोचरः' इति श्रुतेरशुद्धविद्या; शिवतत्त्वं तु शिव एवेति। तथात्म[13]तत्त्वान्नयनं हृदयबीज[14]स्थाने नेत्रबीजं, पृथिव्यादितन्मात्राभिध्यानं नेत्रमन्त्रे चेत्यादि [15]व्याख्यानं केषांचित्। [16]अन्येषां तु "अन्तःकरणप्रक्रमादत्र आत्मतत्त्वादीनि सूर्यसोमाग्निप्रकाशमनोऽहंकारबुद्धय एवेति। तन्मात्रशब्दश्च सर्वतत्त्वोपलक्षणार्थं" इत्यादि[17]व्याख्यानम्, तदत्यन्तासं[18]बद्धत्वात् परिहार्यमेव। यदाहुः[19] —

[20]"कुमार्गं [21]न हि तित्यक्षुः पुनस्त[22]मनुधावति।" इति॥७॥

[23]अथ धारणा —

चिन्तयेत्परमं धाम सुषुम्नाभिन्नमस्तकम्।

---

[1] पुर्यातीतं — ई
[2] वासोमात्राद्विन्द्वा० — अ; वासोमात्रा बिन्द्वा० — आ
[3] ०पीठात्मिकमात्रा — अ
[4] पुर्यष्टकसमा० — अ
[5] तुर्यातितस्तु — अ
[6] मध्यमा — अ, आ
[7] नाधिदेवते — अ; नासिदेवते — आ
[8] सार्धत्रि० १३.१०
[9] तैत्तिरीयारण्यके १०.३९
[10] सदाशिवोम् — तै० आरण्यकपाठः।
[11] यदत्रात्मकतत्त्व० — अ, आ
[12] 'विद्यादर्शित' इत्यारभ्य 'शिवतत्त्वं तु' इत्यन्तं नास्ति — अ
[13] ०तत्त्वानयन्नहृदय० — अ; तत्त्वानयनहृदय० — आ
[14] स्थानेत्र बीजं — अ; स्थनेत्र बीजं — आ
[15] 'व्याख्यानं' इत्यारभ्य 'लक्षणार्थं इत्यादि' इत्यन्तं नास्ति — अ
[16] अनेषां० — आ
[17] व्याख्यातं — अ, आ
[18] बन्धात्परि० — अ; बन्धत्वात्परि० — आ
[19] आकरो न लभ्यते।
[20] अमार्गं — आ
[21] निहतीत्यक्षं पुन०—अ; निहतित्यक्ष पुन०—आ
[22] ०मतिधावति — अ
[23] अधारणां — अ

[1]**सुषुम्नया** मध्यनाड्या यद्भिन्नं ब्रह्मरन्ध्रगतिमार्गेण [2]**मस्तकम्** एतद्बाह्यशरीरावयवे, तमवधिं कृत्वा, तत् **परमं** सदाशिवरूपं **धाम** परमामृतं **चिन्तयेत्**। तदानीं तदुपर्यमृतरूपं सोममण्डलं तद्भिन्नयेदित्यर्थः। धामशब्देनामृतस्याभिधानात्[3]। यदुक्तम्[4] —

"धाम तेजस्तथानन्त[स्त]देवामृतमुच्यते।" इति॥

ततश्च —

तेनाप्लावितमात्मानं [5]परिपूर्णं विचिन्तयेत् ॥८॥

अत्र **आत्मानम्** अ[धिभूता]ध्यात्माभिधानाद्द्विविध[6]मप्येतच्छरीरं **तेन** [7]अमृतेन तदूर्ध्ववाहिना **आप्लावितं** क्लिन्नं **परिपूर्णं** च [8]विशुद्धं कर्मसाधन[9]समर्थं चिन्तयेत्॥८॥

अथ [10]"अल्पायुषस्त्विमे मर्त्याः" इत्येतस्य प्रश्नहेतोर्निराकरणायात्रैव प्रसङ्गात्काम्यप्रयोगः —

योऽभ्यसेदीदृशं मर्त्यः समाधिं मृत्युनाशनम् ।
न तस्य जायते मृत्युरिति शास्त्रस्य निश्चयः ॥९॥

ध्यानस्यैव [11]प्रकर्षावस्था या [सा] **समाधिः**। [12]"प्रत्ययैकतानता [13]ध्यानम्", [14]"तदेव स्वरूप-[15]शून्यमिव समाधिः" इति॥९॥

अथ प्रकृतमुच्यते —

[16]पश्चाद्गुरोः साधकानां मूर्तेस्तु ग्रहणं भवेत् ।

एवमन्तःकरणशुद्धेरपि **पश्चात्** परापर[17]श्रेयःसाधकानां यो **गुरुः** [18]इत्थं ज्ञानक्रियाव्यञ्जकः [तस्य] पुर्यष्टकाख्यातस्य पूर्वं बिन्दुतयाभिध्यातस्य या **मूर्तिः** शिरोवक्त्राद्याकारं [19]शरीरं, तस्या **ग्रहणं** भावनाद्वारेण स्वीकारो भवेत्। ओमित्यनेन कुर्यादित्यर्थः। यदुक्तमस्मद्गुरुभिः अत्र **पद्धतौ**[20] —

---

[1] सुषुम्नामध्य० — अ
[2] समस्तम् — अ, आ
[3] ०धानम् — अ
[4] आकरो न लभ्यते।
[5] पूर्यमाणं — अ, आ, इ, ई, मु; 'परिपूर्णम्' इति व्याख्यातृसंमतः पाठः।
[6] ०मप्येव तच्छरीरं — अ
[7] अमृतो न तदूर्ध्ववह्निना — अ
[8] विशुद्धकर्म० — आ
[9] सामर्थ्यं — अ
[10] सार्धत्रि० १.२ पू०
[11] प्रकर्णावस्थायाः समाधिप्रत्य० — अ
[12] योगसू० ३.२
[13] तद्ध्यानम् — अ; दध्यानम् — आ
[14] योगसू० ३.३
[15] ०शून्यत्वमिव — अ
[16] इदमर्धं न दृश्यते — इ, ई, मु
[17] श्रेयसाधिकानां — अ; श्रेयः साधिकानां — आ
[18] इत्यर्थ ज्ञान० — आ
[19] अशरीरं तस्य ग्रहणं — अ
[20] ग्रन्थोऽयं नोपलभ्यते।

"ध्यात्वादौ प्रणवेनाथ [1]मूर्तिं मूर्धादिभेदतः।
तामेव सकलीकुर्यात्" इति ॥

तस्यां च —

ईशानाद्यास्तु [2]सद्यान्तं [3]मूर्ध्न आरभ्य विन्यसेत् ॥१०॥

एवं स्थूलसूक्ष्मव्यतिरेकेण लब्धात्मप्रतिपत्तिरसाविति [4]तस्यां [5]स्वरूपायामपि मूर्तौ वक्ष्यमाण-क्रमेण [6]मूर्धादिस्थानेषु **ईशानाद्यास्तु** ये [7]मन्त्राः प्रोक्ताः, तान् **विन्यसेत्**। कथमिति विशेषोऽत्र [8]भस्मस्नानवदनुसंधेयः। यद्वक्ष्यति[9] —

"ईशानेन शिरः स्नायान्मुखं[10] तत्पुरुषेण तु।
हृदयं [11]बहुरूपेण गुह्यं वै गुह्यकेन तु॥
सर्वाङ्गानि [12]त्वजातेन" इति ॥१०॥

नेत्रं दत्त्वा [13]तदावाह्यो देवदेवः सदाशिवः।

तस्मिञ्शरीरद्वये **नेत्रम्** इति [14]समाख्यानान्नेत्रयोरेव विन्यस्य [15]परमेश्वरं स्वमन्त्रेणै[16]वावाहयेत् विशेषाधिष्ठायकत्वेन स्मरेत्॥

सर्वज्ञं च तदात्मानं चिन्तयेत्तु विचक्षणः ॥११॥

तदानीं च परमेश्वरावाहनकाले सर्वं तत्त्वभावभूत[17]भुवनादिकं साधिपं यत्तस्याधिष्ठेयं,[18] यच्चास्य करणं शक्तिः, यच्च कर्तव्यं भुक्तिमुक्तिवच्चात्मस्वरूपं, तत्सर्वं **चिन्तयेद्** इत्यर्थः। अन्यथा [19]तदा-वाहनानुपपत्तेर्यस्य कस्यचि[20]दावाहनं स्यादि[21]त्युक्तम् **अनुभवस्तोत्रे**[22] —

---

[1] मुर्तिमूर्त्यादि — अ
[2] सद्यान्ता — इ, ई
[3] मूर्ध्न्यारभ्य — अ; मूर्ध्नि आरभ्य — मु
[4] तस्या स्वररूपायामपि — अ
[5] चिरूपायामपि — आ
[6] मूर्ध्न्यादि० — अ
[7] मन्त्रान् तान् — आ
[8] भस्मना तदनु — अ
[9] सार्धत्रि० ४.३, ४ पू०
[10] मुखे — अ, आ
[11] बहिरूपेण — अ
[12] तु जातेन — अ
[13] तदा वास्यो — आ; तदा वाह्यो — इ, ई
[14] समाख्यानान्ते त्रयो० — अ
[15] परमेश्वरेण स्व० — अ
[16] ०वाह्लादयेत् — अ
[17] भुवनाधिकं — अ
[18] यस्याधिष्ठितं — अ
[19] तदावाहनं . . . क्तः यस्य — अ
[20] दावाहः स्या० — अ
[21] ०त्युक्त अनुभवस्ते तेजोऽनलमूल० — अ; ०त्युक्त अनुभवस्तेत्रे जान कुल० — आ
[22] ग्रन्थोऽयं न लभ्यते ।

"ज्ञानमूलमधिभोक्तृचेतना ज्ञानमेतदधिनायकप्रदम्[1]।
[2]शक्तयस्तदधिभोक्तृसंहतिस्तत्स्मृतौ युगपदेव [3]भासते ॥ इति ॥११॥

[4]अङ्गन्यासः —

हृदयं च शिरश्चैव [5]शिखां कवचमेव च।
न्यसेदस्त्रं च मन्त्रज्ञो यथास्थानेष्वनुक्रमात् ॥१२॥

[6]समाख्यया स्थानविशेषेषु विनियोगेन न [7]पाठक्रमेणैषामित्यर्थः ॥१२॥

तदेवं [8]शरीरे आवाहनं कृत्वा —

हृदयेऽर्चाविधानं तु नाभौ होमं प्रकल्पयेत् ।
ललाटे [9]त्वीश्वरं [10]ध्यायेद्वरदं सर्वतोमुखम् ॥१३॥

अत्र प्रकृतत्वात्पुर्यष्टक**हृदये** एवाध्वरस्य, **नाभौ** होमस्य [11]प्रकरणे [12]वक्ष्यमाणमेव कुर्यात् ॥ **ललाटे त्वीश्वरं** [13]प्रागुक्तवद् **वरदम्** अभिप्रेतार्थप्रदं सर्वदा च सर्वार्थकरण[14]समर्थं ध्यायेद् इति ॥१३॥

[15]अतिदेशः —

[16]यथार्चने [17]तथाग्नौ च [18]ध्याने [19]स्नाने तथैव च।
[20]यथा देवे तथा देहे चिन्तयेत्तु विचक्षणः ॥१४॥

विकृतावा[वाहनविव]क्षाबलादेवास्य प्रकृतितः [21]सकलतदङ्गव्रातस्य प्राप्तत्वादनुवादक [22]एव तदिति ॥१४॥

---

[1] ०नायकपूजकः — अ; नायकप्रजः — आ
[2] शक्तवत्तदधिभोक्ता संहरति तत्स्मृतौ — अ
[3] हासते — अ, आ
[4] ततः शिवाङ्गन्यासः — आ
[5] शिखा कवच० — इ, ई
[6] समाख्याय स्थान० — अ; समाख्याया स्थान० — आ
[7] पाठकक्रमे० — अ
[8] शरीरोत्पादनं कृत्वा — आ
[9] चैश्वरं — अ; चेश्वरं — आ, इ, ई, मु
[10] ध्यायेद्विशदं — इ; ध्यायेद्विरतं — ई
[11] 'प्रकरणे' इति नास्ति — अ
[12] पञ्चमषष्ठप्रकरणयोः।; वक्ष्यमाण एव — अ, आ
[13] प्रागुक्तवत्स्वरमभिप्रेतार्थ० — अ; सार्धत्रि० २.२ उ०, ३ पू० वृत्तौ।
[14] ०सामर्थ्यं ध्याये० — अ
[15] अतिदेशं — अ, आ
[16] यथाभ्यर्चने — अ, आ
[17] तथाप्युक्तौ — अ; तथाभ्यक्तौ — आ
[18] ध्यानस्थाने — मु
[19] 'स्नाने' इति नास्ति—अ, आ; स्थाने—इ, ई
[20] यथा दहे तथा देवं — इ; यथा दहेत्तथा देवं — ई; यथा देहे तदा देवं — मु
[21] सकलं तदा रङ्गपातस्य — अ; सकलं निष्कलं तदेत्यङ्गव्रातस्य — आ
[22] एवेति तदिति — अ

अथास्मिन् बाह्येऽपि शरीरे न्यासः, तथा [1]बहिर्यागस्य च क्रमविधिः —

कृत्वान्तःकरणं ह्येवं पश्चा[2]द्बाह्यं तु [3]षण्मुख।
सबाह्याभ्यन्तरं कृत्वा पश्चाद्यजनमारभेत् ॥१५॥

इति [भट्टनारायणकण्ठात्मज] भट्टरामकण्ठविरचितायां श्री [मत्सार्धत्रिशति]-
कालोत्तरवृत्तौ अन्तःकरणविन्यासप्रकरणं द्वितीयं [समाप्तम्]

इति द्वितीयः पटलः

---

[1] तथा हि यागस्य च क्रमधि . . . धीः — अ
[2] ०द्बाह्यस्य षण्मुख — अ
[3] षण्मुखम् — आ; विन्यसेत् — इ, मु

तृतीयः पटलः

वारुणस्नानप्रकरणम्

अतः परं प्रवक्ष्यामि [1]स्नानं पापहरं शुभम् ।

अतः संध्यार्थत्वेनानुष्ठितात् करन्यासादेरन्तर्यासिपर्यन्तात् कर्मसमूहात्; अतश्च ब्राह्मणादिभेदेन सामान्यविशेषशास्त्रसिद्धाच्छौचादेः **परं** यत् [2]**स्नानं**, तत् **प्रवक्ष्यामि**। तच्च [3]**पापम्** अशुद्धिं चण्डालादिस्पर्श[4]जातं **हरति** इति [5]तद्रूपनैमित्तिकमित्यर्थः। [6]**शुभं** च शुभहेतुत्वान्नैमित्तिककाम्यकर्मार्थमित्यर्थः। यदुक्तं श्रीमत्**पौष्करे**[7] —

"नदीषु देवखातेषु[8] पल्वलप्लवनेषु च।
दीक्षितस्योत्तमं [9]स्नानं पुष्करिण्यां तु मध्यमम्।
कूपेऽधमं स्नानमाहुर्गृहे श्रेष्ठं प्रकल्पितम्॥
नवाष्टपञ्चभिः कुम्भैः शिवमन्त्रप्रकल्पितैः।
स्नानं गृहेऽपि कर्तव्यं लिप्तायां भुवि दीक्षितैः॥" इति॥

अथ तदुपक्रमः —

[10]सकृज्जप्तेन संगृह्य [11]मृदा अस्त्रेण मन्त्रवित् ॥१॥
मलस्नानं पुरा कृत्वा"

अस्त्रमन्त्रस्यास्य [12]मन्त्रोद्धार एव विहितत्वाद्[13] [14]द्वितये को वात्र मन्त्रो विनियुक्तः। ततश्च पाशुपतस्योत्पत्तेः समनन्तरमेव विघ्ननिवृत्तौ [15]पाशच्छेदने च विनियुक्तत्वात्, अत्र शिवास्त्रस्यैव विनियोगसिद्धिः। न च विघ्ननिवृत्त्यर्थमे[16]वात्र तदस्त्रं भविष्यतीति वाच्यम्[17]। स्नानस्य शुद्धयर्थत्वाच्छुद्धयर्थं चैतद्यतः। ततश्च **सकृदु**च्चारितशिवास्त्र[स][18]मन्वितया **मृदा** मलस्नानं कुर्यादित्यर्थः। [19]कथमित्याकाङ्क्षायां संहितान्तराद्वा, सामान्यशास्त्रतोऽपि विशेषः कटिपादकरादि-

---

[1] ज्ञानं — इ
[2] स्थानं — अ
[3] पाचनमशुद्धि — अ
[4] ०जातमक्तीति — अ; ०जातमत्तीति—आ
[5] तद्रूपं नैमित्तिक० — आ
[6] शुभश्च — अ
[7] पौष्करागमस्य विद्यापादमात्रमुपलभ्यते। इमे श्लोकाः क्रियापादान्तर्गता इति भाति।
[8] ०घातेषु — अ, आ
[9] स्थानं — अ
[10] सकृज्जपेन — इ
[11] मृदा वस्त्रेण — अ, आ; मृदमस्त्रेण—इ, ई, मु
[12] मन्त्रोद्धारण एव—अ; प्रथमप्रकरणे १० उ०, १२, १३ श्लोकैः
[13] विदितत्वाद् — अ, आ
[14] द्वितीयो गवि अत्र मन्त्रो — अ, आ
[15] पाशच्छेदेन च — अ; सार्धत्रि० १.१३
[16] ०वास्त्र तदस्त्रं — अ
[17] वाच्यः — आ
[18] ०मान्वितया — आ
[19] अथ इत्याका० — आ

शौच[ादि]कोऽनुष्ठेय इति दर्शयितुमत्र तदनुपा[1]दानम्, नाविस्मृतत्वात् सर्वज्ञस्य तदसंभवादित्येव-मन्यत्रापि द्रष्टव्यम्। [2]एवं [3]मलस्नानं कृत्वा, तस्य च स्नानत्वादेव पश्चाद्यत्कर्तव्य[4]माचमनं तथा शास्त्रप्रसिद्धम्। यद्वक्ष्यति[5] — "उपस्पृश्य विधानेन" इति तदपि कृत्वा;

"सकृज्जप्त्वा तु संहिताम् ।
[6]तामेव मृत्तिकां पश्चादभिमन्त्र्य सकृत्सकृत्" ॥२॥
भागत्रयं ततः कृत्वा [7]एकमस्त्रेण [8]मन्त्रयेत् ।
द्वितीयं ब्रह्मभिर्वत्स शिव[9]जप्तं तृतीयकम् ॥३॥

तामेव अस्त्रजप्तां **मृत्तिकां** मन्त्रसंहितोच्चारणेनाभिमन्त्रयेत्। "संहिताप्रयोगश्चात्र क्रमेण" इत्येके। "देहन्यासविनियोग[10]क्रमेण" इत्यपरे। "उद्धारक्रमेण" इत्यस्मद्गुरवः। [11]यद्येवं चैत-त्तत एव मन्त्रस्वरूपावगतिः[12]। अत एवात्र पाशुपतस्यापि [13]प्राप्तौ निषेधो [14]भविष्यति। **अभि-मन्त्र्य** च, **ततः** अभि[15]मन्त्रिताया मृदो **भागत्रयं कृत्वा अस्त्रेणैकम्** अभि**मन्त्रयेत्**। **सकृत् सकृद्** इति सकृदेवेत्यर्थः। यदाहुः [16]सन्तः — "सिद्धे सत्यारम्भो नियमार्थः" इति। **शिवजप्तम्** इत्यत्राप्यपेक्षासामर्थ्येन सकृदेवेत्यभिसंबध्यते ॥२–३॥

ततश्च —

अस्त्रजप्तेन भागेन [17]दिशां बन्धं तु कारयेत् ।
शिवजप्तेन तीर्थं तु ब्रह्मजप्तेन विग्रहम् ॥४॥
[18]कुण्ठयित्वा ततः स्नायाच्छिवतीर्थस्य मध्यतः ।
[19]चक्रवर्त्युपचारेण सुगन्धामलकादिभिः ॥५॥

अत एव च पाशुपतास्त्रेणात्र प्रथमं [20]विघ्नोत्सारणमिति गम्यते। [21]प्रोत्सारितानां तु पुनर-प्रवेशाय दिग्बन्धो यतः। **शिवजप्तेन तीर्थं तु** अत्रापि **कारयेद्** इति संबन्धः। [22]तस्यैव जन्तु-

---

[1] ०दानमपि स्मृत० — अ
[2] एव मलस्नानमकृत्वा — आ
[3] 'मल' इति नास्ति — अ
[4] ०माचमनात्तथा — आ
[5] सार्धत्रि० ३.६ पू०
[6] तमेव — अ
[7] एकमन्त्रेण — अ
[8] मन्त्रवित् — इ
[9] ०जप्तिं — अ
[10] ०करणे अपरे — अ, आ
[11] यदुक्तं चैत० — आ
[12] एवं मन्त्रस्वरूपावगतेः — अ, आ
[13] प्राप्तो — अ
[14] सार्धत्रि० ३.७ उ०, ८
[15] ०मन्त्रिता यत्र ततो भाग० — अ
[16] सत्यसन्धे सत्यारम्भे नियमार्थमिति — अ; सत्यसन्धे सत्यारम्भ इति — आ; महाभाष्ये ६.१.८०; पदमञ्जर्याम् ६.१.८०
[17] दिशाबन्धं — अ
[18] कुण्डयित्वा — अ
[19] चक्रवत्युप० — इ
[20] विघ्नोत्सारणादिति — अ, आ
[21] 'प्रोत्सारितानां' इत्यारभ्य 'कर्तृकत्वात्' इत्यन्तं नास्ति — अ
[22] तस्यैवाजन्त्यप्रायोज्यकर्तृकत्वात् — आ

प्रयुक्तदोषोपशमनकर्तृकत्वात्। **शिवतीर्थस्य** [1]**मध्यतः** एवं स्वशरीरतो बाहु[2]भ्रमणप्रमाणं तत्कार्यमिति मन्तव्यम् । तत्र राजोपचारेण यथासंभवं [3]गीतलास्यवाद्यपरिचारादियुक्तं स्नानं कुर्यात्। गन्धद्रव्याणां पूर्वेणैव सिद्धेः पुनर्वचनमवश्योपभोगार्थम् ।।४–५।।

उपस्पृश्य विधानेन संध्यां वन्देत साधकः।
मन्त्रैः सर्वैः सकृद्वत्स [4]उपस्थानं तु कारयेत् ।।६।।

संहितान्तरे सामान्यशास्त्रे [5]वा यत् तेषां विधानं, तेनेति पूर्वमेवोक्तम्[6]। "जलं प्रोक्ष्य वन्देत" इति वक्तव्ये [7]यः संध्या[8]समाख्ययास्य कर्मणो निर्देशः, [9]सः संध्याकालेऽपि विनियोगदर्शनार्थम्। श्रुत्यादीनामिव समाख्याया अपि विनियोजकत्वात्। यदुक्तमस्मद्**गुरुभिः** अत्र **पद्धतौ**[10] —

"संध्याकालेऽपि संध्यायाः [11]समाख्यानात्प्रयोगतः।
अस्य संध्यार्थता सिद्धा"

इति दर्शितं प्रागेव[12]। **मन्त्रैः सर्वैः** इति सपाशुपतैः। यदुक्तं मन्त्रोद्धारे[13] —

"ब्रह्माणि च [14]शिवं साङ्गं नेत्रं पाशुपतं च यत्।
समासात्कथितः सर्वो [15]मन्त्रोद्धारः" इति।

उपस्थानम् इति [16]शिवरूपकायादित्याय जलाञ्जलिजपैरभिमुखमुपस्थानं सिद्धमेव ।।६।।

अभिषेकं पुरा कृत्वा ततः संध्यां समाचरेत् ।

अत्राभिषेकसमाख्यायाः सर्वैर्मन्त्रैर्युगपदेव कलश[17]मुद्रया शिरःसेचनम्। संध्या तु प्रतिमन्त्रं बिन्दुप्रक्षेपेण [18]सिद्धैवेति। स एव [19]कस्मात् संक्षेपायात्र [20]प्रथमतो नोक्त [इति] चेदेवं पठितमभ्युदयाय भवतीति दर्शयितुम्। [21]"प्राङमुखोऽन्नानि भुञ्जीत" इत्याद्यनुष्ठितमिवेत्यदोषः[22] ।।

---

[1] उद्धृत एव — आ
[2] ०भ्रमणमप्रमाणं — अ
[3] गीतस्य वाद्य० — अ
[4] उपस्नानं — अ
[5] 'वा' इति नास्ति — आ
[6] सार्धत्रि० ३.१ उ०, २ पू० वृत्तौ।
[7] 'यः' इति नास्ति — अ
[8] समाख्या वास्य — अ; समाख्य वास्य — आ
[9] सः सन्धानकालेऽपि — अ; ससन्धानिकालेऽपि — आ
[10] ग्रन्थोऽयं न लभ्यते?
[11] सांख्यानात्प्रयोगतोऽस्य सिद्धा — अ; साख्यानात्प्रयोगतोऽस्य — आ
[12] सार्धत्रि० २.१ उ० वृत्तौ।
[13] सार्धत्रि० १.१४
[14] शिवाः साङ्गो — अ; शिवः साङ्गो — आ
[15] मन्त्रोद्धारो उपस्थानम् इति — अ; मन्त्रोद्धौरस्त्वयमिति उप० — आ
[16] "'शिवरूपायादित्याय जलाञ्जलिजपैरभिमुखमुपस्थानं सिद्धमेव' इत्युक्तं श्रीमत्सार्धत्रिशतिवृत्तिकृता।।" इति दृश्यते क्रियाक्रमद्योतिकाव्याख्यायां प्रभायाम्, पृ० ४९.
[17] ०मुद्रा शिरः सेवनम् — अ
[18] सिद्धेवेति — अ
[19] कस्यात् — अ, आ
[20] प्रथमत उक्तं चेदेवं — अ; प्रथमतोक्तं चेदेवं आ —
[21] वसिष्ठस्मृतिः १२. १५; कूर्मपु० २.१९.१ पू०
[22] मेवेत्यदोषः — अ, आ

अत्र संध्यायामभिषेके च सर्वमन्त्रान्त[1]र्भावान्मृत्तिकाभिमन्त्रणे मन्त्रसंहितान्तर्भावाच्च पाशु[2]पतास्त्रस्यापि प्रयोगः प्राप्त इति [3]तत्प्रतिक्षेपः —

अस्त्रं [4]न योजयेद्देहे क्षिपेत्तद्बहिरेव [5]च ॥७॥
[6]शरीरं [7]शोषयेद्वत्स तेनात्मनि [8]न योजयेत् ।
विघ्नेषु [9]पाशजालेषु सदा योज्यं विचक्षणैः ॥८॥

[10]ननु किं सर्वमेव **अस्त्रं न योजयेद्देहे**। नेत्याह। यद् **विघ्नेषु पाशजालेषु सदा योज्यं विचक्षणैः** इत्युक्तं, तदेव पाशुपतास्त्रमित्यर्थः। यदुक्तं तदुद्धारे[11] —

"एतत्पाशुपतं दिव्यं सर्वपाशनिकृन्तनम्।" इति।

[12]मलस्नानार्थं देहे योजितमेव, भस्मस्नानार्थं च नियोक्ष्यत[13] इति न तस्य निषेधः। तत्र मृदादिद्वारेणेति चेदिहापि जलद्वारेणास्त्र[14]कलश इति को विशेषः। करन्यासे द्वारमपि नास्तीति न कश्चिदेव तत् ॥७–८॥

हृदयेन ततो विद्वान्पितृदेवांश्च तर्पयेत् ।

अत्र देवतर्पणे [15]विध्युक्तोत्तराभिमुखत्वेन नमस्कार[16]प्रयोगश्चेहैवोक्तः[17]। पितृतर्पणे तु दक्षिणाभिमुखत्वं, स्वधाकारप्रयोगः संहितान्तरात्सामान्यशास्त्रतो[18]ऽप्यपेक्ष्यत इति। अन्यथैतदत्रानर्थक[19]मेव यतः। तिलादीनां चात्र [20]कामचारः, मन्त्रत एव तदर्थसिद्धेः। **ततः** अदृष्टार्थत्वा[21]दनार्द्रः शुचिमानसोऽनन्तरं [22]**पितॄन् तर्पयेद्** इति॥

संहारं [23]तस्य तीर्थस्य प्रासादेनैव कारयेत् ॥९॥

तेनैव ततोऽस्याव्यवहितत्वादिति ॥९॥

[इति भट्टनारायणकण्ठात्मजभट्टरामकण्ठविरचितायां श्रीमत्सार्धत्रिशतिकालोत्तरवृत्तौ वारुणस्नानप्रकरणं तृतीयं समाप्तम्]

इति तृतीयः पटलः

---

[1] र्भावामृतं तदभिमन्त्रणे — अ; र्भावामृततदभिमन्त्रणे — आ
[2] ०पतशास्त्रस्यापि — अ
[3] 'तत्' इति नास्ति — अ, आ
[4] न्ययोजये० — अ; नियोजये० — आ, मु
[5] तु — आ, इ, ई
[6] क्वशरीरं — अ
[7] शोधये० — इ, ई
[8] नियोजयेत् — अ, मु
[9] जालपाशेषु — अ, मु
[10] 'ननु' इत्यारभ्य 'विचक्षणैः' इत्यन्तं नास्ति —अ
[11] सार्धत्रि० — १.१३ उ०
[12] सार्धत्रि० ३.१ उ०, २ पू० वृत्तौ
[13] सार्धत्रि० ४.१ उ०, २ पू०
[14] कल इति — अ
[15] विद्वतोत्तराभि० — आ
[16] प्रयोगश्चैहैवोक्तः — अ, आ
[17] सार्धत्रि० २४.४ पू०
[18] ऽप्यवेक्ष्यते — अ, आ
[19] ०मेवं यतः — आ
[20] कामाचारो — आ
[21] ०दनाद्रो शुचमासो — अ, आ
[22] परिवर्तये० — अ, आ
[23] तस्यादित्यस्य — अ; न्यस्यादित्यस्य — आ

चतुर्थः पटलः

भस्मस्नानप्रकरणम्

भस्मस्नानं प्रवक्ष्यामि तदूर्ध्वं च षडानन ।

स्नानमात्र[1]शुद्धित्वमेव, न तु जल इव [2]निमज्जनासंभवात्। **तत् च** तस्माद् जलस्नानाद् **ऊर्ध्वम्**। **च**[3]शब्दाद् आदौ ऊर्ध्वं च वक्ष्यामि। यदुक्तं श्रीमन्**निश्वासे**[4] —

"वारिणा तु सकृत्स्नात्वा त्रिसंध्यं भस्मना पुनः।
स्नाया[5]दथातुरो नित्यम्" इति ॥

अथ तदुप[6]क्रमः —

मन्त्रैः सर्वैः सकृद्[7]भस्म अभिमन्त्र्य यथाक्रमम् ॥१॥
[8]जलस्नानं पुरा कृत्वा अस्त्रबीजेन षण्मुख ।

इह केचित् "संहितान्तरे विहितेतिकर्तव्यतया मन्त्रविशेषेण यो गो[9]मयाहरणशोषणशिवा-[10]ग्न्युत्पादनतद्देहशैत्यजननादि[11]ना, ततस्तावद्भस्मोत्पाद्यम्" इत्याहुः। तदयुक्तमेव। [12]अत्रोत्पाद्ये-त्यश्रवणात्। तच्छ्रुतौ हि विशेषाकाङ्क्षायां[13] संहितान्तरापेक्षा भवेदेव। [14]यावद्देहे जलवत्तु लोक-प्रसिद्धमेव **मन्त्रैः सकृद् भस्म अभिमन्त्र्य** इति श्रूयते। कुतस्तदपेक्षा संहितान्तरे तद्विद्यत इति चेति। किं च जलादिना तत्र [15]दाहोत्पूयन[16]परशक्तिध्यानतः क्षोभ[17]शाक्तजलस्तुतिपूरणानि श्रूयन्ते। यथा [18]चाकाङ्क्षाया अभावान्नात्रापेक्षितं तथेदमपीत्युक्तं **सिद्धगुरुभिः**[19] —

[20]"क्रियादिभेदभेदेन तन्त्रभेदो यतः स्मृतः।
तस्मात्तत्र [21]यथैवोक्तं कर्तव्यं नान्यतन्त्रतः ॥ इति।

---

[1] शुचित्वं मे न तु — अ
[2] निमज्य सं — अ; निमज्जसं — आ
[3] ०शब्दादावूर्ध्वं — अ; शब्दादूर्ध्वं — आ
[4] अयं श्लोको मृगेन्द्रे क्रियापादे २२ उ० — २५ वृत्तौ 'निश्वासोत्तरे' इति निर्दिश्योद्धृतः।
[5] ०दथ तातुरे नित्यम् — आ
[6] ०क्रममन्त्रैः — अ
[7] ०भस्माभिमन्त्र्य — अ
[8] मलस्नानं — इ, ई, मु
[9] मायापहरण—अ; मायाहरण० — आ
[10] ०ग्न्युत्पातन० — अ, आ
[11] ०नातस्ताव० — आ
[12] अत्रोत्पद्यते कुतस्तदपेक्षा — अ
[13] दीक्षाकाङ्क्षायां — आ
[14] यावद्देहज्जलावत्तु — आ
[15] दाहोत्पूधन — अ
[16] परिशक्ति० — अ, आ
[17] शालजल० — अ
[18] चाकाङ्क्षाया भावात्तत्रापेक्षितं — अ; चाकाङ्क्षायामभावान्नात्रापेक्षितं —आ
[19] एतच्छ्लोकसदृशः कामिके उत्तरभागे स्नपनविधिपटले ३१ पू० ३२ तमश्लोकश्च
"क्रियामन्त्रादिभेदेन शास्त्रभेदो न वा भवेत्।
क्रियामन्त्रादिभेदेन तन्त्रभेदो यतस्ततः।
तस्मात्तत्र च शैवोक्तं कर्तव्यं नान्यशास्त्रतः।"
इति दृश्यते।
[20] क्रियादिभेदेन तन्त्रभेदो यस्मात्तत्र — अ, आ
[21] यदेवोक्तं — अ; यदैवोक्तं — आ

श्रुतावपि[१] —

"यः स्वसूत्रमतिक्रम्य परसूत्रे च वर्तते।
अप्रमाणमृषिं कृत्वा सोऽप्यधर्मेण युज्यते॥" इति।

इह च [२]"अल्पायुषस्त्विमे मर्त्या अल्पवीर्याल्पबुद्धयः" इति प्रश्न[३]पूर्वमतिसंक्षिप्तं भगवता वक्तुमुपक्रान्तम्। तदेव संहितान्तरान्वेषणेन विस्तारं वस्तुसाधनं स्यादिति **वातुले** इवेति तत्संग्रहेऽ[४]प्यस्मिन्नशक्ताः, अतोऽनधिकारस्तेषाम्" इत्युपक्रमविरोधः।

[५]नन्वस्मद्गुरुपद्धतिरियमिति चेत्। तदयुक्तम्। [६]"पद्धतिः प्रतिशास्त्रं विक्षिप्तस्य श्रुतस्य तत्सामर्थ्यात् क्षिप्तस्य च मन्त्रतन्त्रानुष्ठानाय संक्षेपक्रमेणाभिधानाद् यजुर्वेदादौ यज्ञसूत्रादिवत्। न तु तच्छ्रुतिसामर्थ्याभ्यामसिद्धस्य [७]पुरुषेच्छयोपस्थितस्य" इत्युक्तम् अस्माभिः[८] —

[९]"कर्मलिङ्गादिभोगार्थः पुंसः शास्त्रेण दृश्यते।
[१०]तदश्रुतत्वेऽनुष्ठानं भवे[११]दन्धपरंपरा॥
न च शास्त्रान्तरे कर्तुं युक्तं शास्त्रान्तरश्रुतम्।
शास्त्रस्यान्यानपेक्षत्वात्पुंबुद्धि[१२]प्रभवं हि [तत्]॥
तत्सापेक्षेऽप्यपेक्षैव[१३] मानं यावदपेक्षते।
तावदेवान्यतः कार्यं नान्यत्स्यादनवस्थितेः॥" इति।

अत्रापि **सर्वैर्मन्त्रैः** इति श्रुतेः पाशुपतेनापि तत्प्राप्तौ प्रतिषेधः [१४]प्रागुक्तः। **यथाक्रमम्** इति उद्धारक्रमेणेति दर्शितम्[१५]। **अस्त्रबीजेन** इति शिवास्त्रेण **जलस्नानम्**। कर्तव्यस्यैव बीजात्मकत्वाद्भस्मरजो [१६]मन्त्राधिकरणेनैव॥

[१७]विधिस्नानं ततः कुर्यान्मूर्ध्न आरभ्य[१८] मन्त्रवित्॥२॥

ततः मन्त्रजप्ताद्भस्मस्नानं **कुर्यात्**॥२॥

---

[१] अयं श्लोकः आचारेन्दौ उपोद्घातप्रकरणे चतुर्थपृष्ठे विष्णुधर्मोत्तरादिवचनैरिति निर्दिश्योद्धृतः।
[२] सार्धत्रि० १.२ पू०
[३] ०पूर्वमिति — अ
[४] ऽप्यभिन्नशक्तोऽतोऽनधि० — अ
[५] न त्वस्माद्गुरुपद्धति० — अ; न त्वस्मद्गुरुपद्धति० — आ
[६] पद्धतिप्रति० — आ
[७] पुरुषस्योपस्थितस्य — अ
[८] आकरो न लभ्यते।
[९] कर्षलिङ्गादतिभोगार्थः — अ; कषलिङ्गादतिभोगार्थः — आ
[१०] तदशास्त्र . . त्वेऽनुष्ठानं — अ; तदश्रुतत्वेनानुष्ठानं — आ
[११] ०दण्डपरंपरा — आ
[१२] ०प्रभावं — अ, आ
[१३] ०क्षे व्यपेक्षैव — अ
[१४] प्रागुक्तं यथा — अ, प्रागुक्त यथा — आ; सार्धत्रि० ३.७ पू०, ८
[१५] सार्धत्रि० ३.२, ३ वृत्तौ।
[१६] मात्राधि० — आ
[१७] विधिस्नानं तन्मूर्ध्न आरभ्य — अ
[१८] ०न्मूर्ध्नि आरभ्य — ई, मु

कथमित्युच्यते —

"ईशानेन शिरः [1]स्नायान्मुखं तत्पुरुषेण तु।
हृदयं बहुरूपेण गुह्यं वै गुह्यकेन तु॥३॥
सर्वाङ्गानि [2]त्वजातेन"

[3]अविभागेनात्र ब्रह्मणां प्राप्तेर्विभागविधिः। स्नानं [4]चात्रादृष्टेन रूपेण [5]शुद्धित्वसिद्धेरेवेति [6]दर्शितं च। तच्चोद्धूलनादिभेदेन द्विविधमित्युक्तं श्रीमत्पौष्करे —

[7]"यतिरुद्धूलनेनैव स्नायान्नित्यं समाहितः।
गृही यथाङ्ग[8]मालभ्य तिलकैर्वा त्रिपुण्डकैः॥" इति॥

ततोऽनन्तरम् —

"अभिषेकं तु पञ्चभिः।

प्रकृतत्वादीशानादिभिरेवेति सर्वमन्त्राणां [9]प्राप्तौ प्रतिषेधः॥

उपरिष्टात्प्रसादेन[10] स्नानं कुर्वीत षण्मुख ॥४॥

उपरिष्टाद् उत्तरकालम्। अनेन संध्यात्व[11]मस्य ज्ञापयति। यदुक्तम्[12] —

"अभिषेकं पुरा कृत्वा [13]ततः संध्यां समाचरेत्।" इति।

अन्यथा पाठ[14]क्रमादेवास्य तदुत्तरकालतासिद्धेरनर्थकमेतदिति। ततश्च [15]सर्वमन्त्रप्राप्तेरत्रापि प्रतिषेध एव। ततः स्नानत्वाद्देवपितृतर्पणं पूर्वानुष्ठितं जल[16]स्नानप्रसङ्ग[17]सिद्धत्वेनोक्तं, तत्पूर्वानुष्ठानाभावे तु तदसिद्धे[18]रकर्तव्यमेवेति॥

इति भट्टनारायणकण्ठात्मजभट्टरामकण्ठविरचितायां श्रीमत्सार्धत्रिशतिकालोत्तरवृत्तौ भस्म[स्नान]प्रकरणं चतुर्थं [समाप्तम्]

इति चतुर्थः पटलः

---

[1] स्नायान्मुखे — अ, आ
[2] त्वजानेन — अ
[3] विभागेनात्र — अ
[4] चात्रा . . द्रेष्टेन — आ
[5] शुद्धित्वं सिद्धे० — अ
[6] दर्शितं चोद्धूलनादि० — अ, आ
[7] कामिके पूर्वभागे पृ० २४
[8] ०मारभ्य — अ, आ
[9] प्राप्ते — अ, आ
[10] ०त्प्रासादेन — आ, मु; अत्र मूले 'प्रसादेन' इति छन्दोभङ्गनिवारणाय तथा पाठः
[11] ०मस्या ज्ञापयति — आ
[12] सार्धत्रि० ३.७ पू०
[13] पश्चात् — अ, आ
[14] क्रमे देवाकालतासिद्धे० — अ; ०क्रमो देवास्य तदुत्तरकालतासिद्धे० — आ
[15] सर्वमत्रप्राप्ते० — आ
[16] ०स्नानाप्रसङ्ग० — अ, आ
[17] ०सिद्धत्वं नोक्त तत्पूर्वा० — आ
[18] ०रकर्तमेवेति — आ

पञ्चमः पटलः

यजनप्रकरणम्

[1]"सबाह्याभ्यन्तरं कृत्वा पश्चाद्यजनमारभेत्।" इत्युक्तं तदिदम् —

यजनं संप्रवक्ष्यामि यथाविध्यनुपूर्वशः।

तच्च **यथाविधि** [2]स्नानादि हृदयाद्यङ्गादिना प्रोक्तसमस्तविध्यनतिक्रमेण वक्ष्यामि। सर्वे एवाङ्गभूतास्ते इत्यर्थः। अत एव चैतदत्र प्रकृतिभूतं परिपूर्णत्वात्; "मण्डलं यायात्" इति वक्ष्यमाणानि तदाङ्क्षत्वादपरिपूर्णत्वेन विकृतिभूतानीति वक्ष्यामः[3]। बाह्ययजनस्याधारापेक्षत्वात्, अत्र चावाहनादनन्तरं स्नानस्य श्रुतेः, तस्य च लिङ्गाविनाभावाल्लिङ्ग[4]लक्षणं तत्प्रसिद्धमेवेत्यत्र नोपात्तम्। तस्य च चलात्मकत्वेन [5]स्नाननिकटदेशे एव नदीतटाकादौ यजनोपपत्तेः।

"[6]ततो ह्यायतनं गच्छेत्पुष्पहस्तो विचक्षणः" इत्यादिपद्धत्युपन्यासोऽत्र युक्त एवेति। **अनुपूर्वशः** इति बीजाङ्कुरन्यासादेरत्र क्रमस्य च वक्ष्यमाणत्वादनेन दृष्टार्थैव यागानु[7]पूर्वी विधीयते। द्वारपालविघ्नेशपूजनं न [8]दृश्यते। यथा प्रोक्तं श्री**पौष्करे** —

[9]"अविघ्नार्थं तु यजनं गजेन्द्रस्य पुरा भवेत्।
"[10]द्वारपालार्चनं तथा" इति॥

यथा यजनोपक्रमः —

बीजाङ्कुरं पुरा शक्त्या [11]पश्चादानन्तमासनम्॥१॥
अनन्तं चान्तगं कुर्यात्क्रमेणैव षडानन।

अत्र दीक्षितः स्नातो गृहीतवासाः सुनिर्वर्तिताग्नेयस्नानोऽधि[12]कार्येव शुचावेकान्ते सशिवास्त्रेण पाशुपतास्त्रेण विघ्नानुत्सार्य, शिवास्त्रेण दिग्बन्धनं कृत्वा, [13]कृतद्वारपालविघ्नेशपूजनः [14]प्रविश्य,

---

[1] सार्धत्रि० २.१५ उ०

[2] स्नानानि हृद्यङ्गादीनि — अ; स्नानादि हृद्यङ्गादिना — आ

[3] सार्धत्रि० ७.१० उ०, ११ पू०

[4] तत्क्षण० — अ

[5] स्थाननिकट० — अ

[6] आकरो न लभ्यते।

[7] ०पूर्वं — अ

[8] दृश्येत — अ

[9] इदमर्धं मृगेन्द्रवृत्तावपि 'पौष्करे' इति निर्दिश्योद्धृतम्। "अविघ्नार्थं तु यजनं गणेन्द्रस्य पुरा भवेत्।" (मृ. वृ. क्रिया० पृ.४)

[10] द्वारपालेष्वपा तथा — अ, आ

[11] पश्चादानन्दमानसम् — अ, इ

[12] कार्ये पशुचा — अ

[13] ततो द्वारपाल० — अ; कृतद्वारपाल० — आ

[14] उत्तराभिमुखमुपासनं प्रविश्य कर० — अ, आ

उत्तराभिमुखमासीनः, करन्यासभूतशुद्धिपूर्वं[1]मन्तर्यागसंतर्पणबाह्यन्यासं च कृत्वा, मुद्रां बध्नीयाद् इत्ययं तावत्क्रमः। ततश्च देवत्वेन वक्ष्यमाण[2]मप्यस्त्रमन्त्रै[3]र्वास्त्राभिमन्त्रितपात्रे हृदयेन तेन सपीठं तल्लिङ्गं क्षालयित्वा, पीठाद्यमारभ्य **पुरा शक्त्या** प्रणवेन तु समस्तजगद्**बीजस्य** मायातत्त्वस्य यः **अङ्कुरः** वसुधादिकलातत्त्वान्तः, [तं] त्रिंशत्तत्त्वात्मकं कुर्यादिति। तस्य पूर्वकृतत्वात्तत्र विन्यसेत्; कन्दनालादिवद्भावयेदित्यर्थः। यदुक्तं श्रीमत्**किरणे**[4] —

"पृथिवीतत्त्वकन्दकम्।, कलातत्त्वान्तनालम्" इति।

पश्चाद् अनन्तस्य विद्येश्वरस्येदं साक्षादधिष्ठायकत्वाद् [5]**आनन्तं** मायातत्त्वं **पुरा शक्त्या** एव [6]**आसनं** कुर्यात्। अनन्तासनत्वे[7]नानेकस्रोतोरूपत्वात् सहस्रदलपद्मतया तदभिध्येयमित्यर्थः। तस्य चानन्तस्य च तम् [8]**अनन्तं** विद्येश्वरम् **अन्तगं** मध्यगं [9]कर्णिकास्थानं **कुर्याद्** विन्यसेदित्युक्तम्। अत्र च [10]"यद्यपि वक्ष्यमाणविद्यापद्मदलत्वेन विद्येश्वराणां स्थितिरर्थसिद्धा। यदुक्तं श्रीमत्**किरणे**[11] — "विद्येश्वर[12]दलाक्रान्तम्" इति। तथाप्यनन्तस्यात्र प्रपञ्चव्याप्त्या च स्थितिरुक्तेत्यविरोधः॥

अत्रापि [13]"पुरा शक्त्या" इति संबध्यत इत्युत्सर्गप्राप्तस्य हृदयस्य बाधः। यद्वक्ष्यति[14] —

[15]"उक्तानुक्तं च यत्किंचित्तत्सर्वं हृदयेन तु।" इति। [16]ततश्च —

[17]**हृदयं कर्णिका पद्मं धर्मं ज्ञानादिमेव च[18]॥२॥**

वैराग्यं च तथैश्वर्यमीशान्तं वह्नितो न्यसेत्॥

पुरा शक्ति[19]संबन्धनादत्र हृदयेन **कर्णिका** इति [20]कर्तव्ये यः समानाधिकरणनिर्देशः [21]संभवार्थतया शक्तितत्त्वाधिष्ठेयत्वेन शुद्धविद्यातत्त्व[त्व]मस्य [22]ख्यापयितुम्। ततश्चैत[23]त्षडुत्थमासनं [24]सद्भावात्मकं हृदयेनैव च न्यसेदित्यर्थः। [25]ततश्च [26]"ओमित्यनेन कमलं योगपीठं [27]तदा भवेत्।"

---

[1] ०मन्तरयागसंतर्पण० — अ

[2] ०मप्यस्यमन्त्रै० — अ; ०मप्यर्घ्यमन्त्रै० —आ

[3] ०र्वास्त्रादिभिमन्त्रित० — आ

[4] किरणे क्रिया० २.१९ उ०, २० पू० किरणे "कालतत्त्वान्तनालैकं" इति दृश्यते।

[5] अनन्तं — अ

[6] 'आसनम्' इत्यस्यानन्तरं 'ध्यानं' इत्यधिकम्—आ

[7] ०नानैक — अ

[8] अननन्तरविद्ये० — अ

[9] अकर्णिका० — अ

[10] 'यद्यपि' इत्यारभ्य 'अविरोधः' इत्यन्तमुद्धृत्य एवं निर्णीतं श्रीमत्सार्धत्रिशतिवृत्तिकृता' इति क्रियाक्रमद्योतिकाव्याख्यायां प्रभायां ९२ तमपृष्ठे दृश्यते

[11] किरणे क्रिया० २१ पू०

[12] 'दलच्छन्नं' इति मुद्रितकिरणागमपाठः।

[13] सार्धत्रि० ५.१ उ०

[14] सार्धत्रि० ५.५ उ०

[15] उक्तं च — अ

[16] नतश्च — अ

[17] हृदयकण्ठिका० — अ; हृदयकर्णिका० — आ

[18] धर्मज्ञानादिकमेव — अ, आ; धर्मज्ञानादिमेव च — इ, ई, मु

[19] ०संबाधनादत्र — आ

[20] कर्तव्येऽधः समानाधि० — अ

[21] ०संभवनार्थ० — अ

[22] स्थापयितुं — अ

[23] ०त्षडुक्तमासनं — अ, आ

[24] तद्भावात्मकं — अ

[25] ततश्चादित्यमनेन — अ

[26] सार्धत्रि० — २.६ पू०

[27] तदभावेदित्यस्यापि — अ

इत्यस्यापि बाध इति। [1]धर्मादय[2]स्त्वेतेऽनन्तस्य सामर्थ्यविशेषाः, यैः सर्वं धत्ते, जानाति, न [3]केनचिदनुरज्यते, सर्वेश्वरश्च भवतीति। न तु [4]बुद्धिधर्मा इति [5]मौर्ख्याद्व्याख्येयं, तेषामत्र प्रगमासंभवात्। न चेह [6]पशवः [7]पाशाश्चेज्यन्ते यतः। अत एव धर्मादीनामत्र [8]प्रदर्शनं कृतमिति विश्वातीतमित्युपेक्ष्यते। ननु क्वचिदस्त्येव तत्। सत्यम्। तदधिष्ठायकं तदनन्तसामर्थ्यमेव तत्स्थानात्तथोक्तमिति मन्तव्यमिति तन्न [9]विरोधः। **ज्ञानस्य आदिभूतं धर्मं** न्यसेत्। ततो ज्ञानमित्यर्थः। अन्यथा ज्ञानस्य प्रधानत्वा[10]दार्थक्रमेण पाठ[11]क्रमस्य बाधितत्वात् पूर्वन्यासः प्राप्तः। [12]आर्थाच्च क्रमादत्रादिशब्दोपात्तश्रौतक्रमो बलीयानिति **वाक्यविदः**। यदाहुः[13] —

"श्रुत्यर्थपाठकाण्डमुख्यप्रवृत्तिदौर्बल्यम्।" इति। एतच्च धर्मादिचतुष्टयम् **ईशान्तं वह्नितो न्यसेत्**। [14]वह्नि[15]कोणात्प्रभृतीशानकोणं यावदित्यर्थः। अनन्तसामर्थ्यानुकारित्वेनैव च [16]संहितान्तरेषु [17]सिंहरूपास्तेऽभिध्येया इत्युक्तम्॥

तदनु —

शक्तिभिः केसरव्यूहं[18] हृदयेन [19]च कल्पयेत्॥३॥

वामादिशक्ति[20]नवकमार्थेन क्रमेण पूर्वादि**केसरेषु** सकर्णिकेषु **व्यूहम्** आवरणं विन्यसेत्॥३॥

आवाहयेत्ततो देवं हृदयेन तु षण्मुख।

ततश्चान्तःकरणोक्तक्रमेण ओमित्यनेन मूर्तिं दत्त्वा, तां ब्रह्मभिः सहनेत्रैः सकलीकृत्य सदा-

---

[1] "अत्र अनन्तसामर्थ्यरूपाणां धर्मादिशब्दवाच्यत्वे निमित्तमुक्तं तत्र भगवता रामकण्ठेन श्रीमत्कालोत्तरवृत्तौ 'धर्मादयस्त्वनन्तसामर्थ्यविशेषाः यैः सर्वं धत्ते जानाति न केनचिदनुरज्यते सर्वेश्वरश्च भवतीति न तु बुद्धिधर्मा इति मौर्ख्याद्व्याख्येयं तेषामत्र प्रगमासंभवात्। न चेह पशवः पाशाश्चेज्यन्ते' इति" क्रियाक्रमद्योतिकाव्याख्या प्रभा पृ० ९२

[2] ०स्त्वेतेन तस्य — अ

[3] केचिदनु० — अ

[4] बन्धी धर्मा — अ; बन्धिधर्मा — आ

[5] मौख्याद्वेनैवं तेषा० — अ; माख्याद्वेषो नैवं तेषा० — आ

[6] पशः — अ

[7] पाशा चेद्यन्ते — अ

[8] प्रदशिनं कृमिति — अ; संप्रदर्शितम्। किमिति विस्परदिदमित्युपेक्ष्यते — आ

[9] विरोधमज्ञानस्यादि० — अ, आ

[10] ०दानर्च्यक्रमेण — आ

[11] ०क्रमोश्चोधितत्वात्पूर्व० — अ; क्रमपि साधितत्वात्पूर्वं ० — आ

[12] अर्थाच्च — अ, आ

[13] अयं विचारः मीमांसान्यायप्रकाशे, पृ० ३७–४४

[14] वह्नौ — अ, आ

[15] कोणात्प्रभृति न कोणं — अ

[16] ०कामिके पूर्वभागे ४.२९५

[17] सहरूपास्ते — अ, आ

[18] व्यूहः — अ

[19] चकारो नास्ति — अ; प्रकल्पयेत् — इ, ई, मु

[20] नवकामार्थेन — अ; नवकमर्थेन — आ

शिवभट्टारकं, प्रासादेन [1]सहृदयेन हृदयादीनि यथास्थानं न्यसेत्। ततो [2]देहो [3]जीववत्। यदुक्तमस्मद्गुरुभिः —

"[4]प्रासादप्लवन[5]व्रातविश्रान्त्या परपूजनम्।" इति॥

परतः —

[6]स्थापनं पाद्यमर्घ्यं च तथा[7]चमनमेव च॥४॥
स्नपनं पूजनं चैव हृदयेन तु कारयेत्।

उपलक्षण[8]मेतद् धूपसमालभनादेस्ततो मुद्रायाः॥

अथ परिभाषासूत्रम् —

उक्तानुक्तं च यत्किंचित्तत्सर्वं हृदयेन तु॥५॥

यद् **उक्तं** [9]मुद्रादानादिकं, यच्च [10]**अनुक्तं** नैवेद्यध्यानजपनिवेदनादि **तत्सर्वं हृदयेन** कुर्यात्। यद्वक्ष्यति **प्रासादलक्षणप्रकरणे**[11] —

"अर्घ्यं दत्त्वा तु [12]मन्त्रस्य जपं कुर्याद्विचक्षणः।
देवस्य दक्षिणे भागे" इति।

अत एवात्र सर्वमेव [13]कर्मोत्तराभिमुखेन कर्तव्यमिति दर्शितम्।
नन्वेतद्वाक्यं प्रकरणे[14]नावरुद्धम्। [न] सर्वमेव वाक्यं प्रकरणेन [15]वावरोद्धुं शक्यमिति तत्रैव वक्ष्यामः।
[16]ध्यानमन्त्रे बिन्दुरूपत्वमेव, लिङ्गाकारादिशिवमूर्तिरूपकविधौ च तदेव [17]पारमार्थिकं रूपम्। यदुक्तं श्रीमत्**पौष्करे**[18] — "बिन्दुरूपः शिवो ध्येयः" इति। ईशानादिसमस्तशक्तिप्रसरात्मकत्वात्तस्य [19]सकलनिष्कलत्वमप्युपपद्यत इत्यविरोधः॥५॥

अथ किमत्र मण्डल[20]यागे [21]वक्ष्यमाणगर्भावरणादिविन्यासविधिः कार्यः। नेत्युच्यते —

एकावरणमेतत्तु सर्वकामार्थसाधनम्[22]।

---

[1] हृदयेन — अ
[2] देहे — अ, आ
[3] जीवत्सवत् — अ
[4] प्रसासुपलवन — अ, आ
[5] प्रातिर्विश्या श्रान्त्या — अ; प्रातविश्या श्रान्त्या — आ
[6] स्थापरपाद्य० — अ; स्नापनपाद० — इ; स्नापन पाद्यं० — मु
[7] ०चमनमेव स्नपनपूजनं च हृदयेन — अ
[8] मेतत्सूपसमा० — अ
[9] मुद्रानानादिकं — अ
[10] अनुक्तनैवेद्य० — अ
[11] सार्धत्रि० १६.८ उ०, ९ पू०
[12] देवस्य — अ, आ
[13] क्रमोत्तराभि० — अ
[14] ०नाविरुद्धं — अ
[15] वा रोद्धं — अ; वरोद्धुं — आ
[16] ध्यानमन्त्रबिन्दु० — अ; ध्यानबिन्दु० — आ
[17] परमार्थिकं — आ
[18] मुद्रितपौष्करे ज्ञानपादे नोपलभ्यते।
[19] सकले निष्कलीकमप्युप० — अ, आ
[20] योगे — अ, आ
[21] सार्धत्रि० ७.६ उ० —११ पू०
[22] साधकम् — इ, ई, मु

अनेकशक्त्यावरणेनैकेनैव युक्तम् **एतद्** यजनं दृष्टफल[1]साधकम्। अत्र हि यावदुपदिष्टयैवेतिकर्तव्यतानियमाङ्क्षत्वात्प्रकृतित्वमेवेति कुतो वैकृतधर्मप्राप्तिः ॥

न केवल[2]मिहैवैतद्यावत् —

सर्वतन्त्रेषु सामान्यं"

सर्वागमेष्वेतन्नित्यार्चनं सर्वाङ्गपरिपूर्णत्वेन प्रकृतिभूतमेव श्रूयत इति, न तस्य वक्ष्यमाणविकृतियागापेक्षासंभव इति ॥

[3]किं तु —

"सर्वज्ञानेषु चोत्तमम् ॥६॥

[4]निष्कलार्चनोपायभूतसकलादिज्ञानादावरणज्ञानाद्युप[5]दिश्यते, न [6]न्यसनतया। शक्त्यावरणं च [7]तत्पूर्वं विनिवेश्यत्वात्तत्रोपायतां गच्छतीति तद्विषयमेव ज्ञानमुक्तमित्युच्यते। न तु गर्भा[8]वरणादिविषयम्; तेषां तदर्चनोत्तरकालविनिवेश्यत्वेन [9]तदुपायत्वासंभवात्। यदाहुः[10] —

"[11]उपायान्निष्कले प्राप्ते तदावरणलक्षणम्।
उपायानुपदिशन्पश्चान्न्यायमार्गेण बाध्यते॥" इति।

कथं तर्हि तेषां तत्रापि न्यासः। यथासौ तथा तत्रैव [12]वक्ष्यामः। ततश्चावाहनश्रुतेस्तथैव विसर्जयेदिति ॥६॥

इति [भट्टनारायणकण्ठात्मज] भट्टरामकण्ठविरचितायां श्रीमत्[सार्धत्रिशति]-
कालोत्तरवृत्तौ यजनप्रकरणं पञ्चमं [समाप्तम्]

इति पञ्चमः पटलः।

---

[1] साधकमन्त्रभयादुपदिष्ट एवेति० — अ
[2] ०मिहेवैतद्यायवत् — अ; ०मिहैव तद्यावत् — आ
[3] किं च — अ
[4] निष्कलाच्च नाद्यायभूत० — अ
[5] ०दिश्यन्ते — अ, आ
[6] व्यसनतया — अ; व्यसनितया — आ
[7] तत्पूर्वे — आ
[8] ०वरणविषयम् — अ
[9] तदुपायत्वसं० — अ; तदपायत्वसं० — आ
[10] आकरो न लभ्यते।
[11] उपायन्निष्कले — अ
[12] सार्धत्रि० ७.६ उ०, ११ पू०

षष्ठः पटलः

अग्निकार्यप्रकरणम्

अतः परं प्रवक्ष्यामि अग्निकार्यविधिं क्रमात् ।

अतः अर्चनादनन्तरम् **अग्नेः** [1]**कार्याय** [2]उत्पादनार्थको यो **विधिः**, [3]तस्मिंश्च **अग्नौ कार्यः यो विधिः** मन्त्रन्यासः, [4]तद्धोमात्मकः, तं प्रयोगक्रमेण वक्ष्यामीति ॥

[5]अथ द्वे कर्मणी —

अस्त्रेणोल्लेखनं कुर्याद्वर्मणाभ्युक्षणं ततः ॥१॥

तस्य त्वग्न्यधि[6]करणस्य विशेषान्तरानभिधानं विशेषसामान्य[7]शास्त्रप्रसिद्धचनुग्रहाय । यदुक्तं श्रीमत्**किरणे**[8] —

"हस्तमात्रस्य कुण्डस्य [9]मेखला चतुरङ्गुला ।
[10]अन्यतद्द्वितयं कार्यं [11]त्र्यङ्गुलं द्वचङ्गुलं क्रमात् ॥" इति ।

यज्ञसूत्रेऽपि[12] —

"पूर्वेणाहवनीयः स्या[13]दरत्निश्चतुरश्रकः ।
पश्चिमे गार्ह[14]पत्यश्च चतुर्दशभिरङ्गुलैः ॥
[15]भ्रमावृतः समुल्लेख्यो [16]दक्षिणश्चैव दक्षिणे ।
षोडशभिरालेख्य[17]स्त्र्यंशं त्यक्त्वार्धचन्द्रकम् ॥
हस्तत्र्यंशो निखातः स्यादेषामेका च मेखला ।" इति ।

एवं होमपात्रादिकमपि मन्तव्यम् ।

---

[1] कार्यापादानार्थकयो — अ
[2] उत्पादानार्थकयो — आ
[3] 'तस्मिंश्च अग्नौ कार्यः यो विधिः' इति नास्ति — अ
[4] तद्धोमार्थकः — अ
[5] अथद्वेऽर्चनमन्त्रेणो० – अ; अथ द्वेर्च्चनम् – आ
[6] ०करणं तस्य विशेषान्तरादनभि० — अ
[7] ०शास्त्रं प्र० — अ, आ
[8] किरणे क्रिया० — ५.७ उ०, ८ पू०
[9] नेमिः स्याच्चतुरङ्गुला — मु० किरणागमपाठः ।
[10] अन्यत्तद्द्वितीयं कार्य० — अ; अन्यन्नेमिद्वयं कार्यं — मु० किरणागमपाठः ।
[11] मङ्गुलद्वयङ्गुलं क्रमात् – अ; त्र्यङ्गुलद्वचङ्गुलक्रमात् — मु. किरणागमपाठः ।
[12] ग्रन्थो न लभ्यते ।
[13] ०दरत्निचतुरश्रकम् — अ, आ
[14] ०पत्यं च — अ, आ
[15] भ्रमावृत्तः — आ,
[16] दक्षिणेव षोडशाभि० — अ; दक्षिणे सषोडशाभि० — आ
[17] तत्र्यंशत्क्यं क्त्वा तदर्धचरुकं — अ; त्र्यंशं त्यक्त्वा तदर्धचरुकं — आ

अत्र च [1]प्राग्द्वावेव श्रूयेते। सत्यम्। अतस्तावेव [2]कर्तव्यौ। न च द्वाभ्यां संस्कृतमेवादृष्टार्थ-[3]त्वात्। दृष्टानां हि शोधनतत्क्षालनादीनामिदं सर्वं संपन्न[4]मिति, [5]नैव युज्यते [6]वक्तुमदृष्टार्थानामिति। तदुल्लेखन[7]मुत्पाटनमशुद्धायाम्; अतोऽदृष्टार्थमेव। ततश्च तदुद्धारशुद्धमृदा[8]पूरण-समीकरणकुट्टनसेचनादयोऽप्यवश्यं कर्तव्या एव। सत्यम्। यदि तत्क्रियते, तत्तु यथाशास्त्रेण संपन्नमेव दृष्टेन रूपेण भाव्यते। तथापि तेऽपि कवचाभ्युक्षणेन संपन्ना एव [9]कार्याः। ततो द्वावेव कर्तव्याविति॥१॥

शक्तिन्यासं ततो दर्भैर्हृदयेनैव कारयेत्।

ततः शक्तेः वागीश्वर्याः **न्यासः** तस्मिन्नधिकरणे **दर्भैः** विष्टरं कृत्वा कुर्यात्पुष्पादिना। यदुक्तं श्रीमत्**पौष्करे**—

"न्यासो धूपैश्च कुसुमैः कार्यो वा गन्धकोलकैः।" इति॥

हृदा वै शक्तिगर्भे तु प्रक्षिपेज्जातवेदसम् ॥२॥
[10]गर्भाधानादिकं कृत्वा निष्कृतिं चाप्यपश्चिमाम्[11]।

[12]ततोऽग्निं संप्रोक्ष्य परं पारमेश्वरमेतद्वीर्यमिति **शक्तिगर्भे** न्यसेत्। अन्यथा [13]तत्रोपक्षेपानुपपत्तेः। एतच्च निषेका[द्य]पूर्वतरपरमेश्वरसंस्कृता[14]द्यणुचिता संयोगः। **आदिग्रहणात्** पुंसवन-सीमन्तोन्नयनजातकर्माणि। ततो **निष्कृतिम्** इति निःशेषेण [15]संव्यवहारार्थतया करणम्। तस्य नामकरणमित्यर्थः। सा च पश्चिमा न विद्यते पश्चिममग्निकर्म [16]यस्याः, निष्कृतिः। न त्वत्र निष्कृतिः [17]प्रायश्चित्तं [किंतु] जातकर्म व्याख्येयं, नाम[18]कर्मत्वेनैषां प्रसिद्धेः। यदुक्तं श्रीमत्**पौष्करे**—

गर्भाधानं पुंसवनं सीमन्तकरणं तथा।
जातकर्म च कर्तव्यं नामकर्म ततः पुनः॥
[19]पाच्याश्चरुपुरोडाशाः पञ्चसंस्कारसंस्कृते।
[20]अनाहूते शिवे वह्नौ होमस्त्वावाहिते [21]शिवे"॥ इति॥

---

[1] प्राग्वतेश्रूयते — अ, आ
[2] कर्तव्यो — अ
[3] ०त्वा . . . नां हि—अ; ०त्वादृष्टानां हि—आ
[4] ०मिदं नैव — अ
[5] नेति — आ
[6] वक्तुं ना दृष्टार्थाना तदनुपलेखन० — अ; वक्तुर्नादृष्टार्थानाम् तदनुपलेखन० — आ
[7] ०मुत्पादन० — अ
[8] पूरनकुट्टन० — आ
[9] हार्यस्ततो — अ; हार्यास्ततो — आ
[10] इदमर्धं 'अ, आ' मातृकयोर्नास्ति।
[11] ०पश्चिमम् — इ, ई
[12] ततोऽग्निमसंप्रोक्ष्य — अ
[13] तन्त्रोपक्षेपा० — आ
[14] ०द्यनुचिता — अ
[15] संव्यहारार्थ० — आ
[16] यस्यामनिष्कृतिः — अ
[17] प्रायश्चित्तजातकर्म — अ
[18] ०कर्मतत्त्वेनैषां — अ
[19] कामिके पूर्वभागे अग्निकार्यविधिपटले श्लो. ८५; अयं श्लोको मृगेन्द्रवृत्तौ ६२ तमपृष्ठे, क्रियाक्रमद्योतिकाव्याख्यायां प्रभायां १७२ पृष्ठे च पौष्करे इति निर्दिश्योद्धृतः; प्राच्याश्चरु० —अ
[20] अनाभूते — अ
[21] 'भवेत्' इति मुद्रितमृगेन्द्रवृत्तिपाठः।

हृदयेनैव मन्त्रज्ञः सर्वकर्माणि कारयेत् ॥३॥

अनुक्तान्यन्यकर्माणि यानि, तान्यपि **हृदयेन** इत्युच्यन्ते। गर्भाधानादीन्येव तेषु तस्य सिद्धत्वात्। यदुक्तम्[1] —

"उक्तानुक्तं च यत्किंचित्तत्सर्वं हृदयेन तु।" इति।

कानि [2]तान्यन्यानि तत्र [3]तावद्दर्भास्तरणादीनि। यदुक्तं श्रीमत्**सर्वज्ञानोत्तरे**[4] —

"हृद्बीजेना[5]स्तरेद्दर्भान्परिधींश्च निवेशयेत्[6]।
[7]प्रागग्रानुदगग्रांश्च ततो देवान्प्रपूजयेत् ॥
ब्रह्माणं शंकरं विष्णु[8]मनन्तेशं च मन्त्रवित्।
पूर्वा[9]दारभ्योत्तरान्तं विष्टरस्थान्प्रपूजयेत् ॥" इति।

घृतसमिद्धोमपात्रसंस्कारादीनि च। [10]होम्यं [11]तावदाज्यं, तदभावा[12]त्तिलादि च सिद्धमेव। यदुक्तं श्रीमत्पौष्करे[13] —

"[14]आज्याभावात्तिलैर्होमः [15]कर्तव्यः कृष्णवर्चसैः।
व्रीहिभिर्वा यवैर्वापि समिद्भिर्वाजुगुप्सितैः ॥" इति।

ननु तानि सामान्यसंस्कारेण सिद्धानीत्युक्तम्। सत्यम्। अदृष्टार्थे; अदृष्टार्थाश्चाज्यस्य ग्रहणपरितापो[16]पप्लवनोद्वीक्षणादिकाः, पात्राणां च क्षालनपरितापनसंमार्जनरूपाः संस्कारा विधीयन्त इत्यदोषः ॥३॥

ततो गर्भाधानादिकं कृत्वा —

पश्चात्पद्मविधानं तु प्रागुक्तं परिकल्पयेत्।

ततः सासनस्य भगवतस्तत्र न्यासं कुर्यात् ॥

[17]शिवादिसर्वमन्त्रांश्च होमयेदनुपूर्वशः ॥४॥

ततः शिवं सब्रह्माङ्गमुद्दिश्य होमं कुर्यात्। तत् प्रधानमित्यर्थः। **अनुपूर्वशः** इति अनु ज्येष्ठवत्

---

[1] सार्धत्रि० ५.५ उ०
[2] तान्यानि — अ; तर्ह्यन्यानि — आ
[3] तावद्गर्भा० — अ
[4] सर्वज्ञानोत्तरे क्रिया० ५.१७ उ०, १८,१९ पू०
[5] ०स्तरेद्गर्भान् परिधीश्च — अ
[6] ०न्परिधयश्च निधापयेत् — सर्वज्ञानोत्तरमातृकापाठः।
[7] प्रागग्रानुत्तराग्रां च पुन्नर्देवान् — सर्वज्ञानोत्तरमातृकापाठः।
[8] ०मनन्तेशसमन्वितम् — सर्वज्ञानोत्तरमातृकापाठः।
[9] ०दारभ्य गायत्र्या विष्टर० — सर्वज्ञानोत्तरमातृकापाठः।
[10] होद्यं — आ
[11] तावदाज्यतद० — अ, आ
[12] ०त्तिलादिव सिद्ध० — अ
[13] कामिके पूर्वभागे अग्निकार्यपटले श्लो० ९३,९४
[14] आज्यभावात्तिलो होमः — अ
[15] कर्तव्यं — अ
[16] ०प्लवनादीक्षणादिकाः — अ; ०प्लवनाद्वीक्षणादिकाः — आ
[17] शिखादि० — आ, मु

प्रधानापेक्षयाङ्गानामल्प इत्यर्थः । यदुक्तं श्रीमत्**किरणे**[1] — [2]"दशांशतोऽन्यज्जुहुयात्" इति । **च**शब्दाद् गर्भाधानादिकमपि। **होमयेत्** प्रोक्तमत्र होमेन संपादयेदित्यर्थः । ततश्चान्नमपि होमयेत् संसिद्धं वैश्वदेवविधानादन्ते; पूर्णाहुतिमपि दीक्षाप्रकरणोत्सर्गवाक्यात् । यद्वक्ष्यति[3] —

[4]"पूर्णाहुतिप्रदानं च कर्तव्यं धारणायुतम् ।
अमृतं यत्परं वत्स [5]स्रवन्तं मनसा स्मरेत् ॥
दीक्षाप्रकरणे ह्येतद्योज्यं सर्वत्र सर्वदा ।
लिङ्गोद्धारविधाने च नित्यसंस्कारकर्मसु ॥" इति ।

यज्ञकर्मविधिं चैनं होमात्मकं सुसमिद्धे हुताशने कुर्यान्नाल्पतेजसीत्युक्तम्[6] ।

नन्वतः [7]परं प्रश्नपूर्वकमग्नेर्वक्त्रभेदेन कर्मविशेषप्रतिपादकं प्रकरणं केषुचित्पुस्तकेषु दृश्यते । कैश्चिद्व्याख्यातमिति तत्कथम् । अत एव [8]विभावनाक्षिप्तमूलत्वात्कैश्चिदेव [9]परिग्रहादनुसूक्तं, [10]ततस्त्यक्तम् । [11]मूर्खाक्षिप्तान्य[12]वाक्यवत्तस्य [न] प्रयोजनमस्ति । [13]वक्त्रैकीकरणस्य सर्वत्र श्रुतेः । श्रुतावपि[14] — "येष्वङ्गारेष्वग्निर्लेलिहायते तान्यसाध्यम्" इति । अत एव [15]चैतदाक्षेपप्रतिसमाधान[16]भूतं श्रीमत्**त्रयोदशशतिके**ऽपि तदन्य[17]पटलं न दृश्यत इति [18]**चतुःशतिकालोत्तराद्** वस्तुश्रद्धालुभिः प्रक्षिप्तत्वादुपेक्ष्य[19]मेव । **द्विशतिकादि**[20] **चतुःशति**[21]**कादिकं** च कालोत्तरं तत्रापि विद्यत एव । यदुक्तं तत्समाप्तिपटले[22] —

[23]"पुत्रस्नेहान्मया पूर्वमाख्यातं ते शतद्वयम् ।
[24]सूत्रभेदेन तैः सार्धैः [शतकैश्च] त्रिभिः शुभम् ॥
भूयश्चतुर्भिराख्यातं तत्त्रयो[25]दशभिस्त्वयम् ॥"

इत्यदोषः ॥४॥

इति [भट्टनारायणकण्ठात्मज] भट्टरामकण्ठविरचितायां [श्रीमत्सार्धत्रिशति]-
कालोत्तरवृत्तौ अग्निकार्यप्रकरणं षष्ठं [समाप्तम्] ॥

इति षष्ठः पटलः ।

---

[1] किरणे क्रिया० ४.४० उ०
[2] दशांशतो हुनेन्मन्त्रान् — मु० किरणपाठः ।
[3] सार्धत्रि० ८.२२ उ० — २४ पू०
[4] पूर्णाहुतिं प्रधानं च — अ
[5] स्मरन्तं — अ
[6] सार्धत्रि० — ७.६ पू०
[7] परमं प्रश्न० — अ, आ
[8] विभानाच्छिन्न०—अ; विभानाच्छिन्न०—आ
[9] परिग्रहानु ० — अ, आ
[10] तदधस्त्यक्तम् — अ; तदस्त्यक्तम् — आ
[11] मूर्खक्षिप्तान्य० — अ, आ
[12] वाक्यपन्तवतस्य — आ
[13] अत्रैकी० — अ
[14] आकरो न लभ्यते ।
[15] चैतदापेक्षप्रति० — अ
[16] ०भूते — अ, आ
[17] ०पटलवन्न — आ
[18] चतुःशक्तिकालो० — अ
[19] ०मेवं द्विशति० — आ
[20] चकारोऽधिकः — आ
[21] ०कादिकमपि कालोत्तरम् — आ
[22] आकरो न लभ्यते ।
[23] पुत्रस्नेहाजयापूर्वं व्याख्यातं — आ
[24] पुत्रसूत्रभेदेन तैः सार्धं त्रिभिः शुभ — अ; पुत्रसूत्रभेदेन तैः सार्धैस्त्रिभिः शुभम् — आ
[25] ०दशभिस्त्वमित्यदोषः — अ; ०दशभिस्त्विदम् इत्यदोषः — आ

सप्तमः पटलः

मण्डलविधानप्रकरणम्

तदियता दीक्षितानां नित्यकर्मोक्तम्। अधुना तेष्वेव मध्यात् कस्यचित् साधकस्य काम्यमुच्यते —

अतः परं प्रवक्ष्यामि मण्डलं [1]सार्वकामिकम्[2] ।

यतः सर्वकामप्रयोजनमेतत्, काम्ययागाङ्गमित्यर्थः। ननु पूर्वोऽपि काम्य एव। यदुक्तम्[3]— "एकावरणमेतत्तु सर्वकामार्थसाधनम्।" इति। सत्यम्। किं तु सर्वेभ्यः कामेभ्यः दर्शपूर्णमासादिविधिवन्नित्योऽपि। अयं च काम्य एव। अत एव तयोस्तीर्थे[4]स्नाननित्यस्नानयोरिव [5]तन्त्रेणैवानुष्ठानसिद्धिः। अत्र तु लिङ्गार्चनाद्भेदेनेति[6]॥

अथ तदुप[7]क्रमः —

भूमिसंशोधनं कृत्वा शास्त्रदृष्टेन कर्मणा ॥१॥

तच्च न लोकसिद्धे[8]नैवोपलेपनादिना; यावत् **शास्त्रदृष्टेन कर्मणा**। यच्छ्रूयते[9] —

"अथाङ्गारप्रसिद्ध्यर्थं [10]जलान्तं शोधयेन्महीम्।
[11]शल्यशङ्का[12]निवृत्तिः स्यात्तद्वदत्रोपलेपनम्[13]॥" इति[14] ॥१॥

अधिवासं ततः कृत्वा [15]नक्षत्रे [16]गुरुणान्विते ।

पूर्वेद्युर्यागाधिवासं[17] कुर्यात्। तत्र प्राग्विघ्नोच्चारणादि **कृत्वा** कलशमवस्थापयेत्। यद्वक्ष्यति **अस्त्रयागप्रकरणे**[18] —

"पूर्वोक्ते भूतले शुद्धे गोमयेनोपलेपिते।
मन्त्रद्रव्यसमायुक्तं कलशं वारिपूरितम्॥

---

[1] 'सार्वकामिकम्' इति नास्ति — अ, आ
[2] सर्वकामिकम् — इ, ई, मु
[3] सार्धत्रि० ५.६ पू०
[4] स्नानं . . . योरिव — अ
[5] तन्त्रे नैवानु० — अ
[6] ०नाभेदेनेति — आ
[7] ०क्रमं — अ
[8] ०नैवाद्यलोपादिना — अ
[9] आकरो न लभ्यते।
[10] जालान्तं — अ
[11] शाल्यः शङ्का० — अ
[12] निवृत्ती स्या० — अ; निवृत्ति स्या० — आ
[13] स्यात्तद्वदत्रोपते च हि — अ, आ
[14] इतिशब्दो नास्ति — अ
[15] नक्षत्रशकुनान्विते — इ
[16] गुरुनान्विते — आ; शकुनान्विते — ई, मु
[17] ०र्यागोधिपतिं — अ, आ
[18] सार्धत्रि० २७.१ उ०, २

दिश्यैशान्यां [1]स्थापयेत्तन्निश्छिद्रं करकं परम्।" इति।
[2]हेतिवचनसामर्थ्यादितद्वाक्यमिहापि [3]संबध्यते। [4]"तेषामपि चातिगुरवो [5]राजमाषा न भक्ष्याः" इति[वत्]। तत्र [6]चास्त्रस्यैव नायकत्वादेक एवासौ [7]हेतिनायकास्त्रयोर्भेदतोऽर्थाद्द्वावेव कलशाविति। ततो वास्तुमध्ये देवतार्चनमग्निकर्म च प्रकृतिवत् कुर्यादित्यधिवासार्थः॥

अथ द्वितीये दिवसे —

आलिखेन्मण्डलं प्राज्ञः सर्वसिद्धिप्रदं शुभम् ॥२॥

प्रोक्तफलानु[8]वशादेतत्कथं कीदृशं चालिखेत् —

सूत्रेण [9]सुमितं कृत्वा [10]चतुरश्रं समन्ततः।
मध्ये पद्मं [11]प्रतिष्ठाप्यमष्टपत्रं सकर्णिकम् ॥३॥
एकहस्तं द्विहस्तं [12]वा चतुर्हस्तमथापि वा।
स्वतन्त्रविहितं प्राज्ञो लिखेदावरणत्रयम् ॥४॥
वाहयेत्पश्चिम[13]द्वारमाचार्यः सुसमाहितः।

एतच्च गर्भावरणसहितावरणत्रयेण [14]वीथित्रयेण द्वारैश्च युक्तं द्वाविंश[15]द्भागैरन्यथानुपपत्त्या कार्यम्। [16]तत्र **मध्ये पद्मम् एकहस्तादिभेदभिन्नम्**। बाह्यावरणद्वये कृतजगत्समा[:] स्वस्तिका एव; लोकपालतदस्त्रपूजाधिकरणत्वेन तेषां सिद्धेः। यदुक्तं श्रीमत्**किरणे**[17] —

"लोकेशाः [18]स्वस्तिकेष्विज्याश्चतुर्भाग[19]विभाजिते।" इति।

षोडशस्वस्तिकमेतन्मण्डलमिति। अत्र च पद्मादीनां लक्षणं रजसां च संहितान्तरादेव ग्राह्यमित्याह — "**स्वतन्त्रविहितं प्राज्ञो लिखेदावरणत्रयम्**" इति। प्रवेशार्थं च पश्चिम[20]द्वारमावाहयेत्॥

[21]आग्नेय्यां कारयेत्कुण्डं हस्तमात्रप्रमाणतः ॥५॥
यज्ञकर्मविधिं कुर्यात्सुसमिद्धे हुताशने।

---

[1] स्थापयेन्निच्छिद्रकरणं शुभम्। — अ; स्थापयेन्तन्निच्छिद्रकरणं शुभम् — आ
[2] हेतुवचनसामर्थ्या० — अ, आ
[3] संबन्ध्य तेषां० — अ
[4] तेषादापि चाति — आ
[5] राजमाषान्नभक्ष्याः — अ, आ
[6] शास्त्रस्यैव — अ
[7] हेतुना यतस्त्रयोर्भेदतार्था द्वावेव — अ; हेतुनायकस्त्रयोर्भेदतार्था द्वावेव — आ
[8] ०वशादेवात्र कथं — आ
[9] सुमितिं — आ
[10] चतुरश्रसम० — इ
[11] प्रतिष्ठाप्य अष्ट० — इ, ई
[12] 'वा' इति नास्ति — अ
[13] द्वार आचार्यः — अ, इ, मु
[14] विधित्रयेण — आ
[15] ०त्यागैरन्यथा — अ, आ
[16] तन्त्रमध्ये — आ
[17] किरणे क्रिया० ८.११ उ०
[18] स्वस्तिकेष्वज्याः — अ; स्वस्तिकैः पूज्याः — मु० किरणपाठः।
[19] ०विभाजितेष्विति — अ; ०विवर्जितैः — मु किरणपाठः
[20] ०द्वारं वाहयेत् — आ
[21] ५ उत्तरार्धं ६ पूर्वार्धं च न स्तः — इ, ई, मु

ननु [1]सूत्रमेतदसंबद्धमेव, अग्निकर्मणोऽश्रुतत्वात्। [2]स्नानार्घ्यपात्रादिवत् [3]तदपि प्रकृतितोऽर्चनप्रकरणादुपतिष्ठत एवेति। तर्हि विशेषान्तरस्य बाधकं भविष्यति। सत्यम्। यदि तत्र दिगन्तरमानात्तु युक्तं [4]कुण्डं स्यात् तर्हि विशेषकः स्यात्। सत्यम्। अत एवैतत्तेन संबध्यत इति दर्शितम्। यदाहुः[5]—"अनार[6]भ्याधीतानां प्रकृतिगामित्वमेव" इति। पाठेऽत्र प्रयोजनं प्रोक्तम्। ततो मण्डलमालिख्य तत्र पद्मे [7]प्रागुक्तवदासनं शक्त्यावरणान्तं विन्यस्येश्वरमर्चयेत्॥

ततो गर्भावरणम्—

पूर्वादारभ्य वक्त्रादीन्विन्यसेदनुपूर्वशः॥६॥

यथाप्रधानम्। ततश्च तत्पुरु[8]षाघोरौ पूर्वदक्षिणयो[9]र्वामदेवाजातौ उत्तरपश्चिमयोः, पूर्व[10]तरमीशानमीशान्याम्। तदपेक्षया तासामेव प्रधान्यं यतः। [11]केचिदीशानं मध्य इत्याहुः। यदुक्तं श्रीमत्**किरणे**[12]—ईशः [13]स्फटिकवन्मध्ये" इति। [14]तत्त्वयुक्तम्। अत्रैव स्थाने विनियोगस्य सिद्धत्वात्। इह हि पूर्वतः [15]पुरुषादीनीति[16]वत् तथैव **वक्त्रादीनि** इत्युक्तम्। तदीशानस्य मूर्धत्वोपलक्षणार्थम्। ततश्च मूर्धत्वादेव तस्य शिरःपूजास्थान एवैशान्यां विनियोगो युक्तः। [17]समाख्यया च। यदुक्तं श्रीमत्**त्रयोदशशतिके**—

"[18]सद्यं पश्चिमभागे तु वामं चोत्तरतो न्यसेत्।
दक्षिणे बहुरूपं च पुरुषं पूर्वतस्तथा॥
ईशानमूर्ध्वभागे तु पञ्चधैव प्रकल्पयेत्।" इति।

तदिदमुक्तमस्मद्गुरुभिरत्र **पद्धतौ**[19] "ईशपूर्वे [20]यजेद्दिक्षु ब्रह्माणि" इति॥६॥

[21]पवित्राणि पुरा न्यस्य शिवाङ्गानि न्यसेत्ततः।

---

[1] पात्रे तत्सूत्रसंबन्धमेव — अ; पात्रैतत्सूत्रसंबन्धमेव — आ
[2] स्थानार्घ्यं० — अ
[3] तद्विप्रकृतितो — अ
[4] कुण्ठं — अ
[5] जैमिनीयन्यायमालाविस्तरे ५, ३, ६
[6] ०भ्याधिकानां — अ, आ
[7] प्रागुक्तपद्मवदासनं — अ; सार्धत्रि० ५.१ उ० —३
[8] ०षाघोरेण पूर्व० — अ, आ
[9] ०र्वामजाता उत्तर० — अ
[10] ०तरमीशान्यां — अ
[11] "केचिदीशानं मध्य इत्याहुः। यदुक्तं श्रीमत्किरणे 'ईशं स्फटिकवन्मध्ये' इति। तदयुक्तम्। अत्रैव स्थाने विनियोगस्य सिद्धत्वात्। इह हि पूर्वतः पुरुषादीनि वक्त्रतयेत्युक्तम्। तदीशानस्य मूर्धत्वोपलक्षणार्थम्। ततश्च मूर्धत्वादेव तस्य शिरःपूजास्थान एवैशान्यां विनियोगो युक्तः इत्युक्तं श्रीमत्सार्धत्रिशतिवृत्तिकारेण" क्रियाक्रमद्योतिकाव्याख्या प्रभा पृ० ११०
[12] किरणे क्रिया० — ८.३० उ०
[13] स्फटिकन्मध्ये — अ, आ
[14] तत्वमयुक्तम् — आ
[15] पुरुषादीनितिवत् — अ
[16] ०वद्वत्तथैवद्वक्त्रादीनी० — आ
[17] समाख्या च यदुक्ता श्री० — अ
[18] सत्यं — अ
[19] आकरो न लभ्यते।
[20] यमेद्द्वप्सु — अ; य . . प्सु — आ
[21] इदमर्धं नास्ति — इ, ई, मु

ननु [1]पूर्वोत्तरवाक्याभ्यां गतम्। न, अन्यार्थत्वात्। ब्रह्मणां तावत्पवित्रत्वकथनं प्रायश्चित्तादौ विनियोगप्रदर्शनार्थम्। यदुक्तं श्रीमत्**पौष्करे** —

"सर्वेषामेव पापानां संकरे समुपस्थिते।
पवित्राणि जपेत्पञ्च एकं वा बहुरूपिणम्॥" इति।

[2]**शिव**पदमपि च यदङ्गविशेषत्वे[3]नोपात्तं, तदपि नाङ्गान्तर[4]व्यावृत्त्यर्थमसंभवात्। अपि तु शिवस्य शिवतायां यदङ्गं प्रधानं सर्वज्ञतालक्षणं [5]नेत्रं, तदेव पश्चाद् **न्यसेद्** इति। न तु **ततः** अनन्तरं सदाशिवभट्टारकमिति [6]प्रकृतिप्राप्तस्य क्रमस्य बाधः। यदुक्तम्[7] —

"नेत्रं दत्त्वा तदावाह्यो देवदेवः सदाशिवः।" इति।

बहुवचनं तु तस्य प्राधान्यदर्शनार्थम्। लोके सिद्धत्वात्। यदाहुः — "पुनरेवेह नेत्रमङ्गत्वेन कथितमङ्गेभ्यः, प्रागुद्धारे [तथा] प्रोक्तत्वात्,

'[8]ब्रह्माणि च [9]शिवं [10]साङ्गं नेत्रं पाशुपतं च यत्।
समासा[11]त्कथितः [12]सर्वो मन्त्रोद्धारस्त्वयं शुभः॥'

इति [13]देवोक्त्यामेवात्र तथा कथितत्वात्। अत एव तत्र तद्भेदकथनं [14]'ब्राह्मणा आयाताः काश्यपश्च' इति [15]तत्प्राधान्यख्यापनार्थमेव" इत्यदोषः।

ननु नैवेह तत्, पश्चादपि नेत्रस्य भोगस्थाने विनियोगश्रुत्यभावादिति केचित्। तदयुक्तम्। इयमस्त्येव श्रुतिर्यतः। तर्हि कस्मिन्स्थानेऽस्य विनियोगोऽस्ति। स्वस्थान एव, स्थानस्यापि विनियोजकत्वाच्चास्य यदेव [16]शिरसो मूर्ध्नश्च तदेव [17]तदविनाभावसिद्धे सिद्धमित्यदोषः। न्यायादेव विनियोगः। यदुक्तं श्रीमत्**त्रयोदशशतिके** —

"वह्नितो हृदयं न्यस्य दलैशाने शिरो न्यसेत्।
नैर्ऋत्यां तु शिखा ज्ञेया [18]कवचो वायुगोचरे॥
नेत्रस्थाने न्यसेन्नेत्रमस्त्रं पूर्वदलादितः।" इति।

तदिदमुक्तमस्मद्गुरुभिरत्र [19]**पद्धतौ**[20] "ईशाने लोचनम्" इति॥

आग्नेय्यां हृदयं [21]न्यस्य ऐशान्यां तु शिरस्तथा॥७॥
नैर्ऋत्यां तु शिखा ज्ञेया कवचं वायुगोचरे।
अस्त्रं दिक्ष्वथ विन्यस्य कर्णिकायां सदाशिवम्॥८॥

---

[1] पूर्वोक्ताभ्यां गतन्नान्यर्थत्वाद्ब्रह्मणां — अ
[2] शिवमपि — अ
[3] ०नोत्पत्ति तदपि — अ, आ
[4] ०व्यावृत्त्यर्थं संभवादिति तदपि तु — अ
[5] नेत्र देव प...न्यसे — अ; नेत्र देव प० — आ
[6] सार्धत्रि० ५.४ पू०
[7] सार्धत्रि० २.११ पू०
[8] सार्धत्रि० १.१४
[9] 'शिवं' इति नास्ति — अ, आ
[10] साङ्गो — आ
[11] ०त्कथितं — अ
[12] सर्वमन्त्रोद्धार स्वयं शुभ — अ
[13] देवोच्यामेवात्र — आ
[14] ब्रह्मणा — अ, आ; लौ० न्या० साहस्री २०४ ब्राह्मणवसिष्ठन्यायं पश्यत।
[15] तत्प्रधानख्यापनार्थ० — अ
[16] शिकसोद्धूध्नश्च — आ
[17] तदधिनाभाव० — अ
[18] कवचं वायु० — अ
[19] पद्धतौ तौ ईशाने — अ
[20] ग्रन्थोऽयं न लभ्यते।
[21] न्यसेदैशान्यां तु — अ, मु

ततो [1]हृदयाद्यङ्गान्याग्नेयादिषु **विन्यस्य कर्णिकायां** निष्कलं न्यसेत् पूर्वन्यस्तमप्यावरणकलाभिरा[2]वृतत्वेनानपेतसकलभावं यत इत्युक्तम्। श्रीमन्**मतङ्गे**ऽपि[3] —

"शुद्धस्फटिकसंकाशं [4]स्वाङ्गोत्थकिरणोज्ज्वलम्।
[5]ध्यायेत्तं पञ्चमूर्धानं पुनर्देवं महेश्वरम्॥
त्रिपञ्चनयनं सौम्यं सौम्यास्यं चारुनासिकम्।
खण्डेन्दुमण्डितं नाथं मकुटेन सुतेजसा॥
दशबाहुं विशालाक्षं नागयज्ञोपवीतिनम्।
[6]तस्मिन्मन्त्रतनुं ध्यात्वा परं तेजो निवेशयेत्।" इति।

[7]नास्य गतार्थता। नापि **सदाशिव**पदेनात्र ईशानमिति व्याख्येयम्। तस्याधुना विन्यासायोगात्, न च पूर्वं, [8]तन्न्यासश्रुतेरभाव इति दर्शितम्॥७–८॥

तदेवम् —

गर्भन्यासविधिः प्रोक्तो द्वितीयावरणे शृणु।
हृदा [9]पूर्वं समारभ्य लोकपालान्प्रपूजयेत्॥९॥
[10]**[तृतीयावरणेऽस्त्राणि स्वमन्त्रेण प्रपूजयेत्।]**

लोकपालद्वारेणात्र रुद्र एव पूज्य इत्युक्तम्। **तृतीयावरणेऽस्त्राणि**। अस्त्रेण केन पूजयेत्। लोकपालास्त्रद्वारेणास्त्रं पूज्यं, **स्वमन्त्रेण** इत्युक्तं भवति। ततश्च हृदय[11]स्यात्र व्युदासः॥

अथ किमत्र [12]स्नानविशिष्टकरणाद्यङ्गजातमनुक्त[13]त्वादकर्तव्यमेव। [14]नेत्युच्यते —

संक्षेपेण मया स्कन्द विधानं परिकीर्तितम्॥१०॥
अनुक्तं [15]यद्भवेत्किंचित्तत्सर्वं मूलमाश्रयेत्।

[16]प्रकृतौ प्रागननुवादपरिहारार्थं तत् [17]**संक्षेपेण मया** एतन्मण्डलविधानमुक्तम्। **यत्** तत्र **अनुक्तं** [18]स्नानाद्यङ्गं **तत्सर्वं** मूले प्रकृतौ भवं [19]**मूलमाश्रयेत्** [20]प्रकृतिस्थं यदपेक्षणीयमित्यर्थः। यदाहुः[21] —

---

[1] हृदयान्यङ्गा — अ
[2] ०वृतत्वेन तप्ते सकल० — अ
[3] मतङ्ग० क्रिया० ३.५८ — ६० पू०, ६१ पू०
[4] स्वाङ्गोर्थं किर० — अ
[5] ध्यायेत्तत्पञ्च० — अ
[6] तस्मान्मन्त्रं ततो ध्यात्वा — अ; तस्मान्नेत्रं ततो ध्यात्वा — आ
[7] नास्त्यगतार्थता — अ
[8] तन्न्यासे श्रुतेराभास इति दर्शितम् — अ
[9] पूर्वात्समा० — इ, ई, मु.
[10] इदमर्धं नास्ति मुद्रिते।
[11] ०स्यात्राप्युदासः — अ
[12] स्थानविशिष्टविकरण० — अ
[13] ०त्वादितिकर्तव्य० — अ
[14] 'नेत्युच्यते' इत्यतः पूर्वं 'कर्तव्यं' इत्यधिकम् — अ, आ
[15] यद्भवेत्कि च तत्सर्वं — अ, आ
[16] प्रकृतिप्रागनुपादपरिहारं तत् — अ; प्रकृतिप्रा० — आ
[17] संक्षेपण मयेतन्मण्डल० — अ
[18] स्नानाद्यं तत्सर्वं — आ
[19] मलमाश्र० — अ, आ
[20] प्रकृतिस्थं मदपेक्षणीय० — अ; प्रकृतिस्थ.. दक्षेपणीय० — आ
[21] लौ० न्या० साहस्री ५९४

"प्रकृतिवद्विकृतिः कर्तव्या" इति न्याय[1]विदः। प्रकृतिश्चात्र [2]प्रागुक्तं नित्यार्चनं, तस्य सर्वेतिकर्तव्यतायुक्तत्वादित्युक्तम्। न तु **वातुलादपेक्षणीयमिति** व्याख्येयम्। तस्यातिविस्तृतत्वादुपक्रम एवोपसंहृतत्वादिति॥

यद्येवं तत एव दीक्षायामपि प्रकृतितोऽङ्गजातस्य [3]प्राप्तेर्मण्डलन्यासस्य सिद्धिरिति। तदर्थमेतत् —

[4]एवं विधिविधानज्ञो दीक्षाकर्म समाचरेत्॥११॥

एवं योऽस्य मण्डलस्य विधिं विजानाति, स एव **दीक्षाकर्म समाचरेद्** इति। तत्रापि मण्डलं कर्तव्यमित्यर्थः। अनेनैव च [5]व्याख्यातस्य प्रकरणस्योप[6]संहारो व्याख्येयस्य चोपक्रमसिद्धिरिति। ततश्च [7]प्राग्वदत्र कलशस्नानं कुर्यात्। यद्वक्ष्यत्यत्र यागान्ते[8] —

"ततोऽभिषेचयेत्तत्र कुम्भेन" इति॥११॥

इति भट्टनारायणकण्ठात्मजभट्टरामा[कण्ठ]विरचितायां श्री[मत्सार्धत्रिशति]कालोत्तरवृत्तौ मण्डलविधानप्रकरणं सप्तमं [समाप्तम्]

इति सप्तमः पटलः

---

[1] विदः कृतिश्चात्र प्रागुक्तिनित्यार्चनमतस्य — अ

[2] पञ्चमप्रकरणे

[3] प्राप्ते मण्डल० — अ

[4] एवं विधिं विधा०—इ; एवंविधविधा० — मु

[5] व्याख्यानस्य — आ

[6] ०संहारे — आ

[7] सार्धत्रि० ३.१ पू० वृत्तावुक्तवत्

[8] सार्धत्रि० २७.२० पू०

अष्टमः पटलः

दीक्षाप्रकरणम्

तदेवं दीक्षितानुष्ठेयं [1]क्रियाकाण्डमुक्तम्। अधुना तस्यैव दीक्षितत्वसंपत्त्यर्थमाचार्यानुष्ठेयदीक्षाकाण्डमुच्यते —

अथ दीक्षां प्रवक्ष्यामि पञ्चतत्त्वव्यवस्थिताम्।

इह हि [2]"अल्पायुषस्त्विमे मर्त्याः' [3]इत्यनुक्रमाद्दीक्षा[4]संस्कार्या मलपरिपाकशक्तिपातयुक्ताः पुमांसः, तेषां च [5]सापि द्विविधैवात्र [6]वक्ष्यते समयदीक्षा, निर्वाणदीक्षा च। तत्र प्रथमं समयदीक्षेति दर्शयितुम् **अथ**शब्दोऽत्र क्रमार्थ उपात्तः।

अथ तावदेषां [7]यावत् स्वबाह्यशरीरारम्भकेषु [8]पृथिव्यादितत्त्वेषु विशेषतः संस्कारतयाव[9]स्थिता दीक्षा, [10]न तूत्क्रान्तिवत्तद्विच्छेदकत्वेन। तदेवं [11]पञ्चतत्त्वप्रसङ्गतो वक्ष्यामि समयदीक्षां वक्ष्यामीत्यर्थः। यदुक्तं श्रीमत्**त्रयोदशशतिके** —

"पञ्चतत्त्वस्थितं वत्स शरीरं सर्वजन्तुषु।
शोधितव्यं प्रयत्नेन दीक्षाकाले ह्युपस्थिते॥" इति।

[12]इहापि वक्ष्यति[13] —

"एवं समाप्यते दीक्षा जननादिविवर्जिता।" इति।

तथा एष संस्कारः [14]उक्तः इति प्रथम इत्यर्थः। यदुक्तं श्रीमत्**त्रयोदशशतिके** –

"एषा तु प्रथमा दीक्षा भूताख्या परिकीर्तिता।" इति।

अनया भूतसंबन्धिनोऽस्य शरीरस्य शुक्लशोणितादि[15]रूपत्वेनाशुद्धात्मनां शुद्धमन्त्रसंस्काराच्चात्राज्ञत्वलक्षणं बन्धत्वं सद्योजाताद्यभिव्यक्तिस्थान[16]शुद्धविद्याकलाधिष्ठानेन [17]निवर्त्यते, सर्वशास्त्रश्रवणानुष्ठानाधिकारित्वं च जन्यत इति प्रथमत्वमस्याः, अनन्तरं निर्वाणदीक्षाधिकारादिति॥

---

[1] क्रियामण्डलमुक्तम् — अ
[2] सार्धत्रि० १.२ पू०
[3] इत्याद्यनु० — आ
[4] ०संस्कार्यमल० — अ, आ
[5] सापि वैवात्र — अ; सा द्विविधैवात्र—आ
[6] सार्धत्रि० ८.१–१३ पू० समयदीक्षा; १३ उ० –३३ पू० निर्वाणदीक्षा
[7] यावञ्च स्वो बाह्य० — आ
[8] पृथिव्यादिषु तत्त्वेषु — आ
[9] स्थिताद्दीक्षितानुत्क्रान्ति० — अ
[10] न ऋत्क्रान्तिपदद्विच्छेद०
[11] पञ्चत्वप्रसङ्गतां — अ, आ
[12] इष्टापि — अ
[13] सार्धत्रि० ८.११ उ०
[14] उक्तम् इति — आ
[15] ०रूपत्वेन शुद्धा० — अ, आ
[16] ०शुद्धिविद्या० — अ
[17] निर्वर्त्यते — अ, आ

अथास्य प्रतिज्ञासूत्रस्यार्थघटना —

पृथिव्यापस्तथा तेजो वायु[1]राकाशमेव च ॥१॥
पञ्चैतानि च तत्त्वानि यैर्व्याप्तमखिलं जगत् ।

अत्र मनुष्याणामेव संस्कार्यत्वेनोप[2]क्रमाज्जगच्छब्देन ब्रह्माण्डा[3]न्तर्वर्ती चतुर्दशविधो भूतसर्गो विवक्षितः । यदुक्तं सांख्यैः[4] —

"अष्टविकल्पो दैवस्तैर्यग्योनश्च[5] पञ्चधा भवति ।
मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ॥" इति ।

[6]**सर्वतत्त्वानि तत्रैव [7]द्रष्टव्यानि तु साधकैः ॥२॥**

[8]न तु मायान्तानि । न केवलं तैरेवैतज्जगद्व्याप्तम् । यावत् **सर्वतत्त्वानि** तु[9] **साधकैः तत्र** पृथिव्यादि[10]कलान्तानि पुर्यष्टकतयावस्थिततत्वेन **द्रष्टव्यान्येव**। मायापि तदापूरकतया, पुरुषस्तु बध्यत्वेन, [11]शुद्धविद्यापि [12]वाग्भूततयैवेत्युक्तम् । विद्येश्वरसकलनिष्कलास्त्वधिष्ठातृकतयेति दीक्षां साधयन्त्याचार्याः, तैः **साधकैः** इत्थं मन्तव्यमिति । शुद्धविद्या तु यद्यपि शुद्धाध्वनि [13]विद्येशेभ्योऽप्यूर्ध्वं [14]निवृत्तिभुवनाद्यात्मना क्रमेण केवलं सद्योजाताद्युपासकानां भोगप्रदत्वे[15]नावस्थितेति वक्ष्यति **प्रासादनिर्णयप्रकरणे**[16] । तथाप्यत्राशुद्धेऽप्यध्वनि [17]वागात्मना स्थितेत्युक्तम् ॥२॥

वागात्मनावस्थिताप्यत्र[18] कस्मिंश्चित्स्थाने कलाभेदेन कथंचिदवस्थिता । न तु पुर्यष्टकादिवत् सर्वत्रैकरूपेणेत्युच्यते —

ब्रह्माण्डे तु निवृत्तिर्वै शतरुद्रावधिस्थिता[19] ।
तदूर्ध्वे तु प्रतिष्ठा स्याद्यावदव्यक्तगोचरम् ॥३॥
ततो विद्या नियुक्ता सा यावद्विद्येश्वरान्तिकम् ।
शान्तिस्तदूर्ध्वमध्वान्ते शक्तिरेव [20]शिवे पदे ॥४॥

शतरुद्रावधौ ब्रह्माण्डे निवृत्त्यात्मना वाग्रूपेणावस्थिता । तावत्यध्वनि वागात्मनः पुरुषसंकल्पस्य

---

[1] ०राकारमेव — अ
[2] ०क्रमत्वाज्जग० — आ
[3] ०न्तर्वर्तिचतुर्विधो — अ
[4] सांख्यका० ५३
[5] ०स्तैर्यज्ञोन्यश्च — अ; ०स्तैर्यग्योन्यश्च—आ
[6] इदमर्धं 'अ, आ' मातृकयोर्न दृश्यते ।
[7] दृष्टव्यानि — मु
[8] ननु माया० — अ
[9] तु दृष्टव्यानि तु साधकैः — आ
[10] कलान्तरादिपुर्यष्टक० —अ
[11] शुद्धतविद्यापि — आ
[12] वाभूपतयैवे० — अ, आ
[13] विद्येशोऽन्योऽप्यूर्ध्वं — अ, आ
[14] निवर्त्य भुवना० — अ; निवृत्त्या भुवना० — आ
[15] ०नावस्थितेरिति — अ, आ
[16] सार्धत्रि० द्वाविंशतितमे प्रकरणे — १२, १३ पू० वृत्तौ । ; प्रासादविज्ञानप्रकरणे—अ, आ
[17] 'वागात्मना स्थितेत्युक्तम्' इति नास्ति — — अ
[18] ०स्थिताप्यस्मित्र — आ
[19] ०वधिस्तथा — अ, आ, मु
[20] शिवपदे — मु

यथासंकल्पितार्थप्रतिष्ठायै निवृत्तिरसमर्थत्वात् [1]तत्साधकेभ्योऽत्र दारिद्र्य[2]दुःखादयो न भवेयुरेवेति। **तदूर्ध्वे** शतरुद्रादौ यावद्गुणतत्त्वेश्वरश्रीकण्ठभुवनं तावत् **प्रतिष्ठा** स्थिता **स्यात्**। यतोऽसौ संकल्पस्तत्र प्रतिष्ठित एव। **ततः** गुण[3]तत्त्वादूर्ध्वे शुद्धविद्येश्वरभुवनम्। शुद्धाशुद्धभुवनेषु **विद्या** [4]**सा नियुक्ता** भगवतासौ संकल्पः सर्वज्ञत्वमेषां सर्वार्थविद्योतकः प्रतिष्ठितः, मायागर्भाधिकारिणां [5]मण्डल्यादीनां सर्वज्ञत्वात्। यद्येवं तदधोऽपि शतरुद्राणां [6]तदेवाधिपत्यं, तेषा[7]मप्यत्रैवावस्थितानां सतां तथानुगृहीतत्वात्। यदुक्तं श्रीमद्भार्गवे[8] —

"अन्यतन्त्रेषु [9]यद्युक्ता धर्मा[10]धर्मक्षयान्नराः।
तेऽत्र [11]रुद्राश्च संप्रोक्ता गुणत्रयविवर्जिताः॥" इति।

मध्यमप्रलये च गुणानामप्युपसंहृतत्वात्तेषामत्रैव [12]स्थितिः। यदुक्तं श्रीमन्मतङ्गे[13] — "रुद्रादयोऽपि [14]तेषामत्रोदितं पदम्" इत्यदोषः। तदूर्ध्वे **शान्तिः** ईश्वरसदाशिवपदे स्थिता। [15]तद्भुवनवासिनां तत्संकल्पस्य भोगरागाद्यभावेन शान्तत्वादिति। [16]ततः **अध्वान्ते** [17]परमे पदे तच्छक्तिरेव स्थितेति॥३–४॥

अज्ञात्वैतानि तत्त्वानि यो दीक्षां कर्तुमिच्छति।
वृथा परिश्रमस्तस्य नैव तत्फलमाप्नुयात्॥५॥

एवं शुद्धविद्याकलाधिष्ठितानि [18]**एतानि तत्त्वानि** ज्ञात्वा दीक्षा कार्येति [19]ज्ञानं सिद्धम्। एतज्ज्ञानं विनानुष्ठानासंभवात्॥५॥

यथा [20]चैवं तेषां तानि तत्त्वतया [21]कलाभेदेनाधिष्ठितान्येतानि तथा तद्देहारम्भकाणि भूतान्यपीत्युच्यन्ते —

निवृत्तिः [22]पृथिवी ज्ञेया प्रतिष्ठा आप उच्यते।
विद्यां तेजो विजानीयाद्वायुः शान्तिः [23]प्रकीर्तितः॥६॥

---

[1] ०तत्सा. . द्येभ्योऽत्र—अ; तत्तत्साभ्योऽत्र—आ
[2] ०दुःखादधो न — अ
[3] ०तत्त्वात्पुरस्त्वे शुद्ध० — अ
[4] सातियुक्ता — आ
[5] मण्डलादीनां — अ, आ
[6] तदवधि सत्यां — अ, आ
[7] ०मप्यत्रैव च स्थितानां — अ
[8] ग्रन्थोऽयं न लभ्यते।; मृगेन्द्रे ज्ञानपादे २.११ श्लोकवृत्तौ नारायाणकण्ठेन भार्गवोत्तरे इति निर्दिश्यायं श्लोक उद्धृतः।
[9] यदुक्ता — आ
[10] ०धर्माक्षया० — अ, आ
[11] रुद्राः सं०—अ; रुद्राणां च प्रोक्ता गुण०—आ
[12] स्थितम् — अ, आ
[13] मध्यमप्रलये गुणानामुपसंहृतत्वाच्छतरुद्रादीनामव्यक्तवर्तिश्रीकण्ठभुवने वासः प्रोक्तः मतङ्गे विद्यापादे २५.५१ तमश्लोके।
[14] 'तेषामत्रोदितं पदम्' इत्ययं पादः मतङ्ग० विद्या० ४. ६३ उत्तरार्धे 'सदाशिवार्पितधियस्तेषामत्रोदितं पदम्' इति दृश्यते।
[15] तत्सवनवासिनां — अ
[16] ततोर्ध्वान्ते — अ
[17] परमपदे — आ
[18] एतानि इयं नी कार्येति — आ
[19] ज्ञानसिद्धमेतज्ज्ञानं — अ, आ
[20] चैतेषां —अ
[21] भेदान्येतानि तथा — अ
[22] प्रतिष्ठा ज्ञेया — अ
[23] प्रकीर्तिता — आ

[1]शान्त्यतीता भवेद्व्योम [2]तत्परं शान्तमव्ययम् ।
[3]तं विदित्वा महासेन श्वपचानपि दीक्षयेत् ॥७॥

पृथिव्याः परमाणूनां स्वतो धूल्यात्मना शरीरसंपत्तौ निवृत्तिस्वभावत्वान्निवृत्तित्वम् । जलसंयोगात्तु तत्र तेषां प्रतिष्ठितत्वाज्जलस्य प्रतिष्ठात्वम् । प्रकाशकत्वात्तेजो विद्या । [4]वायुस्तु प्राणात्मना पापक्षयहेतुत्वादभ्यासतश्च [5]प्रशान्ताख्यप्राणायामरूपत्वात् शान्तिः । [6]शान्त्यतीता [7]त्वत्र व्योम सर्वोपाध्यतीतत्वादिति तद्वत्तथा[8]भूतनिष्कलशिवप्रतिरूपकमिव ज्ञात्वा श्वपचानपि दीक्षयेद् इत्यतिशयार्थः । अपिशब्दोपहितस्य[9] भावार्थस्य "अपि पर्वतं शिरसा [10]भिन्द्याद्" इत्यादाविव[11] परेऽतिशयप्रतिपादनार्थत्वेन विधिविषयत्वासंभवादिति शिरसा पर्वत[12]भेदवन्म्लेच्छश्वपचादिदीक्षणमत्रापि कर्तव्यमेवेति युक्तं [13]व्याख्यातुम् । न तु कुलाचार्यैरिव बलात्कर्तव्यमिति ॥६–७॥

एवं दीक्षाविषयवस्तुव्याप्तिं प्रदर्श्याथ दीक्षोपक्रमः —

निवृत्तिं हृदयेनैव[14] प्रतिष्ठां शिरसा गुरुः ।
शिवो विद्यां तु शिखया [15]शान्तिं वै कवचेन तु ॥८॥
शान्त्यतीतं परं व्योम [16]प्रासादेन तु होमयेत् ।

अत्र [17]मण्डलप्रकरण[18]स्थातिदेशोपदेशवाक्याभ्या[19]मातिदेशिकमौपदेशिकं [20]स्नानादि[21]मण्डलतर्पणान्तं च कर्म कृत्वा, गुरुः शिवः इति द्वयोः [22]कर्तृत्वश्रुतेः तत्सिद्ध्यर्थं [23]मण्डलस्थं [24]शिवमेवं ज्ञापयेत् । "भगवन्पूर्वमेव भगवता [25]गुर्वधिरूढेनाहं नियुक्तः । यथा —

---

[1] शान्त्यतीतं — अ, इ, ई, मु
[2] तत्फलं शान्त० — इ
[3] तद्विदित्वा — इ, मु
[4] वायुषस्तु — अ
[5] 'प्रशान्तप्राणायामः' स्वच्छन्दतन्त्रे ४.३२४, ३२५
[6] शान्त्यतीत्वं — अ; शान्त्यतीतं — आ
[7] तत्र — अ
[8] ०भूतं निष्कल० — आ
[9] ०हीतस्य — अ
[10] भिर्वाद् — अ
[11] इत्यादावपि — अ, आ
[12] ०भेदान्म्लेच्छ० — अ; ०भेदाम्लेच्छ०— आ
[13] व्याख्यातं चानुकूला० — अ; व्याख्यातम् ननु कुला० — आ
[14] 'नैव' इति नास्ति — अ, आ
[15] शक्तिं वै — अ, आ
[16] प्रासादेनैव होम० — इ, ई, मु
[17] सार्धत्रि० ७.१० उ०, ११ वृत्तौ
[18] ०स्थादिदेशोप० — आ
[19] ०मादेशिक० — अ, आ
[20] स्थानादि० — अ, आ
[21] ०मण्डलं तर्प० — अ
[22] कर्तृश्रुतेः — अ
[23] मण्डलमेव ज्ञाप० — अ
[24] शिवमेव — आ
[25] गुर्वधिकरूढे० — आ

[1]"अनुग्राह्यास्त्वया शिष्या मच्छक्त्या[2]घ्रातचेतसः।' इति।
तदमी त्वच्छक्तिपातलक्षणेन [3]युक्तत्वादनुग्रहीतुमुपक्रान्ताः। न [4]कारणान्तरेण [5]लोभादिनेति भगवानेव [6]सर्वार्थप्रदर्शी प्रमाणम्। [7]तन्मया विशेषतोऽधिष्ठेयेन [8]त्वयाहमेकाकारको भूत्वा [9]संपादयाम्येतत्। अन्यथा विद्येश्वरैरपि संपादयितुमशक्यम्। यतोऽत्रानुरूपां परमेश्व[10]रादाज्ञां प्राप्तां भावयित्वा य एवायं परमेश्वरो मण्डल[11]हेतुकर्तृतयाग्नौ [12]सोऽहमिति दीक्षाकर्मणोऽधिकरणत्वेन कलशे विघ्न[13]प्रोत्सारणाय प्रपञ्च[14]व्याप्त्यावस्थितः सोऽहमेव [15]तत्कारकैक्यात्। यच्चास्य [16]कर्तव्यं बन्ध[17]निवृत्त्यादि तन्ममापि, यच्चास्यात्र करणं मन्त्रजातं[18] तन्ममाप्यस्मिन् हस्ते व्यवस्थितं, यच्चास्य यथा [19]शुद्धविद्याकलाद्वारेणाधिष्ठेयं समस्तं तत्त्वभुवनादिकं तन्ममैव" इति भावयेत्, एवं ह्याचार्यः [20]स्वां तनुं शिवस्य तनुवत्। आचार्यश्च शिवः स्यात्, तद्भेदेनैककर्तृकतया प्रवृत्तेः। [21]या चेयमाचार्यस्य भोगयोग्या तनुः सदाशिवस्य भोग[22]योग्यत्वेनापि स्यात्, तद्द्वारेणोभयोर[23]त्र कर्तृत्वात्। श्रुतिरपि[24] —

"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं [25]स्वाद्वत्त्य[26]नश्नन्नन्यो अभिचाकशीति"। इति[27]।

सैषा परशिवतनुः दीक्षाङ्गत्वेनैव कार्या। पूजादौ परा इत्युक्तम्। [28]ततः शिवः स एव गृहीतव्रतादृष्टनिवेदितशुभ[29]स्वप्नानशुभादिनिष्कृतिककाष्ठसूचितदोष[30]निर्हरणान्दीक्षयेत्।

नन्वेतदत्रानुक्तमेव, [31]नाप्यतिदेशप्राप्तम्। सत्यम्। व्रतं तावत् सामान्यविशेषशास्त्रप्रसिद्ध-

---

[1] 'अनुग्राह्यास्तथा शिष्याः शास्त्रदृष्टेन कर्मणा'। सर्वज्ञानोत्तरे क्रिया० अभिषेकप्रकरणे २० पृ०; 'अनुग्राह्यास्त्वया शिष्याः शास्त्रदृष्टेन कर्मणा'। सोमशम्भुपद्धतौ आचार्याभिषेकविधौ २७ पृ०; क्रियाक्रमद्योतिकायां पृ० ३७९; 'अनुग्राह्यास्त्वया शिष्याः यथाशास्त्रमनिन्दिताः' क्रियाक्रमद्योतिकायां पृ० २४५; 'मच्छक्त्याधिष्ठिताः शिष्या अनुग्राह्यास्त्वया सदा'। मतङ्ग० क्रिया० ५.१६ वृत्तौ
[2] ०प्रातचेतसः — आ
[3] युक्तत्वाद्या तु गृहीतु० — अ, आ
[4] करणान्तरेण — अ
[5] लोहादि० — अ, आ
[6] सर्वार्थदर्शि — आ
[7] तन्मा विशेषितो — अ; तन्मा विशेषतो — आ
[8] त्वया ह एकाकारकी भूता — अ
[9] संपादयामेतत् — अ, आ
[10] ०राद्याज्ञां — अ
[11] ०हेतुकक्तृतयाग्नौ — आ
[12] सर्वमिति — अ, आ
[13] ०प्रोत्सरणाय — अ
[14] ०व्याप्तावस्थितः — अ, आ
[15] तत्कारकैक्याद . . . स्य — अ; तत्कारकैक्यादर्च्चास्य — आ
[16] कर्तव्यबन्ध० — अ, आ
[17] ०निवृत्त्या तन्ममापि — आ
[18] करणमन्त्रजातं — अ; करणमन्त्रजातजातं — आ
[19] शुद्धचविद्या — अ
[20] स्वं तनुः — अ; स्वं तनुं — आ
[21] यो च यमा० — अ
[22] ०योगत्वे० — अ, आ
[23] ०त्रैककर्तृत्वात् — अ
[24] ऋग्वेदे १.१६४.२०
[25] स्वाद्वचक्त्यनश्नन्नन्यो — अ
[26] ०नश्नन्यो हि चाकशि हीति — आ
[27] इतिशब्दो नास्ति — अ, आ
[28] ततोः शिवः स — अ; ततो शिवा स — आ
[29] ०स्वस्नान० — अ, आ
[30] निर्हरणादीषन्नन्वेत० — अ
[31] नानाप्यति० — अ, आ

त्वान्नोक्तम्। न त्वननुष्ठेयत्वादित्युक्तं [1]प्राक्। [2]तथा यज्ञसूत्रेऽप्युक्तम्[3] — [4]"पयोव्रतं ब्राह्मणस्य, [5]यवागू राजन्यस्य, आमिक्षा वैश्यस्य, [6]मस्तु शूद्रस्य" इति। स्वप्न[7]निर्हरणादि तु प्रायश्चित्तस्य [8]वक्ष्यमाणत्वादत्र कर्तव्यमेव। अन्यथा तस्यास्य[9] पृथक्पृथक् कथनासंभवादित्यदोषः। ततो यैषा शुद्धाध्वनि [10]विद्येशेभ्योऽप्यूर्ध्वं सद्योजातभुवन[11]रूपेण, अशुद्धाध्वनि [12]वाग्वृत्तिविशेषात्मना ब्रह्माण्डेऽधिष्ठात्रीत्वेन निवृत्तिकाख्या कलावस्थिता। तां निवृत्तिम् अस्मिन्दीक्षितशरीरे पृथिवीतत्त्वा[13]धिष्ठायिकात्वेनोद्दिश्य हृदयेन जुहुयादिति च पाशुपतस्यात्र बाधः। एषा च कर्माहुतिरेवेति विज्ञेयम्। अनया हि तच्छरीर[14]हुतस्यास्य पृथिवीतत्त्वस्य शुद्धमन्त्रसंस्कारा[15]च्चाज्ञत्वं [16]बन्धकत्वं च निवर्त्यते। यच्छास्त्रानुष्ठानाधिकारित्वं च जन्यत इति। [17]ततस्तदूर्ध्वं शुद्धेऽध्वनि च वामदेवभुवनरूपेण, [18]अशुद्धे ब्रह्माण्डादूर्ध्वं गुणान्तं यावद्वाग्वृत्तिविशेषात्मना प्रतिष्ठाख्यकलाव[19]स्थिता। [तां] तस्मिंस्तच्छरीरे [20]जलतत्त्वाधिष्ठायिकात्वेनावस्थितामुद्दिश्य शिरसा [21]जुहुयात्तदर्थमेव। एतदूर्ध्वमपि शुद्धाध्वनि या अघोरभुवनत्वेन, अशुद्धेऽध्वनि प्रधाना[22]दूर्ध्वं मायान्तं, शुद्धे च विद्येश्वरान्तं वाग्वृत्तिविशेषात्मना विद्याख्यावस्थिता। तां विद्याम् अस्मिंस्तच्छरीरे तेजस्तत्त्वाधिष्ठायिकात्वेनावस्थितामुद्दिश्य [23]शिखया जुहुयात् तत्पाशत्वा[24]दिनिवारणाय च। ततश्च तदूर्ध्वमपि या तत्पुरुषभुवनात्मना तत्रैव च वाग्वृत्तिविशेषात्मना शान्त्याख्या कलावस्थिता। तामस्मिंश्छरीरे वायुतत्त्वाधिष्ठायिका[25]त्वेनावस्थितामुद्दिश्य [26]कवचमन्त्रेण तु होमयेत् तदर्थमेवेति। [27]ततश्च तदूर्ध्वमीशानभुवनत्वेन [तत्रैव च वाग्वृत्तिविशेषात्मना शान्त्यतीताख्या कलावस्थिता। तत्र] यदव[28]स्थितमाकाशतत्त्वात्मकं [29]परमं मतं, तदप्य[30]स्मिन्दीक्ष्यशरीरे हृद्व्योमाधिष्ठायकत्वेनावस्थितमुद्दिश्य मूलमन्त्रेणैव होमयेत्तदर्थमेवेति॥

---

[1] सार्धत्रि० ३.१ उ०–२ पू० वृत्तौ
[2] तथा च यज्ञ० — अ, आ
[3] शाबरभाष्ये ६, १, २८-३१
[4] पयोघृतं — अ
[5] यवाग्रं — अ
[6] तस्तु — अ, आ
[7] ०निर्हणादि तु — अ; निरहरणादि तु — आ
[8] सार्धत्रि० ८.१० उ०, ११ पू० वृत्तौ।
[9] तस्यास्तु — आ
[10] विद्येशेऽप्यूर्ध्वं — अ
[11] रूपेण शुद्धाध्वनि — आ
[12] वा वृत्ति — अ, आ
[13] ०धिष्ठायाकर्तृकत्वेनोद्दिश्य — अ; ०धिष्ठा वा कर्तृत्वेनोद्दिश्य — आ
[14] ०हस्तस्यास्य — अ, आ
[15] ०च्चाज्ञात्वं — आ
[16] बन्धकत्वमनिवर्तते — अ
[17] ततस्तूर्ध्वं — आ
[18] अशुद्धब्रह्माण्डा० — अ; अशुद्धे तु ब्रह्माण्डा० — आ
[19] ०स्थितां तस्मिन् — अ
[20] 'जल' इति नास्ति — अ
[21] जुहुयादर्थमेव एव तदूर्ध्वमपि — अ
[22] ०दूर्ध्वमायान्तं — अ
[23] शिखाया — अ
[24] ०दिति वारणा च — अ; ०दिति पारणा च — आ
[25] ०त्वेनामुद्दिश्य — आ
[26] कवचं मन्त्रयेदर्थमेवेति — अ
[27] तत्त्वं च तदूर्ध्व० — अ, आ
[28] ०स्थितं पक्षतत्त्वात्मकं — अ; स्थितं पक्षी तत्त्वात्मकं — आ
[29] परव्योमतत्त्वं तद० — आ
[30] ०स्मिन्दीक्षाशरीरे — अ

तत्र —

एकैकस्य शतं [1]होम्यमित्येवं पञ्च होमयेत् ॥९॥
पञ्च पूर्णा[2]हुतीर्दद्यात्प्रासादेन तु षण्मुख ।

एकैकस्य पृथिव्यादितत्त्वस्य शुद्ध्यर्थं [3]तदधिष्ठात्र्यात्मकलाविशेषमुद्दिश्योद्दिश्य हृदयादिमन्त्रैराहुति-**शतं** [4]**होम्यं**, प्रतिशतं चान्ते शिवेन पूर्णाहुतिरित्येवं पञ्चशतान्यस्यां दीक्षायां होमयेदिति ॥

प्रायश्चित्तविशुद्ध्यर्थमष्टा[5]वेकैकयाहुती[6]: ॥१०॥
अस्त्रबीजेन [7]मन्त्रज्ञो होमयेदनुपूर्वशः ।

अनेन [8]हृदयादिना मन्त्रेण **अनुपूर्वशः** प्रत्येकम् **अस्त्र**सहितेन **अष्टौ** [9]**आहुतीः** जुहुयात्। **प्रायश्चित्त-विशुद्ध्यर्थं** दोषनिर्हरणायेति [10]दर्शितं प्राङ् [11]न्यूनाधिकहोमादिक्रमसमीकरणायेति च ॥

अथोपसंहारः —

[12]एवं समाप्यते दीक्षा जननादिविवर्जिता ॥११॥

संयोजन[13]जननादिकर्मविवर्जितेयं दीक्षा समाप्ता। संस्कार[14]मात्रा दीक्षेत्यर्थः। निर्वाणदीक्षाया-स्तद्रूपत्वात्। यदुक्तं श्रीम**द्दीक्षोत्तरे**[15] —

"संयोजनं संजननं [16]भोगभोजनमेव च।
पाशच्छेदस्तथोद्धारो दीक्षाकर्माणि [17]पञ्चधा।" इति ।

अत एव कलादीक्षापि [18]संयोजनाद्यात्मिका श्रीमत्**स्वायंभुवोक्ता**[19] सा निर्वाणदीक्षैवेति भेदतः ॥११॥

तथाहि —

हुतेनैव तु मुच्यन्ते साधका जन्मबन्धनात् ।

---

[1] भोग्यमित्येवं — अ, आ; होममित्येवं — ई
[2] ०हुतिं दद्या० — अ, आ, उ, मु
[3] तदधिष्ठात्म० — अ
[4] होम्य प्रति० — अ, आ
[5] ०वेकैकधा० — ई; वेकैकाया० — मु
[6] हुतिः — अ, इ, उ
[7] सर्वज्ञो — इ, ई, उ
[8] हृदयादीनामस्त्रेण — अ
[9] आहुतिं — अ
[10] सार्धत्रि० ८.८, ९ पू०
[11] न्यूनाधिकं होमाधिकमसमी० — अ
[12] असमाप्यते जननादिर्वजिता — अ
[13] ०संजननादि० — आ
[14] ०मात्रदीक्षेत्यर्थः — आ
[15] अयं श्लोकः उपलभ्यमाननिःश्वासकारिकान्तर्गतदीक्षोत्तरे नोपलभ्यते। मतङ्गवृत्तौ सर्वज्ञानोत्तरे इति निर्दिश्योदाहृतः —
"संयोजनं च संजातभोगभोजनमेव च।
पाशच्छेदस्तथोद्धारो दीक्षाकर्माणि पञ्च तु ॥"
मतङ्ग० क्रिया० ७.२० उ० वृत्तौ
[16] भोजनं भोगमेव च — अ, आ
[17] योजयेत् — अ
[18] संयोजननाद्यात्मिका — अ, आ
[19] स्वायम्भुवे २२, २३ पटलयोः ।

[1]हेतावत्र पञ्चमी। [2]**जन्मबन्धनं** मलकर्ममायीयं दीक्षया हुतं निर्दग्धं यदा भवति तदा तेनैव हेतुना **मुच्यन्ते** अमी। [3]न त्वनया [4]तद्दाहिकया दीक्षया ज्ञानेन चेति नियमार्थम्। द्रव्यत्वादस्याज्ञानस्य मलात्मनः पुंसां चक्षुषः पटलादे[5]रिव ज्ञानान्निवृत्त्यसंभवादित्युक्तम्। जन्मबन्धनादेव होममात्रेणैव [6]जननादिविवर्जितया [7]दीक्षया **मुच्यन्ते** इति व्याख्येयम्। [8]एवं हि वक्ष्यमाण[9]क्लेशसाध्य-[10]जननादिदीक्षानुष्ठानोपदेशवैयर्थ्यप्रसङ्गः। यदुक्तमत्र —

[11]अक्के चेन्मधु विन्देत किमर्थं [12]पर्वतं व्रजेत्।
इष्टस्यार्थस्य संसिद्धौ को विद्वान्यत्नमाचरेत्॥" इति॥

किमर्थं [13]तर्हीयं दीक्षेत्युच्यते —

[14]इयमिष्टिर्न प्रकाश्या गोपनीया प्रयत्नतः॥१२॥
[15]रहस्यं सर्व[16]तन्त्राणामेष संस्कार [17]उत्तमः।

यद्यपि दीक्षा दानप्रक्षपणार्थत्वेन संस्कारकर्मत्वान्न [18]देवतायागात्मिका **इष्टिः**। तथापि इयं तदधिकारोत्पादनेन तत्सङ्कर्णार्थत्वादिष्टिरित्युक्ता। यच्छिवे पूजायामिव संगतकरणेऽपि [19]पठचत [20]इति इष्टचङ्गत्वाच्च [21]मण्डलयागस्य तदर्थत्वादिय[22]मिष्टिरनधिकारिणां परमेश्वरशक्ति[23]पाता[भावा]-दपवित्राणां **न प्रकाश्या** शब्दतः। **गोपनीया** च तदर्थानुज्ञाने। यतः सर्वसंहिताप्रसिद्ध[24]विषयेयं दीक्षा आत्मनः **संस्कारः उत्तमः** प्रथमः। तदनन्तरं निर्वाणदीक्षाद्यधिकारादिति तदर्थं कर्तव्यः॥

---

[1] होतावत्र — अ
[2] संबन्धनं — अ
[3] न तु तथा तद्दाहकाय — अ
[4] तद्दाहकया — आ
[5] ०रिति ज्ञानान्निवृत्तिसं० — अ
[6] जननातिवि० — अ
[7] दीक्षाया — अ
[8] एवं वक्ष्य० — अ
[9] ०क्लेशासाध्य० — अ, आ
[10] जननादीक्षा० — अ
[11] "अक्के, अक्वे, अर्के, अङ्क्ते इति पाठचतुष्टयम्। तत्र अक्कं, अक्वं च गृहकोणः। अर्कः लघुवृक्षविशेषः। अङ्क्तम् समीपम्। न्यायोऽयं प्रसिद्धार्थकः।" मीमांसाकोशे पृ० ६२३; 'अत्रैव मधु विन्देत' इति मोक्षकारिकावृत्तिपाठः। मोक्षका० १५३ वृत्तौ।; 'अत्के' इत्यपि पाठः सांप्रदायिको दरीदृश्यते।
[12] पर्वतो — अ
[13] तर्हि यद्दीक्षेत्युच्यते — अ
[14] यष्टिर्न प्रकाश्यो गोपनीयः प्रयत्नतः — अ
[15] रहस्यः सर्व — आ
[16] ०तन्त्रानामेष — मु
[17] उत्तमम् — उ
[18] देवदेवतायागात्मिका — अ
[19] पठचन्ते — अ
[20] इव इष्टचङ्गाच्च — अ; इत इष्टचङ्गाच्च — आ
[21] मण्डला यागस्य — अ
[22] ०मिष्टिर्नानधिकारिणां — आ
[23] ०पातादपवित्रीकृतान्न प्र० — अ
[24] विषयमयन्दीक्षातमनः — अ; विषयमयन्दीक्षात्मकः — आ

इदानीं निर्वाणदीक्षास्वरूपजिज्ञासार्थं प्रश्नः —

[1]योनिन्यासादिकं [2]कर्मोद्धारणं चाप्यपश्चिमम् ॥१३॥
[3]शोधनानुक्रमं देव कथयस्व यथाविधि ।

पूर्वं हि जननादिविवर्जिता दीक्षोक्ता। अधुना तु [4]योजिते जन्म[5]भुवि **न्यासः** उपस्थापनं तदादि यज्जननाद्युद्धारान्तं **शोधनानुक्रमं कर्म** दीक्षाख्यं तद् **यथाविधि** [6]प्रतितत्त्वं ब्रूहि निर्वाणदीक्षात्मकमित्यर्थः ॥

अत्रोत्तरम् —

[7]दश सप्त च [8]ये शोध्याः [9]पृष्टाश्चात्र त्वया गुह ॥१४॥
यस्य यद्बीजमुक्तं तु तद्वक्ष्याम्यनुपूर्वशः ।

सप्तदशकर्मविशेषाः ये अत्र वक्ष्यमाणाः **शोध्याः** इति शोध्यपुरुषार्थत्वेनैवानुष्ठेयत्वाच्छोध्या इत्युक्तम् । [10]तच्छोधका दीक्षात्मका इत्यर्थः । **त्वया** च योनिन्यासादुद्धा[11]रान्ताः शोधनानुक्रमत्वेन [12]**पृष्टाः**, तान् **वक्ष्याम्यनुपूर्वशः** । प्रति[13]तत्त्वं संहारक्रमेण, तस्यैव प्रागुक्तत्वात्[14] । तथा **यस्य** शोध्यस्य कर्मविशेषस्यानुष्ठानार्थं **यद्** मन्त्र**बीजं** भगवता प्रोक्तं, तद्वक्ष्यामि । एतदुक्तं भवति — परमेश्वरोक्तान्येव [15]सप्तदशकर्माण्यत्र निर्वाणदीक्षायामिति ॥

अथ तदुपक्रमः —

योनि[16]बीजं तु हृदये कल्पयेच्च यथाक्रमम् ॥१५॥
अर्चनं प्रोक्षणं चैव ताडनं च तथा परम् ।
संधानं चैव संयोगं निक्षेपं तदनन्तरम् ॥१६॥
अर्चनं च ततः कुर्याद् गर्भाधानं तथैव च ।
[17]जननं चाधिकारं च भोगं [18]चैव लयं तथा ॥१७॥

---

[1] 'योनिन्यासादिकं' इत्यतः पूर्वं 'कार्तिकेयः' इत्यधिकम् — इ, ई, उ, मु
[2] कर्म उद्धारं चाप्य० — उ, मु
[3] शोधनां तु क्रमाद्देव — इ; शोधनां तु क्रमं देव — ई
[4] भोजते — अ; चोजते — आ
[5] ०भुवे न्यास उपस्थानं — अ, आ
[6] प्रतीतत्वं — अ
[7] 'दश सप्त च' इत्यतः पूर्वं 'ईश्वरः' इत्यधिकम् — इ, ई, उ, मु
[8] ये संशोध्याः — अ
[9] दृष्टाश्चात्र त्वया — अ, आ; षा यात्र त्वया — ई; प्रष्टा यात्र त्वया — उ
[10] तच्चोदका — अ
[11] ०रान्ताच्छोदना० — अ
[12] दृष्टाः — अ, आ
[13] तत्त्वसंहार० — अ
[14] सार्धत्रि० ८.२ उ० — ४ वृत्तौ ।
[15] सप्तकर्माण्यत्र — अ
[16] ०बीजस्य हृदयं – अ; ०बीजं तु हृदयं – आ; ०बीजं च हृदयं — मु
[17] यजनं — इ, ई
[18] च वलयं — अ; च विलयं — आ

स्वतत्त्वे [1]चाहुतिशतं [2]हृदयेन तु षण्मुख ।
[3]पाशच्छेदं तथास्त्रेण दद्यात्पूर्णाहुतिं [4]ततः ॥१८॥
हृदयेनात्र [5]तूद्धारः [6]कर्तव्यश्चाप्यनुक्रमात् ।

अत्र समयदीक्षावत् स्नानादि मण्डलस्थशिवविज्ञप्त्यर्थं तदङ्गजातं नित्याग्निसमीपे [7]शिष्येण सहोपस्थानमाहुतिश्रवगसामर्थ्यात्कृत्वा, ततोऽग्नावेव हृदयमन्त्रेण जन्मनो **योनिरेव बीजं** तस्मिश्च **हृदये यथाक्रमम्** इति संहारक्रमप्रस्तावात् पृथिवीतत्त्वमादायानेकस्रोतोभेदभिन्नं प्रकल्पयेत्; [8]वक्ष्यमाणप्रकारेणोप[9]स्थापयेत् । नोप[10]स्थाप्यमन्यथेत्युपस्थाप्य, पृथिवीतत्त्वादि[11]योनिमनुपस्थाप्य तदुपस्थापनं चात्र दोष इति पूर्वमेव यदुक्तम्[12] । ततस्तस्या [13]उपस्थापिताया योनेः **अर्चनं** पुष्पैर्द्वितीयं कर्म । तदनन्तरं **प्रोक्षणं ताडनं** च शिष्यदेहस्य जल[14]भस्मभ्याम् । ततः तदन्तःपुर्यष्टके तु **संधानम्** आत्म[15]तत्त्वानां तदूर्ध्वक्रमेण । यद्वक्ष्यत्यत्रैव[16] —

"संधानं चैव तत्त्वानां कर्तव्यं तु यथाक्रमम् ।" इति ।

परमेश्वरशक्त्यनु**संधानं** च । स्वकरे कृतस्य पुर्यष्टकस्य तेन हस्तेन **संयोगः** ग्रहणम् । तदनन्तरं तद्देहत्वात्तस्य वक्ष्यमाणप्रकारेणोद्धारपूर्वं तस्यां [17]योनौ **निक्षेपं** कुर्यात् । यदनन्तरमत्रैव वक्ष्यति[18] —

[19]"आदिमस्य [20]द्वितीयेन गृहीत्वात्मानमात्मना ।
[21]मुष्टिना यावत्स्थानं तन्नयेत्तं सुविचक्षणः ॥" इति ।

[22]तदर्थानि च पञ्च पूर्वाभ्यां सह सप्त कर्माणि । ततस्तस्य निषिक्तस्य तत्र पुष्पेण **अर्चनम्** । ततस्तस्यां योनावनन्तकर्मवशाद्यावन्ति शरीराणि चतुर्दशविधभूत[23]सर्गावान्तरविधभूतभेदभिन्नानि तस्य संभवन्ति तावद्भेदं सकृदेव **गर्भाधानं तथैव कुर्याद्** यथा वक्ष्यमाणं योनिविसर्जनमाहुति[24]द्वारेणेत्यर्थः । एतच्च जनना[25]दीनामप्युद्धारान्तानां बोद्धव्यम् । यदुक्तम्[26] —

[27]"हुतेनैव तु मुच्यन्ते साधका जन्मबन्धनात् ।" इति ।

---

[1] वाहुतिं हुत्वा हृदयेन — अ; वाहुतिशतं हृदयेन — आ; चाहुतिं हुत्वा हृदयेन — मु
[2] वादयेन्नैव कारयेत् — इ; हृदयेनैव कारयेत् — ई; वादये नैव कारयेत् — उ
[3] शतं तथास्त्रमन्त्रेण — इ, ई, उ
[4] तथा — इ, ई, उ
[5] त्रद्धारः — ई
[6] कर्तव्यं चा० — आ
[7] शिष्येण उपस्थान० — अ
[8] सार्धत्रि० ८.२७ उ०, २८ पू० वृत्तौ ।
[9] ०स्थापये नोप० — आ
[10] ०स्थाप्यं नान्यथेत्युप० — अ, आ
[11] योन्यनुपस्थापनमनुप० — अ, आ
[12] समयदीक्षायाम्
[13] उपस्थापनयोनेः — अ
[14] ०भस्म ततः — अ; ०भस्माभ्यां ततः — आ
[15] ०तत्त्वानामूर्ध्व० — आ
[16] सार्धत्रि० ८.२० उ०
[17] ये . . . पं — अ; योनिक्षेपं — आ
[18] सार्धत्रि० ८.२६ उ०, २७ पू०
[19] आदिमध्यद्विती० — आ
[20] द्वितीये गृहीतत्वात्मना — अ
[21] यावत्स्थानं नयेत्तं — अ, आ
[22] दत्वा नि च पञ्च — आ
[23] ०सर्गायान्तर० — आ
[24] ०क्रमेणेत्यर्थः — अ
[25] ०दीनामपि तदन्तानां — अ, आ
[26] सार्धत्रि० ८.१२ पू०
[27] भुवनेनैव मु० — अ

ततो [1]**जननम्**। [2]तदनन्तरं शरीरोत्पत्तिः, तद्भोग्यविषयोपपत्तिश्च। ततश्च **अधिकारः** यथानुरूपतत्तद्भोग[3]सामर्थ्यलाभबलादीनां तस्य दर्शनात्। ततश्च **भोगः** विचित्रानन्तभोग्यसंवेदनात्।

ननु प्रत्यक्षनिराकृत[4]मेतदिदानीं तथा [5]संवेदनादर्शनात्। न। कर्मशक्त्यैव [6]नियमितत्वादतीतशरीरभोगावेदनावत्। अन्यथानेकशरीरभोगवेदकत्वेन तस्य कार्यकरणेभ्यो लब्धज्ञानत्वान्न कर्माणि बन्धकानि स्युः। [7]"ज्ञानाग्निः सर्वकर्माणि भस्मसात् [8]कुरुते" इति आरब्धकार्याणां कर्मणां [9]परिक्षयात्सर्वस्य विज्ञान[10]केवलित्वप्रसङ्गतः संस्काराभाव इत्युक्तम्[11] —

"अदृष्टशक्यदेहेऽस्मिन्देहान्तरमिदं [12]भवेत्।
[13]पुमानेवानुसंधत्ते भोगाभावप्रसङ्गतः॥"

इत्यदोषः। ततो **लयं** कुर्यात्। सर्वात्मना भोगस्य सिद्धेर्भावप्रत्ययात्मनः कर्मबन्धस्य परि[14]क्षय इत्यर्थः। ततश्च तस्मिंस्तत्त्वे भोगाधिकरण[15]स्थोपस्थापिते [16]भुवनसाधनत्वात् सर्वथा विच्छेदानुपपत्तेः पुनस्तद्बन्धकत्वमात्रविच्छेदाय **हृदयेनाहुतिशतं दद्याद्** इत्यस्त्रस्यापवादः। **च**शब्दोऽन्येष्वप्यत्र [17]कर्मसूत्सर्गो हृदयेनेत्यस्य संबन्धार्थः। अपवादस्य वक्ष्यमाणत्वात्[18]। ततश्च तेषां [19]जनिनां पाशानां स्थूलशरीरात्मनां [20]सर्वथा विच्छेदः। पुर्यष्टकस्य [21]सर्वथा तदूर्ध्वभाविषु तत्त्वेषु तेन विना भोगायोगादिति, [22]तत्तत्तत्त्वभोगादानसामर्थ्यमेव विच्छिद्यते यावन्मायातत्त्ववत् कलातत्त्वम्। तदूर्ध्वं तस्य प्रयोजनाभावात् [23]सर्वात्मना विच्छेदोऽस्थाने एव कार्य इत्यर्थः। सिद्धमेतत्तत्तदस्य मायीयस्य बन्धस्य त्रिविधो विच्छेदः कार्यः। [24]एतदत्रार्थसिद्धमेव। शुद्धे तु दीक्ष्या[25]णां वाक्शक्तिद्वारेण संयोजनं, प्रतिस्थानं चोत्कर्षणं, क्रमेण पालनात्मनो भोगस्य, [26]महामायात्मनश्च देहादिबन्ध[27]स्य, अधिकारिकर्ममलस्य च विच्छेद इति। ततः **पूर्णाहुतिं** हृदयोपस्थापितानां[28] विसर्जनाय दत्त्वा, [29]वक्ष्यमाणमन्त्रोद्धारं शिष्य[30]देहस्थिरीकरणाय तत्पुर्यष्टकस्य वाक्छक्तेः कुर्यादित्ये[31]तान्युपस्थापितयोनिविषयाणि दशकर्म पूर्वैः सह सप्तदशैव कार्याणि दीक्षाशब्दवाच्यानीति॥

---

[1] यजनं — अ, आ
[2] तदनन्तरशरी० — अ
[3] सामर्थ्यालाभबलादिना — अ
[4] ०मेददिदानीं — अ
[5] संवेशना० — अ, आ
[6] नियतत्वादिति शरीर० — अ
[7] कामिके पूर्वभागे ४.५५ पू०; भगवद्गीता ४.३७
[8] कुरुतेऽर्जुन इति — अ
[9] अपरिक्षया० — आ
[10] ०केवलित्वे — अ
[11] आकरो न लभ्यते।
[12] भूयात् — अ, आ
[13] पुमानैवानु० — अ, आ
[14] ०क्षयमित्यर्थः — आ
[15] ०स्थोऽवस्थापिते — अ
[16] सा भुवने साधनत्वात्सर्वधा — अ; सा भुवने साध्यनत्वात्सर्वदा — आ
[17] कर्मस्त्रक्सर्गो — अ
[18] सार्धत्रि० ८.१९ उ०, २० वृत्तौ ।
[19] जननीनां — अ
[20] सर्वधा — अ, आ
[21] सर्वधा — अ, आ
[22] तत्त्वतत्त्वभोगा० — अ
[23] समात्मना — अ, आ
[24] एतदप्यत्रार्थं — आ
[25] ०णामविच्छित्तिद्वारेण—अ; ०णामवछ्शक्तिद्वारेण — आ
[26] मायामायात्मनश्च — अ
[27] ०स्याथ करीकर्म — आ
[28] ०स्थापितानि — अ, आ
[29] सार्धत्रि० ८.१९ उ०, २० पू०
[30] ०भेदे स्थिरी० — अ
[31] ०तान्यवस्थायोनि० — अ, आ

अथैषामेव वक्तव्यत्वेन प्रतिज्ञातानि मन्त्रजातान्युच्यन्ते —

उद्धारे प्रोक्षणे चैव ताडने [1]च तथैव च ॥१९॥
हुंफट्कारसमायुक्तं कर्तव्यं चानुपूर्वशः ।
संधानं चैव तत्त्वानां कर्तव्यं तु यथाक्रमम् ॥२०॥

संधानं तत्समायुक्तं कर्तव्यम् इति [2]चत्वारि पाशुपतेन कर्तव्यानि। पाशच्छेदस्तु तेनैवेत्युत्सर्गप्राप्तस्य हृदयस्यापवादः। [3]शिष्टानि द्वादशैतेनैवेति स्थितम्। ग्रहणनिक्षेपयोः शिवस्यापि [4]वक्ष्यमाणत्वात्। एवमेतत्सप्तदशात्मकं विशिष्टमन्त्रसाध्यमेतद्दीक्षाकर्म ॥ १९-२०॥

कस्मिंस्तत्त्वे प्रोक्तं तत् —

तत्त्वे तत्त्वे [5]त्विदं कर्म एष एव विधिक्रमः[6] ।

एतत् प्रतितत्त्वं षट्त्रिंशत्स्वपि कर्तव्यमिति तत्त्वदीक्षेयमित्यर्थः। अस्य च प्रतितत्त्वम् **एषः** [7]एवंविधानुष्ठाने [8]**क्रमः**। केवलं [9]पशुतत्त्वे जनन[10]भोगयोरसंभवः शिवतत्त्वादुद्धारस्येति निर्वाणदीक्षा ॥

[11]यद्येवं दीक्षयैव तदानीं तस्य सर्वकर्म[12]क्षयान्निमित्तानामपीन्द्रियाणामभावेन पञ्चत्वप्रसङ्गः। यदुक्तं सौगतैः[13] —

[14]"गतिप्रतीत्योः [15]करणान्याश्रयस्तान्यदृष्टतः ।
अदृष्ट[16]नाशान्न [17]गतिर्दीक्षितस्य न चेतना ॥" इति।

अन्तःकरणात्मिकाया बुद्धेरभावेन वा। यदुक्तं तैरेव[18] —

[19]"धारणप्रेरणक्षोभनिरोधाश्चेतनावशाः ।
न स्युस्तेषामसामर्थ्ये तस्य दीक्षाद्यनन्तरम् ॥" इति।

[20]तदर्थमेतत् —

[21]**एभिस्तु शोधितैर्वत्स विधिं प्राप्नोति पुष्कलम् ॥२१॥**
अन्यथा नैव मुच्यन्ते [22]विधिहीनाः षडानन ।

---

[1] चैव तथैव च — ई
[2] चत्वार्योनि पाशु० — अ, आ
[3] शिष्टाग्नि द्वादशैते तेनैवेति — अ
[4] सार्धत्रि० ८.२९ उ०,३० पू० वृत्तौ।
[5] हि तत्कर्म — इ, ई, उ
[6] ०क्रमम् — उ
[7] एव विधानु० — आ
[8] क्रमं० — अ
[9] पशुपतितत्त्वे — अ
[10] ०भोगहेतुरसंभवः — अ
[11] यद्येव दीक्षयैवं — आ
[12] ०क्षयानिमित्तानामपीन्द्रिया० — अ; ०क्षयनिमित्तानामितीन्द्रिया० — आ
[13] प्रमाणवार्तिके प्रमाणसिद्धौ २६३ उ०,२६४ पू०
[14] गतप्रतीत्योः — अ, आ
[15] करणाश्रयस्ता० — अ, आ
[16] ०नाशनान्न गति० — अ, आ
[17] गतिस्तत्संस्कारो न चेतना — मुद्रितप्रमाणवार्तिकपाठः।
[18] प्रमाणवार्तिके प्रमाणसिद्धौ २६५ उ०, २६६ पू०
[19] श्लोकोऽयमत्र मातृकायामशुद्धभूयिष्ठो दृश्यते।
[20] तदर्धमेतत् — अ
[21] २१ उत्तरार्धं, २२ श्लोकश्च 'इ' मातृकायां, मुद्रिते च न स्तः।
[22] विधिना च षडानन — अ, आ

दीक्षायाः समनन्तरमेवाभिचारादिवासौ [न] पञ्चतां तत्र याति। शरीरान्तरभोग्यानि तान्ये-[1]वानया क्षपितानि, न [2]वर्तमानफलान्यपि। तेषां भोगेनैव [3]क्षपणीयत्वात्। यदुक्तं श्रीमत्**किरणे**[4] —"येनेदं तद्धि भोगतः" इति। [न] सद्योनिर्वाणदीक्षायाः। ततश्चैव [5]तद्दीक्षया अक्षपितवर्तमानशरीरभोग्यकर्माक्षिप्तत्वाद्दीक्षितानामस्य शरीरस्य कुतः पञ्चतापत्तिप्रसङ्ग इत्यदोषः॥

अत एव सर्वदीक्षाकर्मणोऽन्ते —

पूर्णाहुतिप्रदानं च कर्तव्यं धारणायुतम्॥२२॥
अमृतं यत्परं वत्स [6]स्रवन्तं मनसा स्मरेत्।

एवं हि दीक्षितशरीरस्य स्थिरीकरणाय [7]प्रत्युत शान्तिः क्रियत इति॥

दीक्षा[8]प्रकरणे ह्येतद्योज्यं सर्वत्र सर्वदा॥२३॥
लिङ्गोद्धार[9]विधाने च नित्यसंस्कारकर्मसु।

एष पूर्णाहुतिप्रयोगः [किं] दीक्षायामेव कर्तव्यः?। [न]; यावन्नित्यादिकर्मस्विति दर्शितं तत्रैव[10]॥

अथ [11]दीक्षायामेव कर्मविशेषानुपपत्त्या[12]शङ्कया [13]सप्रासङ्गिकं प्रश्नपञ्चकम् —

[14]पशोर्ग्रहणमोक्षं तु [15]यत्त्वयोक्तं पुरानघ॥२४॥
पाशा [16]आभ्यन्तरा बाह्याः कस्मिन्स्थाने कथं स्थिताः।
कस्मिन्स्थाने तु [17]विच्छेद्याः सद्य उत्क्रमणं कथम्॥२५॥
पशूनां चैव [18]निर्देशं कथयस्व महेश्वर[19]।

यद् अत्र **त्वया** [20]दीक्ष्यस्य प्रतितत्त्व[21]मुपस्थाप्य योनिनिक्षेपणार्थं **ग्रहणमुक्तम्**। यश्च **मोक्षः** तस्यां योनौ [22]निक्षेपः, तत् **कथयस्व**। आत्मनो व्यापकत्वान्नोपपद्यते यतः। अथ पुर्यष्टकद्वारे-

---

[1] ०वानयक्षपितानि — अ, आ
[2] ०वर्तमानान्यपि — अ, आ
[3] प्रक्षणीयत्वात् — अ, आ
[4] नेपोलीमुद्रिते किरणे ६.१९ उ०
[5] तद्दीक्षाया — अ, आ
[6] स्रुवन्तं — अ, इ
[7] प्रत्युतः क्रियते इति — आ
[8] प्रकरणेभ्यो योज्यं — अ, आ
[9] ०विदाने — ई
[10] सार्धत्रि० ६.४ उ० वृत्तौ।
[11] दीक्षामेव — अ, आ
[12] ०शङ्काया — आ
[13] सप्रसङ्गिकमप्रपञ्चकं — अ
[14] 'पशोर्ग्रहणमोक्षं' इत्यतः पूर्वं 'कार्तिकेयः' इत्यधिकम् — इ, ई, उ, मु; पशोर्ग्रहणमोक्षं च — मु
[15] यत्तथोक्तं पुरा नग्न — अ; यत्तयोक्तं पुरानघं न — आ
[16] आरभ्यान्तरा — अ; अभ्यन्तरा — इ, ई, उ
[17] ते छेद्याः — इ, ई, उ, मु
[18] 'निर्देशं' इति नास्ति — अ
[19] महेश्वरम् — अ
[20] दीक्षितस्य — अ
[21] ०मुपस्थाय — अ, आ
[22] निक्षिपेत्तत् — अ

णेत्युच्यते। [1]तदैवोत्क्रमणप्रसङ्गः सूक्ष्मस्थूलशरीरद्वयवियोगरूपत्वात् क्रमेणास्येति प्रश्नः।

किं च यदप्युक्तं **पाशाः** [2]**आभ्यन्तराः** देहान्तर्भोग्यकर्मभोगरूपाः, **बाह्याश्च** [3]तत्कर्माक्षिप्तभोगसाधनस्थूलशरीरात्मकाः, [4]तत्तत्प्रतितत्त्वं योनिं पृथिवीतत्त्वाद्युप[5]स्थापनेन स्थिताः [6]सन्तोऽस्य [7]संपाद्यन्त इति, तदपि कथय। **कस्मिन् स्थाने** तथा **स्थिताः**। [8]न कस्मिंश्चित्। न तावदग्नौ तत्रोपस्थापितस्यास्य पृथिवीतत्त्वादेरुपलब्धिलक्षणप्राप्तस्यानुपलम्भात्। स्थानान्तरं तु नान्यत्पश्यामः। **कथं** च तत्राप्यग्नौ तथा [9]**स्थिता** इत्येतदपि [10]**कथय**। सा तद्योनिर्यतः [11]शक्त्यात्मना सा स्थिता, [12]तदा न भोग[13]साधिका, क्षीरान्तर्व्यव[14]स्थितदध्यादिशक्तिवत्। अथ व्यक्तिरूपेण, तदा तत्रैवास्या उपस्थितत्वाद्वाह्योऽत्र च [15]बहूनां ह्युपसंहारः, तद्भुवनवासिनां च क्रमादुत्क्रमणं भवेदिति प्रत्यक्षबाधः। न कल्पनामात्रमेतदिति [16]वक्तव्यम्। दीक्षाया मोक्षहेतुत्वाभावप्रसङ्गात्। न हि कल्पिता[17]द्वन्ध्यापुत्रादेरर्थसिद्धिरिति [18]सर्वमसमञ्जसम्।

[19]किं च "**कस्मिन् स्थाने तु** [20]**विच्छेद्याः**" एतदपि कथय। [21]तत्स्थानान्त[22]राग्न्यादावनुपलम्भः प्रोक्तः। तद्यदि परस्मिन्नेव शरीरे विच्छेद्या इति तच्छरीरभोग्यानां कर्मणां विच्छेदप्राप्तेः **सद्यः उत्क्रमणं** प्रसज्यत इत्युक्तम्। अन्यथा **सद्य उत्क्रमणं कथम्** [23]इत्येतदपि [24]कथयेति। यद्यारब्धकार्याणामपि [25]कर्मणां क्षयासंभवान्नास्य शरीरस्य लयः, तत [26]**उत्क्रमणं कथम्**। नैवेति प्रासङ्गिकप्रश्नः। तथोच्चार्यमाणस्य [27]मन्त्रस्य ब्रह्माद्यधिष्ठितहृदयादिपञ्चस्थानयोगं वक्ष्यति[28] —

"ब्रह्मणो [29]हृदयं स्थानं कण्ठे विष्णुः समाश्रितः।
तालुमध्ये स्थितो रुद्रो ललाटस्थो महेश्वरः॥
[30]नादान्ते तु शिवं विद्यात्" इति।

तत्तत् कस्मिन् स्थाने प्राप्ते, मन्त्रे सति [31]चेत् संहारदेवतारुद्रस्थान एव [32]युक्त इत्यभिप्रायेणापि प्रश्नः।

---

[1] तदैवोपक्रमणप्रसङ्गसूक्ष्म० — अ
[2] अभ्यन्तराः — अ
[3] तत्कर्मकप्ते भोग० — आ
[4] तत्त्वप्रतीतत्वं योनिपृथिवी० — अ; तत्त्वं योनिपृथिवी — आ
[5] ०स्थानेन — अ, आ
[6] संतोष्य — आ
[7] संपाद्यत — अ, आ
[8] नकारो नास्ति — आ
[9] स्थित इत्येत० — अ, आ
[10] कथयतः सा — अ
[11] शक्त्यात्मनि सा — अ, आ
[12] तथा — अ, आ
[13] ०साधिकां — अ
[14] ०स्थितं दध्यादि — अ
[15] बहुनाभ्युप० — अ, आ
[16] वक्तव्या — अ, आ
[17] ०द्वन्ध्यापुत्रा० — आ
[18] सर्वं सम० — आ
[19] किं त्वस्मिन् — अ, आ
[20] नोच्छाद्या एत०—अ; नेच्छाद्या इत्येत०—आ
[21] 'तत्' इति नास्ति — अ
[22] ०राभ्यासादावनुपलभ्यः — अ; राभ्यासादावनुपलम्भः — आ
[23] ०इत्येतदिति — अ
[24] कथयतो यद्यारब्ध — अ
[25] कर्मणामक्षया० — अ, आ
[26] उत्क्रान्तिरपि कथं — आ
[27] 'मन्त्रस्य' इति नास्ति — अ
[28] सार्धत्रि० २३.१० उ०, ११
[29] हृदयस्थानं — अ, आ
[30] नासाग्रे — अ, आ
[31] चेत्यः संहार० — अ
[32] युक्ता इत्यभि० — अ, आ

किं च **पशूनां** दीक्ष्याणामत्र ग्रहणमोक्षणे च येन [1]निर्दिश्येते मन्त्रबीजेन तत् कथय। हृन्मन्त्रस्य [2]कर्मार्थत्वेनोक्तत्वात् [3]संज्ञया च निर्देशस्तदा कर्तव्यो न वेत्येतदपि कथयेति प्रश्नः ॥

अथ क्रमेण समाधिः —

[4]आदिमस्य द्वितीयेन गृहीत्वात्मानमात्मना ॥२६॥
मुष्टिना [5]यावत्स्थानं तन्नयेत्तं सुविचक्षणः ।

स्थूलशरीरसृष्टेरादावेवाहर्मुखे भवतीति **आदिमः**। पुर्यष्टकस्य तस्य [6]पापात्मनो [7]वह्न्या-देरिव शक्तिस्वरूपं च। तेन **द्वितीयेन आत्मना** ततस्त[8]स्यात्मनः स्वरूपं **गृहीत्वा,** यथाग्नेः स्व-रूपेण ग्रहणं, न [9]तृणशक्त्या आत्मना अपि तद्वदभिव्यक्तशिवशक्तिहस्त**मुष्टिना** तद्दीक्षाकर्मण्यु-पस्थापितं **यावत्स्थानं** [10]**नयेद्** इति सूक्ष्मदेहस्य ग्रहणेऽपि न तस्योत्क्रमणप्रसङ्गः। शक्त्यात्मनस्तत्र विद्यमानत्वादिति प्रथमप्रश्ननिरासः। न त्वत्र "आदिमस्य हकारस्य द्वितीयेन हृदयेन गृहीत्वा" इति व्याख्येयम्। तस्य [11]प्राप्तत्वेन विधानानर्थक्यात्। नापि "आदिमः प्राणः, द्वितीयः अपानः, मुष्टिश्च तयोः संघट्टः" इति व्याख्येयम्। ज्ञान[12]दीक्षायाश्चात्रापि प्रश्नपूर्वं [13]वक्ष्यमाणत्वादियं च द्रव्यदीक्षा। अत एव प्रश्नो यतः। [14]न तत्र मुख्यस्यैव मुष्टचादेरनुपपत्तिः। यदुक्तं श्री-मद्भार्गवे[15] —

"पुष्पेण संहरेन्मुष्टचा साधकं बिन्दुरूपिणम्।
सद्याद्यैः पञ्चभिर्मन्त्रैः शिवहस्तप्रचोदितैः ॥
[16]नयेत्क्षेत्रे यथाक्षेत्रं क्षेत्रिणं शिवमव्ययम्।" इति ॥

अथ द्वितीयस्य प्रश्नस्य निरासः —

विषुवत्सं[17]प्रयोगेण [18]ब्रह्माद्यास्ते शिवान्तकाः ॥२७॥
एकत्र [19]समतां [20]यान्ति अन्यथा तु पृथक् पृथक्।

---

[1] नश्येत — अ; निश्येते — आ
[2] कर्मार्थनोक्त० — आ
[3] संज्ञाय च — अ, आ
[4] 'आदिमस्य' इत्यतः पूर्वं 'ईश्वरः' इत्यधिकम् — इ, ई, उ
[5] यावत्तत्स्थानं नयेत्तं — इ, ई, उ, मु
[6] वा वात्मनो — अ
[7] पर्यादेरिव शक्तिः स्वरूपं च — आ
[8] ०स्यात्मानं — अ, आ
[9] तु मुष्णशक्त्या नापि तद्वमित्यर्थः। अभि-व्यक्तिशिव० — आ
[10] नयेति सूक्ष्मदेह्यस्य — अ
[11] प्राप्तित्वेन — अ, आ
[12] ०दीक्षा चात्रापि — अ, आ
[13] सार्धत्रि० ८.३३ उ०—४२
[14] न तु तत्र — आ
[15] ग्रन्थोऽयं नोपलभ्यते।
[16] नये क्षेत्रे — अ
[17] ०प्रयोगेन — अ, आ, इ, उ
[18] ब्रह्माणः सशितकाम — अ; ब्रह्माद्याः स शिवा० — आ
[19] समता या तत्तु पृथक् — अ; समता यान्ति अन्यथा तु पृथक् — इ, उ
[20] याति या तत्तु पृथक् — आ

[1]यदुक्तं तत्र पृथिवीतत्त्वादिकाया योनेरुपस्थापनं नोपपद्यत इति। तत्सत्यमेव। तत्तत्त्वेश्वरस्तु ब्रह्मादिरुपस्थाप्यते, तन्न दोषः। यदुक्तं **श्रीमन्मतङ्गे**[2] —

"शिवो ज्ञापयति स्वाहा [3]रुद्रागच्छ पशोर्विधौ।
[4]त्वदीयभुवने कर्म कर्तव्यं कारणेच्छया॥
कृतकृत्यस्य शुद्धस्य निरोधेन त्वयाधुना।
स्थातव्यमिति वक्तव्यं ततश्चाहुतयः क्रमात्॥" इति।

इहापि वक्ष्यति[5] — [6]"ब्रह्माद्याञ्श्रावयेत्" इति। ते च पृथिवीतत्त्वात् प्रभृति शिवान्तं यावत् प्रतितत्त्वं **ब्रह्माद्याः** शिवाभिधानान्ता एव। यदुक्तं **श्रीमन्नन्दिकेश्वरकारिकासु**[7]—

"ब्रह्मा स्थूलानि गतः क्ष्मादी[8]न्याधारदेहभोगार्थम्।
रुद्रशतं क्षेत्र[9]भुवां चत्वारिंशच्च सूक्ष्मभूतानि॥
[10]तन्मात्रा मनोऽहं[11]कृद्बुद्धीर्देवा गुणांस्तु [12]योगिवराः।
[13]वामाद्या गुणसारं क्रोधाः प्रकृतिं कलां तु मण्डलिनः॥" इति।

अत्र च मन इन्द्रियाणां दशानां, कला च विद्यादीनां पञ्चानामुपलक्षणम्। मायासहिते शुद्धेऽध्वनि [14]विद्येश्वरसदाशिवा इति ते सर्व एव। दीक्षा[15]कर्त्रोः शिवा[16]चार्ययोः संबन्धि यदिच्छात्मकं क्रियाशक्तिद्वयं, तस्य युगपदेव प्रवाहात् प्राणिगतसव्येतरप्राणशक्ति[17]द्वयस्येव [18]**विषुवच्छब्दवाच्यो यः सम्यक् प्रयोगः**। वक्ष्यति **नाडीचक्रप्रकरणे**[19] — "ईश्वरयोगाद्विषुवत्" इति, तेन तत्रैवाग्नौ **समतां** [20]शक्तिसहिताग्निरूपेण उत्तिष्ठन्त इत्यर्थः। यदुक्तं **श्रीमद्रौरवे**[21] — "अग्नि[22]रूपास्ततो देवाः" इति। नान्यथा। एतदुक्तं भवति — दीक्षाकर्त्रोः शिवाचार्ययोः संप्रवृत्तेन प्रेरणद्वयेन तत्राग्नौ [23]तत्त्वेश्वरस्तथोपस्थाप्यते। न तु तत्तत्त्वजद्वारेणैव तत्र संयोजनादिक्रिया इत्यदोषः।

---

[1] सार्धत्रि० ८.२४ उ० — २६ पू०

[2] मतङ्ग० क्रिया० ७.१८ उ० — २० पू०

[3] काहकच्छ पशोर्पीधौ — अ; कादृगछ्श पशोर्विधौ — आ

[4] त्वदीयदिभुवने — अ

[5] सार्धत्रि० ८.४१ पू०

[6] ब्रह्माद्याः श्रा० — अ, आ

[7] भोगकारिकावृत्तावपीमे कारिके उद्धृते दृश्येते यथा — "तदुक्तं श्रीमन्नन्दिकेश्वरकारिकासु— ब्रह्मा स्थूलानि गतः सूक्ष्मादीन्याधारदेहभोग्यार्थम्। रुद्रशतं क्षेत्रभुवां चत्वारिंशच्च सूक्ष्मभूतानि॥ तन्मात्रा मनोऽहंकृतिबुद्धिर्देवा गुणांस्तु योगिवराः। वामाद्या गुणसारं क्रोधाः प्रकृतिं कलात्तु मण्डलिनः॥ इति" भोगकारिका पृ० ५९

[8] ०न्याधाराद्देह० — अ, आ

[9] ०भुवनजानां चत्वा० — अ; ०भुवाजां चत्वा० — आ

[10] तन्मात्रमनो — अ, आ

[11] ०कृद्बुद्धयो गणांस्तु — अ; ०कृद्बुद्धियो गणांस्तु — आ

[12] योगीश्वराः — अ, आ

[13] वाद्यागुणास्तु योगीश्वरः वाद्या गुणसारं प्रकृतिः कलामण्डलीनः — अ; वाद्या गुणास्तु योगीश्वरः वाद्या गुणसारं क्रों प्रकृतिकलामण्डलित — आ

[14] विद्येश्वरेश्वरसदाशिवा — अ, आ

[15] कत्रा शिवा० — अ

[16] ०चार्ययो यस्संबन्धि — आ

[17] ०द्वयस्यैव — अ

[18] विषुवच्छन्दवाच्यो — अ

[19] सार्धत्रि० १०.२२ पू०

[20] शक्तिकमितोऽग्नि० — अ, आ

[21] मुद्रितभागयोर्नोपलभ्यते।

[22] ०रूपस्ततो देव इति — अ; ०रूपान्तस्ते तो देव इति — आ

[23] तत्रैश्वर० — अ; तत्रेश्वर० — आ

न त्वत्राचार्यगत एव सव्येतरनासिकारन्ध्र[1]प्राणशक्तिद्वय[2]प्रवाहात्मको [3]विषुवत्प्रयोगो व्याख्येयः। तस्यैवात्र कर्तृत्वासिद्धेः। उत्क्रान्त्यादौ तु तस्यैव कर्तृत्वं युक्तमिति वक्ष्यामः[4]। न [5]तद्विषुवत्-प्रयोगमात्रेणैव तेषां साम्यम्। तस्यैकाग्रतावस्थायाः स्वत एव प्राणप्रवाहाभ्यन्तरप्रवृत्तिकाले च [6]वक्तृशक्तेः शक्त्यैक्यभावात् तेषां सृष्टि[7]संहारतः सुमहद्वैशसप्रसङ्गात्। अपि त्वीश्वरेच्छयैव। अथ सापि तत्र [8]तदास्तीत्युच्यते। तर्हि तदिच्छात्मकक्रियाशक्तिद्वयसंप्रवाहात्मकोऽसावन्य एव विषुवत्प्र[9]योगस्तत्राभ्युप[10]गन्तव्य इति दर्शितम्[11]। तत् [12]स एवात्र व्याख्येयो नान्य इति ॥

अथ तृतीयप्रश्नस्य निरासः —

द्वादशान्ते तु [13]ते छेद्याः शरेणास्त्रेण संयुताः ॥२८॥
तदा सायुज्यतां यान्ति समयैः परिवर्जिताः।

प्रतितत्त्वं [अ]शुद्धेऽध्वनि तावत्पृथिव्यादिषु तत्त्वेषु ब्रह्माद्याः शिवान्ता [14]द्वादशात्राधिष्ठातारः शिवादयस्त्रयो विद्येश्वराश्चाष्टौ तत्त्वेश्वरश्चैक इति। यत्रापि तत्त्वेश्वरा बहवः पूज्यन्ते, तत्र भुवनेश्वरास्ते ज्ञेयाः। तत्रैवास्तु तत्प्रोक्त[15]प्रोन्तवत्तत्त्वात्तत्प्रधान[16]भूता एवेति द्वादश एवोक्ताः श्रीमत्**पारमेश्वरा**दाविवेत्यविरोधः। एतच्चोपलक्षणं [अ]शुद्धेऽध्व[17]न्यष्टत्र्येकानां, तस्य द्वादश-तत्त्वेश्वरस्य ब्रह्मादेरन्ते तदधिष्ठेये पृथिव्यादितत्त्वे, तद्द्वारेण **ते** [18]पाशाः **छेद्याः** तेषां पाशु-पतास्त्रेण [19]यदा [20]भवन्ति; तदा ते दीक्षिताः, तेन तदीश्वरेण **सायुज्यतां यान्ति**। तत्**समयैः** आज्ञानियमैः **परिवर्जिताः** [21]तत्समा एव भवन्तीत्यर्थः। तन्न दोषः। न तु दीक्षोत्तरकालानुष्ठेयैः परिवर्जिता इति [22]कौलाचार्यवद्व्याख्येयम्। तेषां तदवश्यानुष्ठेयत्वेनोक्तत्वात्। तथा द्वादशान्तं यावन्नादवृत्तिप्रेरणया मन्त्रोच्चारे सति आचार्येण ते पाशास्तत्र छेद्यास्तदा [23]निस्वनस्य निष्कल-स्वरूपोदयात्। न तु रुद्रस्थाने इति वक्ष्यामः[24] —

"प्रासादाब्जशिखान्तस्थो यस्तु दीक्षां [25]करोति" इत्यदोषः ॥

---

[1] ०प्राणिशक्ति० — अ
[2] ०प्रभावात्मको — अ, आ
[3] विषुप्रयोगो — अ
[4] सार्धत्रि० ८.३० उ०, ३१ पू० वृत्तौ।
[5] तद्विषुवप्रयोग० — अ, आ
[6] वक्तु शक्त्रे शक्यै भावात् — आ
[7] संहारः सुमह० — अ
[8] तदस्ती० — अ, आ
[9] ०योगास्तत्रा० — अ
[10] ०गन्तव्याः — अ
[11] सार्धत्रि० ८.३० उ०, ३१ पू० वृत्तौ।
[12] सर्व एवात्र व्या० — अ; सर्वं एवात्रे व्या० — आ
[13] ते इच्छा शरेणास्त्रेण संयुक्ताः — अ; कृते इच्छाद्याः शरेण शस्त्रेण संयुक्ताः — आ
[14] द्वादशान्ताधिष्ठातारः — अ, आ
[15] ०प्रान्तवन्तत्वा० — अ
[16] ०भूत एवेति क एवेति द्वादश — अ, आ
[17] ०न्यष्टत्र्यध्येकानां — अ, आ
[18] पाशे चोद्यास्तेषां — अ; पाशाश्चोद्यास्तेषां — आ
[19] 'यदा भवन्ति' इति नास्ति — अ
[20] भवति — आ
[21] तत्सम एव भवतीत्यर्थः — अ
[22] काळाचार्य० — अ, आ
[23] निस्वन्तस्य — अ, आ
[24] सार्धत्रि० २२.४ पू०
[25] करोमि — अ, आ

अथ चतुर्थप्रश्नोत्तरस्य ज्ञानात्मकत्वेन [1]वक्ष्यमाण[2]प्रकरणानुगुणत्वात्, तमतिक्रम्य पञ्चमनिरासः –

[3]अनिर्दिष्टमसंज्ञं च यत्कृतं [4]तद्वृथा भवेत् ॥२९॥
[5]तमुद्दिश्य कृतं कर्म [6]मोक्षदं [7]तन्न संशयः ।

अविद्यमानं [8]निर्दिष्टं मन्त्रबीजं यस्मिन् [9]प्रागुक्ते [10]ग्रहणे, एवं [11]मोक्षे कर्मणि संज्ञा च न विद्यते यस्मिन्, गृह्य[12]माणस्य मोच्यमानस्य च तदेतत् कर्मानुष्ठितं **वृथा भवेद्** इति [13]शिवं संस्कार्यसंज्ञाविशेषं च **उद्दिश्य** तत्कर्म[14]ग्रहणं मोक्षप्रदं भवेदिति । अवश्यमत्र शिवपदं संज्ञापदं [15]चोद्देश्यमित्यर्थः । अत एवात्र [16]प्रागुक्तस्य [17]न तस्य बाधा भिन्नविषय[18]त्वात्सूद्देश्यतया हृदयं च कर्ममन्त्रत्वेनोक्तं यतः । ततश्च शिवमुच्चार्य हृदयं च [19]दीक्षयात्मनो ग्रहणमिच्छामीवेति प्रयोगः कार्य इत्यर्थः ॥

अधुनावशिष्टस्य चतुर्थस्य प्रश्नस्य निरासः —

सूर्यस्य ग्रहणे वत्स विषुवद्योगसंयुतम् ॥३०॥
[20]आयामान्ते [21]यदा छिन्नं तदा [22]चोत्क्रमते ध्रुवम् ।

स्थूलशरीरक्षपणायोत्क्रान्तिः पशुदर्शनेष्वपि सिद्धेरन्यत्रारब्धकार्यकर्मक्षयाय कदाचिद्दीक्षितैरनुष्ठेयेति तत्प्रश्नोत्तरत्वेनोपदिष्टम् । यदुक्तं श्रीमत्[23]**स्वायंभुवे** —

"अथा[24]त्मनो वधं मन्त्री न कुर्यात्फलवाञ्छया ।
न च दुःखसमुत्पत्तौ कामतो देहमुत्सृजेत् ॥
यदि निर्वेदमापन्नोऽप्राप्तभोगोऽथवा ततः ।
ध्यानधारणयोगेन शिव[25]लीनमनास्त्यजेत् ॥" इति ।

ततः **सूर्यस्य** [26]प्रकाशात्मकत्वाद्बुद्ध्यादेः पुर्यष्टक[27]स्थाच्छरीराद् **ग्रहणनिमित्तं विषुवत्सं**[28]प्रयोगेण [29]संयुक्तं शरीरं कृत्वेत्यर्थात्संबध्यते । तस्यैतत्प्रयोगयुक्तत्वात् । यद्वक्ष्यति **जीवज्ञानप्रकरणे**[30] —

---

[1] सार्धत्रि० ८.३० उ० — ३३ पू० वृत्तौ ।
[2] प्रकारानुगुण० — अ
[3] आनिष्टमसंज्ञं च यत्कुतस्त० — अ; अनिष्टमसंज्ञं च यत्कृतं तद्वृधा — आ
[4] तद्यथा — उ
[5] तदुद्दिश्य — मु
[6] मोक्षादं — इ.
[7] ते न संशयः — ई
[8] तन्निर्दिष्टं — अ
[9] सार्धत्रि० ८.१५ उ० — १९ पू० वृत्तौ ।
[10] ग्रहणमेव — अ, आ
[11] नाखे — आ; 'मोक्षे' इत्यारभ्य 'तत्कर्मग्रहणं' इत्यन्तं नास्ति — अ
[12] ०माण समोच्य० — आ
[13] शिवसं० — आ
[14] ०ग्रहणमोक्ष० — आ
[15] चोद्दिश्य० — आ
[16] सार्धत्रि० ८.१५ उ० — १९ पू० वृत्तौ ।
[17] न न दस्य — आ
[18] ०त्वात्भ्युद्देश्यतया — आ
[19] दीक्षात्मानं — अ, आ
[20] आयामोन्ते — इ, उ
[21] यदाच्छिन्न तदा चोत्क्रमते — उ
[22] चेत्क्रमते — अ, आ, इ
[23] स्वायंभुवादौ — आ; स्वायंभुवे ३१.१, २.
[24] ०त्मनोपयन्मन्त्री — अ
[25] ०लीलमना० — अ
[26] प्रकाशकत्वा० — अ, आ
[27] ०स्यास्थिनाच्छरीरा० — अ
[28] ०प्रयोगेन — अ, आ
[29] संवृतं — आ
[30] सार्धत्रि० ११.५ उ०

"मध्ये तु विषुवत्प्रोक्तं पुटद्वयविनिःसृतम् ।"

इति [1]तस्य छेदात् प्राणापानप्र[2]वाहवियोगाद्यदा त्वभ्यासतः प्राणा[3]यामान्ते ब्रह्मरन्ध्रमार्गेण मध्यनाडीप्राण[4]रेचनात्मको भवति, तदानीं पूरकाद्यसंभवात् । तदानीं तस्मिन् सति तच्छरीरं विच्छिन्नं बन्धकत्वेन भवतीत्यसावुत्क्रान्तिकर्ता निश्चितमुत्क्रामति पञ्चतामायातीति [5]व्याख्यातः पुर्यष्टकोत्क्रमणं कथमिति प्रश्नार्थः । यदुक्तं श्रीमत्**त्रयोदशशतिके** —

[6]द्वितीयां ते प्रवक्ष्यामि [7]उत्क्रान्ति पाशदाहिकाम् ।" इति ॥

तत्राप्युच्यते —

मनसि ग्रथिताः पाशाः सूत्रे मणिगणा इव ॥३१॥

अज्ञानं हि [8]प्राकृतमनात्मादा[9]वात्माभिमानाद्यात्मकं समस्तकर्महेतुः । कर्म च धर्मादिकं कलादिक्षित्यन्तानां पुर्यष्टकाख्यानां पाशानां हेतुरप्यात्मनः । यदुक्तं श्रीमत्स्वायंभुवे[10] —

"कर्मतश्च शरीराणि [11]विषयाः [12]करणानि च ।
भोगसंसिद्धये भोक्तुर्भवन्ति न भवन्ति च ॥" इति ।

ततश्च [13]यद्द्वयमपि बुद्धौ वर्तते तेषां गुणत्वेनोक्तत्वात् [14]तस्याः । अत एव [15]मनःशब्देनात्र बुद्धिरेवोच्यत इति **मनसि ग्रथिताः पाशाः** तस्मिन्नर्थयुक्ताः[16] ॥३१॥

किमत इत्युच्यते —

[17]हृत्पद्माद्यावतत्पद्मं[18] मनस्तन्तुवितानितम्[19] ।
तद्दृष्ट्वा छेदनं कुर्यान्मनोवृत्त्या मनश्छिदा[20] ॥३२॥
मनसा मनसि छिन्ने जीवः केवलतां व्रजेत् ।

हृत्पद्माद् यावत्तत्पद्मं यदानन्तासनत्वेनोक्तं मायाख्यं [21]तद् **मनस्तन्तुवितानितम्** इति [22]तदज्ञाननिबन्धनसर्वकर्माक्षिप्तमित्यर्थः । ततश्च **तद्** मनः **दृष्ट्वा** ध्यानधारणादियोगाभ्यासेन साक्षात्कृत्य

---

[1] तस्या छेदा प्राणा० — अ; तस्या छेदा प्राणो — आ
[2] ०वाहावियोगा — आ
[3] ०यामोऽन्तो — अ; ०यामान्तो — आ
[4] ०रेचनानको — आ
[5] प्यधातूपुर्यष्ट० — अ; व्याधातूपुर्यष्ट० — आ
[6] द्वितीयं ते — आ
[7] उत्क्रान्ति पाश० — अ, आ
[8] प्रकृत० — अ, आ
[9] ०वाद्याभि० — अ
[10] स्वायंभुवे – ३२.१३
[11] विषयः — अ; विषयं — आ
[12] कारणानि — अ
[13] 'यद्' इति नास्ति — आ
[14] अतस्या तस्या — आ
[15] नमः शब्दो नात्र — अ, आ
[16] ०न्नर्थमुक्ताः — अ, आ
[17] ३२ श्लोकः, ३३ पूर्वार्धं च न स्तः अ, आ मातृकयोः । वृत्तिः परं दृश्यते । हृत्पद्मं ब्रह्मपद्मं तु — इ, मु
[18] ०द्याव तत्पद्मं — उ
[19] ०वितानितः — इ, उ
[20] मनश्चिदा — ई
[21] तमनुस्तन्तु तातेति — अ; तन्मनुस्तन्तु ताततिते — आ
[22] तज्ज्ञान — अ, आ

छेदनं कुर्यात् तत्स्थस्य [1]तस्य अज्ञानस्य। केनोपायेनेत्युच्यते — **मनोवृत्त्या** एवानया योगा[2]त्मिकया। यदाहुः[3] — "चित्तवृत्तिनिरोधः" इति, [4]यतो युक्त इति, पुरुषविवेकोदयफलत्वादेषैव तन्मनोगत-[5]मत्राच्छिनत्तीति [6]**मनश्छिद्** ततस्तयैव करणभूतयेति। एवं च [7]**मनसा** तद्विषयेण योगाभ्यासेन [8]**मनसि** तत्स्थे तस्मिन्नज्ञानलक्षणे **छिन्ने** सति परप्रकृतिविवेकोदयात् तदाज्ञाननिमित्तानामपि पाशाना[9]मुत्क्रान्त्या जीवात्मा स्वपरिणत[10]मलत्वाद् विज्ञानकेवलत्वं व्रजति। तदुक्तं **सिद्धगुरुभिः**[11] —

"[12]कलातत्त्वोर्ध्वभुवने कैवल्यं संभवेत्पशोः।
विज्ञानयोग[13]संन्यासैर्भोगाद्वा कर्मणः क्षयात्॥" इति।

अतः परिणतमल[14]प्राप्त्या दीक्षया च तदा प्रायश्चित्त[15]केवलत्वमिति। अपरप्रकृति[16]ज्ञाननिष्ठाः सांख्यादयो यथा प्राप्य[17]मिच्छन्तः, तत्त्वाभ्यासेन योगेन [18]तत्तत्त्वमात्रकेवलत्वं [19]व्रजन्ति। तदुक्तं **सिद्धगुरुभिः**[20] — "गुणतत्त्वोर्ध्व[21]भोग्यस्य" इति। श्रीमत्**सर्वज्ञानोत्तरे**[22] —

"बुद्धितत्त्वे स्थिता बौद्धा गुणेष्वेवार्हताः स्थिताः।
स्थिता वेदविदः पुंसि अव्यक्ते पाञ्चरात्रिकाः॥" इति।

न तु विज्ञान[23]केवलत्वं तेषाम्। [24]तदूर्ध्वतत्त्वभाविनां कर्मणामक्षपितत्वादिति। तदुक्तम्[25] —

"गुणतत्त्वोर्ध्व[26]भोग्यस्य [27]कर्मणोऽनुपलब्धितः।
कैवल्यमपि सांख्यानां नैव [28]युक्तमसंक्षयात्॥"

इत्यविरोधः॥

अधुना प्रसङ्गाज्ज्ञानदीक्षाविषयः प्रश्नः —

[29]विस्तरं त्यज देवेश संक्षेपात्कथयस्व मे॥३३॥
[30]येन विज्ञानमात्रेण पशून्मोचयते क्षणात्।

---

[1] तस्य ज्ञानस्य – अ, आ
[2] ०त्मिकाया — अ, आ
[3] योगसू० — १.२
[4] यतः प्रकर्तव्य इति — अ
[5] ०मन्त्राच्छिनत्तीति — अ, आ
[6] मनश्चित्ततस्तवैकरण० — अ, आ
[7] मनसा मनसा तद्विषयेण — आ
[8] मनस्तस्थे — अ
[9] ०मुत्क्रान्ति जीवात्मा — अ
[10] ०मलत्वा च ज्ञान० — आ
[11] परमोक्षनिरासकारिकायां श्लो० ५४
[12] कला ततो वध्वं भुवने — आ; 'अङ्गुष्ठमात्रभुवने' इति परमोक्षनिरासकारिकापाठः।
[13] ०विन्यासै० — अ
[14] ०प्राप्तं दीक्षाश्च — अ, आ
[15] केवलित्व० — अ
[16] ०ज्ञानिष्ठाः — अ
[17] ०मिच्छन्त्वा — आ
[18] तं तत्त्वमात्रा० — अ
[19] व्रजति — अ, आ
[20] परमोक्षनिरासकारिकायां श्लो० ५२
[21] ०भोगस्य — अ, आ
[22] मुद्रितसर्वज्ञानोत्तरे नोपलभ्यते।
[23] ०केवलित्वं — आ
[24] तदूर्ध्वं तत्त्व० — अ
[25] परमोक्षनिरासकारिकायां श्लो० ५२
[26] भोगस्य — अ; भागस्य — आ
[27] कर्मणानुप० — अ, आ
[28] युक्तं हि संक्षयात् — अ; युक्तमसांक्षयात् — आ
[29] 'विस्तरं' इत्यतः पूर्वं 'कार्तिकेयः' इत्यधिकम् — इ, ई, उ, मु
[30] इदमर्धं 'अ, आ' कोशयोर्न दृश्यते।

[1]बहुद्रव्यभूमिमण्डलतिलाद्याहरणादिविस्तरं त्यक्त्वा, **येन विज्ञानमात्रेण** एव दीक्षाप्रयोगेण[2] **पशून्** आचार्यो **मोचयते** यदि तं कथयेति ॥

अत्र समाधिः —

[3]शृणु षण्मुख तत्त्वेन येन मोक्षो [4]ध्रुवं भवेत् ॥३४॥

तत्र तावदभ्यस्तयोगे[5]नैवाचार्येणायं दीक्षाप्रयोगो विधेय [6]इत्युच्यते —

[7]प्रयोगेणातिसूक्ष्मेण योगदृष्टेन मन्त्रवित् ।
[8]दिव्येन [9]योगमार्गेण [10]शक्तिं यः प्रेरयेत्तु ताम् ॥३५॥
तं विदित्वा महासेन जीवं [11]प्राणमयं बुधः ।
विषुवत्संप्रयोगेण[12] योजयेच्छाश्वते पदे ॥३६॥
योगं तु विषुवं प्राप्य को न मुच्येत बन्धनात् ।

यः तां प्राणशक्तिं प्रेरयेत्। [13]**तं जीवं** प्राणाधारमहंकारवृत्तिप्राणाद्यास्पदत्वात् **प्राणमयं मन्त्रविद्** आचार्यो **विदित्वा** पुर्यष्टकाख्यमित्यर्थः। यद्वक्ष्यति **विज्ञानप्रकरणे**[14] —

[15]"पुर्यष्टकसमायुक्तो ह्यध ऊर्ध्वं स गच्छति।" इति।

[16]नन्वतीन्द्रियोऽसौ पुर्यष्टकाख्यो [17]जीवः, तत् कथमसौ तं वेत्तीति तदर्थमेतत् — [18]**प्रयोगेणातिसूक्ष्मेण योगशास्त्रदृष्टेन दिवि** हृदयाकाशे साधुना ध्यानधारणादियोगाभ्यासमार्गेण तं साक्षात्कृत्य, [19]पूर्वदीक्षाप्रयोगोक्तशिवशक्ति**विषुवत्प्रयोगेण**[20] **शाश्वते** कर्माक्षिप्तत्वादवश्य[21]भोग्य**पदे** तत्त्वात्मके **योजयेद्** इत्युक्तम्। **योगं तु** विषुवल्लक्षणं **प्राप्य को न मुच्येत बन्धनाद्** इति ॥

न [22]केवलमेतदेव ज्ञात्वा यावत् —

[23]पृथिव्याद्यब्जनाडीर्वै शब्दादिगुणवायुभिः ॥३७॥
आत्माधि[24]देवता मन्त्राञ्ज्ञात्वा मुक्तस्तु मोचयेत् ।

---

[1] बाहुद्रव्य० — अ
[2] ०प्रयोगेन — आ
[3] 'शृणु षण्मुख' इत्यतः पूर्वं 'ईश्वरः' इत्यधिकम् — इ, ई, उ, मु
[4] भवेद् ध्रुवम् — इ, ई, उ
[5] ०नैवाणेयं दीक्षा० — आ
[6] इत्युच्यन्ते — अ, आ
[7] ... योगेन सूक्ष्मेण — अ; प्रयोगेन् तु सूक्ष्मेण — आ, मु ; प्रयोगेण तु सूक्ष्मेण — इ, ई, उ
[8] द्रव्येण भोग० — अ
[9] भोग० — आ
[10] शक्तयः प्रेर० — अ, आ
[11] वायुमयं — अ, आ, इ, ई, उ, मु
[12] ०योगेन – अ, आ, मु
[13] तज्जीवं — अ, आ
[14] सार्धत्रि० १७.४ पू०
[15] पुर्यष्टकस्य योगाद्धि अतश्चोर्ध्वं — अ; पुर्यष्टकस्य योगादधश्चोर्ध्वं — आ
[16] न त्वित्यतो इन्द्रियोऽसौ — अ; न त्वन्यतोन्द्रियोऽसौ — आ
[17] जीव तत् — अ; जीवतः कथं सौ तं — आ
[18] प्रतियोगेनाति० — अ
[19] सार्धत्रि० ८.२७ उ०, २८ पू० वृत्तौ
[20] ०योगेन — आ
[21] भोग्यभोग्यपदे — अ, आ
[22] केवलं तदेव — आ
[23] पृथ्व्याद्यब्ज० — इ, उ
[24] ०देवतान्मन्त्रा० — अ, इ, ई, उ, मु

पृथिव्यादीनां महाभूतानां देवताकाराणां पञ्चानां [1]मायाब्जादीनि पञ्चासनभूतानि, तेषां च [2]ध्यानासनग्रन्थिमुखेष्वेषां स्थितिश्चिन्त्या। अत्र च "त्रिषु [3]बहुत्वपरिसमाप्तिः" इति [4]न्यायेन प्रधाननाडीत्रयमे[5]वात्रापेक्षितम्। यद्वक्ष्यति **जीवज्ञानप्रकरणे**[6] —

[7]"सुषुम्ना मध्यमे [8]ह्यङ्गे इडा वामे प्रकीर्तिता।
[9]पिङ्गला दक्षिणे मार्गे" इति।

ताः यथावद् **ज्ञात्वा** तथात्मा दीक्षासंस्कार्यो[10]ऽचिद्रूपोऽनित्योऽव्यापकत्वधर्मयुक्तः, तद्भोगसाधनश्च पुर्यष्टकाख्योऽनाद्यात्माभिमानः, [11]प्राग्वद् **अधिदेवताश्च** ब्रह्माद्याः। यद्वक्ष्यति **विज्ञानप्रकरणे**[12] —

"ब्रह्मा विष्णुश्च रुद्रश्च [13]ईश्वरः शिव एव च।
पञ्चधा पञ्चदैवत्यः सकलः परिपठ्यते॥" इति।

निवृत्त्याद्यास्तु कलास्तदधिदेवता इत्युक्तमत्रैव[14] — "पृथिवी ज्ञेया" इत्यादिना। **मन्त्राश्च** सद्योजातादयः। यद्वक्ष्यति **प्रासादनिर्णयप्रकरणे** —

"[15]सद्यस्तु पृथिवी ज्ञेयो वामो ह्यापः प्रकीर्तितः।
अघोरस्तेज इत्युक्तो वायुस्तत्पुरुषः स्मृतः॥
आकाशस्तु भवेदीशः" इति।

तानपि **ज्ञात्वा मुक्तस्तु** आचार्यो भवति **मोचयेत्** शिष्यानिति। कैः [16]करणैर्मोचयेदित्युच्यते — **शब्दादिगुणवायुभिः** इति। [17]**गुणेति** गुण्येव अजन्तः। ततश्चायमर्थः — पृथिव्यादिगतशब्दादिगुणवद्[18]गुणिनां संख्यानं येषां वायूना[19]मुद्घातानां, तैर्मोचयेत्। [20]गुणित्वात्पृथिव्याः पञ्चोद्घाताः। ततश्चैकैक[21]गुणापचयाज्जलादीनां क्रमेण [22]तदपचय इत्युक्तं भूतशुद्धौ[23] —

"पञ्चोद्घा[24]ताश्च चत्वारस्त्रयो द्वावेक एव च।" इति॥

---

[1] मायाशब्दानि — अ, आ
[2] ध्यानासनो ग्रन्थि० — अ; यानासनो ग्रन्थि० — आ
[3] बहुत्वं परि० — अ; बहुत्वं परिसमाप्तमिति — आ
[4] शाबरभाष्यम् ११.१.८
[5] ०वात्मपक्षितं — आ
[6] सार्धत्रि० ११.७
[7] 'सुषुम्ना' इत्यारभ्य 'विज्ञानप्रकरणे' इत्यन्तो भागः 'आ' मातृकायां न दृश्यते।
[8] ह्येते — अ
[9] पिङ्गलादिदक्षिणमार्ग — अ; 'मार्गे' इत्येतत्स्थाने मूलमातृकासु सर्वत्र 'अङ्गे' इत्येव पाठः।
[10] दीक्षासंस्कार्या — अ, आ
[11] प्रागुक्तवपधि – अ; सार्धत्रि० २.२–३ पू० वृत्तौ।
[12] सार्धत्रि० २३.९ उ०, १० पू०
[13] ईश्वरश्च सदाशिवः – अ, आ पाठान्तरम्
[14] सार्धत्रि० ८.६, ७
[15] सार्धत्रि० २२.१२, १३ पू०; सद्यश्च – अ, आ
[16] कारणै० – अ
[17] गुणितं गुणौ वज्रमन्तः – अ; गुणितगुण एव ज्ञामन्तः — आ
[18] गुणिनसंख्यानं — अ, आ
[19] ०मुत्पातानां — अ; ०मुद्घातनां — आ
[20] गुणत्वा० — अ; पञ्चगुणत्वा० — आ
[21] ०गुणाविचजयाज्जला० — अ
[22] तत्पय इत्युक्तं — अ; तदपय इत्युक्तं — आ
[23] सार्धत्रि० २.४ पू०
[24] ०ताश्चत्वार० — अ; ०तश्चत्वार० — आ

[1]अथ कथं तैर्मोचयेदित्युच्यते —

नाडीविवरसंबन्धा ऊर्ध्वनाला [2]ह्यधोमुखाः ॥३८॥
ग्रन्थिद्वययुताः सर्वे हुंफडन्तेन [3]योजिताः ।
[4]ततश्चोर्ध्वत्वमायान्ति उद्घातैः पूर्ववद्गुह ॥३९॥

पूर्वं तावन्तोऽब्जा नाडीत्रयग्रन्थिविवरनिर्गता **अधोमुखाः** [5]एवात्माधिदेवमन्त्राधिष्ठिताः संसार[6]प्रवणत्वादस्य भावनीयाः। कुतः स्थानात्प्रभृति [7]केषु स्थानेष्विति चेत् कन्दस्थानात्प्रभृतीति दर्शितं सर्वव्याख्यातृभिर्भूतशुद्धौ[8]। यद्वक्ष्यति **नाडीचक्रप्रकरणे**[9] — "नाभेरधस्ताद्यत्कन्दम्" इत्यादीनि। [10]तच्चायुक्तमियता, अत्रैवोक्तं[11] — "हृत्पद्माद्यावत्तत्पद्मम्" इति। तदधिदेवतानामपि ततः प्रभृत्यवस्थितेः। यद्वक्ष्यति **ज्ञानामृतप्रकरणे**[12] —

"ब्रह्मणो हृदयं स्थानं कण्ठे विष्णुः समाश्रितः ।
तालुमध्ये स्थितो रुद्रो ललाटस्थो महेश्वरः ॥
नादान्ते तु शिवं विद्या[13]त्तस्यान्ते तु परं पदम् ।" इति।

नाडीचक्रं तु तथा [14]स्वप्रकरणे श्रुतेस्तत्रैव भाव्यमित्यविरोधः। ततश्च [15]भूतशुद्धिप्रकरणोक्तक्रमेणोद्घातै[16]रूर्ध्वमुखमायातत्त्वेन निर्वर्त्यत इत्यर्थः। [17]चशब्दा[18]द्दीक्षया अपि फट्[19]कारेण **योजिताः** [20]तेनैव [21]क्रमेण **ऊर्ध्वत्वमायान्ति** इति। उक्तं **भूतशुद्धौ**[22] —

"हुंफडन्तेन पटलं भित्त्वा चोर्ध्वं विशेत्ततः।" इति ॥३८-३९॥

ततश्च —

[23]क्ष्माद्यानालोक्य मनसा सबाह्याभ्यन्तरं पुनः ।
तत्त्वे तत्त्वे [24]नियोक्तव्या वियुक्ता निरहंकृता[25] ॥४०॥

---

[1] अथ तदन्तैर्मोच० — अ
[2] ह्यधोमुखाः — इ, उ
[3] रेचिताः — अ, आ, इ, ई, उ, मु; वृत्त्यनुसारेण पाठ उद्धृतः।
[4] ततश्चेपमायान्ति — अ; ततश्चोन्मुखमायान्ति — आ
[5] देवात्माधि० — अ
[6] ०प्रणवत्वादस्य — अ, आ
[7] 'केषु' इत्यारभ्य 'प्रभृति' इत्यन्तं नास्ति — अ
[8] सार्धत्रि० २.२ पू० वृत्तौ।
[9] सार्धत्रि० १०.१ उ०
[10] तच्च युक्तमियतोत्रैवोक्तं — अ; तं च युक्तमियतोत्रैवोक्तं — आ
[11] सार्धत्रि० ८.३२ पू०
[12] सार्धत्रि० २३.१० उ०, ११
[13] ०त्तस्यां तनुपरं पदम् — अ, आ
[14] सार्धत्रि० दशमप्रकरणे
[15] सार्धत्रि० द्वितीयप्रकरणोक्तक्रमेण।
[16] ०रूर्ध्वमुक्त्वा मायाकर्तृत्वेन निवर्तत — अ
[17] वशब्दा० — आ
[18] ०द्दीक्षा अपि — आ
[19] ०कारेणेति योजिताः — अ
[20] तेन क्रमेणास्वत्वमायान्ति — अ
[21] क्रमेणास्वत्मायान्ति — आ
[22] सार्धत्रि० २.३ उ०
[23] क्ष्माद्यामालोक्य — अ; 'क्ष्माद्यमालोक्य' इत्यन्यमातृकासु पाठः; व्याख्यानानुसारेण मूले पाठः शोधितः।
[24] च योक्तव्या — इ, ई, उ
[25] ०कृताः — आ, मु

बाह्ये [1]साधिकरणभुवनाद्यात्मकानामन्तश्च साधारणपुर्यष्टकाधिकरणत्वेन **क्ष्माद्याः** ये पञ्चकावस्थिताः। यदुक्तं [2]श्रीमन्**मतङ्गे**[3] —

[4]"तन्मात्राणीह घटवन्महाभूतानि लेपवत्।" इति।

[5]तान् **मनसा** [6]एव शुद्धान् **आलोक्य** तदूर्ध्वं तन्मात्रादिक्रमेण प्रतितत्त्वं योक्तव्याः शिष्याः [7]पूर्वतत्त्वाद् [8]**वियुक्ताः** सन्त इत्युपलक्षणम्। निर्वर्तित[9]प्रागुक्तसंयोजनादिसमस्तसप्तदशकर्मात्मकदीक्षाप्रयोगाः सन्त इत्यर्थः। **निरहंकृता** च गुरुणा ते **मनसा** योज्याः शिवेनापि तत्प्रधानकर्तृत्वभावेनेत्यर्थः ॥४०॥

ततश्च —

[10]ब्रह्माद्याञ्श्रावयेद्वत्स [11]न पुनर्जन्मतां[12] व्रजेत्।

[13]प्राग्वदत्रापि तत्त्वेश्वरोपस्थापनेन तत्त्वसंयोजनादि कर्तव्यमित्यर्थः॥

अथ किं [14]पूर्वदीक्षाप्रयोगवदेवात्र ग्रहणं सद्यः। विशेषान्तरयुक्तमित्युच्यते —

[15]तेजश्चेतो द्विरभ्यस्य आयामो भास्करस्य तु ॥४१॥
ताडयित्वा पुरा वत्स ग्रहणं पूर्ववद्भवेत्।

[16]प्राग्वदत्रापि तत्त्वेश्वरोप[17]स्थापनेन तत्त्वसंयोजनासंग्रहणं भवेत्। **भास्करस्य आयामः** ग्रहणं, तस्मिन् सति द्वादशान्तप्राप्ते प्राणप्रवाहे इत्यर्थः। यद्वक्ष्यति[18] —

"देहातीतं तु तं विद्यादादित्यग्रहणं बुधः।" इति।

यदैश्वरं **तेजः चेतः** [19]यदुच्चार्यं तत्। द्विरित्युपलक्षणम्। द्विवारम् **अभ्यस्य** तच्छक्तिद्वयविषुवप्रयोगस्थो भूत्वेत्यर्थः। ततः शिष्यदेहं [20]पूर्ववदेव **ताडयित्वा तद्ग्रहणं** कर्तव्यम्। अन्यथाकर्तुमशक्यत्वादित्युक्तम्[21]॥

---

[1] साधारणभुवना० — आ
[2] श्रीमतङ्गे — अ
[3] मतङ्गविद्या० १९.२१ उ०
[4] महाभूतानि कटवत् तन्मात्राण्यत्र लेपवत् — अ; महाभूतानि घटवत् तन्मात्राण्यत्र लेपवत् — आ। एवमेव पाठो मूलमातृकास्वपि दृश्यते। परं तु मुद्रितमतङ्गे १९.२१ पाठं, तस्य रामकण्ठवृत्ति, मृगेन्द्रवृत्तिदीपिकायां विद्या० १२.५ 'तदुक्तं मतङ्गे' इति निर्दिश्याघोरशिवाचार्यैरुद्धृतं पाठं चानुसृत्यात्र पाठः शोधितः।
[5] तन्मनसैव — अ
[6] 'एव' इति नास्ति — आ
[7] पूर्वत्वाद् — आ
[8] वियुक्तः — आ
[9] सार्धत्रि० ८.१५ उ०–१९ पू०
[10] ब्रह्माद्याः श्रा० — अ, ई, मु; ब्रह्माद्या श्रा० — इ; ब्रह्माद्याच्छा० — उ०
[11] नकारो नास्ति — ई
[12] ०र्जनितां — इ, ई
[13], [14] सार्धत्रि० ८.१५ उ०—१९ पू० वृत्तौ; २७ उ०; २८ पू० वृत्तौ।
[15] चेतश्चेतो — अ, आ, इ, ई, उ, मु
[16] सार्धत्रि० ८.१५ उ० – १९ पू०; २७ उ०, २८ पू० वृत्तौ।
[17] ०स्थापने तत्त्व० — अ, आ
[18] सार्धत्रि० – ११.९ उ०
[19] यदुच्चार्य येन्तद्विरित्युपलक्षणम्। के वारमभ्यस्य — अ; यच्चार्य येन्त द्विरित्युपलक्षणम् के वारामभ्यस्य — आ
[20] सार्धत्रि० ८.१५ उ० — १९ पू० वृत्तौ।
[21] सार्धत्रि० ८.१५ उ० — १९ पू०; २६ उ०, २७ पू० वृत्तौ।

"योगं तु [1]विषुवं प्राप्य को न मुच्येत बन्धनात् ।"
इत्येवं [2]प्रागुक्तेर्निक्षेपेऽप्यत्र[3] विशेषः —

[4]भित्त्वार्गलां [5]न्यसेद्योनिं ह्रत्वं तत्वेन [6]संधयेत् ।
शक्तिभिः संपुटीकृत्य वौषडन्तेन निक्षिपेत् ॥४२॥

प्रतीतमर्गला[7]बन्धं [8]प्रोक्तनयेन त्रिविधं [9]भङ्क्त्वा [10]तत्त्वान्तरं योनिभूतं **संधयेद्** इति प्रातिपदिकाण्णिजन्तस्य रूपम् । तत्रापि [11]पूर्वोक्तस्य शिवशक्तिविषुवत्प्र[12]योगेणानुग्राहकेश्वर**शक्तिभिः संपुटीकृत्य वौषडन्तेन** पाशुपतास्त्रेण **निक्षिपेद्** इति हृदयस्यात्र प्रकृतिप्राप्तस्य बाधः । न तूद्देश्यस्य शिवस्येति ॥४२॥

इति भट्टनारायणकण्ठात्मजभट्टरामकण्ठविरचितायां [श्रीमत्सार्धत्रिशति]-
कालोत्तरवृत्तौ दीक्षाप्रकरणमष्टमं [समाप्तम्]

इत्यष्टमः पटलः

---

[1] विषुवत्प्राप्य —अ, आ
[2] सार्धत्रि० ८.३७ पू०
[3] प्रागुक्तेराक्षेपोऽप्यत्र — अ; प्रागुक्तेरोक्षेपेऽप्यत्र — आ
[4] भित्त्वार्गलान्नयेद्योनिं — अ; हित्वार्गलान्नयेद्योनिं — आ; भित्त्वार्गलं —इ; . . .र्गलाभ्यसेद्योनितत्त्वं — उ
[5] नयेद्योनिं — मु
[6] बन्धयेत् — ई
[7] बन्धः — अ, आ
[8] सार्धत्रि० ८.१५ उ०–१९ पू० वृत्तौ ।
[9] भुर्भुत्वा — अ
[10] तत्त्वान्तरमयोनि० — अ
[11] सार्धत्रि० ८.२७ उ०, २८ पू०; ३५–३७ पू० वृत्तौ ।
[12] ०योगेनानुग्राहकीश्वर० — अ; ०योगेनानुशक्तीश्वर० — आ

नवमः पटलः

अभिषेकप्रकरणम्

समयदीक्षानिर्वाण[1]दीक्षात्मकः संस्कारः। साधकस्य वा दीक्षादीक्षितस्यैव मण्डलाभिषेकात्मकः। अधुना त्वाचार्यस्य तथाभूतस्यैवोच्यते —

अभिषेकं प्रवक्ष्यामि संक्षे[2]पान्न तु विस्तरात्।
[3]हिताय साधकेन्द्राणां [4]परमेशेन भाषितम्॥१॥

अभिषेकप्रकरणं विप्रैकविषयतया वक्ष्यामीत्यर्थः। यदुक्तं श्रीमत्**स्वायंभुवे**[5] —

"अथाचार्यवरः श्रीमानग्रजन्मा [6]सुपेशलः।" इति।

तच्च ये **साधकानामिन्द्राः** गुरवः, तेषां **हिताय**। [7]ननु तेषां [8]हितं दीक्षयैव सिद्धम्। सत्यम्। ऊर्ध्वमपि यदभिप्रेतं [9]तद्धितायेदमुच्यते। तदानीं स्वप्रयोजनाभावेऽपि तेषां [10]परानुग्रहस्यैवाभिप्रेतत्वाद्धि[11]तत्वमित्यविरोधः॥१॥

कथमसावभि[12]षेकः कार्य इत्युच्यते —

[13]मृण्मयं कलशं ह्येकं चन्दनेन विलेपितम्।
ब्रह्म[14]पत्रपुटं वाथ [15]पद्मपत्रमथापि वा॥२॥
[16]सर्वौषधियुतं कृत्वा सर्वगन्धोपशोभितम्।
शतमष्टोत्तरं जप्त्वा प्रासादं सर्वतोमुखम्॥३॥
[17]यागं कृत्वा तु पूर्वोक्तमभिषेकं तु कारयेत्।

[18]अल्पवित्तानामेवात्रोप[19]क्रमाद् **मृण्मयमेकम्** इति संक्षेपस्योपक्रमात्। ततश्च[20] —

"विद्येश्वराष्टजप्तैस्तु कलशैरभिषेचयेत्॥"

---

[1] दीक्षात्मकसं० — अ
[2] ०पाद्विस्तराद्गुह — अ, आ
[3] विधाय — ई; हितया — मु
[4] परमेशानभा० — ई
[5] स्वायंभुवे १५.१ पू०
[6] सुपेशनः — अ
[7] न तु — आ
[8] हि तद्दीक्षयैव — अ
[9] तद्द्वितयमुच्यते — अ; तद्वितयमुच्यते — आ
[10] पुरानु० — अ, आ
[11] ०तत्त्वमविरोधः — अ
[12] ०षेककार्य — अ
[13] जयं कलशमप्युदकं — अ; जयं कलशमभ्यर्च्य — आ
[14] ०वृक्षपुटं — अ, आ
[15] पद्ममात्रमथा० — अ, आ
[16] सर्वोषधिवृतं — आ
[17] यथाविधि तु पूर्वोवत० — इ
[18] सार्धत्रि० १.२
[19] ०क्रमान्मयामेकदिति — अ, आ
[20] आकरो न लभ्यते।

इत्यादिना संहितान्तरश्रुतायास्तदष्टसंख्या[1]याश्च। [2]अथवात्र **ब्रह्मपत्रपुटं वाथ** इति पलाशपत्रनिर्मितम्। **शतमष्टोत्तरं जप्त्वा प्रासादम्** इति प्रासादं **सर्वतोमुखम्** [3]निष्कलं रूपं तत्र संपूज्य, तन्मात्राक्षराष्टा[4]धिकशतजपेन [5]प्रागुक्तमण्डल[6]यागं तत्स्थशिवविज्ञप्तिकया [7]च तं **कृत्वा अभिषेकं** तस्य कुर्यात्। अत एवैतत्कलशान्तरं प्रधानभूतमेवौपदेशिकं [8]यत् तन्मण्ड[9]लाङ्गत्वेनोपपत्तेः प्राप्तं [10]तदातिदेशिकमन्यदेवेति भेदः ॥

[11]कथं चैतत्कुर्यात् —

[12]शुभनक्षत्रदिवसे मुहूर्ते [13]करणान्विते ॥४॥
बहुमङ्गलनिर्घोषैः शङ्खवादित्रनिःस्वनैः[14]।
ब्रह्मघोषैश्च विविधैर्नृत्तगीतसमन्वितैः ॥

ततश्च —

[15]अनुज्ञातोऽभिषिक्तश्च[16] आचार्यः पाशहा भवेत् ॥५॥

[17]स्वगुरुणा चात्राचार्येण **अनुज्ञातः** [18]सन्। उक्तं च श्रीमत्स्वायंभुवे[19] —
"अद्य संक्रामितो योऽयमधिकारो मया त्वयि।
कर्तव्यं हि त्वया यावन्नैव संक्रामितोऽन्यतः॥" इति।

अभिषिक्तश्च एवम् **आचार्यः** शिवः पशुपाशहा **भवेत्** इति। न संहितान्तरे [20]श्रुतमस्य तदाचार्यव्रतानुष्ठानमुपयुज्यते इत्यर्थः ॥५॥

इति भट्टनारायणकण्ठात्मजभट्टरामकण्ठविरचितायां श्रीमत्[सार्धत्रिशति-]
कालोत्तरवृत्तौ अभिषेकप्रकरणं नवमं [समाप्तम्]

इति नवमः पटलः

---

[1] ०याश्चोथोऽत्र — आ
[2] अथोऽत्र ब्रह्म० — अ
[3] निष्कलरूपं — आ
[4] ०धिके शतं जपेन — अ; ०धिकशते जपेन — आ
[5] सार्धत्रि० सप्तमपटले
[6] ०यागतत्स्थ० — अ, आ
[7] वा तं — अ; वतं कृत्वाभिषेकान्तस्य — आ
[8] यत्तमण्ड० — आ
[9] ०लागतत्वे० — अ
[10] तदादिदेशि० — अ
[11] कथा कथं ते तत्कुर्यात् — आ
[12] शुभे नक्षत्रे दिवसे — अ, मु
[13] कुशलान्विते — अ, आ, मु
[14] ०निस्वनैः — अ, आ, इ, उ, मु
[15] संप्रज्ञातो — इ
[16] ०षिक्तं च — उ
[17] स्वगुणा इत्यत्राचार्येण — अ; स्वगुणावत्राचार्येण — आ
[18] सम्यगुक्तम् — आ
[19] 'अद्यप्रभृति संक्रान्तो योऽधिकारो मया त्वयि।
कर्तव्यं हि त्वया तावद्यावत्संक्रमतोऽन्यतः॥'
स्वायंभुवे २४.२१
[20] श्रुतस्य — अ, आ

दशमः पटलः

नाडीचक्रप्रकरणम्

[1]साधकस्य [2]भावनोपयोगाय नाडीचक्रोपदेशः। यद्वक्ष्यत्युपसंहारे[3] — "कथितमिह सिद्धिहेतोः" इति।

नाडीचक्रं [4]परं सूक्ष्मं प्रवक्ष्याम्यनुपूर्वशः।

तच्च **परं सूक्ष्मम्** इत्यनेन प्रधानाप्रधानलक्षणेन [5]**चक्रं** क्रमेण वक्ष्यामीति॥

तत्र मूलमध्यक्रमेण तावदुच्यते —

नाभेरधस्ता[6]द्यत्कन्दमङ्कुरास्तत्र निर्गताः॥१॥
[7]द्वासप्ततिसहस्राणि[8] नाभिमध्ये व्यवस्थिताः[9]।
तिर्यगूर्ध्वमधश्चैव [10]व्याप्तं [11]नाभेः समन्ततः॥२॥
चक्रवत्संस्थिता नाड्यः [12]प्रधाना दश तासु याः।

मुष्कपृष्ठे [13]**यत् कन्दं** मूलं, तस्मिन् **अङ्कुराः** इव [14]नाड्यः सुषिररूपा वायुरसशोणितप्रवाहाय **निर्गताः** याः, एताः **नाभिमध्ये** अनन्त[15]संज्ञाः **चक्रवत् तिर्यगूर्ध्व[16]मधः** स्थिताः। [17]**नाभेः** च सर्वमेवैतच्छरीरं रोमकूपान्तं व्याप्तम्। ऊर्ध्वं च [18]प्राणवहाभिरेव। अधश्च रेतोमूत्र[19]पुरीषवहाभिः। **तासु** मध्यात् **प्रधानाः दश** वै॥

ता एव नामभिरुच्यन्ते —

इडा च पिङ्गला चैव सुषुम्ना च [20]तृतीयिका॥३॥
गान्धारी [21]हस्तिजिह्वा च पूषा चैव [22]यशास्तथा।

---

[1] साधनस्य — अ, आ
[2] भा . . . नोपायो गायका . . . .चक्रोप० — आ
[3] सार्धत्रि० १०.२८ उ०
[4] प्रवक्ष्यामि परं सूक्ष्ममनु पूर्वशः — इ, ई, उ
[5] चक्रक्रमेण — अ, आ
[6] ०द्यत्स्कन्द अङ्कुरा० — अ, इ, ई, उ; द्यस्कन्द अङ्कुरा० — आ
[7] द्वित्रिसप्तसह० — इ; द्वात्रिसप्तसह० — उ
[8] ०सहप्राणि — आ
[9] ०स्थिता — इ, ई, उ
[10] व्याप्ति नाभिः — इ; व्याप्ता नाभिस० — ई; व्याप्तिर्नाभिः — उ
[11] नाभिसमन्ततः — आ
[12] प्रधानादृश तासुधाः — अ; प्रधानदश तासु याः — आ
[13] यः कन्दः मूलं नाङ्कुरा इव — अ; यः कन्दः मूलं तस्मिन्नङ्कुराः — आ
[14] नाड्य सुषिर० — अ
[15] संज्ञः — अ
[16] ०मवस्थिताः — अ; ०मधस्थिताः — आ
[17] नाभिश्च — अ, आ
[18] नवा नवाहाभिरेव—अ; नवा नवहाभिरेव—आ
[19] पुरीषावहाभिः — आ
[20] तृतीयगा — अ, आ
[21] हस्तिनी जिह्वा च — इ
[22] यशा तथा — इ, ई, उ, मु

अलम्बुषा [1]कुहूश्चैव शङ्खिनी दशमी स्मृता ॥४॥
दश प्राणवहा ह्येता [2]नाडयः परिकीर्तिताः ।

प्रसङ्गादत्र वायवोऽपि नामभिः संख्यया[3] चोच्यन्ते —

प्राणोऽपानः समानश्च[4] उदानो व्यान एव च ॥५॥
नागः कूर्मोऽथ कृकरो देवदत्तो धनंजयः ।
प्राण[5]स्तु प्रथमो वायुर्नवानामपि स प्रभुः ॥६॥

तत्र प्राणस्य व्यापारभेदो वाय्वन्तर[6]प्रभुत्वप्रतिपत्तये —

प्राणः प्राणमयः प्राणो [7]विसर्गः पूरणं प्रति ।
[8]नित्यमापूरयत्येष प्राणिनामुरसि स्थितः ॥७॥
निश्वासोच्छ्वास[9]कासैस्तु [10]प्राणो [11]जीवसमाश्रितः ।
प्रयाणं कुरुते यस्मात्तस्मात्प्राणः प्रकीर्तितः ॥८॥

योऽयं **प्राणः** स **प्राणमयः**। "[12]अन्नं प्राणाः" इति पठचते। तच्च जीवनमेव। जीवनमपि [13]प्राणधारणे पठचते यतः। ततो जीवनमय इत्यर्थः। तस्य तत्र प्रकृतत्वात् तत्प्राणे हि सति शरीरे जीवतीत्युच्यते। किं च सोऽयं **प्राणः** स शरीरस्य देशाद्देशान्तर**विसर्गः** यः प्रेरणात्मकः। यच्चापूरणमन्नपानादीनां तत्कर्मविशेषं प्रति तत्तेन साध्यते। ततश्च बलात्मको[14]ऽप्यसावित्युक्तम्। यदाहुः[15] — "प्राणो [16]बलं समाख्यातम्" इति। न तु विसर्गापूर्णनासिकया बहिरन्तश्च प्राणप्रवाहात्मकम्। तदात्मकत्वात्प्राणस्य स्वात्मनि क्रियाविरोधात्। तत्र निमित्तं [17]प्रयत्नः। यदाहुः —

[18]"प्रेरणाकर्षणे वायोः प्रयत्नेन विना कुतः।" इति।

स च क्रियाशक्त्याश्रयभूतो ज्ञानशक्त्याश्रयभूतबौद्धाध्यव[19]सायादिवदाहंकारिक एवेत्युक्तमन्यत्र — "[20]संरम्भोऽहंकृतिः" इति। कथं तर्हि वाय्वन्तरा वायवः? [21]तदुरसि [22]स्थितः स **नित्यमापूरयति** [23]तच्चेष्टयैव तेषां चेष्टासिद्धेः, स एव [24]**जीवसमाश्रितः**। **प्राणिनां** संबन्धिनो [25]ये **निश्वा**[26]**सो-**

---

[1] कुहश्चैव—अ; कूहूश्चैव—इ; कुहू चैव—ई
[2] नाडचः — इ
[3] वोच्यन्ते — अ, आ
[4] ऽपानसमानश्च — अ
[5] ०स्तु. . . .यन्नवानामपि — इ, ई, उ
[6] ०प्रभृत्युपपत्तये — अ
[7] विसर्गापूरणं — मु
[8] ७ उत्तरार्धं ८ पूर्वार्धं च न स्तः — अ, आ
[9] ०कास्यैस्तु — इ; ०कासैश्च — उ
[10] प्राणे — मु
[11] जीवः समा० — इ, मु
[12] अन्नप्राणः — आ; तैत्तिरीयब्राह्मणे ३.२.१९
[13] प्राणा धारणे — अ
[14] ऽप्ययावित्युक्तम् — अ; ऽप्यथावित्युक्तं भवति यदाहुः — आ
[15] मतङ्ग० विद्या० २०.१० पू०
[16] बलसमाख्यानमिति — अ
[17] प्रश्नः — अ, आ
[18] प्रमाणवर्तिके प्रमाणसिद्धौ ५६ पू०
[19] ०सायादिवाहंकारिक — अ
[20] सङ्गोऽहंकृतिरिति—अ; भोगकारिका पृ० १८
[21] तास्तदुरसि — आ
[22] स्थितः — अ
[23] तच्चेष्टधैव — अ
[24] जीवः समा० — अ
[25] यो — अ, आ
[26] सोश्वासका. . .वः एव जीवः समा० — अ; सोक. . .छ्वास० — आ

च्छ्वासकासाः अन्ये वायवः [तैः] स एव जीवसमाश्रितः प्रोक्तो [1]यश्च [2]प्रतिक्षणं तदा-पूरणायैव। द्वादशान्ते प्रयाणकाले देहान्तरे **प्रयाणं** करोति। **तस्मात्** स एव प्रभुः कीर्तितो [3]विश्वान्तराणामिति ॥७–८॥

अथ वाय्वन्त[4]राणां व्यापारः कथ्यते —

अपानयत्यपानस्तु आहारं च [5]नृणामधः।
मूत्र[6]शुक्लमलान्वायुरपानस्तेन कीर्तितः ॥९॥
पीतं भक्षितमाघ्रातं [7]रक्तपित्तकफादिकम्।
समं नयति गात्रेषु समानो नाम मारुतः ॥१०॥
स्पन्दयत्यधरं वक्त्रं नेत्रगात्रप्रकोपनः[8]।
[9]उद्वेजयति मर्माणि उदानो नाम मारुतः ॥११॥
[10]व्यानो विनामयत्यङ्गं[11] व्यानो व्याधिप्रकोपनः।
[12]प्रीतेर्विनाशकरणो [13]व्यापनाद्व्यान उच्यते ॥१२॥
[14]उद्गारे नाग इत्युक्तः [15]कूर्म उन्मीलने [16]स्मृतः।
कृकरस्तु [17]क्षुते चैव देवदत्तो विजृम्भणे ॥
धनं[18]जयः स्थितो [19]घोषे मृतस्यापि न मुञ्चति ॥१३॥

अतस्तत्र **धनंजयः** एव नाहंकारिक इत्यर्थः ॥९–१३॥

अथोपसंहारः —

इत्येतद्वायुवृन्दं हृदि [च वि]निहितं नाभिचक्रप्रतिष्ठं[20]
[21]निश्वासोच्छ्वास[22]कासैः श्वसनपुरमधः कम्पितार्घूणितैश्च।

---

[1] यत्वकृतश्च प्रति० — आ
[2] प्रतीक्षणं — अ
[3] विश्वान्तरमिति — अ
[4] ०राणामत्राव्यापारः — आ
[5] नृणामयः — अ
[6] ०शुक्लमलो वायु० — अ, आ; ०शुक्लमवो वायु० — इ, ई, उ; ०शुक्रवहो वायु० — मु
[7] रक्तं पित्त० — इ, ई, उ
[8] ०प्रकोपनम् — इ
[9] उद्वेजयन्ति — इ, ई, उ
[10] व्यानोऽपि नाम० — ई
[11] ०त्यागं — इ, उ
[12] पीतो विनाश०—अ; प्रीतोर्विनाश० — आ; प्रीते विनाश० — उ
[13] व्यापाना० — इ, उ
[14] उत्कारे — इ; उत्कारो — ई
[15] कर्म — इ
[16] स्थितः — इ, ई, उ
[17] क्षुतावेव — इ, ई
[18] ०जयस्थितो — अ, आ, इ, ई
[19] घोषं — अ
[20] ०प्रतिष्ठितं — अ, आ
[21] निःश्वासकोच्छ्वास० — आ
[22] ०कासैश्च स नः पुरः कम्पिता पूर्ण. . .तश्च — अ; कासैश्च स न पुरः कम्पिता० — आ

नित्यं नित्याल्प[1]जन्मा व्यसनयति पशुं यौवने बालभावे
आक्रान्तो वायुरेकः [2]स जननमरणैः क्रीडति [3]भ्रान्तसत्त्वैः ॥१४॥

यद् **एतद्वायुवृन्दं** पूर्वं **नाभि[4]चक्रप्रतिष्ठम्** इत्युक्तमपि हृदयश्वासोऽसौ पूर्वं तज्जलाधारत्वात्। [5]हृच्चैव हृदयं, तस्मिन् निहितम्। **नित्यमेको** [6]**वायुः** प्रभुत्वेन यः [7]प्रागुक्तः प्राणाख्यः सः **व्यसनयति**। किं च [8]**निश्वासोच्छ्वासकासैः** तत्कार्यभूतैः **अधः कम्पिता**[9]**घूर्णितैश्च** नित्यं स [10]एवैको वायुः **श्वसन**[11]**पुरं** शरीरं च। [12]**पशुं यौवने बालभावे** च स एवैको व्यसनयति। स च **नित्यमेवाल्पजन्मा**। यदाहुः[13] — "उच्छ्वा[14]सा वायवः प्राणाः" इति। स एवैको वायुः **आ**[15]**क्रान्तः** कर्मभिः संक्रमन् जननमरणे [16]विद्येते येषां, [17]ते, **जननमरणाः**, तैः, **भ्रान्तसत्त्वैः** अविद्यासक्तैः **क्रीडति** इति तत्प्रभुत्वस्याप्युपसंहारः ॥१४॥

एतदेवं प्रासङ्गिकं परिसमाप्य प्रकृते —

नाडीचक्रं यथावस्थं प्रवक्ष्याम्यनुपूर्वशः।
दशारं चक्रमेतत्तु विभागो जायते यथा ॥१५॥

दशारमेतत् तत् प्रधाननाडीचक्रम्। येन प्रकारेण यत्रावस्थितं, [18]**यथा** चास्य **विभागो जायते** तथा वक्ष्यामि। न तु [19]पूर्वोक्तमनन्तनाड्यारब्धनाडीचक्रमित्यर्थः ॥१५॥

चक्रे भ्रमत्यसौ जीवो दशस्थानेष्वनुक्रमात्[20]।
[21]**स जीवो जीवलोकस्य बुध्यन्ते नैव मोहिताः[22] ॥१६॥**

असौ पुर्यष्टकाख्यो **जीवः**। यद्वक्ष्यति **विज्ञानप्रकरणे**[23] —

"पुर्यष्टकसमायुक्तो ह्यध ऊर्ध्वं स गच्छति।" इति।

सः दशस्वपि नाडी**स्थानेषु** तच्च**क्रे** भ्राम्यति। अस्य **जीवलोकस्य** पृथिव्यादिकलान्तस्य भुवनात्मनो यद्यपि च स एव **जीवः** इत्युक्तम्। तथापि तद् [24]बुध्यन्ते [25]**नैव** अविद्या**मोहिताः** ॥१६॥

---

[1] ०जन्म व्यसन० — मु
[2] स जन्ममरणैः — अ; सजननमरणैः — मु
[3] चान्तसत्त्वैः — आ
[4] ०चक्रं प्रतिष्ठति मुक्तमपि हृदयस्वसौ पूर्वं—आ
[5] हृच्चव — आ
[6] वायुः तं प्रडत्वेन — आ
[7] सार्धत्रि० १०.६ उ० मूले; ७, ८ वृत्तौ च।
[8] निश्वासकासैः — अ
[9] घृणितैश्च — अ
[10] एवैका वायुश्वसनपुरं — आ
[11] पुरा — अ
[12] पशु — अ, आ
[13] आकरो न लभ्यते।
[14] ०सावयवः — अ, आ
[15] ०क्रान्तकर्मभिः कर्मजनन० — अ; ०क्रान्तक्रमभिः संक्रमञ्जनन० — आ
[16] विद्यते — अ
[17] तै जनन० — आ
[18] तथा — अ, आ
[19] सार्धत्रि० १०.१ उ० – ३ पू०
[20] स्थानेष्वुपक्रमात् — अ
[21] स जीवजीवलो० — आ
[22] मोहितः — इ, ई, उ
[23] सार्धत्रि० १७.४ पू०
[24] बुध्यन्तेऽनेनैव विद्यामोहिताः — अ
[25] नैव विद्या० — आ

जीवः प्रयाति दशधा तेन चक्रं प्रकीर्तितम् ।
नाडीचक्रमिति प्रोक्तं येन संक्रामति ह्यसौ ॥१७॥

न केवलं चक्राकारम् । तच्चक्रे यावच्चक्रवद्यतः **तेन** जीवो [1]नाडीस्थानात्तत्स्थानान्तरं [2]**संक्रामति** तेनापि कारणेन तत् **चक्रम्** इत्युच्यत इति। अथ **येनासौ दशधा प्रयाति** इत्युक्तं तदपि ॥१७॥

[3]किं दशारं चक्रं नाभिस्थानमेव। नेत्युच्यते —

हृद्व्योम[4]मध्ये पङ्कजमष्टदलं कर्णिका च तस्यान्तः ।

नन्वेवं दशदल[5]मेतत्स्याद्दशारत्वेनोक्तत्वात्[6]। [7]सत्यम्। नाडीद्वयस्य तु तदरकमलस्योर्ध्वा[8]धोगतत्वेनात्र [9]वक्ष्यमाण[10]त्वाददोषः। यदेवं प्रधाननाडीदशारमित्युक्तम् ॥

[11]हृदये पङ्कज[12]मर्केन्द्वग्नि[13]हिरण्यद्योताभाः [14]शक्तयस्तस्मिन् ॥१८॥
[15]उपरिचरी खलु शक्तिस्तासां प्राग्भाविनी [16]शिवस्य ततः ।
शक्तिचतुष्टयपङ्कजमध्ये पुरुषोऽलिरिव स लीनः[17] ॥१९॥

तस्मिन् [18]प्रागुक्ताः **शक्तय**श्चतस्रोऽपि **शिवस्य** संबन्धिन्यः प्रतिपुरुषं भेदेन स्थिता इत्युक्तम्। तत्र निवृत्तिः पृथिवी[19]तत्त्वत्वेन कर्णिकात्मना सुवर्णप्रकाशतया भाति। प्रतिष्ठा तु जलात्मकत्वेन सोमप्रकाशात्मना, विद्या तु [20]तेजस्तत्त्वत्वाद्वह्निवद्भासरूपेण, [21]शान्तिस्त्वाकाशगतसूर्यप्रकाशत्वेनापि। **तासां** तु कारणत्वेन या **प्राग्भाविनी** शान्त्य[22]तीता पञ्चमी शिवशक्तिरपि शुद्धवाक्स्वरूपा नादाख्यं यत् तत्त्वमित्युक्तम्[23]। सा **ततः** पङ्कजाद् **उपरिचरी** प्रतिपुरुषभेदाभावान्न तत्र स्थितेत्यर्थः। अत

---

[1] नाभिस्थाना० — आ
[2] संक्रान्ति तेनाविकारणेन — अ; संक्रान्ति तेनापि — आ
[3] किं च दशारं — अ; किं न दशारं — आ
[4] ०मध्यपङ्कज० — मु
[5] ०मेतद्दशारत्वे — अ
[6] सार्धत्रि० १०.१५
[7] सत्यनाडीद्वयस्य नु तदरकलक्षस्यो — अ, आ
[8] ०योगत० — अ
[9] सार्धत्रि० १०.२५-२७ वृत्तौ
[10] ०त्वाद्दोषः — अ
[11] हृदि पङ्कज० — अ, आ
[12] ०मर्केद्वयग्नि० — अ; ०मकेकं चग्नि० — आ
[13] हिरण्ये द्यो० — इ, उ; हिरण्यो द्यो० — ई
[14] शक्तयः ॥१८॥ तस्मिन् — इ, मु
[15] उपरि खलु — अ, आ, मु; उपचरित खलु — इ; उपरि च खलु — ई
[16] शिवस्य। ततः — अ, आ, इ
[17] ऽलिरिव लीनः — अ, आ, मु
[18] प्रागुक्तावशक्तय० — आ; ८.३, ४ वृत्तौ
[19] ०तत्त्वेन — अ, आ
[20] तेजस्तावत्ववह्निवद् — अ; तेजस्तावस्त्ववह्निवद् — आ
[21] शान्तत्वाकाश — अ; शान्तितत्त्वकाश — आ
[22] ०तीतादि पञ्चमी — अ
[23] सार्धत्रि० १.५ पू०

एव निवृत्त्यादिश**क्तिचतुष्टय**मेव **पङ्कजम्**; तन्**मध्ये पुरुषः** सूक्ष्मदेहाभिव्यक्तो दृक्क्रियामात्रो भ्रमरवद् **लीनः** न [१]वाक्छक्तेरपि व्यतिरिक्तमात्मानं मन्यते। यदाहुः[२] —

"[३]वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती।
न प्रकाशः [४]प्रकाशेत सा हि प्रत्यवमर्शिनी॥" इति ॥१८–१९॥

स च —

[५]शून्यमरुत्संदंशक[६]गृहीत[७]करणात्मको ह्युभयतोऽपि।
[८]संयाति यत्र [९]नेयः शुष्क[१०]दलं मारुतेनेव ॥२०॥

शून्ये हृदयाकाशे यो **मरुत्संदंशकः** प्राणापानद्वयघट्टना[११]त्मकः, तेनानु**गृहीत**श्चासौ। **करणात्मकः** इत्युपलक्षणं कार्यकारणात्मकं [१२]पुर्यष्टकरूपमित्यर्थः। यद्वक्ष्यति **विज्ञानप्रकरणे**[१३] —

पुर्यष्टक[१४]समायुक्तो ह्यध ऊर्ध्वं स गच्छति।" इति।

अन्यथा व्यापकत्वादात्मनो ग्रहणाद्यसंभवो यतः। [१५]स च **उभयतः** [धर्म] धर्मात्मना च कर्मणा **यत्र** [१६]वक्ष्यमाणे पूर्वादिहृत्पङ्कजदले देहान्तरे चा**नेय**स्तत्र [१७]सम्यग्याति **शुष्कदलं** [१८]**मारुतेनेव** इति। उक्तं च **सिद्धगुरुभिः**[१९] —

[२०]"पर्यटति कर्मवशतो भुवनजदेहेष्वयं च सर्वेषु।" इति॥ २०॥

अत एव —

भ्राम्यति [२१]पङ्कजमध्ये कला[२२]चतुष्कात्मपाशसंरुद्धः।
गोलकमिव [२३]हेलाभिहतमुत्पतनं निपातनं [२४]कुरुते ॥२१॥

---

[१] वा शक्तेरपि — अ
[२] वाक्यपदीये १.१२५
[३] पापता चेदुत्का० — अ; पावता चेदुत्का० — आ
[४] प्रकाशेते — अ
[५] स च शून्य मरुत्सदंशक० — ई
[६] ०गृहीतः कारणात्मको — मु
[७] ०करणात्मनो — अ, आ; कारणात्मको — इ
[८] समं याति — अ, आ; स याति — इ, उ; संयाति हृदये पङ्कजं यत्र नेयः — ई
[९] नेयच्छुष्कदलं मम कारुण्यतेनैव तस्मिन् — अ
[१०] ०दलमर्मकारुतेनैव तस्मिन् — आ; ०दलमारुतेनैव तस्मिन् — इ, ई, उ
[११] ०त्मनस्तनुगृहीत० — अ; ०त्मकस्तेन गृहीत० — आ
[१२] पुर्यष्टरूपमित्यर्थः — अ; पुर्यष्टरूप इत्यर्थः — आ
[१३] सार्धत्रि० १७.४ पू०
[१४] ०समायोदादधश्चोर्ध्वं० — अ, आ
[१५] सर्वोभयतः — आ
[१६] सार्धत्रि० १०.२५-२७
[१७] सम्यगाति — अ, आ
[१८] मारुतेनेति — अ, आ
[१९] तत्त्वसंग्रहे श्लो० २५ पू०
[२०] पर्यवसतीति कर्मवसतो — अ
[२१] पङ्कमध्ये — इ
[२२] चतुष्कः पाशसंरुद्धः — अ, आ; ०चतुष्कलात्मपाशसंरुद्धाम् — इ, उ; चतुष्कलात्मपाश० — ई
[२३] एलाभिहत० — अ; हेलाभिर्हत० — इ, उ, मु; होलाभिर्हत — ऊ
[२४] यदा कुरुते — ई

इत्यकस्मात्पङ्कज[1]दलादध ऊर्ध्वमपि गच्छतीति [2]दर्शयिष्यामो [3]नरकं ब्रह्मलोकं वेति ॥२१॥

कथं तर्हि प्राक्[4] "तेजश्चेतो [5]द्विरभ्यस्य" इत्यादिना विषुवत्प्रयोगेण[6] तस्य ग्रहणमुक्तमिति। तदर्थमेतत् —

ईश्वरयोगा[7]द्विषुवत्सं[8]क्रान्तिश्चैव [9]सिद्धिसंयोगात् ।
[10]सौरनियोगाद्दक्षिणमुदगयनं [11]चान्द्रसंयोगात् ॥२२॥
अयने सव्यासव्ये द्वौ [12]पुटकौ युग्मतो विषुवदाहुः ।
संक्रान्ति[13]रितश्चेतश्च [14]गच्छतस्तेन समाख्याता[15] ॥२३॥

ईश्वराचार्ययोरपि तत्र दीक्षाकर्तृत्वेनोक्तत्वात्[16] तदिच्छात्मना क्रियाशक्तिद्वयस्य युगपद्ग्रहणे [17]संपादितेऽन्यदेव विषुवदुक्तम्[18]। ईश्वरेच्छया सर्वत्र [19]सामर्थ्याव्याघाता[20]द्विषुवं निवृत्त्यादिभुवनं संपाद्यते यतः। न त्वाचार्यगतं प्राणशक्तियोगात्मकमनन्तरप्रकरणवक्ष्यमाणम्। यद्वक्ष्यति[21] —

"मध्ये तु विषुवत्प्रोक्तं पुटद्वयविनिःसृतम्।" इति।

तस्यान्यत्र वा [22]सामर्थ्यादृष्टेः। न च [23]वाच्यमत्यन्ताप्र[24]सिद्धोऽयं लोके विषुवत्प्रयोगेष्विति। [25]यतो यथानन्तर[26]प्रकरणवक्ष्यमाणात्य[27]न्ताप्रसिद्धोऽप्यत्र संक्रान्तिरिति, उत्तरायणदक्षिणायनविषुवदादिराध्यात्मिकः कालविशेषः अध्यात्मवित्सिद्धत्वादुपदिष्टः, [28]यथाधिदैविकत्वेनैषामपि [29]तेषां प्रसिद्धत्वादुपदिष्ट इति दर्शयितुमनन्तर[30]प्रकरणवक्ष्यमाणा[31] अपि संक्रान्त्यादयोऽत्रोपात्ताः। लोके त्वधि-

---

1 दलमूर्ध्वमवगच्छतीति — अ, आ
2 सार्धत्रि० १०.२५-२७ वृत्तौ
3 नकारं ब्रह्म० — अ, आ
4 सार्धत्रि० ८.४१ उ०
5 द्विरभ्यसेदित्यादिना — अ; द्विरभ्यस्येत् आदिना — आ
6 प्रयोगेन — अ, आ
7 ०द्विषुवं सं — अ
8 ०क्रान्तिः सव्यासव्ययोकगात् — मु
9 सव्ययोगात् — अ, आ
10 सौरनीयो दक्षिण० — इ; सौरनियोद्दक्षिण० — ई; सौरनिधोर्दक्षिण० — उ
11 चान्द्रमसंयोगात् — अ, आ, इ, ई; चन्द्रसंयोगात् — मु
12 पुरतौ — इ, उ
13 ०रितश्चेतो गच्छतः — मु
14 गच्छतस्ते समा० — अ, आ
15 ०ख्यातः — इ, उ
16 सार्धत्रि० ८, ९ उ० वृत्तौ
17 संपातेरन्यदेव — अ; सपाततेरन्यदेव — आ
18 सार्धत्रि० ८.२७ उ०, २८ पू० वृत्तौ
19 सामर्थ्यात् व्याघातात् विषयनिवृत्त्यादिभुवं सं० — अ
20 ०द्विषयनिवृत्त्यादिन्दुव सं० — आ
21 सार्धत्रि० ११.५ उ०
22 सामर्थ्याद्दृष्टेः — अ
23 पाचमत्य० — अ, आ
24 ०सिद्धोऽथ लोके — अ
25 अतो यथा — अ
26 प्रकरणे — आ; एकादशप्रकरणे तृतीयश्लोके
27 ०न्तात्प्रसिद्धेऽप्यत्र — अ, आ
28 तथाधि० — आ
29 तेषामप्रसिद्ध० — अ
30 प्रकरणा अपि — अ
31 सार्धत्रि० ११.३–६ उ०

भूत एव [1]प्रसिद्धः। सवितृ[2]गमनागमनरूपत्वात्तस्याः। [3]सवितुश्च तेजोविशेषत्वेन प्रसिद्धेरिति ॥२२-२३॥

अथास्याधिदैविकस्य विषुवत्प्रयोगस्य दीक्षायामिवाध्यात्मिक[4]स्य कालस्यापि कर्मविशेषविनि[5]योगः सपादयार्ययोच्यते —

[6]सौरः सव्यो [7]मार्गश्चान्द्रमसश्चेतरः समाख्यातः।
धन्योऽभिषेक [8]इन्दुः सौरः खलु वह्निसंधाने ॥२४॥
[9]ध्यानाद्यो विषुवति च"

[10]प्रागुक्ताभिषेकादौ सौम्यकर्मणि **इन्दुः धन्यः** चन्द्रमसः प्रवाह उत्तरायणमित्यर्थः। **सौरः** तु प्रवाहो दक्षिण[11]माध्यात्मिकं [12]प्रागुक्तप्रणयनादावुग्रकर्मणि। **ध्यानाद्यश्च** कर्मविशेषो **विषुवति** कर्तव्य इति॥

यदुक्तम्[13] — "चक्रे भ्रमत्यसौ जीवो दशस्थानेष्वनुक्रमात्" इति, तदधुना [14]भागोनेनार्यात्रयेणोच्यते —

"प्राग्दलसंस्थो [15]नृपावलेपी स्यात्।
तेजस्वी च [16]बुभुक्षा [17]पीडा वा [18]संजायतेऽग्निदिक्पत्रे[19] ॥२५॥
[20]याम्ये याम्यो भावो [21]नैर्ऋते [22]नैर्ऋतो [23]विनिर्दिष्टः।
[24]वारुणपत्रे [25]वरुणो [26]मारुतपत्रे [27]गतो [28]मरुद्भावम् ॥२६॥

---

[1] प्रसिद्धसवितृगमनागमरूप० — अ
[2] ०गमागमरूप० — आ
[3] सवितुश्चेते तेजो० — आ
[4] ०स्यापि काल० — अ
[5] ०योगं सभागधार्ययोच्यते — अ, आ
[6] सौरस्य मार्ग० — अ; सौरसव्यमार्ग० — आ; सौरस्य सव्य० — मु
[7] मार्गश्चन्द्रमस० — इ, ई, उ, मु
[8] इन्द्रः — उ
[9] यानाद्यो — इ
[10] नवमप्रकरणोक्तमण्डलाभिषेके
[11] ०मध्यात्मिकं — आ
[12] प्रागुक्तादिप्रणयनावुग्र०—अ; प्रागुक्तादिप्रणयनापुग्र०—आ; षष्ठप्रकरणोक्ताग्निसंधानादौ
[13] सार्धत्रि० १०.१६ पू०
[14] भोगोनेनार्यात्रिवेणोच्यते — अ; भोगोनेनार्यात्रयेणोच्यते — आ
[15] नृपावलेपस्य — अ; नृपाय लेपस्य — आ; नृपावलेपि स्यात् — ई, उ
[16] बुभुक्षा च पीडा — अ; बुभुक्षु पीडा वा जायते जायते — इ; बुबुक्षु पीडा वा जायते — उ
[17] पीडावाञ्जायते — ई
[18] मुद्रिते 'संजायते' इत्यन्तेनार्धसमाप्तिः।
[19] ०पात्रे — इ; पाले — उ
[20] याम्यो याम्यो — अ; याम्यो धाम्यो — इ; याम्ये याम्ये — ई
[21] नैर्ऋत्यो निर्ऋतो — इ, उ; निर्ऋत्ये निर्ऋतो — ई
[22] मुद्रिते 'नैर्ऋतो' इत्यन्तेनार्धसमाप्तिः।
[23] विनिर्दिष्टाः — उ
[24] ०वारुणपात्रे — उ; वारुणे पत्रे — मु
[25] वारुणो मरुतः पत्रे — इ; वारुणमरुतपत्रे — उ; वारुणो मरुत्पत्रे — मु
[26] मुद्रिते 'मारुतपत्रे' इत्यन्तेनार्धसमाप्तिः।
[27] गतोद्भावः—अ, आ; मुद्रिते 'गतो' इति नास्ति
[28] मरुद्भावः — इ, ई, उ; मारुतभावः — मु

सौम्ये सौम्यो[1] [2]भावस्त्वैशे [3]त्वैशः समाख्यातः ।
[4]यां यां दिशमभि[5]गच्छति [6]तद्भावं निखिलमायाति ॥२७॥

नृपावलेपी इति [7]नृपवद्देहे बलयुक्तः। **यां यां दिशम्** इति [8]तत्पङ्कजस्याधः ऊर्ध्वं च यदा गच्छति तदा क्रमेणैवं [9]भावं ब्राह्मं च समायातीत्यर्थः। एवं च दशस्वपि स्थानेषु भ्रमणं सिद्धं भवति। अन्यथैतत् सूत्रमनर्थकमेवेति ॥२५–२६॥

[10]पत्रान्तरालयोगा[11]च्छून्यमिवात्मा ततो भाति ।

शून्यमिव आत्मा न तस्य **भाति** [भाति च] [12]उभयमित्यर्थः। एतान्यपि दशैव स्थानानीति [13]प्रागनुक्तानां कथनमित्यर्थः ॥

[14]अथात्र फलम् —

इति खलु [15]पुद्गलचारो नाडी[16]संधानमण्डलं मुख्यम् ।
कथितमिह सिद्धिहेतोर्बोद्धव्यं यत्नतः सिद्धम् ॥२८॥

इति एवं **नाडीसंधानात्मकं मण्डलं मुख्यम्** इति मुख्यनाडीविषयत्वात्। [17]**पुद्गलस्य** आत्मनो यस्यां **चारः** देशाद्देशान्तरे देहाद्देहान्तरे अणिमाद्यात्मिका या **सिद्धिः**, तस्याः **हेतुः** यतस्ततः **कथितः**। अणिमादि **सिद्धम्**इत्यर्थः। न चैतदसाध्यमिति **बोद्धव्यम्**। अपि तु **यत्नसिद्धम्**इति। यदाहुः[18]— "स्थितौ यत्नोऽभ्यासः" इति ॥२८॥

इति [भट्टनारायणकण्ठात्मज] भट्टरामकण्ठविरचितायां [श्रीमत्सार्धत्रिशति-]
कालोत्तरवृत्तौ नाडीचक्रप्रकरणं दशमं समाप्तम् ॥

इति दशमः पटलः

---

[1] सौम्या भाव त्वैशे — अ; सौम्य ऐशस्त्वैशे — मु
[2] भावः ऐशे — आ; भावस्त्वीशे — उ
[3] शैवः समा० — इ, ई, उ
[4] यं यं दिश० — इ
[5] ०गच्छन्ती — इ; ०गच्छन्ति — ई, उ
[6] तं भावान्निखिल० — इ, ई, उ; तं भावं समस्तमायाति — मु
[7] नृपवद्देहो दले युक्तः — अ; नृपवदेहो दले युक्तः — आ
[8] दिक्पङ्कज० — आ
[9] भावः — आ
[10] पात्रान्तराल० — इ, उ
[11] ०च्छून्य इवात्मा — इ, ई, उ; ०च्छून्यमिवाभाति — आ; ०च्छून्यमिवात्मा भाति — मु
[12] सभय० — अ, आ
[13] प्रागनुक्तात्कथन० — अ; प्रागनुपत्तात्कथन० — आ; सार्धत्रि० १०.१६ पूर्वार्धे
[14] अथात्राफलम् — अ
[15] उद्गलचारो — इ, उ; पुद्गलाचारो — ई
[16] संधानं मण्डलं — आ, मु
[17] पुद्गलस्त्वात्मनो यस्याश्चारो — अ, आ
[18] योगसू० १.१३

एकादशः पटलः

जीवज्ञानप्रकरणम्[1]

अथ [2]प्रागुक्तस्य जीवस्याध्यात्मगतस्य कालस्य [च] [3]जिज्ञासया प्रश्नः —

[4]स जीवो जीवलोकस्य ज्ञायतेऽध्यात्मगो यथा।
[5]संशयो मे महादेव [6]प्रसादीभव शूल[7]धृक् ॥१॥

ततो द्वयस्यापि समाधानाय प्रतिज्ञा —

[8]जीवस्य पुरुषाख्यस्य दर्शनं शृणु षण्मुख।
कथयामि न संदेहः [9]पुत्रस्नेहाद्विशेषतः ॥२॥
[10]संक्रान्ति विषुवं चैव अहोरात्रायनानि च।
अधि[11]मासमृणं [12]चापि ऊन[13]रात्रं धनं तथा ॥३॥

अहश्च रात्रिश्च [14]अयने च उत्तरायणदक्षिणायने तानीति **अहोरात्रायनानि** चत्वारि। [15]**कथयामि** इति अत्र सर्वत्र संबध्यते। [16]कालभेदद्वारेणैनं कालं वक्ष्यामीत्यर्थः ॥२–३॥

तत्राध्यात्मिककालभेदानां [17]प्रतिशरीरं प्राणसंचारविशेषात्मत्वात् तज्ज्ञानेन तत्कर्ता जीवः सुखेन ज्ञायत इति प्रथम[18]प्रसिद्धांस्तान् [19]वक्ति —

ऊनरात्रं [20]क्षुतं ज्ञेयमधिमासो विजृम्भिका।
ऋणं च कासो विज्ञेयो निश्वासो [21]धनमुच्यते ॥४॥

---

[1] कालचक्रप्रकरणम् — आ
[2] सार्धत्रि० १०.१६, १७; २३–२७
[3] जिज्ञासाया — अ
[4] 'स जीवो' इत्यतः पूर्वं 'कार्तिकेयः' इत्यधिकम् — इ, ई, उ, मु
[5] संयोगं मे — अ; संदेहं मे — आ
[6] प्रसादादादिशूलभव — अ; प्रसादि शूलधृक् भव शूलधृक् — आ
[7] ०धृत् — ई
[8] 'जीवस्य' इत्यतः पूर्वं 'ईश्वरः' इत्यधिकम् — इ, ई, उ, मु
[9] अत्र — अ; पुत्र स्नेहाद् — आ
[10] संक्रान्तिविषुवत्स्वेव — अ; संक्रान्तिर्विषु० — मु
[11] ०मासो ऋणं — अ, आ, मु; ०मासतृणं — ई
[12] चैव — इ, ई, उ
[13] ०रात्रोऽयनं — अ, आ; ०रात्र्ययनं — इ; ०रात्रायनं — ई; ०रात्रधनं — उ; ०रात्रो धनं — मु
[14] अयनं — अ, आ
[15] वक्ष्यामि — अ, आ
[16] लभेत् द्वारेणैनं — अ, आ
[17] पातिशरीरं — अ
[18] ०प्रसिद्धात्तान् — अ, आ
[19] ०पङ्क्ति — अ
[20] क्षुतो — अ; क्षतो — आ
[21] यनमुच्यते — आ, ई

बाह्यकालविशेषेषु [१]'रात्र्यादिषु यद्विहितं निषिद्धं वा कर्म तदेतेष्वध्यात्मगतेष्वपि प्राण[२]वृत्त्यात्मकेषु दशसु कालेषु तथैवानुष्ठेयमिति दर्शयितुं नामभिर्निर्देशः। यदाहुः[३]— "नाम्ना [४]धर्मातिदेशः" इति। तत्र ऊना रात्रिर्यस्मिंस्तद्' [५]**ऊनरात्रं क्षुतं ज्ञेयम्।** [६]वक्ष्यमाणापान[७]वृत्त्यात्मिकरात्रिभागपरिक्षयात् तस्मिन् सति न किंचित्कर्मानुष्ठेयमित्यर्थः। एवम् **अधिमासो विजृम्भिका** नाम [८]विजृम्भः। [९]वक्ष्यमाणप्राणापान[१०]वृत्त्यात्मनोरहो[११]रात्रयोरधिकत्वात् तस्मिन्नपि मलमासेनैव तन्निषिद्धत्वात्। तथा च [१२]श्रुतिः — [१३]"मलिम्लुचो नाम त्रयोदशमो [१४]मासः" इति। एवम् **ऋणं** [१५]**कासः** तयोर्वृत्तिद्वयोरप्युपरुद्धत्वात् कालच्छिद्रं तदपमृत्युभूतमिति तस्मिन्नपि नैव। यदुक्तम् — श्रीमत्**त्रयोदशशतिके** —

"वृत्तिच्छेदे[१६] ऋणं ज्ञेयं वृद्धौ चैव धनं भवेत्।" इति।

निश्वासः तु प्राणा[१७]यामात्मकः शुभफलत्वात् तस्मिस्तत् कर्तव्यमित्यर्थः॥

केचित्पुनराहुः — "ऊनरात्रमेवेति तिथिच्छिद्रं [१८]यतो धार्यते। अधिमासो बाह्यकाल इवेति। [१९]कासस्तु शरीरापचयहेतुत्वाद् [२०]ऋणम्। निश्वासस्तु तदुपचयहेतुत्वाद् धनम्" इति॥

अपरे तु [२१]"रात्रेर्वक्ष्यमाणाया ऊनत्वाद्यतः क्षुतम्। [२२]दिवसस्य च वक्ष्यमाणस्याधिक्या[२३]द्यतो विजृम्भणम्। द्वयोरूनत्वाच्च कासः, आधिक्ये च निश्वासो भवति। ततस्ते ऊनरात्रादिभिः शब्दैरुच्यन्त इति। तदेवोच्यमानमात्रसिद्धोपपत्तिकमफलं[२४] च विचार्योपेक्ष्यम्" इति ॥४॥

अथ [२५]पूर्वोद्दिष्ट[२६]स्यायनस्य लक्षणम् —

उत्तरं [२७]दक्षिणं ज्ञेयं वामदक्षिणसंस्थितम्।

[२८]उत्तरायणं दक्षिणायनं च तद् **ज्ञेयं** यथाक्रमं वामस्थं दक्षिणस्थं च। प्रकृतत्वात्प्राणस्वरूप-

---

[१] रात्रादिषु — आ
[२] ०प्रत्यात्म० — अ
[३] शाबरभाष्ये ७.३.१.१
[४] धर्माधिदेशः — अ; धर्मादिदेशः — आ
[५] वनरात्रं क्षुतं — अ; ऊनरात्रं वर्षारात्रं क्षतं — आ
[६] सार्धत्रि० ११.८ पू० वृत्तौ
[७] ०प्रत्यात्मिक० — अ
[८] विजृम्भा वक्ष्य० — अ, आ
[९] सार्धत्रि० ११.८ पू० वृत्तौ
[१०] ०प्रत्यात्मनो० — अ
[११] ०रात्र्योरधिकत्वात् — अ, आ
[१२] श्रुति मलीमचो — अ; आकरो न लभ्यते।
[१३] मलीमसो — आ
[१४] मासे इति — अ, आ
[१५] कास्तस्तयोजद्वायोरप्युप० — अ; कासस्तयोजद्वयोरप्युप — आ
[१६] ... छेदे — अ; ऋतिच्छेदे — आ
[१७] ०यामकः — अ
[१८] यतोऽनेन पूर्यते अधि० — आ
[१९] कास्तु — अ
[२०] ऋण निश्वास — अ
[२१] रात्रेवाक्ष्यमाणाय — अ; रात्रे वक्ष्यमाणाय — आ; सार्धत्रि० ११.८ पू०
[२२] दवसस्य — आ; सार्धत्रि० ११.८ पू०
[२३] ०द्यतो विजृम्भनमद्वयोरुणत्वाच्च — अ; ०द्यतो विज्ञाविजृम्भनमद्वयोरुणत्वाच्च — आ
[२४] सिद्धोपपत्तिः कामफलं — अ, आ
[२५] सार्धत्रि० ११.२–३
[२६] ०स्यायतनस्य — अ
[२७] दक्षिणमविज्ञेयं — अ
[२८] उत्तरायनं — आ

मित्यर्थः। [1]न त्वत्रोत्तरस्थं दक्षिण[2]स्थम्, अननुकूलं दक्षिणसंस्थं च, [3]वाममनुकूलमिति व्याख्येयम्। पूर्वमेवोक्तत्वात्। यदुक्तम्[4] —

"धन्योऽभिषेक इन्दुः सौरः खलु वह्नि[5]संधाने।"

इति तल्लक्षणव्याख्यैव युक्ता॥

अत्र [6]पूर्वोद्दिष्टस्य [7]विषुवतो लक्षणम् —

मध्ये तु [8]विषुवत्प्रोक्तं पुटद्वयविनिःसृतम् ॥५॥

मध्य[9]नाडयवस्थितत्वाद्यदा **नासापुटद्वयेन** प्राणस्वरूपं प्रवृत्तं भवति तदा **विषुवद्** इति। [10]एते चोत्तरायगदक्षिणायने सह तदयनाविनाभूतोक्तलक्षणेन विषुवता बाह्याहोरात्रमध्ये [11]चतुर्विंशतिरेव पुंसां वस्तुशक्त्यैव प्राणशतैर्नवभिः [12]सार्धघटिकाद्वय[13]मानैर्भवन्तीत्यनुभवसिद्धमेतद्द्वादशवर्षाणीत्युक्तं श्रीमत्**स्वतन्त्रे**[14] —

"बाह्ये [15]तस्मिन्नहोरात्रे [16]सिद्धा त्वाध्यात्मिका प्रिये।
चतुर्विंशति[17]संक्रान्त्या प्राणहंसस्तु संक्रमेत्॥
अहनि द्वादश प्रोक्ता रात्रौ च द्वादश स्मृताः।
उत्तरे पञ्च संक्रान्त्यः पञ्च वै दक्षिणायने॥
पूर्वाह्णे विषुवत्पूर्वं मध्याह्ने तु द्वितीयकम्।
तृतीयमपराह्णे तु अर्धरात्रे चतुर्थकम्॥
चतुर्विंशति[18]संक्रान्त्या प्राणहंसस्तु संक्रमेत्।
शतानि नव वै हंस एकैकं प्रवहेत्सदा।" इति।

चतस्रो विषुवत्पुण्यकाल[19]समत्वाद्विषुवदित्युक्तम्। तावत्कालं तत्प्रवाहस्य संवेदनाच्चन्द्रगत्यानेनोत्त[20]राय[21]णदक्षिणायनात्मना शुक्लकृष्णपक्ष[22]भेदेनैताश्चतुर्विंशतिसंक्रान्तयो ज्ञेया इति, बाह्याहोरात्रमध्ये द्वादशमासात्मकषड्तुभेदेन पौरुष[23]मेतद्वत्सरं भवेदिति भेदादेवमहोरात्रं भवति। यदुक्तं श्रीमन् **नन्दि[24]कारिकायाम्**[25] —

---

[1] नन्वत्रोत्तर० — अ, आ
[2] ०स्थं न तु क्र...णसंस्थं च — अ; ०स्थदक्षिणं ननु कूलं दक्षिणसंस्थं च — आ
[3] वामननुकूल० — अ, आ
[4] सार्धत्रि० १०.२४ उ०
[5] ०संधानं च इति — अ, आ
[6] सार्धत्रि० ११.२, ३
[7] लक्षणो विष्वतो — अ; लक्षणो विषुवतो — आ
[8] विषुवं प्रोक्तं — अ, आ, मु
[9] ०नाडयावस्थित — अ, आ
[10] सूके चोत्तरा० — आ
[11] चतुर्विंशत्येव पुंसा वस्तु० — अ, आ
[12] साध्यघटिका० — अ
[13] ०मात्रैर्भव० — आ
[14] आकरो न लभ्यते।
[15] त्वस्मिन् — आ
[16] ०सिद्धत्वाध्या० — अ, आ
[17] ०संक्रान्त्यां — अ, आ
[18] ०संक्रान्त्याः — अ, आ
[19] ०समन्ताद्विषुव — अ, आ
[20] ०रायणं दक्षि० — आ
[21] ०णायना शुक्ल० — अ
[22] ०भेदेन नैता० — अ, आ
[23] ०मेतत्सौरं भवे० — अ
[24] ०शाखायाम् — अ, आ
[25] आकरो न लभ्यते।

[1]"रात्रेः पूर्वं शरद्यामौ द्वावह्नि परिकल्पयेत्।
ततो हेमन्तशिशिरे [2]अह्नावेवं [3]भवेदितः ॥
[4]दिनस्यादौ [5]वसन्तः स्याद्ग्रीष्मो मध्ये ततः पुनः।
तृतीयसवनं वर्षा इत्थं पुंवत्स[6]रस्त्वयम् ॥
प्रोक्तं चैवमहोरात्रं हेमन्ताद्युक्तभेदतः ॥" इति ॥५॥

[7]अथ संक्रान्तेरपि लक्षणम् —

[8]संक्रान्तिः पुनरस्यैव स्वस्थानात्स्थान एव च ।
इडा च पिङ्गला चैव अमा चैव तृतीयिका ॥६॥
सुषुम्ना मध्यमे ह्यङ्गे इडा वामे प्रकीर्तिता ।
पिङ्गला दक्षिणे ह्यङ्गे [9]एषु संक्रान्तिरुच्यते ॥७॥

संक्रान्तिः पुनरस्यैव स्वस्थानाद् दक्षिणादुत्तराद्वा स्वस्थाने **एव** नाडचन्तरे [10]**संक्रान्तिः** इति उत्तरायणे एव मकरादौ संक्रान्तयः षट्, दक्षिणायने च कर्कटादाविति प्रतिसंक्रान्तिभेद[11]कल्पनयाध्यर्धशतं प्राणानां भवति। तत्रापि त्रिंशद्भेद[12]कल्पनयाहोरात्रसंख्या। तत्र प्राणाः पञ्चार्थतः सिद्धा इत्युत्तरायणदक्षिणायनसंक्रान्त्योर्भेदः। अथ किं तत् प्राणस्य स्थानं यतः [13]संक्रान्तिरुच्यते — [अत आह — **इडा च पिङ्गला चैव**] [14]**अमा च** इत्युक्तम् ॥ ६-७ ॥

अधुना ततोऽपि सूक्ष्ममाध्यात्मिककालस्वरूपमहोरात्रं लक्षणान्तरेणोच्यते —

[15]ऊर्ध्वं प्राणो ह्यहः प्रोक्तः अपानो रात्रिरुच्यते ।

हृदयपुण्डरीकाद् **ऊर्ध्वं** नासिकापुटक्रमेणैवादित्यः समुदयन् **अहः प्रोक्तः**। अपानवृत्त्या त्वस्तमयन् **रात्रिः**। [16]ततश्च तत्त्रिंशता संक्रान्तिः। अशीत्यधिकेन शते[17]नोत्तरायणदक्षिणायने इति। प्रतिघटिकं षष्ट्यधिकेन प्राणशतत्रयेण वत्सरमित्यहोरात्रेण बाह्येन षष्टयब्दं भवति। तन्मध्ये च सर्वान्यग्रहगतिव्यापिनः शनैश्चरस्येव[18] चतुर्विंशतिसंक्रान्तयः प्राणहंसस्याप्युत्तरायणदक्षिणायनयोः

---

[1] रात्रेः पूर्वशरद्यामो द्वावह्नौ — अ; .. त्रैपूर्वशरद्यादि .. द्वावन्यौ — आ
[2] वह्नाप्येवं — अ; वा प्येवं — आ
[3] भवेदीक्षा — आ
[4] दीनस्यादौ — आ
[5] वसन्तस्य ग्रीष्मो — अ, आ
[6] ०रद्वयम् — अ
[7] असंक्रान्तेऽपि लक्षणम् — अ, आ
[8] ६, ७ श्लोकौ 'अ' मातृकायां न दृश्येते। 'आ' मातृकायां ६ पूर्वार्धं परं न दृश्यते। ६ उत्तरार्धं ७ श्लोकश्च परस्ताद् 'यतः संक्रान्तिरुच्यते' इत्यस्मादनन्तरं दृश्यते।
[9] एष — ई
[10] संक्रान्त्या — अ, आ
[11] ०कल्पनायाध्यर्ध० — आ
[12] ०कल्पनायाहो० — आ
[13] संतिरुच्यते — अ; सन्धिरुक्तेरित्युच्यते — — आ
[14] आमा — अ, आ
[15] ऊर्ध्वं प्राणे ह्यहः — अ; ऊर्ध्वप्राणे ह्यहः — आ
[16] ततश्च त्रिंशता — आ
[17] ०नोत्तरायणे दक्षि० — अ, आ
[18] ०श्चरस्यैव — अ, आ

[1]संभवन्ति। तस्य क्रमेणास्य त्वन्तरान्तरेति भेदः। तन्न पूर्वेण विरोधः। यदुक्तं [2]श्रीमत्-**त्रयोदशशतिककालोत्तरे** —

"अथवा तु महासेन संक्षेपात्कथयामि ते।
षष्टिसंवत्सराः प्रोक्ता अहोरात्रेण योगिनाम्।
शतत्रयं षष्ट्यधिकं प्राणानां तु षडानन।
यावच्च घटिका प्रोक्ता तावत्संख्या [3]प्रकीर्तिता॥
एवं संवत्सरः प्रोक्तो बाह्येऽत्र घटिका तु या।
प्राणापानावहोरात्रम्" इति॥

एवम् —

विभागा दश प्राणस्य यो वेत्त्येवं स वेदवित्॥८॥

संक्रान्त्याद्याः [4]प्रागुपदिष्टा **दश प्राणभेदाः**। [5]एतान् **यो वेत्ति स वेदविद्** इति। तथा च श्रुतिः[6] — "प्राणं ब्रह्मेत्युपासीत" इति।

[7]अन्यस्तु "अहोरात्रयोः षोडशत्रुटचात्मक इति त्रुटिद्वयेन [8]प्रहरकल्पनया [अष्टौ] [9]प्रहराः, संध्याद्वयं चेति [10]दश. [एवं] प्राणस्य [11]दश [12]विभागाः" इति। तदयुक्तम्। प्रागुक्तद्विनिमिषाहोरात्रविभागत्वाच्चैषां प्राणविभागास्तु [13]दशाहोरात्रोद्दिष्टा व्याख्याताश्चेति तेषामेवोपसंहार-[14]कमेतदिति यथाव्याख्यातमेव युक्तम्॥८॥

किमे[15]तावानेवायं प्राणविभागः। नेत्युच्यते —

**आयामो देहमध्यस्थः सोमग्रहणमिष्यते।
देहातीतं [16]तु तं विद्यादादित्यग्रहणं बुधः[17]॥९॥**

---

[1] संभवति — अ, आ

[2] मातृकाद्वयेऽपि 'यदुक्तं सार्धत्रिशतिकालोत्तरे' इति पाठो दृश्यते। परम् उदाहृताः श्लोकाः सार्धत्रिशतिकालोत्तरे नैवोपलभ्यन्ते। व्याख्यानेऽत्र बहुषु स्थलेषु त्रयोदशशतिककालोत्तराच्छ्लोकास्तत्र तत्रोदाहृता दृश्यन्ते। तस्मादत्रापि त्रयोदशशतिकादेव ग्रन्थादेते श्लोका उदाहृताः स्युरिति पाठस्तदनुसारेण शोधितः। वस्तुतत्त्वविमर्शने ग्रन्थस्यास्यानुपलम्भान्नास्ति प्रमाणान्तरम्।

[3] प्रकीर्तिताः — आ

[4] सार्धत्रि० ११.२, ३

[5] एतान् वेत्ति — अ

[6] आकरो न लभ्यते।

[7] अन्यस्त्वहयोः षोडश त्र्यात्मक इति — अ; अन्यस्त्वहयो षोडश त्र्युटचात्म इति — आ

[8] प्रहार० — अ, आ

[9] प्रहारः — अ

[10] दर्श — आ

[11] दर्शितविभाग इति — आ

[12] विभाग इति — अ

[13] दशरात्रोद्दिष्टा — अ; दर्शात्रोद्दिष्टा — आ

[14] ०क्रमेतदिति — आ

[15] ०तावन्नेवायं — अ, आ

[16] कृतं विद्या० — आ, मु

[17] ९ उत्तरार्धं १० पूर्वार्धं च 'इ' मातृकायां न विद्येते।

हृदयपुण्डरीके प्राणायामकुम्भकाख्यसोमग्रहणं तत्पुण्यकाल[1]समय इत्यर्थः। अयं तु [2]द्वादशान्ते तदादित्यग्रहणमेव ॥९॥

अत एव —

अयुते द्वे सहस्रं तु षट्शतानि तथैव च।
अहोरात्रेण योगीन्द्रो जपसंख्यां करोति [3]सः ॥१०॥

[4]प्राणायामस्याहोरात्रत्वात् षष्टयधिकशतत्रयेण घटिकायाः संवत्सरत्वाच्च तत्षष्टया चाहोरात्रस्यावस्थेति षट्शताधिकान्येकविंशतिसहस्राणि प्राणप्रवाहसंख्येति जपस्यापि तत्संख्या [5]सिद्धा। यदुक्तम्[6] — "जपं प्राणमिमं कुर्यात्" इति। [7]वक्ष्यमाणनयेन चोंकारनमस्कारसहितस्य प्रासादजपस्यात्र तत्कालत्वा[8]दित्याध्यात्मिकः कालविभेदः प्राण[9]प्रभेदक्रमानुद्वारेणोक्तः ॥१०॥

अधुना [10]"प्राणो जीव" इत्युक्त[11]भ्रमापनुत्तये[12] तद्विविक्तजीवज्ञानाय प्राणायामोपदेशः —
प्राणायामं समासेन कथयामि [13]तवाखिलम्।

तम् **अखिलं** [14]पूरकादिभेदभिन्नं वक्ष्यामीति ॥

तत्र पूरकः —

उच्चारयेत्तु प्रणवं स्वरेणैकेन योगवित् ॥११॥
उदरं पूरयित्वा तु वायुना यावदीप्सितम्।
प्राणायामो [15]भवेदेष पूरको देहपूरकः ॥१२॥

द्वादशान्ताभि[16]ध्यातप्राणशिवमरुता शुद्धेन यावच्छक्ति **उदरं पूरयित्वा** [17]**प्रणवम्** एकश्रुत्या **उच्चारयेत्**। "प्राणायामः परो यज्ञः" इति श्रुतेः। [18]यज्ञकर्मणि च तस्या एव विहितत्वात्। अन्यथा [19]निपातत्वेनौणादिकतया चोदात्त एव स्यात्। एवमप्युदात्त इति स्वाध्यायाध्ययन[20]काले-

---

[1] ०समयमित्यर्थः — आ
[2] स्वद्वादशान्ते — आ
[3] यः — इ
[4] प्राणागमस्याहो० — आ
[5] सिद्धम् — आ
[6] आकरो न लभ्यते।
[7] सार्धत्रि० १५.१ वृत्तौ।; वक्ष्यमाणेन येनोनचौकारे च नम० — अ; वक्ष्यमाणेन येनोनचौकोरे च नम० — आ
[8] ०दित्यध्यात्मिकः — अ, आ
[9] ०प्रभेदकानु० — अ
[10] प्राणजीव० — आ
[11] सार्धत्रि० १०.७, ८
[12] भ्रमानुपपत्तये — अ
[13] तवा(धुना) खिलम् — अ
[14] पूर्वकादि० — अ
[15] भवेदेषु — इ, उ
[16] ०ध्याता प्राण० — अ
[17] प्राणमेक० — अ, आ
[18] पा. सू. १.२.३४
[19] 'निपाता आद्युदात्ताः' इति फिट्सूत्रेण ८०, 'अवतेष्टिलोपश्च' इत्यौणादिकमन्प्रत्यये १४७, 'ञ्नित्यादिर्नित्यम्' इति पाणिनिसूत्रेण ६, १, ११७.
[20] कालेष्विव स्थितस्य विहित० — अ

ष्वीप्सितस्य विहितत्वाद्वेदेषु [1]तत्स्वरितभेद [2]उदात्तः। यदुक्तं **शतपथपरिशेषे**[3] — "स्वरितोदात्त एकाक्षर [4]ओम्। ओंकार ऋग्वेदे स्वरितोदात्तः, यजुर्वेदे दीर्घप्लुतोदात्तः[5], सामवेदे संक्षिप्तोदात्तः, अथर्व[6]वेदेऽनुदात्तः"। इति नात्र संशयः ॥११-१२॥

अथ [7]कुम्भकः —

> **[8]पिधाय सर्वद्वाराणि निश्वासोच्छ्वासवर्जितः।**
> **[9]संपूर्णकुम्भवत्तिष्ठेत्प्राणायामः स कुम्भकः ॥१३॥**

रेचकस्तु —

> **[10]मुञ्चेद्वायुं ततश्चोर्ध्वं [11]श्वासेनैकेन योगवित्।**
> **निश्वासयोग[12]युक्तस्तु [13]यावदूर्ध्वं स रेचयेत् ॥१४॥**
> **[14]रेचकस्त्वेष विख्यातः प्राणसंशयकारकः।**

[15]हृदयपुण्डरीकाद् ऊर्ध्वं नासिकापुटेन वायोः प्रेरणं रेचकः। स च **प्राणसंशयकारकः** शरीरे तद्विच्छेदः उत्क्रान्तिवत् ॥

तथा हि —

> **[16]यत्तद्धृदि [17]सदा पद्ममधोमुखमवस्थितम् ॥१५॥**
> **विकस[18]त्येतदूर्ध्वं तु [19]पूरकेण [20]तु [21]पूरितम्।**
> **ऊर्ध्व[22]स्रोतो भवेत्पद्मं कुम्भकेन निरोधितम् ॥१६॥**
> **रेचकेन तथा क्षिप्तं सद्यः प्राणहरेण तु।**
> **[23]मुक्त्वा हृदयपद्मं तु ऊर्ध्व[24]स्रोतोव्यवस्थितम्[25] ॥१७॥**

---

[1] तत्स्वरान्तभेद — अ
[2] उदान — आ
[3] आकरो न लभ्यते।
[4] ओं दकार च दैत्रे स्वरितोदात्तो यजुर्वेददीर्घ० — अ; ओं दकार ऋद्वदैत्रे स्वरितोदात्तो यजुर्वेददीर्घ० —आ
[5] "एष प्रणव इत्युक्तः परब्रह्मप्रवक्तृकः।
एकाक्षरो मनुरयं प्लुतोदात्तमिमं पठेत् ॥"
विश्वामित्रसंहिता ६.३
[6] ०वेदानुदात्तो — अ
[7] कुम्भः — अ
[8] विधाय — ई
[9] संपूज्य कुम्भ० — अ
[10] मुञ्चेद्वायुस्तत० — इ
[11] श्वसेनैकेन — मु
[12] ०वृत्तस्तु — आ
[13] ऊर्ध्वं वायुं स — इ, ई, उ, मु
[14] रेचचस्त्वेषु — इ, उ
[15] हृत्पुण्डरीका० — आ
[16] यत्तद्धृति — आ
[17] समा पद्म० — अ
[18] ०त्येकमूर्ध्वं तु — अ, आ
[19] पूरकेन — मु
[20] 'तु' इति नास्ति — ई
[21] पूरितः — उ
[22] स्रोतोद्भवेत्पद्मं — उ
[23] मुक्त्या हृदय० — आ
[24] ०स्रोऽप्यवस्थितम् — आ
[25] ०स्थितः — मु

[1]रेचितो गच्छति हृचूर्ध्वं [2]ग्रन्थि भित्त्वा क्षणेन तु ।
भित्त्वा कपालद्वारं तु [3]जीवो हृचूर्ध्वं तु [4]रेचितः ॥१८॥
सदाशिवपदं गत्वा न [5]भूयो जन्म चाप्नुयात् ।

[6]सर्वदा **अधो**[7]**मुखम्** अविकसितमेव **पूरकेण** तद् विकासं समायाति। विकसितं च **कुम्भकेन** निरोधमेति। **रेचकेन तु** [8]**प्राणहरेण** अभ्यासतो मध्यनाडी[9]वर्तिना, यदा रेचितं भवति, तत [10]ऊर्ध्वत्वमायातीत्युक्तं [11]प्राक्। तदा **जीवः** तथाभूतेन रेचकेन च स्वसंबन्धिना **रेचितः** [12]हंसवत् हृत्पद्मं परित्यज्य, हृदय**ग्रन्थि भित्त्वा**, मध्येन ऊर्ध्वं **कपालद्वारं** ब्रह्मरन्ध्रं निर्भिद्य, **सदाशिवपदं** [13]यातीत्युक्तैवोत्क्रान्तिरिति ॥

ततः प्रकृतं किम्, उच्यते —

[14]**आयामः क्रियते तस्य नान्यस्य तु कदाचन ॥**
स जीवो जीवलोकस्य मया प्रोक्तः समासतः ॥१९॥

येन तस्याहंकार[15]वृत्तेरान्तरस्य च प्राणाख्यस्य वायोः [16]**आयामः** अत्र शरीरे तथा **क्रियते**। न बाह्यस्य। **[स] जीवो मया प्रोक्तः** अत एव प्राणस्य व्यतिरिक्त एवेति ॥१९॥

इति [भट्टनारायणकण्ठात्मज] भट्टराम[17]कण्ठविरचितायां श्रीमत् [सार्धत्रिशति-] कालोत्तरवृत्तौ [18]जीवज्ञानप्रकरणमेकादशं [समाप्तम्]॥

इत्येकादशः पटलः

---

[1] रेचिते — उ
[2] ग्रन्थीन् भित्त्वा — अ, आ
[3] जीवोऽप्यूर्ध्वं तु — इ, ई, उ
[4] रेचतः — उ
[5] भूतो जन्ममाप्नुयात् — अ, आ
[6] सर्वधाधो० — आ
[7] मुखं विकसित — अ
[8] प्राणाहारेणाभ्यासन्तो — अ; प्राणाहरेणाभ्यासन्तो — आ
[9] वर्तिनी — अ, आ
[10] ऊर्ध्वमायाती० — आ
[11] सार्धत्रि ८.३० उ०, ३१ पू० वृत्तौ, ३८ उ०, ३९ वृत्तौ च।
[12] हंसवत्तं पद्मं परि० — अ; हंसवत्तं पत्म परि० — आ
[13] यान्तीत्युक्त्वैवोत्क्रान्ति० — अ; यान्तीत्युक्तैवोत्क्रान्ति० — आ
[14] आयामं — ई, उ
[15] ०प्रोक्तेरान्तरस्य — अ
[16] आयामोऽत एव प्राणस्य. . . .एवेति — अ
[17] 'कण्ठ' इति नास्ति — अ
[18] ज्ञानस्यात्मकालप्रकरण० — अ, आ

द्वादशः पटलः

विद्याप्रकरणम्

तदियता माया तद्गर्भफलं साधकस्य नाडी जीवप्राणभेदश्च प्रोक्ताः । अथ शुद्धविद्या साधकस्योच्यते —

चन्द्राग्नि[1]रविसंयुक्ता आद्या कुण्डलिनी तु या।
हृत्प्रदेशे तु सा ज्ञेया अङ्कुराकारवत्स्थिता ॥१॥

एतत्त्रयमत्र शक्तिचतुष्टयोपलक्षणम् । यदुक्तम् — "[2]अर्केन्द्वग्निहिरण्यद्योताभाः शक्तयः" इति। [3]तस्मात् सा च **आद्या** प्रथममहर्मुखेन पुंसां संबध्यते। अनन्तरं पुर्यष्टकं यतः। **कुण्डलिनी** इति प्रागुक्तनादादिशब्देन शुद्धविद्यायाः कुण्डलिनीशब्देनापि प्रसिद्धिरिति दर्शितं [4]प्राक्। **सापि हृत्प्रदेशे** [5]गुम्फिता। किं च [6]तेनाविकृतेन व्यापकेन च रूपेण तत्र स्थिता नाम **अङ्कुराकारवत्** प्रतिपुरुषं [7]कार्यात्मना भिन्नेन कालाद्यङ्कुरात्मना मायादिवदित्युक्तम् — "[8]नादाख्यं यत्परं बीजम्" इत्यत्र ॥१॥

सृष्टिन्यासं न्यसेत्तत्र [9]द्विरभ्यासपदेरितम् ।

तत्र तस्यां [10]प्रागुक्तस्थूलशब्दात्मिका या मन्त्र**सृष्टिः**, [11]तस्या **न्यासः** मनसा न्यस्यते बिन्दुनादात्मनाकारेण, [12]तं **न्यसेत्** [13]धमनादिनादवदत्यन्तसूक्ष्मं [14]तमुत्पादयेत् । एवं हि तत्कार्यद्वारेण [15]सा तु ज्ञाता भवतीत्यर्थः । यदाहुः[16] —

---

[1] ०रपिसंयक्ता — अ, इ

[2] सार्धत्रि० १०.१८ उ०; अक्कें कं च हिरण्य० — आ

[3] तस्मात्सा चाचाद्या — अ; तस्मिन्निति सा चाद्या — आ; "चन्द्राग्निरविसंयुक्ता ह्याद्या कुण्डलिनी तु या। हृत्प्रदेशे तु सा ज्ञेया ह्यङ्कुराकारवत् स्थिता ॥' इत्यस्य सूत्रस्य वृत्तौ 'मायेयपुर्यष्टकसंबन्धात् पूर्वमेव नादात्मकपुर्यष्टकसंबन्धः' इत्युक्तम्। यथा 'स चाद्य प्रथममहर्मुखे पुंसि संबध्यते। अनन्तरं पुर्यष्टकमित्यादि।" इति क्रियाक्रमद्योतिकाव्याख्यायां प्रभायाम् (पृ २७६) दृश्यते।

[4] सार्धत्रि० १.५ पू० वृत्तौ।

[5] गुम्भिता — आ

[6] किं तेनापि कृतेन — अ

[7] कार्यमात्मना — अ, आ

[8] सार्धत्रि० १.५ पू०, ८ वृत्तौ च।

[9] द्विरभ्यासपदैरिति — अ, आ; द्विरभ्यासं सदेरितम् — ई

[10] सार्धत्रि० प्रथमपटले (९–१४) श्लोकैरुक्ता मन्त्रसृष्टिः।

[11] तस्यान्यो सोमनस्य न्यस्यते — अ

[12] तन्न्यसेत् — आ

[13] दमनादि० — अ, आ

[14] तदुत्पाद० — अ

[15] सानुज्ञाता — आ

[16] आकरो न लभ्यते।

"[1]अतः सततमुद्युक्तं [2]स्पन्दितत्वविमुक्तये ।
जाग्रदेव निजं भाव[3]मचिरेणाधिगच्छति ॥" इति ।

[4]तं च **द्विरभ्यासस्य** प्राणगमागमस्य यत् **पदं** परमकारणं क्रियाशक्तिः, तेन **ईरितं** प्रेरितं न्यसेत् अन्यस्याहंकारस्य प्रेरणस्य तत्र प्रगमासंभवादित्युक्तम् । तद्वक्ष्यामो **ज्ञानामृतप्रकरणे** — [5]"शक्त्या [6]तु नीयते जीवः" इति ॥

एवं कुण्डलिनीस्वरूपं ज्ञात्वा —

[7]स्रवन्तं चिन्तयेत्तस्मिन्नमृतं साधकोत्तमः ॥२॥

तस्यां [8]पूर्वनयेन ब्रह्मरन्ध्रद्वाद[9]शान्ताधिष्ठातृ[10]शिवचन्द्रमसः **स्रवन्तं चिन्तयेत्** साधकः । ततः "[11]सिद्धिफलभाग्भवेद्" इति वक्ष्यमाणेन संबन्धः ॥२॥

[12]अग्नीषोमात्मकं सर्वं जगत्स्थावरजङ्गमम् ।
चिन्तयेद्विपरीतं तु सिद्धिकामः समाहितः ॥३॥
स्वदेहं चिन्तयेद्विद्वान्दिव्यरूपमनौपमम् ।
[13]यस्य यत्कर्म चोद्दिष्टं तत्कर्म परिचिन्तयेत् ॥४॥

यद्यपि [14]प्रागुक्तनयेन विद्याप्रतिष्ठाख्यतत्कलाधिष्ठितत्वाद् अग्नीषोमात्मकं [15]पुर्यष्टकसंबन्धि । तथापि साधकस्तद् **विपरीतं** सोमात्मकं [16]चामृतपूर्णं दिव्यरूपं चिन्तयेत् । यस्य यच्छरीरवर्तिनः शुद्धाशुद्धभेदभिन्नस्य नादादि[17]पृथिव्यन्तस्य तत्त्वसमूहस्य **यत् कर्मोद्दिष्टं** यथा कर्मेन्द्रियादेस्तत्र पान-भोजनादि [18]तदपि **तत्कर्म** व्रतात्मकमेवं चिन्तयेत् ॥३-४॥

अथोपसंहारः —

इदं च योऽभ्यसेदेवममृतं सर्वतोमुखम् ।
अचिरेणैव कालेन स सिद्धिफलभाग्भवेत् ॥५॥

---

[1] अततस्सतत० — आ
[2] स्वदिवन्तत्त्व० — आ
[3] ०मचिरेण कालेनादिगच्छन्ति — अ
[4] तं च द्विरभ्यास्य – अ; तच्च द्विरभ्यस्य — आ
[5] सार्धत्रि० २३.१३ उ०
[6] नु मीयते — अ; नु नीयते — आ
[7] स्रवन्तममृतं चिन्तयेत् साधकोत्तमः — अ, आ; स्रुवन्तं — इ, उ
[8] सार्धत्रि० २.५ उ०, वृत्तौ प्रोक्तनयेन
[9] ०शान्ताभिध्यातृ० — अ, आ
[10] शिवचन्द्रं सस्रवन्तं — आ
[11] सिद्धफलभवेदिति — अ, आ; सार्धत्रि० — १२.५ उ०
[12] अग्निसोमात्कं — मु
[13] 'यस्य' इति नास्ति — अ; यत्क्रमं चोद्दिष्टं तत्तत्क्रमं परि — आ
[14] सार्धत्रि० १०.१८ उ०–१९ वृत्तौ
[15] पुर्यष्टसंबन्धि — अ
[16] वा कृतपूर्णं — अ; वामृतपूर्णं — आ
[17] ०पृथिव्यान्तस्य — आ
[18] 'तदपि' इति नास्ति — अ

[1]सृष्टिन्यासमविज्ञाय कथं युञ्जीत साधकः ।
[2]हन्यान्मुष्टिभिराकाशं [3]तुषान्कुट्टयतीव सः ॥६॥

एवं यः शुद्धविद्यासृष्टिन्यासमविज्ञाय साधकः सिद्धावस्य मानस्यां वा प्रयतते [4]सोऽशक्यानुष्ठाने निष्फले च कर्मणि प्रवृत्तो भवतीति [5]तज्ज्ञानं साधक[6]स्यावश्यं कर्तव्यमिति ॥५-६॥

इति [भट्टनारायणकण्ठात्मजभट्ट] रामकण्ठविरचितायां श्रीमत् [सार्धत्रिशति-] कालोत्तरवृत्तौ [7]विद्याप्रकरणं द्वादशं [समाप्तम्] ॥

इति द्वादशः पटलः ।

---

[1] अन्यथा सिद्धिमविज्ञाय — अ, आ
[2] हन्या मुष्टिभि० — आ
[3] तुष्टा कुट्टवतीव — इ, उ
[4] सोऽशक्यानुष्ठानफले — अ; सोऽशक्या नुष्ठा- निष्फले — आ
[5] तद्भानं — अ
[6] ०स्यावश्यकर्तव्य० — आ
[7] विद्याज्ञानप्रकरणं — अ, आ

त्रयोदशः पटलः

मन्त्रसृष्टिप्रकरणम्

येषु [1]पूर्वोद्दिष्टेषु मध्यादल्पबुद्धयो [ये]ऽत्राधिकारिणः शुद्धविद्यासंबन्धिनीमेतामाध्यात्मिकीं मन्त्रसृष्टिं [2]ज्ञातुमुत्सुकाः साधकाः, तेषाम् —

अथातः संप्रवक्ष्यामि सृष्टिं [3]मन्त्रलिपेः क्रमात् ।

विस्तरेण **मन्त्रलिप्यक्ष**[4]राथिकां क्रमेण **सृष्टिं** प्रवक्ष्यामीति ॥

यथा तु सकलो देवो निष्कलेन समन्वितः ॥१॥
कला[5]मुत्पादयामास सर्वमन्त्रप्रवर्तिकाम् ।
[6]ओंकारमूर्ध्नि मध्यस्थ [7]ओंकारव्यापकस्तथा ॥२॥
[8]ओंकारप्रथमां रेखामकारं सृजति प्रभुः ।

[9]**यथै**वादिदेवो महाप्रलयादनन्तरसर्गप्रारम्भे **सकलः** [10]नादाख्यः प्रागुक्तदेवः समुपहृतसमस्तवाक्यप्रपञ्चात्मनो **मूर्ध्नि** मध्ये तमेव व्याप्य स्थितः, [**तथा**] तदुपसंहारश्रुत्यविना[11]भाविनि ध्वनिरूप एव सकलो देवो नादात्मना च। [12]यदुक्तं **गुरुभिः** —

"[13]अवर्णोवर्णमकारा [14]बिन्दुर्नादश्च तस्य [15]तन्मात्राः" इति।

असौ **निष्कलेन** च तेनैवाधिष्ठितः सन् बाह्येऽपि स्थूलभेदेन [16]तदनुकार्यात्मनो [17]रेखागवयन्यायेन रेखारूपस्यैवोंकारस्योत्पत्तिनिमित्तं **प्रथमा** या शिरोरूपा **रेखा अकारः**, तं सृजति। स एव **प्रभुः** स्थूलशब्दात्मनो [18]मन्त्रस्य। एवं तदनु संसारभाविनो लिपिप्रबन्धस्य स एव कर्तेत्यर्थः ॥

---

[1] सार्धत्रि० १.२
[2] ज्ञातुमुक्ताः — अ, आ
[3] लिपेरितः क्रमात् — अ, मु; वितीरितः क्रमात् — आ; विस्तरतः क्रमात् — इ, उ; वस्तुनः क्रमात् — ई
[4] ०राथिका — अ, आ
[5] ०मुत्पातयामास — इ
[6] ओंकरमूर्तिमध्यस्थ — अ, आ; ओंकारं मूर्ध्नि मध्यस्थ — ई
[7] ओंकारः व्याप० — उ
[8] ओंकारः प्रथमा रेखा अकारं — अ, इ, ई, उ; ओंकारप्रथमा रेखा अकारं — आ; ओंकारप्रथमरेखामकारं — मु
[9] यथैवाधिदेवो — आ
[10] नादाख्यंप्रागुक्तदेवसमुप० — अ; नादाख्यप्रागुक्तदेवसमुप० — आ; सार्धत्रि० १.५ पू०
[11] ०भावध्वनि० — आ
[12] यदुक्ता — अ; आकरो न लभ्यते।
[13] आर्णोवर्णमकार ० — अ, आ
[14] ०बिन्दुनादश्च — अ, आ
[15] मात्र इति — अ, आ
[16] तदनुरागात्मनो — अ, आ
[17] लौ० न्या० साहस्री पृ० २७; रेखाजागन्यायेन — अ; रेखाजातिन्यायेन — आ
[18] 'मन्त्रस्य एवं' इति नास्ति — अ; मन्त्रस्यैव तदनु — आ

या चाका[१]रात्मिकैषा प्रथमा तद्रेखा —

विद्या नाम [२]कला सा तु वर्णे वर्णे व्यवस्थिता ।।३।।
[३]ओंकारस्य [४]उकाराभा रेखा या संप्रदृश्यते ।
[५]प्रतिष्ठा नाम सा ज्ञेया उकाराक्षरसंभवा ।।४।।
मूर्ध्नि तस्य भवेद्यासौ [६]सूक्ष्मरेखा निरञ्जना ।
[७]मकारो ह्यभवत्तत्र निवृत्तिर्नाम सा कला ।।५।।

ननु सर्वं[८]तत्कलापूर्वकत्वेन [९]तस्याः "शान्तिर्नाम कला[सा] तु" इति वक्तव्यम् । [१०]तदतीता वा । न । अस्याधिभौतिक[११]स्यैवात्र ध्वनिप्रणवस्यानुकार्यत्वात् । [१२]द्विविधो हि प्रणव आध्यात्मिक आधिभौतिकश्चानुभवसिद्धः । तत्राध्यात्मिकस्यैव [१३]प्रागुक्तवाक्छक्ति[१४]क्षोभतो [१५]नादबिन्द्वात्मकादक्षरादीनामुत्पत्तिर्दर्शिता । यदुक्तं श्रीमत्**स्वायंभुवे**[१६] —

"[१७]अथादावभवच्छब्दकारणादक्षरं ततः ।" इति ।

अत एव [१८]मातृकायामस्याकारादिभ्योऽपि पूर्वन्यासो दृश्यते । अत एव चेह सर्वमन्त्राणामादावस्य [१९]प्रयोगं वक्ष्यति [२०]**प्रत्यक्षयजनप्रकरणे** । श्रीमन्**निश्वासादा**वप्युक्तम्[२१] । **यासौ** तच्छिरसि मकारानुकारिण्यर्धचन्द्राभा रेखा [२२]**मकारो ह्यभवत् तत्र** अनुकार्यत्वेन ।

[२३]"आद्यस्याकारस्य निवृत्तिकलात्वेऽपि सृष्टि[२४]कारणब्रह्माधिदेवतात्वात्, सृष्टेश्च भोगवेदनात्मकत्वाद् विद्याकलात्वमुपचारादत्रोक्तमिति । [२५]परस्योकारस्यान्वयद्वारेण त्रिकोणाग्नेयमण्डलानुकारित्वादग्नेश्च प्रकाशकत्वा[२६]द्विद्यात्वम् [इति] ।" मकारकलायाश्च [२७]तद्वदेव तु निवृत्तित्वमपास्तमेव भवेत् । कथमुपचरितमिति शक्यते [२८]वक्तुम् । मुख्ये संभवत्युप[२९]चारो [न] । शब्दवाच्यस्य सूक्ष्मशब्दपूर्व[३०]मकारोकारमकारक्रमेणोत्पत्तिसिद्धेः शान्त्यादिकलापूर्वमित्युक्तम् —

---

[१] ०रात्मनि कैषा — आ
[२] कया सानुपर्णे . . .व्यव० — अ, आ
[३] ४, ५ श्लोकौ 'अ, आ' मातृकयोर्न स्तः
[४] उकारभा — मु
[५] प्रतिज्ञा नाम — ई
[६] सूक्ष्मा रेखा — मु
[७] मकारोस्य भवेत्तत्र — ई
[८] ०तत्कालापूर्वं० — आ
[९] तस्या शान्ति० — अ, आ
[१०] तदतीत वा न स्याधिकभौतिक० — अ; तदतीत वा न स्याधिभौतिक० — आ
[११] ०स्यैवात्राध्वनि० — अ
[१२] द्विविधेति प्राणव—अ; द्विविधे हि प्रणव—आ
[१३] प्रागुक्तात्वाच्छक्ति० — अ; प्रागुक्तत्वाच्छक्ति ० — आ
[१४] क्षोभको — अ, आ
[१५] सार्धत्रि० १.५ पू० वृत्तौ
[१६] स्वायम्भुवे १.१
[१७] अथादावच्छब्दा कारणता तत इति — अ; अथादावच्छब्दाकाराणा दक्षिणतस्तत इति—आ
[१८] मात्रकाया० — अ
[१९] प्रयोगः — अ
[२०] सार्धत्रि० २४.२,३ पू० वृत्तौ ।
[२१] निश्वासकारिकायां ज्ञानकाण्डप्रकरणे
[२२] मकारोऽप्यभव० — अ, आ
[२३] अन्यस्वकारस्य — अ, आ
[२४] ०कारणं ब्रह्मा० — अ
[२५] परस्वकार० — अ, आ
[२६] ०द्विद्यात्वममकार० — अ, आ
[२७] तददत्वा तु — अ, आ
[२८] वक्तुमभिख्येयं संभव० — अ; वक्तुमभिख्येय संभव० — आ
[२९] ०चारशब्दो वाच्यस्य — अ, आ
[३०] ०मकारोत्र क्रमेणोत्पत्ति० — अ; मकारो मात्रक्रमेणोत्पत्ति० — आ

[1]"स्थूलं शब्द इति प्रोक्तं सूक्ष्मं चिन्तामयं भवेत्।
चिन्तया रहितं यत्तु तत्परं परिकीर्तितम्॥" इति।

आधिभौतिकस्य तु तद्विवक्षयोच्चार्यमाणस्य ध्वनिरूपस्याकाशवायुप्रभव[2]त्वादत्र शान्त्यादिकलापूर्वत्वा[3]भावे किम्। प्रयत्ननिर्वशत्वात् [4]कण्ठोष्ठ्यत्वे च सत्यकारादिमात्राक्रमेणाभिव्यक्तिसिद्धेर्विद्याकलादित्वमेव तन्निवृत्तिकलात्मको मकारः। शून्यान्तरं च आध्यात्मिक[5]स्यैव। कारणात्मन्युपशमाविनाभूतायाः शुद्धेऽध्वनि [6]मातृरूपायाः शान्तिकलायाः संवेदनादनन्तत्वमिति विशेषः। स एव [7]चात्राधिभौतिकभेदान्तरेण रेखा[8]प्रणवेनानुकार्य इति तथैवोक्तः। तन्न विरोधः।

कथं तर्हि [9]"निवृत्तिः पृथिवी ज्ञेया" इत्यादीनि [10]प्रागुक्तानि च, प्रासादप्रकरणवक्ष्यमाणानि च

[11]"सद्यस्तु पृथिवी ज्ञेयो वामो ह्यापः प्रकीर्तितः।" इति,

तान्यकाराक्षरजानि [12]"सद्यः" इत्यादीनि च,

[13]'सद्योजातस्तु वै ब्रह्मा वामो विष्णुः प्रकीर्तितः'।
[14]"ब्रह्मणो हृदयं स्थानं कण्ठे विष्णुः समाश्रितः।
तालुमध्ये स्थितो रुद्रः"

इत्येवमन्तानि सूत्राणि नोपपद्यन्ते। अकारादि[15]कलानामन्ते निवृत्त्यादिक्रमस्य प्रतिपादनात्। यथोक्तं श्रीमत्स्वतन्त्रे[16] —

"अकारश्चाप्युकारश्च मकारो बिन्दुरेव च।
अर्ध[17]चन्द्रो निरोधी च नादो नादान्त एव च॥" इति।

[18]अधिदेवताधिष्ठातृप्रणव[19]कलापेक्षया [20]तदुक्तिर्निदर्शिता [21]प्राक्। [22]प्रवक्ष्यामश्चात्रायं न विरोध [इति]। सा च प्रतिवर्णं शिरोरेखात्वेन[23] स्थिता। यमु[द्दिश्यै]वं सर्व[24]वर्णप्रमुखा रेखेति कथमुच्यते। तस्य सर्ववर्णेभ्यः प्रथमतरकल्पना युक्ता। [25]सर्वत्रैवं प्रसङ्गात्प्रोक्तागमविरोधादिति चेत्। न। अनुभवबाधितत्वेन तस्य "अग्निना सिञ्चेरन्" इत्यादेरिवाप्रामाण्येनापि विरुद्धत्वात्। [26]न च तद्विरोधोऽप्यत्र, भिन्नविषयत्वादिति दर्शितम्। [27]तस्या मुख्यतयैवं व्याख्यातमित्यदोषः॥३–५॥

---

[1] सार्धत्रि १.८; स्थूलः शब्द इति — अ
[2] ०त्वादष्टशान्त्यादि० — अ; ०त्वाष्टाशान्त्यादि — आ
[3] ०भाव्ये किम् — अ, आ
[4] कण्ठोष्ठ्यमलत्वे च — आ
[5] ०स्यैककारणात्म० — अ
[6] मात्ररूपायाः — आ
[7] चाह्लोऽधिभौतिक० — अ, आ
[8] ०प्रणवेनाकार्य — अ, आ
[9] सार्धत्रि० ८.६ पू०
[10] प्रागुक्तानीव — अ; प्रागुक्तानिव — आ
[11] सार्धत्रि० २२.१२ पू०
[12] सार्धत्रि० २२.८ पू०; स्सन्ध इत्यादीनि—आ
[13] सार्धत्रि० २२.१५ पू०
[14] सार्धत्रि० २३.१० उ, ११ पू०
[15] कलानान्ते — अ, आ
[16] आकरो न लभ्यते।
[17] ०चन्द्रनिरोधिश्च — अ; ०चन्द्रनिरोधीश्च — आ
[18] आधिदेवता० — अ, आ
[19] ०कपालप्रेक्षया — अ, आ
[20] तदुक्तिनिर्दर्शितं प्राक् — आ
[21] सार्धत्रि० २.६ उ०, ७ पू० वृत्तौ।
[22] सार्धत्रि० १३.९ उ० वृत्तौ।
[23] ०रेखत्वेन — अ
[24] ०वर्णप्रमुखे — अ; ०वर्णं प्रमुखे — आ
[25] सर्व एव प्रसङ्गा० — अ, आ
[26] न व तद्विरोधो — अ
[27] तस्यां मुख्यतयैव — अ, आ

चतुर्थं च तत् —

[1]ओंकारमूर्ध्नि संयुक्ता लय [2]ओंकारमूर्धनि।
[3]रेखेयं व्योम्नि [4]निर्वाणा[5] सा कला [6]शान्तिरुच्यते ॥६॥
[7]संयोगात्संप्रकाशेत निष्कले सकले स्थिता।

इयं तु तत्र शिखा[8]रूपा रेखा बिन्दुद्वारेण संयुक्ता। न तु कार्यान्तरवत्तदारम्भिका यतः। तस्मिन् **ओंकारमूर्ध्नि** यद्व्योम परं शुद्धविद्याकाशं, तस्मिन् कारणात्मनि [9]**लयः**। ओंकाररेखासौ तत्रैव यतो **निर्वाणा** उप[10]शान्ता च ततः **शान्तिः उच्यते**। बिन्दुकलान्तर्भाविन [11]तदतीता नु। यद्वक्ष्यति[12]—

[13]"बिन्दुं तदुदरे [14]क्षिप्त्वा [15]मातृवत्परिरक्षति" इति॥

अत एव च **निष्कले** तस्मिन्कारणात्मन्यवस्थितापि[16] **सकले** [17]तत्कार्यग्रामे ध्वनिरूपेण तु यावत् प्रकाशते मायेव स्वकार्यवर्त्मनि [18]मोहेनान्वयादिति॥

अथ [19]पूर्वोक्तविरोधशङ्कयाधिदैविकस्यापि तत्स्वरूपस्य क्रमेणोत्पत्तिरुच्यते —

[20]मूर्धन्याक्रान्त [21]ओंकारे शब्दस्तत्र तु जायते ॥७॥
सा शक्तिः परमा सूक्ष्मा बिन्दुना सहिता [22]मता।

ओंकारविषये [23]या **मूर्धनि** शुद्धाशुद्ध[24]विद्याख्या कौण्डलिनी शक्तिरुक्ता तस्मिन्मन्त्र[25]तन्त्रयोर्न विवादविषयः। परमेश्वरेण **आक्रान्ते** सति प्रथमं नादात्मकः **शब्दः** उत्पद्यते। यदुक्तं श्रीमत्**स्वायंभुवे**[26] —

"अथादा[27]वभवच्छब्दकारणात्" इति।

स च शब्दः शान्त्यतीतोऽपि शान्तिरुच्यते इत्याह — "**बिन्दुना सहिता मता**"। तस्या एवोत्तरपरिणामो बिन्दुरतस्तत्स्थेत्युक्तम्॥

---

[1] ओंकारमग्निसं — अ
[2] ओंकारमूर्ध्वं — अ; ओंकारमूर्ध्नि — आ, उ
[3] रेखेयं . . . सकला — इ
[4] निर्याणा — ई
[5] रेखेयं शिक्षारूपा च — मु.
[6] शान्तिरुक्ता — अ; शान्तिरुत्तमा — आ
[7] ह्यसंयोगात्संप्राकोशेत — अ; संयोगात्संप्रकोशेत — आ
[8] रूपां —आ
[9] लयोङ्कार० — अ, आ
[10] ०शान्ताद्धि ततः — अ
[11] तदतिनानु — आ
[12] अत्रैव त्रयोदशपटले १२ पू०
[13] बिन्दुस्तदुदरे — अ; बिन्दु तदुदरे — आ
[14] क्षिप्ता — अ
[15] मात्रावत्परि० — आ
[16] कारणात्मन्यप्यवस्थापि — अ; कारणात्मनि अव्यवस्थापि — आ
[17] तत्कार्या ग्रामे — अ; तत्कार्या ग्रामेऽध्वनिरूपेणात्वयात् — आ
[18] मोहनान्वया० — अ, आ
[19] सार्धत्रि० १३.३ उ० –५ वृत्तौ।
[20] मूर्ध्ना क्रान्त० — आ
[21] ओंकारो — इ, उ
[22] 'मता' इति नास्ति — अ
[23] यो मूध्न्य शुद्धा — अ; यो मूर्ध्न्य शुद्धा—आ
[24] विद्याख्यकौण्डल्यशक्ति० — आ
[25] तन्त्रयोर्नापिवाद०—अ; तन्त्रोन्न विवाद०–आ
[26] स्वायम्भुवे १.१
[27] ०वुद्भवः छन्दः — अ

सा चेयम् —

[1]दीपादिव महत्तेजो [2]विष्फु[3]लिङ्ग[4]शिखान्वितम् ॥८॥
[5]निपतन्ती त्रिधा याति शिव[6]विद्यात्मकैर्यथा ।

[7]प्रदीपाच्छिखामात्राप्यु[8]त्पन्ना वनदाहादावनन्त**विष्फुलिङ्गशिखा**[9]वत्त्वेन [10]महत्त्वं **याति** । [11]तथैव [12]शान्तिकला कार्याय [13]प्रभवन्ती [14]मकारोकाराकारात्मकैः **शिवविद्यात्म**लक्षणैर्भेदैरनेकत्वं याति इति ॥

ततश्च —

शान्तिर्विद्या प्रतिष्ठा च निवृत्तिश्चेति ताः कलाः ॥९॥

सृष्टि[15]क्रमेण **शान्ति**र्नादबिन्द्वात्मिका [16]**विद्या** मकारः, **प्रतिष्ठा** उकारो [17]**निवृत्तिः** अकारश्चोच्यत इति[18]। एवं चाधिष्ठातृ[19]प्रणवकलापेक्षया संहारक्रमेण पूर्वाक्षिप्तानि सूत्राण्युप[20]पद्यन्त एव । [21]तथोक्तं **गुरुभिः** —

[22]"कमलजकेशवरुद्रा महेश्वरोऽन्यः परः शिवः सकलः ।
एते कारणसंज्ञाः [23]स्वाध्वव्यापिनः स्वमात्रस्थाः ॥"

इत्यविरोधः । [24]यतोऽयमुत्पत्ता[25]वाधिदैविकक्रमः ॥९॥

---

[1] दीपाद्दीपमह० — अ, आ, इ, उ; दीपोद्दीप्तं महत् — मु
[2] विष्पुलिङ्ग० — अ
[3] ०लिङ्गं — इ, ई, उ
[4] ०शिवान्वितम् — अ, इ, ई, उ
[5] निपतन्ति त्रिधा — अ, आ, इ, उ, मु; निपन्ति त्रिधा — ई
[6] ०विद्यात्मिका यथा — अ, आ; ०विद्यात्मभिः कला — इ, ई, उ, मु
[7] प्रति वा शिखा०—अ; प्रतिपा शिखा०—आ
[8] ०त्पन्नो वददाहादौ वनं न विष्पु० — अ; ०त्पन्नोर्वनदाहादावनन्न विष्फु० — आ
[9] ०पक्वेन — आ
[10] महत्वया याति — अ; महत्वं या याति— आ
[11] यथैव — अ, आ
[12] शान्तकला — आ
[13] प्रभवन्ति — अ, आ
[14] मकारोकारात्मकैः — अ, आ
[15] क्रमेण नाद० — आ
[16] विद्याकारप्रतिष्ठाकारो — अ; विद्यामकारः प्रतिष्ठात्रकारो — आ
[17] निवृत्तिराकारश्चोप्यत — अ, आ
[18] यदाह श्रीमान् कालोत्तरवृत्तिकारः — "शान्तिर्विद्या प्रतिष्ठा च निवृत्तिश्चेति ताः कलाः" इत्येतत्सूत्रवृत्तौ "सृष्टिक्रमेण शान्तिर्नादबिन्द्वात्मिका विद्या मकारः प्रतिष्ठा उकारो निवृत्तिरकारश्चोच्यते" इति ॥ — क्रियाक्रमद्योतिकाव्याख्या प्रभा, पृ० २८१
[19] उभयोरपि मातृकयोर्वृत्तौ 'प्रणवसत्ता' इत्यस्ति । परं पूर्वं १३.३–५ वृत्तौ 'प्रणवकलापेक्षया' इति पाठस्य विद्यमानत्वादत्रापि तदनुसारेण 'प्रणवकला' इति शोधितम् ।
[20] ०पद्यत एव — अ, आ
[21] यथोक्तं — आ
[22] अयं श्लोकः शिवपूजास्तवव्याख्याने ५७ तमपृष्ठे 'मन्त्रवार्तिके' इति निर्दिश्योद्धृतः ।
[23] स्वसाध्वसव्यापिनमात्रास्था — अ; स्वस्वाध्वव्यापिनमात्रस्था — आ
[24] यतो यदुत्पत्ता० — अ
[25] 'वाधिदैविक' इत्यारभ्य 'सा रेखिनी' इत्यन्तो भागो नास्ति 'आ' मातृकायाम् ।

ततः —

या कला रेखिनी तत्र पतिता [1]बिन्दुना सह ।
[2]सविद्येशः शिवः प्रोक्तो देवदेवः सदाशिवः ॥१०॥

तदनुकरणेऽप्यधिभूते **या** शिखारूपा प्रणव**कला** रेखैव आत्मतया विद्यते यस्याः, सा **रेखिनी**। व्रीह्यादित्वादिनिः[3]। तत्र **बिन्दुना सह पतिता**। सैव सह विद्येश्वरेण वर्तत इति **सविद्येशः शिवः** प्रोक्त[4]क्रमेणेति। अधिष्ठातारौ भावयेदित्यर्थः। तदधस्तु रेखात्रये ब्रह्मविष्णुरुद्रा इति वक्ष्यामो **ज्ञानामृतप्रकरणे**[5] —

"ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरः शिव एव च।
पञ्चधा पञ्चदैवत्यः सकलः परिपठ्यते॥" इति ॥१०॥

प्रथमं तस्य तद्बीजं [6]नादबिन्दुरितीरितम् ।
न जहाति परं स्थानं शाश्वतं ध्रुवमव्ययम् ॥११॥
बिन्दुं तदुदरे [7]क्षिप्त्वा [8]मातृवत्परिरक्षति ।

या सा कला रेखिनीति तत्र पतितेत्युक्ता, **तद्** एवास्य प्रणवस्य नादबिन्द्वात्मकं **प्रथमं बीजं** कारणमित्युक्त[9]माधिदैवेषु [10]"मूर्धन्याक्रान्त ओंकारे" इत्यादिना। **परं च स्थानं न जहाति** इत्युक्तं [11]"संयोगात्सं[12]प्रकाशेत" इत्यादिना। अत एव [13]तत्कारणत्वाद् **बिन्दुं** च [14]**रक्षति**। तदप्युक्तं [15]"बिन्दुना सहिता मता" इति॥

अधुना मकार[16]मात्रायुक्तस्यापि रूपमुच्यते —

तस्योर्ध्वं वाम[17]पार्श्वेऽथ विष्णुबीजं [18]प्रतिष्ठितम् ॥१२॥
दक्षिणं ब्रह्म[19]योनिस्थमेकमेव त्रिधा स्थितम् ।

मकारमात्रानुकारभूताया अर्धचन्द्राकाररेखाया ऊर्ध्वकोटिद्वयप्रान्तभूतबिन्दुद्वयं **तस्य** शिखारूप-

---

[1] सह बिन्दुना — मु
[2] सो विद्येशः —मु
[3] व्रीह्यादीत्यादि — अ; वाह्यादित्यादीनि — आ; 'व्रीह्यादिभ्यश्च' इति पाणिनिसूत्रम् ५.२.११६
[4] ०क्रमेणेत्वधिष्ठा० — अ
[5] सार्धत्रि० २३.९ उ०, १० पू०
[6] बिन्दुर्नादश्च कीर्तितम् — अ, मु; बिन्दुनादेति कीर्तितम् — आ
[7] क्षिप्तं मात्रवत्परि० — अ; क्षिप्तं मातृ० — मु
[8] मात्रावत्परि० — ई, उ
[9] ०मादिदैवेषूद्धन्याक्रान्त० — आ
[10] सार्धत्रि० १३.७ उ०
[11] सार्धत्रि० १३.७ पू०
[12] ०प्रकाशतेत्यादिना — आ
[13] तत्कारणाद्बिन्दुं — अ
[14] रक्षतीत्यप्युक्तं — आ
[15] सार्धत्रि० १३.८ पू०
[16] ०मात्रयुक्तमस्यापि—अ; ०मात्रायुक्तमस्यापि — आ
[17] ०पार्श्वे तु विष्णु० — इ, ई, उ, मु
[18] प्रकीर्तितम् — ई
[19] ०योनिस्तमेकमेव — अ

स्योक्तबीजस्य वामदक्षिणपार्श्वाभ्यां स्थितं तत्क्रमेण विष्णु[1]ब्रह्मणोस्तदुकाराकारमात्राधिष्ठातृत्वे-[2]नोक्तयोः कारणम्। मध्यबिन्दुः [3]पुनर्मकारकलाधिष्ठातृत्वेनोक्तस्य [4]रुद्रस्येत्युक्तम् **एकमेव** बिन्दु-रूपं **त्रिधा स्थितम्** इति॥

[5]पार्श्वबिन्दु[6]द्वयोपेता सा रेखा मध्यतः स्थिता ॥१३॥
तत्र देवः शिवः सूक्ष्मो [7]गूढस्तिष्ठति शंकरः।
तद्बीजं परमं [8]देवः शक्तिगर्भो महेश्वरः ॥१४॥
यतः प्रवर्तते सर्वं मन्त्रतन्त्रं चराचरम्।
अव्यक्तं परमं सूक्ष्मं शक्तिदेहं निरञ्जनम् ॥१५॥
शिवं त्वनादिनिधनं यं बुद्ध्वा [9]नाभिजायते।
दक्षिणस्थं हि यद्बीजं ज्ञानशक्तिः परा हि सा ॥१६॥
[10]तद्बीजमपरं [11]ब्रह्मा यत्र [12]गूढः स तिष्ठति।
[13]वामगोऽथ परो बिन्दुः क्रियाशक्तिः परा हि सा ॥१७॥
तत्र विष्णुः स्वयं बीजे गूढः सूक्ष्मो निरञ्जनः।
[14]एष देवोऽपि सर्गस्थो विसृष्टो [15]यः स शम्भुना ॥१८॥
निगूढत्वान्न पश्यन्ति येन सृष्टं चराचरम्।

मध्यमं तूर्ध्वरेखायां सर्वस्य मन्त्रादेः [16]कारणम् ईश्वरो [17]**यः** उक्तः; **स** परमेश्वरेण **विसृष्टः**। न तु परमेश्वर एव, शान्त्यतीतत्वात्तस्येति। तन्निगूढत्वेन नित्यानुमेयत्वादर्वाग्दृशो **न च पश्यन्ति**॥

[18]ततः —

विसर्गाज्जायते सृष्टिरीश्वरः प्रभुरेव सः ॥१९॥

तत एव हि विसर्गशब्दवाच्यादीश्वरात्सर्गः॥१९॥

---

[1] ब्रह्मणोस्तु दकारमात्रा० — अ; ब्रह्मणोस्त-दुकारमात्रा० — आ
[2] 'नोक्तयोः' इत्यारभ्य 'कलाधिष्ठातृत्वे' इत्यन्तं नास्ति — अ
[3] पुनर्ममकार० — आ
[4] रुद्रत्वस्येत्युक्तम् — अ
[5] परं बिन्दुद्वयेनैव या रेखा — अ; पार्श्व-बिन्दुद्वयेनैव या रेखा — आ, इ, ई, उ; मुद्रिते 'पार्श्वबिन्दु' इत्येतल्लुप्तम्
[6] द्वयेनैव या — मु
[7] ग्रन्थिस्तिष्ठति — ई
[8] देवं शक्ति० — अ, आ; देवशक्ति० — इ, ई, उ
[9] न हि जायते — इ, ई, उ
[10] तद्बीजं परमं ब्रह्म — अ; तद्बीजं परमं ब्रह्मा — ई, उ, मु; १७ श्लोको नास्ति — इ
[11] ब्रह्म — आ
[12] गूढं — अ
[13] वामस्थगोऽपरो — आ; वामस्थो यः परो — ई, उ, मु
[14] १८ उ०, १९ पू० च न स्तः अ, आ मातृकयोः।
[15] यस्य शंभुना — इ
[16] करणं — अ
[17] यदुक्तः — अ
[18] तत् — अ

अथ कथमसौ विसर्गशब्दवाच्य [1]इत्युच्यते —

[2]विसृष्टं येन तद्बीजं विसर्गस्तेन चोच्यते ।

येन कारणेन **तद्** अपि रेखाप्रणवात्मकं **बीजं** [3]स्वात्मनो रूपत्वेन [4]साधकनाडया विध्यर्थं तेनैव **विसृष्टं तेन विसर्गः** कथ्यत इति ॥

न केवलमेवं सृजत्येव [5]यावत् —

तेन [6]चापूरितमिदं [7]जगत्सर्वं च तन्मयम् ॥२०॥
शक्ति[8]रश्मिसमूहेन शतशोऽथ सहस्रशः ।
[9]सृजति [10]ग्रसति ह्येष संयोजकवियोजकः ॥२१॥
ज्ञानशक्त्या च भगवाननुगृह्णाति वै शिवः ।

तन्मयं जगत् तदधिष्ठितमिति । अत्र सृष्टिसंरक्षणा[11]दानतिरोभावानुग्रह[12]लक्षणं पञ्चविधं पतिकृत्यं [13]करोतीत्यर्थः ॥

तथा हि —

विसर्गाच्च भवेत्सृष्टिः संहारो बिन्दुना सह ॥
निर्वाणं तत्त्वविज्ञानं [14]तन्त्रविस्तार[15]गोचरः ॥२२॥

न केवलं तस्माद् **विसर्गात् सृष्टिः** । यावत् **संहारः** अपि **बिन्दुना सह** भवति । शुद्धविद्यात्मनो बिन्दोरपि तत एव संहार इत्यर्थः । तथा **निर्वाण**[16]पदं परमात्मकसंज्ञत्वादिलक्षणं [17]तत्त्वत एव भवति । ततश्च **तन्त्रविस्तरस्य** दीक्षात्मनो विषय इत्युक्तमेवेति ॥२२॥

इति [भट्टनारायणकण्ठात्मज] भट्टरामकण्ठविरचितायां श्रीमत्[सार्धत्रिशति-] कालोत्तरवृत्तौ मन्त्र[18]सृष्टिप्रकरणं [19]त्रयोदशं [समाप्तम्] ॥

इति त्रयोदशः पटलः ।

---

[1] इत्युच्यन्ते — अ
[2] सृष्टं येन हि तद्बीजं — अ, आ; विसृष्टं येन तत्सर्वं — इ, उ, मु; सविसृष्टं येन हि तत्सर्वं — ई
[3] स्वात्मको रूपकत्वेन — अ, आ
[4] साधका नाडया — अ, आ
[5] यवात् — अ, आ
[6] वापूरित० — अ, आ
[7] जगत्स्थावरजङ्गमम् — इ, ई, उ, मु
[8] ०रस्मिन् समूहेन—अ, आ; ०रग्निसमूहेन—आ
[9] सृजन्ति — अ, आ
[10] ग्रसन्ति ह्येषा — अ
[11] ०दनतिरो० — आ
[12] ०लक्षणपञ्च० — अ
[13] करोति करोतीत्यर्थः — अ, आ
[14] तत्त्वविस्तारगोचरः — अ, आ; तन्त्रविस्तरगोचरः — मु
[15] गोचरम् — उ
[16] ०परं परमात्मिकसंज्ञ० — अ
[17] तत्त्व एव — अ
[18] सिद्धिप्रकरणं — अ, आ
[19] त्रयोदशमम् — अ

चतुर्दशः पटलः

गतिभ्रंशप्रकरणम्

अथ संहारप्रतिपादनप्रसङ्गेन प्रश्नः —

[1]संहारश्चैव सृष्टिश्च सर्वं निगदितं प्रभो ।
दीक्षितानां [2]गतिभ्रंशं [संक्षेपात्] कथयस्व मे ॥१॥
[3]मायाविनि शठे क्रूरे [4]निःसत्त्वे कलहप्रिये ।
गतिभ्रंश[5]करे योगे तत्त्वं तच्छृणु षण्मुख ॥२॥

तथा[6]भूतेऽनधिकारिणि दीक्षिते सति योऽसावाचार्यस्य **गतिभ्रंशं** करोति **योगः**, तस्मिन्निमित्त[7]भूते यत् **तत्त्वं** तेनानुष्ठेयं तत्क्षपणायेत्यर्थः। **तत् शृणु** इति [8]प्रतिज्ञा ॥२॥

विधाय [9]मूर्ध्नि [10]क्षिप्तस्य आयामे [11]शशिनः क्रमात् ।
पूर्ववन्मनसालोक्य[12] [13]गतिं तस्य निवर्तयेत् ॥३॥
[14]संहारसंपुटं कूटमादावन्ते षडानन ।
[15]मातृकायां शतं हुत्वा एकैकस्य पृथक् पृथक् ॥४॥

तस्य [16]अध्व**मूर्ध्नि** [17]दीक्षायां **क्षिप्तस्य संहारसंपुटं** क्षकारा[18]त्मकं **विधाय** [19]तन्नामद्वारेणेत्यर्थः। **आयामे शशिनः** इति अपान[20]वृत्त्युत्क्रमेण [21]**पूर्व**दीक्षाप्रयोग**वद्** [22]**मनसा** अध्वमूर्धन्यवस्थितं [23]शिवम्

---

[1] संहारश्चैव इत्यतः पूर्वं 'कार्तिकेयः' इत्यधिकम् — इ, ई, उ, मु

[2] 'गतिभ्रंशं' इत्यारभ्य 'कलहप्रिये' इत्यन्तं नास्ति — अ; गतिभ्रंशः — आ, ई, उ

[3] 'मायाविनि' इत्यतः पूर्वं 'ईश्वरः' इत्यधिकम् — इ, ई, उ, मु

[4] निस्सत्ये — आ, उ

[5] ०करो योगस्तत्त्वं — अ; ०करो योगे तत्त्वं — आ

[6] ०भूतेनाधिकारिणि — अ

[7] ०भूते यत्वन्तेनानुष्ठेयं — अ; भूते यतत्वं तेनानुष्ठेयं — आ

[8] प्रतिज्ञामविधाय — अ

[9] मूर्ध्नि क्षिप्तस्य आधाने शशिने क्रमात् — अ; मूर्ध्नि क्षिप्तस्य आयामे शशिने क्रमात् — आ

[10] क्षिप्तव्य — इ, ई, उ

[11] शशिनो — इ, ई, उ

[12] ०लोच्य — इ, ई, उ; ०लोख्य — मु

[13] गतं — अ

[14] संहारं संपुटं — इ, ई, उ

[15] मात्रकायां — अ, इ, मतृकायां — मु

[16] ऊर्ध्वमूर्ध्नि — अ, आ

[17] दीक्षाया क्षि० — अ, आ

[18] ०त्मकमविधाय — अ; ०त्मकं पिधाय — आ

[19] न तन्नाय तन्नामे द्वारे० — अ, आ

[20] वृत्तिप्रत्यक्क्रमेण — अ

[21] पूर्वक्दीक्षा — आ

[22] मनसाध्वमूर्ध्न्यव० — आ

[23] 'शिवं' इत्यारभ्य 'तत्त्वाक्षरस्य तत्' इत्यन्तं नास्ति — आ

आलोक्य विज्ञाप्य च यथावृत्तं [1]तदानीं दीक्षणे स्खलितं, तत्प्रतिविधानभूते चास्मिन् [2]कर्मण्याज्ञां गृहीत्वा, [3]**मातृकायां** व्युत्क्रमेणैकैकस्य तत्त्वाक्षरस्य तत्**कूटं** क्षकारम् **आदौ अन्ते** च संयोज्य प्रतितत्त्वं [4]तत्त्वेश्वरोपस्थानश्रावणपूर्वं **पृथक् पृथग्** [5]**हुत्वा** [6]अधःपातनेन पृथिवीतत्त्वं यावद् [7]**गतिं तस्य निवर्तयेत्**; [8]इत्येवं प्रायश्चित्तं भवति। नान्यथा। यदुक्तम्[9] —

"अतत्त्वविदभक्तेषु दीक्षां [10]कुर्याद्यदा गुरुः।
दीक्षिता न शिवं यान्ति गुरुर्निरयगो भवेत्॥"

इत्यदोषः ॥३-४॥

इति [भट्टनारायणकण्ठात्मज] भट्टरामकण्ठविरचितायां श्रीमत् [सार्धत्रिशति-]
कालोत्तरवृत्तौ गतिभ्रंशप्रकरणं [11]चतुर्दशं [समाप्तम्]॥

इति चतुर्दशः पटलः

---

[1] तदनाशिनी क्षणे स खलितं — अ
[2] कर्मण्याज्ञानं गृहीत्वा — अ
[3] मात्रकायां — अ
[4] तत्त्वेन चरोवस्थानाच्छ्रवणं पूर्वं — अ; तत्त्वेनेश्वरोऽवस्थानाच्छ्रवणं पूर्वं — आ
[5] भुक्त्वा — अ
[6] अथो पातनेन — अ; अथे. . .पातनेन — आ
[7] गतं — आ
[8] इत्येव प्रायश्चित्तिर्भवति — अ; इत्येवं प्रायश्चित्तभवति — आ
[9] 'यदुक्तं' इति नास्ति — आ; आकरो न लभ्यते।
[10] कुर्याद्गुरुर्वा दीक्षितानशिनं शान्तिरयोगो भवेत् — अ
[11] चतुर्दशमम् — अ, आ

पञ्चदशः पटलः

प्रासादभेदप्रकरणम्

गतमानुषङ्गिकम्। प्रकृतमुच्यते —

प्रासादं नादमुत्थाप्य जपेद्यः सततं नरः।
षण्मासात्प्राप्नुयात्सिद्धिं योग[1]युक्तो न संशयः ॥१॥

एवं [2]प्रागुक्तप्रण[3]वोच्चारणपूर्वकं **प्रासादम्** अनुरणद्घण्टानिनादवद्यथाशक्त्या ध्वन्यात्मकं नादान्तं, नमस्कारयुक्तं चापि तारं [4]**जपेद्यः** साधकः, स शुद्धविद्यासिद्धिं शीघ्रमाप्नोतीत्युक्तम् ॥१॥

गमागमस्य जपतः सर्वपापक्षयो भवेत्।
अणिमादिगुणैश्वर्यं [5]षण्मासैस्तु न संशयः ॥२॥

प्राण**गमागमस्य** संबन्धी यः कालः, तत्कालमात्रावच्छिन्नो यः प्रासादजपः, तस्मात् प्रायश्चित्तार्थ-[6]मनुष्ठितात् **सर्वपाप**[7]**क्षयः**। श्रूयते — "[8]प्राणायामः परं तपः" इति। सिद्ध्यर्थं[9]मनुष्ठितत्वाद् **अणिमादेः** अष्टविधस्य **ऐश्वर्यस्य** प्राप्तिः ॥२॥

गमागमं विदित्वा तु मुच्यते नात्र संशयः।
[10]**तन्मयस्तल्लयो भूत्वा** [11]**षण्मासात्सिद्धिमाप्नुयात् ॥३॥**

यस्तु प्राण**गमागमं** नादेन सहोच्चार्यमाणं वेत्ति मुमुक्षुः, सः **मुच्यते**। साधकोऽपि तल्लीन-मनाः **सिद्धिम्** आप्नोति ॥३॥

तदेवम् —

स्थूलः सूक्ष्मः परश्चैव प्रासादः कथितो मया।
प्रासादं [12]ये न बुध्यन्ति [13]ते न बुध्यन्ति शंकरम् ॥४॥

---

[1] युक्ते — इ, उ

[2] सार्धत्रि० त्रयोदशतमप्रकरणोक्तः।; "अत्र प्रणवोच्चारपूर्वं प्रासादं नमस्कारयुक्तं चापि तारं जपेत्। यदाह सार्धत्रिशतिवृत्तिकारः — प्रासादं नादमुत्थाप्य जपेद्यः सततं नरः। षण्डात् सिद्धिमवाप्नोति" इति ॥ क्रियाक्रमद्योतिका-व्याख्या प्रभा पृ० २४२

[3] ०वोच्चारपूर्वं — आ

[4] जपेत्साधकः — अ

[5] षण्मासैर्न—अ; षड्भिर्मासैर्न—इ, ई, उ, मु

[6] ०मनुष्ठितार्थात् — अ, आ

[7] ०क्षयाय श्रूयते — अ, आ

[8] मनुस्मृतौ २.८३ पू०

[9] ०मनुष्ठितत्वादथादेरष्ट० — अ; ०मनुष्ठितात्वयोदरष्ट० — आ

[10] तन्मयास्तल्लयो — इ, उ

[11] षाण्मासा० — इ

[12] यो न — अ

[13] ते हि बुध्यन्ति — इ

यदुक्तम् —

[1]"उपांशुर्मानसो भाष्यस्त्रिविधस्तु जपः स्मृतः।" [इति]

[2]एवं **ये प्रासादं** स्वरूपोपादानसह[3]कारिहितफलं **न** बुध्यन्ते परमेश्वरमपि न बुध्यन्ते यथावत्। उपायं [4]विनोपेयज्ञानासंभवात्। तथा च श्रुतिः[5] —

"शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।" इति[6] ॥४॥

इति [भट्टनारायणकण्ठात्मज] भट्टरामकण्ठविरचितायां श्रीमत्[सार्धत्रिशति-] कालोत्तरवृत्तौ प्रासादभेदप्रकरणम् [7]पञ्चदशं [समाप्तम्] ॥

इति पञ्चदशः पटलः

---

[1] उपांशु मानसो — अ; आकरो न लभ्यते।
[2] एवमये प्रासादस्वरूपो० — अ
[3] ०कारी हित० — अ
[4] विनोपायज्ञानासंभवात् — अ, आ
[5] ब्रह्मबिन्दूपनिषत् — १७; त्रिपुरतापिन्युपनिषत् — ५.१७
[6] इतिशब्दो नास्ति — आ
[7] पञ्चदशमम् — अ, आ

षोडशः पटलः

प्रासादलक्षणप्रकरणम्

अतः परं प्रवक्ष्यामि प्रासादस्य तु लक्षणम् ।

[1]परमन्यल्लक्षणमस्य प्रतिपादयितुं प्रतिज्ञा ॥

किं तत् । उच्यते —

[2]ह्रस्वं दीर्घं प्लुतं चैव लक्षयेन्मन्त्रवित्सदा ॥१॥

ह्रस्वादिभेदान्यथानुप[3]पत्तेरत्र प्रासादो हकारमात्रात्मक [4]एव विवक्षित इति **लक्षयेन्मन्त्रवित्**[5]। अथ वक्ष्यति शिव[6]भेदाष्टकमन्त्रोद्धारप्रकरणे[7] —

"प्रासादं षष्ठसंयुक्तं षडन्तेन समन्वितम् । इति ।

तत्र ह्रस्वो ब्रह्मात्मको दीर्घस्त्वङ्गात्मकः । यदुक्तम् प्रागेव[8] —

"ब्रह्माणि ह्रस्वाः प्रोक्तानि [9]दीर्घा ह्यङ्गानि" इति ।

प्लुतस्तु मूलमन्त्र एव दीर्घ[10]मात्राद्वययोगतो [11]द्वादशान्तं यावदुच्चार्यत्वेनोक्तत्वादिति ।

अन्ये तु "प्रासादो मूलमन्त्र एव । गमागमोच्चारणात्तु ह्रस्वः, विषुवदुच्चारणा[12]त्पुनर्दीर्घः" इति व्याचक्षते । तत्त्वयुक्तम् । अस्योक्तनयेन सर्वत्र प्लुतत्वाव्यभिचारात् । "[13]गमागमस्य जपतः सर्वपापक्षयो भवेत्" इत्यादिभिर्वाक्यैः पूर्वमुक्तत्वेनानर्थक्याच्च[14] ॥१॥

[15]ह्रस्वो दहति पापानि दीर्घो मोक्षप्रदो भवेत् ।
[16]आप्यायने प्लुतश्चैव बिन्दुना मूर्ध्नि भूषितः ॥२॥
स्थूल[17]भेदास्त्रयः प्रोक्ता वश्योच्चाटनमारणे ।

---

[1] परमन्यलक्षणस्य — अ; परमन्यल्लक्षणस्य — आ

[2] ह्रस्वदीर्घप्लुतं चैव — आ, इ

[3] ०पत्तिरत्र — अ, आ

[4] एवेति विव० — आ

[5] लक्षयेन्मवद् — अ

[6] ०भेदाष्टमन्त्रो० — अ; ०भेदाष्टममन्त्रो० — आ

[7] सार्धत्रि० १९.३ पू०

[8] सार्धत्रि० १.९ उ०

[9] दीर्घाभ्याङ्गानि — अ

[10] ०मात्राद्वयो गता — अ; ०मात्रद्वये गता — आ

[11] प्रतियान्तं यावद् — अ; प्रतियान्तं यान्तं यावद् — आ

[12] त्पुनर्दीप इति — अ, आ

[13] सार्धत्रि० १५.२ पू०

[14] चकारो नास्ति — अ

[15] २–८ पूर्वार्धपर्यन्तश्लोकाः वृत्तिश्च 'अ, आ' द्वयोरपि मातृकयोर्न दृश्यन्ते । ८ पूर्वार्धान्तिमभागस्य परं वृत्तिर्दृश्यते ।

[16] आप्यायेन — मु

[17] ०भेदस्त्रयः प्रोक्तः — म

प्लुतेन तु सदा वश्यं कुरुते नात्र संशयः ॥३॥
[1]दीर्घस्तूच्चाटयेत्क्षिप्रं फट्कारेण न संशयः।
आदावन्ते च ह्रस्वस्य फट्कारो मारणे स्मृतः ॥४॥
आदावन्ते च हृदय[2]योग आकर्षणे स्मृतः।
[3]आकर्षयेद्ध्रुवं [4]युक्तो योजनानां शते स्थितम्[5] ॥५॥
एवमाकर्षयेत्साध्यं नाम [6]विज्ञाय तत्त्वतः।
साधकस्य भवेद्वृद्धी न्यूना साध्यस्य कीर्तिता ॥६॥
एवं विदित्वा मेधावी [7]आकर्षं कुरुते ध्रुवम्।
अविज्ञाय त्विदं सम्यङ नैव सिध्यति [8]सर्वदा ॥७॥
[9]यागं कृत्वा तु पूर्वोक्तं मन्त्र[10]स्यार्घ्यं च दापयेत्।

तद्व्यतिरिक्तस्य साध्यमन्त्रस्य अर्घ्यं प्रदापयेत् ॥

अर्घ्यं [11]दत्त्वा तु मन्त्रस्य जपं कुर्याद्विचक्षणः ॥८॥
देवस्य दक्षिणे भागे पञ्चलक्षं स्थितो [12]जपेत्।
जपान्ते [13]घृतहोमस्तु दशसाहस्रिको भवेत् ॥९॥
[14]एवमाप्यायितो मन्त्रः कर्मयोग्यो भवेत्ततः।
[15]उक्तानुक्तानि कर्माणि सिद्धिं यान्ति न संशयः ॥१०॥

परमेश्वरं [16]लिङ्गादौ संपूज्य, तस्य दक्षिणदले साध्यमन्त्रस्य ब्रह्माङ्गेभ्योऽन्यतमस्यात्रोक्तस्य, [17]"सकलं निष्कलं शून्यम्" इत्यादिना, [18]"**प्रत्ययप्रकरणेन** [19]वा वक्ष्यमाणस्य पूजां कृत्वा, प्रत्यहं संख्योपचय[20]मेलनेन **पञ्चलक्ष**जप[21]संख्याकं जपं कृत्वा, अन्ते मण्डल[22]पूजापूर्वं साध्यमन्त्रस्य [23]तर्पणान्ते स्रुवा घृतेन सहस्रदशकं जुहुयात्। ततः सिद्धिप्रदो भवेदिति ॥८-१० ॥

---

[1] दीर्घमुच्चारयेत्क्षिप्रं — इ, उ; दीर्घ उच्चाटयोत्क्षिप्तः — मु
[2] हृदयप्रयोगः कर्षणे — मु; हृदयप्रयोगाकर्षणे — इ, उ
[3] आकर्षेत्तु ध्रुवं — इ
[4] युक्ते — इ, ई, उ
[5] आकर्षेत्तु ध्रुवं . . . स्थितम् — मु
[6] विज्ञेय — इ; विज्ञेयं — मु
[7] आकर्षः — ई
[8] साधकः — ई
[9] योगं — इ, मु
[10] ०स्यार्धं च — उ
[11] कृत्वा तु — इ, मु
[12] भवेत् — इ, ई, उ
[13] तु घृताद्धोमो — इ; तु घृतहोमो — मु
[14] एवमाव्याधिनो मन्त्रं — अ; एवमाप्यायिनो मन्त्रं — आ
[15] उक्तानुक्तकर्माणि — ई
[16] आदौ संपूज्य — अ
[17] सार्धत्रि० १९.२ पू०
[18] सार्धत्रि० एकविंशप्रकरणेन
[19] 'वा' इति नास्ति — आ
[20] मीलनेन — अ, आ
[21] संख्यान्ते जपं — अ
[22] ०पूजातर्पणपूजापूर्वं — अ
[23] तर्पयते स्रुवा गुहसहस्र० — अ, आ।

दशलक्षाणि जपतो जनाः स्वस्थानवासिनः।
वशमायान्ति ते [1]क्षिप्रमिति शास्त्रस्य निश्चयः॥११॥
[2]त्रिपञ्च[3]लक्षं जपतो दशग्रामनिवासिनः।
ते जना वशमायान्ति आत्मना च धनेन च॥१२॥
[4]एवं विंशतिभिर्लक्षैः प्रासादस्य षडानन।
देश[5]देशाधिपान्मन्त्री नियतं वशमानयेत्॥१३॥
[6]लक्षाणां पञ्चविंशत्या विषयं वशमानयेत्।
[7]त्रिंशल्लक्षजपादस्य वशो वै मण्डली भवेत्॥१४॥
पञ्चत्रिंशच्च लक्षाणि [8]जपन्पृथ्वीं वशं नयेत्।
चत्त्वारिंश[9]ज्जपाद्देवमीक्षते हाटकेश्वरम्॥१५॥
लक्षाणि [10]जप्त्वा पञ्चाशद्विद्याधरसमो भवेत्।
तत्रैव मोदते मन्त्री [11]यावदाभूतसंप्लवम्॥१६॥

इति [भट्टनारायणकण्ठात्मजभट्टरामकण्ठविरचितायां श्रीमत्सार्धत्रिशति-] कालोत्तरवृत्तौ प्रासादलक्षणप्रकरणं षोडशं [समाप्तम्]॥

इति षोडशः पटलः

---

[1] सर्वे इति — इ; सर्व इति — मु
[2] १२,१३ श्लोकौ, १४ श्लोके पादत्रयं च न सन्ति 'अ' मातृकायाम्।
[3] ०लक्षजपतो — आ
[4] पञ्चविंशति० — अ, इ, ई, उ, मु; १३ श्लोको नास्ति 'आ' मातृकायाम्।
[5] ०देशाधिपान्मन्त्रम् — इ; देशाधिपं मन्त्रं — ई
[6] '१४' पूर्वार्धं नास्ति 'ई' मातृकायाम्।
[7] त्रिशल्लक्षं जपा० — ई
[8] जपं पृथ्वीं — अ
[9] ०ज्जपं चैव ईक्षतो — अ, आ; ०ज्जपादेवमीक्षते — इ, ई, उ, मु
[10] सप्तपञ्चाशद्विद्या० — अ, आ
[11] यावदाहूत — मु

सप्तदशः पटलः

विज्ञानप्रकरणम्

[1]अद्यापि संशयो देव ज्ञानविज्ञानयोः स्फुटम्।
कथं वा ज्ञायते ज्ञानं कथं वा ज्ञेयमुच्यते ॥१॥

उक्तं प्राग् [दीक्षा]प्रकरणे[2] —

"आत्माधि[3]देवता मन्त्राञ्ज्ञात्वा मुक्तस्तु मोचयेत्" इति।

तत्र ज्ञायतेऽनेनेति **ज्ञानम्** उक्तमात्मा च [4]विज्ञप्तिः विज्ञानं, तयोः **अद्यापि** भेदस्य त्वयानुक्तत्वान्मम **संशयः**। किं च तदपि करणरूपं **ज्ञानं** विज्ञप्तिरूपं न वा। यद्यविज्ञप्तिरूपं तदा **कथं** तत्तेन ज्ञप्तिरूपं विज्ञान[5]मपि **ज्ञायते**। ज्ञप्तिरूपत्वेऽपि **कथं** तत्तेन **ज्ञेयम्**। देवदत्तयज्ञदत्तज्ञानयोरिव परस्परसंवेदनस्योक्तत्वात् [6]कर्तृत्वं च द्वयोरिति प्रकृते एव [7]प्रश्नः ॥१॥

सिद्धान्तस्तु —

[8]विज्ञाय पूर्वमाधारं[9] पश्चादाधेयमेव च।
आधाराधेयवित्प्राज्ञः समर्थः सर्वकर्मसु ॥२॥

आधीयते व्यवस्थाप्यते अनेनेति **आधारं** करणरूपमुपायज्ञानम् **आधेयं** चैतदुपेयभूतं विज्ञानमात्मस्वरूपं ज्ञात्वा नित्यादिकर्मस्वधिकृतो भवति। न अनात्मवित् पशुरेवासौ यतः ॥२॥

अथ तदपि किं ज्ञप्तिरूपमेव। न। यतः —

[10]आधारः पुरमित्युक्तमाधेयस्त्वीश उच्यते।

स च आधारः व्यवस्थाप[11]नात्मकः [12]**पुरम्**। बुद्धेः संबन्धित्वात् पुरवद्भोगकरणत्वाच्च पुरमित्युक्तं ज्ञानम्। न तु ज्ञप्तिरूपमित्यर्थः। **आधेयस्तु** अवस्थाप्यस्तद्भोक्तृत्वादीश्वरः आत्मैव ज्ञप्तिरूपमुच्यते ॥

---

[1] प्रथमश्लोकात्पूर्वं 'कार्तिकेयः' इत्यधिकम् — इ, ई, उ, मु
[2] सार्धत्रि० अष्टमपटले ३८ पृ०
[3] देवतान् — अ; दैवतान् — आ
[4] विज्ञप्तिविज्ञानम् — अ, आ
[5] ०मविज्ञायते — अ, आ
[6] कर्तृत्वं द्वयोरिति — अ; न कर्तृत्वं च द्वयोरिति — आ
[7] अग्निः — अ
[8] 'विज्ञाय' इत्यतः पूर्वं 'ईश्वरः' इत्यधिकम् — इ, ई, उ, मु
[9] ... पूर्वमाधारं — अ, आ; विज्ञानपूर्वमाधारं — इ; विज्ञाय पूर्वमाधारः — ई, .. र्वमाधारः — उ; विज्ञानं पूर्वं० — मु
[10] आधारं पुर० — अ, आ, इ, मु
[11] ०नात्मकपुरो — आ
[12] पुरो बुद्धेः — अ

[1]ईशं विज्ञाय मेधावी सदा यो [2]नन्दति स्वयम् ॥३॥
पुर्यष्टकसमा[3]युक्तो [4]ह्यध ऊर्ध्वं स गच्छति ।

[5]**यः** अयं तेन बुद्ध्यादिना [6]**पुर्यष्टकेन** [7]संबद्धः **सदा** [8]**नन्दति** इत्युक्तम् । बुद्धिभोक्तारमीश्वरमात्म[9]लक्ष्यं **विज्ञाय** बुद्धिमान् [10]**अधः** सिद्ध्यर्थम् [11]**ऊर्ध्वं** मुक्त्यर्थं **गच्छति** [12]नाम । अतः पशोरत्रानधिकारादित्युक्तम् ॥

अथ तस्य [13]पुर्यष्टकस्य स्वरूपम् —

[14]शब्दः स्पर्शश्च रूपं च रसो गन्धश्च [15]पञ्चकम् ॥४॥
बुद्धिर्मनस्त्वहंकारः पुर्यष्टकमुदाहृतम्[16] ।

---

[1] ईश्वरः ज्ञानमेवापि सदा — अ
[2] नदति — अ, आ, ई, उ, मु
[3] ०युक्तं — आ
[4] ह्यथ — अ, आ
[5] इति योऽयं — आ
[6] पुर्यष्टके संबन्धः — अ
[7] संबन्धः — आ
[8] नदति — अ, आ
[9] ०लक्षं — अ, आ
[10] अथ सिध्यर्थम् — अ
[11] ऊ. . . मत्यर्थं — अ
[12] नामतः पशुरत्रा० — अ, आ
[13] पुर्यष्टकस्वरूपम् — आ
[14] शब्दस्पर्श च रूपं — ई; शब्दस्पर्शं च रूपं — उ
[15] पञ्चमः — अ, मु
[16] "ननु 'शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः । बुद्धिर्मनस्त्वहंकारः पुर्यष्टकमुदाहृतम्' इति श्रीमत्कालोत्तरे श्रूयते । सत्यम् । अत एव तत्सूत्रं तत्रभवता रामकण्ठेन त्रिंशत्तत्त्वपरतया व्याख्यातम् । कथं पुनरस्य पुर्यष्टकत्वम् । भूततन्मात्रबुद्धीन्द्रियकर्मेन्द्रियान्तःकरणसंज्ञैः पञ्चभिर्वर्गैस्तत्कारणेन गुणेन तदापूरकेण प्रधानेन कलादिपञ्चकञ्चुकात्मना वर्गेणारब्धत्वादित्यविरोधः ।" तत्त्वप्रकाशिकाव्याख्या पृ० १४, १५
"ननु श्रीमत्कालोत्तरे 'शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चकम् । बुद्धिर्मनस्त्वहंकारः पुर्यष्टकमुदाहृतम्' इति श्रूयते । सत्यमत एवैतत् सूत्रं भगवता रामकण्ठेन त्रिंशत्तत्त्ववाचकतया व्याख्यातम् । यद्येवं कथमस्य पुर्यष्टकत्वं भूततन्मात्रबुद्धीन्द्रियकर्मेन्द्रियान्तःकरणसंज्ञैः पञ्चभिर्वर्गैस्तत्कारणेन गुणतत्त्वेन तदापूरकेण च प्रधानेन भोक्तृस्वरूपोपकारकेण कलादिपञ्चकञ्चुकात्मना च वर्गेणारब्धत्वादित्यविरोधः" तत्त्वसंग्रहव्याख्या पृ० २६
"ननु 'शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः । बुद्धिर्मनस्त्वहंकारः पुर्यष्टकमुदाहृतम्" इति श्रीमत्कालोत्तरे श्रूयते । सत्यम् अत एव तत्सूत्रं तत्र भगवता रामकण्ठेन षट्त्रिंशत्तत्त्ववाचकतया व्याख्यातम् । 'कथं पुनरस्य पुर्यष्टकत्वम् ? भूततन्मात्रकर्मेन्द्रियबुद्धीन्द्रियान्तःकरणसंज्ञैः पञ्चभिर्वर्गैस्तत्कारणेन गुणेन तदापूरकेण प्रधानेन कलादिपञ्चकञ्चुकात्मना वर्गेणारब्धत्वादित्यविरोधः' इति क्रियाक्रमद्योतिकाव्याख्यायां प्रभायां (पृ० ६३) दृश्यते । यद्यपि 'कथं पुनरस्य' इत्यारभ्य 'अविरोधः' इत्यन्तं रामकण्ठव्याख्यानुवाद इवोद्धृतं प्रभायां, तथापि तादृशव्याख्यानस्यात्रानुपलम्भान्नायं रामकण्ठव्याख्यानुवादः, परं तु तत्त्वप्रकाशिकातत्त्वसंग्रहव्याख्याने अघोरशिवाचार्यकृतरामकण्ठमतसंग्रहानुवाद इति भाति ।

[1]तत्र भूतानि, पञ्चतन्मात्राणि चात्र स्वगुणैरवि[2]शेषेणोपक्षिप्तानीति [3]कार्यवर्गो द्विविधो निर्दिष्टः। ततः **पञ्चकम्** इत्यनेनाप्यविशेषात् कर्मेन्द्रिय[4]लक्षणो बुद्धीन्द्रियात्मकश्च [5]करणवर्गो द्विविधः। **बुद्धिर्मनस्त्वहंकारः** इति। एभिश्च स्वपदैरेवान्तःकरणवर्गः, [6]तुशब्दतश्चशब्दस्थानीयादत्र गुणाव्यक्तलक्षणस्तत्प्रकृतिवर्गः, रागविद्याकलानियतिकालाख्य[7]कञ्चुकाख्यो वर्गो, [8]माया महामायाख्यश्च परप्रकृतिवर्गो निर्दिष्टः। एवमस्यां पुरि [9]भौवनेन बाह्यशरीरात्मिकायामष्टकमेतद्वर्गाणामुदाहृतम्। यदुक्तम् —

[10]"सर्वतत्त्वानि तत्रैव [11]द्रष्टव्यानि तु साधकैः" इति॥

यद्यपि च [12]दीक्षयासौ सर्वपाशेभ्यो मोचितः। तथापि —

यावदेतैर्न [13]निर्मुक्तः कथं मुच्येत बन्धनात्॥५॥

आरब्धकार्य[14]कर्मभोगोपरोधेनैते[15]भ्योऽनिर्मोचितत्वात् तदारब्धस्यास्य शरीरस्य स्थितिर्यावद्बद्ध एव। ततश्च तेभ्योऽपि मोक्षार्थैतज्ज्ञानं तस्योपयुज्यत इत्युच्यते॥५॥

[16]ब्रह्मणि स्पर्शशब्दौ तु रसं वै केशवे त्यजेत्।
रूपगन्धौ त्यजेद्रुद्रे बुद्ध्यहंकारमीश्वरे॥

---

[1] "यदाह श्रीमद्रामकण्ठाचार्यः कालोत्तरवृत्तिकारः 'शब्दः स्पर्शश्च रूपं च'इत्येतत्कारिकावृत्तौ 'तत्र भूतानि पञ्चतन्मात्राणि चात्र स्वगुणैरविशेषादुपक्षिप्तानि इति कार्यवर्गो द्विविधो निर्दिष्टः। पञ्चकमित्यनेनापि विशेषात्। कर्मेन्द्रियलक्षणः बुद्धीन्द्रियात्मकश्च करणवर्गो द्विविधः बुद्धिर्मनश्चाहंकारः इति। एभिश्च स्वपदैरेवान्तःकरणवर्गः तुशब्दानुशब्दतो वाशब्दस्थानीयात्तत्र गुणाव्यक्तलक्षणस्तत्प्रकृतिवर्गः रागविद्याकलानियतिकालाख्यकञ्चुकाख्यो वर्गः माया महामायाख्यश्च परप्रकृतिरूपो निर्दिष्टः। एवमस्यां पुरि भौवनबाह्यशरीरात्मिकायामष्टकमेतद्वर्गाणामुदाहृतम्'। इति" प्रभा पृ० ३४७

[2] ०शेषानुपक्षिप्तानि — अ, आ

[3] कार्यवस्तु त्रिविधो — अ; कार्यविस्नस्त्रिविधो — आ

[4] लक्षणे — अ

[5] अहंकारवर्गो — अ

[6] तुशब्दानुशब्दतो वशब्दस्थानीया० — अ; तुशब्दानुशब्दातो वशब्दस्थानीया० — आ; यद्यपि मातृकाद्वये तथा प्रभाव्याख्यायामप्येवं पाठः, तथापि प्रकरणानुसारादर्थानुरोधेन च पाठः शोधितः।

[7] कञ्चकाख्यो — अ

[8] महा या महामायाख्यश्चेति पर० — आ

[9] भौचेनन बाह्य — आ

[10] सार्धत्रि० ८.२ उ०; प्रसवतत्त्वानि — अ, आ

[11] द्रव्याणि तु — अ, आ

[12] दीक्षायासौ — अ

[13] निर्मुक्तिः — इ, ई, उ

[14] ०कर्मे भोगोप० — आ

[15] ०भ्यो स्वनिर्मोचि — अ

[16] ब्रह्माणि — इ, उ; "तत्र 'ब्रह्मणि स्पर्शशब्दौ तु रसं वै केशवे त्यजेत्। रूपगन्धौ त्यजेद्रुद्रे बुद्ध्यहंकारमीश्वरे। मनो बिन्दुं शिवे त्यक्त्वा एभिर्मुक्तः शिवं व्रजेत्।" इति श्रीमत्कालोत्तरश्रुतिं हृदि निधाय आवाहिकदेहशुद्धये ब्रह्मणि शब्दस्पर्शौ शुल्कतया समर्पयेदिति पक्षान्तरमाचष्टे (यद्वा) इति। (पुर्यष्टकविशुद्ध्यर्थं) पुरि बाह्यशरीरात्मिकायाम् अष्टकं कार्यवर्गादिपरप्रकृतिवर्गान्ताष्टकं तस्य

मनो [1]बिन्दुं शिवे त्यक्त्वा एभिर्मुक्तः शिवं व्रजेत् ॥६॥

ब्रह्मणि इति [2]ब्रह्मस्थाने। यद्वक्ष्यति[3] —

"ब्रह्मणो हृदयं स्थानं कण्ठे विष्णुः समाश्रितः।
तालुमध्ये स्थितो रुद्रः" इत्यादि।

तस्मिन् हृदयाकाशे **स्पर्शशब्दौ त्यजेत्**, आकाशविषयत्वादस्य शब्दस्य वायोश्च। यदुक्तम्[4] —

"आकाशवायुप्रभवः शरीरात्समुच्चरन्वक्त्रमुपैति नादः।
स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः॥" इति।

केशवस्थाने तु कण्ठे [5]**रसं त्यजेत्**, रसनेन्द्रियमूलस्थानत्वात्तस्य। यदाह धारणाप्रक्रमे भगवान् **पतञ्जलिः**[6] — "कण्ठकूपे क्षुत्पिपासानिवृत्तिः" इति। **रुद्रस्थाने** तालुनि **रूपगन्धौ त्यजेत्**, रूपगन्धेन्द्रियमूलस्थानत्वात्तस्य। यदाह भगवान् [7]**पतञ्जलिः** [8]"गन्धसंविद्" इति। एवं कार्यात्मनो[9]ऽपि वर्गद्वयस्य स्वस्थानेनेत्युक्तम्[10]।

यस्तु "ब्रह्मण्येव [11]त्यजेत्" इत्यादि व्याचष्टे। तेन शब्दस्पर्शादीनामत्र क्रमविपर्यासे च ब्रह्मण्येव त्यजेद् गन्धमित्यादि विपर्यासं वा कृत्वा व्याख्येयम्। अन्यथा ब्रह्मादीनां [12]निवृत्त्याद्यात्मकपृथिव्याद्यधिष्ठातृत्वेन [13]वक्ष्यमाणत्वात्तदा[14]पत्तेरिति पूर्वैव व्याख्या युक्ता। **बुद्ध्यहंकारम्** इत्येतत् [15]करणादिवर्गपञ्चकस्य, [16]तद् **ईश्वरे** एव त्यजेत्। पूर्ववद् **मनः** इति। विद्यात्मकोऽष्टमो वर्गः, तं [17]**बिन्दुं शिवे** इति। [18]तदूर्ध्वमत्र द्वादशान्तेत्युक्तम्। **शिवं व्रजेद्** इत्युक्तं [19]प्रागुत्क्रान्तौ ॥६॥

इति [भट्टनारायणकण्ठात्मजभट्टरामकण्ठविरचितायां श्रीमत्सार्धत्रिशति-]
कालोत्तरवृत्तौ [20]विज्ञानप्रकरणं [21]सप्तदशं [समाप्तम्]॥

इति सप्तदशः पटलः

विशेषशुद्धये। (ब्रह्मन् शब्दस्पर्शौ) इति" प्रभा पृ० ३२१, ३२२

अत्र पक्षान्तरमपि प्रभाव्याख्याने पृ० ३२२ अनूद्यते —

"शब्दस्पर्शौ ब्रह्मणि च श्रीवत्साङ्के रसं त्यजेत्
रूपगन्धौ त्यजेद्रुद्रे धीगर्वावीश्वरे त्यजेत्॥
मनः सदाशिवे देवि शब्दादीनां च हेतुकीम्।
शक्तिं बिन्दुमयीं तत्र त्यजेदित्थमनुक्रमात्"।

[1] बिन्दुशिवे — अ, आ, मु

[2] ब्रह्मानेन — अ

[3] सार्धत्रि० २३.१० उ०, ११ पू०

[4] अयं श्लोकः आपिशलिशिक्षायां, पाणिनिशिक्षायां वृद्धपाठे, तथा लघुपाठे चादौ दृश्यते।

[5] रसस्त्यजेत् — आ

[6] योगसू० ३.३०

[7] पतञ्जलिना अनि गन्धं स विदिति — आ

[8] गन्धं सविदिति — अ

[9] नोऽपवर्ग० — अ, आ

[10] ०त्युक्तः — आ

[11] 'त्यजेद्' इत्यारभ्य 'ब्रह्मण्येव' इत्यन्तं नास्ति — अ

[12] निवृत्यात्मक० — अ

[13] सार्धत्रि० २२.११, १२ पू०

[14] ०पवर्तेरिति — आ

[15] करणादिव पञ्च० — अ

[16] तमीश्वर एव — अ

[17] बिन्दुः शिव इति — अ

[18] तदूर्ध्वरात्रे द्वादशान्तेत्युक्ता — अ, आ

[19] सार्धत्रि० ११.१५ उ०–१९पू० वृत्तौ

[20] ज्ञानप्रकरणम् — अ, आ

[21] सप्तदशमम् — अ, आ

अष्टादशः पटलः

कालचक्रप्रकरणम्

[1]उत्क्रान्तिः प्राप्तकालेन कर्तव्या तेन नरेणेति दर्शयितु[2]मरिष्टविज्ञानाय प्रासङ्गिकं प्रकरणम्।

कालचक्रविधानं तु प्रवक्ष्याम्यनुपूर्वशः।
कालचक्रमिति [3]ख्यातं येन कालः प्रबुध्यते ॥१॥

कालचक्रस्याध्यात्मिकस्य यद् **विधानं** येन विधीयते प्राणचारेण तद्वक्ष्यामीति। **तच्च कालचक्रं** [4]प्रागुक्तत्वाद्व्याख्यातमेव। **येन** लोकैः **कालः** ज्ञायते तदेव ॥१॥

तद्विधानमुच्यते —

[5]त्र्यहोरात्रप्रचारेण [6]त्रीण्यब्दानि स जीवति।
[7]द्व्यहोरात्रप्रचारेण [8]जीवेद्वर्षद्वयं तु सः ॥२॥
[9]अहोरात्रप्रचारेण [10]अब्दमेकं स जीवति।

इति। यस्य तु ततो द्विगुणं **सः** [11]**वर्षद्वयम्**, यस्य तु ततस्त्रिगुणं **सः** [12]वर्षत्रयमेवेति ॥

अहरेकं [13]व्रजेद्यस्य [14]रात्रिमेकां तथैव च ॥३॥
षण्मासाज्जायते मृत्यु[15]रिति शास्त्रस्य निश्चयः।
[16]द्वितीयस्यानुचारेण अहोरात्रं स जीवति ॥४॥

यस्य त्वकस्मात् [17]सूक्ष्मीभवद् **अहः** संचारकाले एव गमा[18]गमौ विदधति काले च स मासषट्कं

---

[1] उत्क्रान्तिप्राप्त० — अ, आ
[2] ०मरिष्टाविज्ञानाय — आ
[3] व्याख्यातं — आ
[4] सार्धत्रि० एकादशपटले
[5] साहोरात्रप्रचारेण — अ; इडाहोरात्रचारेण — आ, इ, ई, उ; इहाहोरात्रचारेण — मु
[6] त्रीणि पदानि स — अ; त्रीण्यवदानि स — आ; त्रीण्यङ्गानि स — इ, उ, मु
[7] प्रबुद्धचहोरात्र० — अ, आ
[8] जीवे द्वयं तु—अ, आ; जीवेद्विषुद्वयं तु—इ, उ
[9] त्र्यहोरात्र्यप्रचा० — अ, आ; अहोरात्र्युपचा० — इ; अहोरात्र्यप्रचा० — ई, उ; त्र्यहोरात्र्युपचारेण — मु
[10] अर्धमेकं — इ
[11] वर्षद्वयस्य तु — अ, आ
[12] वर्षमेवेति — अ, आ
[13] व्रजेदस्य — अ; वहेद्यस्य — इ, ई, उ, मु
[14] रात्रिमेकं — मु
[15] ०रिति च शास्त्रस्य — अ, आ
[16] . . . तु वारेण — अ, आ
[17] सूक्ष्मभवद् —अ
[18] गमौ विघति कले च — अ; गमं विदधति कले च — आ

जीवति। यस्य त्वकस्मादेवातिदीर्घीभवति, असौ **अहोरात्रम्** एवेत्युत्क्रान्त्यधिकारीति ॥३-४॥

न केवलमिडायाश्चारेणैतद्बोद्धव्यम्। यावत् —

[1]यथा [2]चाद्या तथा वामा मध्यमा च तथैव च।

मध्यमाचारस्तु विषुवत्प्रवाह इत्युक्तम्[3] ॥

अथोपसंहारः —

कालचक्रं समाख्यातं पुत्रस्नेहाद्विशेषतः ॥५॥

अतः परं **बृहत्कुमारीसंवाद**[4]**प्रकरणं** केषुचित् पुस्तकेषु दृश्यते। तदत एव संख्यातिरेकहेतुत्वाच्चात्र न। [5]मौल[6]प्रकरणानन्वयाच्च। अपि तु **चतुःशतिकात्** पटलान्तरम् प्रक्षिप्तमिति दर्शितं [7]प्राक्। अत एव श्रीमत्**त्रयोदशशतिके** समस्तान्यपटलवदाक्षिप्तं परतस्तत्र दृश्यत इति [8]विद्यत एव तत्रान्यदेव [9]**करणीघटिकालक्षण**[10]**प्रकरण**वदित्यदोषः ॥५॥

इति [भट्टनारायणकण्ठात्मजभट्टरामकण्ठविरचितायां श्रीमत्सार्धत्रिशति-]
कालोत्तरवृत्तौ कालचक्रप्रकरणमष्टा[11]दशं [समाप्तम्] ॥

इति अष्टादशः पटलः।

---

[1] यावद्यथा वामा तथा मध्यमा — मु
[2] वामा तथा चामा — अ, आ; वाद्या तथा — ई; पाद्या तथा — उ
[3] सार्धत्रि० ११.५ उ० वृत्तौ
[4] प्रकारं केषुचित् — आ
[5] मालं — आ
[6] प्रकरणान्वयाच्च — अ
[7] सार्धत्रि० षष्ठपटलेऽन्तिमभागे।
[8] वेदम एव — अ, आ
[9] करणीयघटिका० — अ
[10] प्रकरणादित्यदोषः — अ
[11] ०दशमम् — अ, आ

एकोनविंशः पटलः

शिवभेदाष्टकप्रकरणम्

[1]पूर्वमेवं प्रतिज्ञातं शिवभेदोऽष्टधा [2]स्थितः।
कथं भिद्येत देवेश तत्त्वतः कथय प्रभो ॥१॥

पूर्वं [3]जपाच्छिवश्रेयस्सिद्ध्यात्म[4]नोऽणिमादेरष्टधा [5]भेदस्थितिरिति प्रतिज्ञातम्। यदुक्तम् —
"[6]अणिमादिगुणै[7]श्वर्यं षण्मासैस्तु न संशयः" इति।
[8]संज्ञानामत्र भेदेन श्रेयोभेदः, अथ **तत्त्वतः** मन्त्रभेदेनापीति प्रश्नः ॥१॥

सिद्धिस्तु मन्त्रभेदेनापीत्युच्यते —

[9]सकलं निष्कलं शून्यं [10]कलाढ्यं खमलंकृतम्।
क्षपणं च तथान्तस्थं कण्ठोष्ठ्यं चाष्टमं विदुः ॥२॥

इति। सर्वे एव शिवभट्टारकादयो गुरवस्तत्प्रति[11]बद्धा एव, तेषां मन्त्राणां मया संज्ञाभेदो लक्षणभेदश्च वक्ष्यमाण इत्यर्थः ॥२॥

तत्र सकलस्य लक्षणम् —

[12]प्रासादं षष्ठसंयुक्तं षडन्तेन समन्वितम्।
सकलं सर्वभूतस्थं शिवतत्त्वं प्रकीर्तितम् ॥३॥

"[13]सान्तं सर्वगतं शून्यं" प्रासादाख्यं यत् **शिवतत्त्वं प्रकीर्तितं**, तदेव [14]**षष्ठेन** ऊकारेण **संयुक्तं**, **षष्ठस्य** वर्गस्य यः **अन्तः** मकारः तेन **समन्वितं सकलं** जानीयादिति संबन्धः। यदुक्तं श्रीमत्**त्रयोदशशतिके**ऽपि —

---

[1] आदौ 'कार्तिकेयः' इत्यधिकम् इ, ई, उ, मु; पूर्वमेतत्प्रति० — इ, ई, उ; पूर्वमेव प्रति० — मु

[2] स्थितम् — इ

[3] जप्त्वा शिवज्ञेय० — अ

[4] ०नोरणिमा० — अ; ०नोरणिमा . . या — आ

[5] भेदः स्थितिरिति प्रति० — अ; भेदस्थिति-प्रति० — आ

[6] सार्धत्रि० १५.२ उ०

[7] ०श्वर्यं षड्भिर्मासैर्न — अ; ०श्वर्यष्षड्भिर्मासैर्न — आ

[8] संज्ञानामात्र — अ

[9] द्वितीयश्लोकात्पूर्वं 'ईश्वरः' इत्यधिकम् — इ, ई, उ, मु

[10] कलाडचं — इ

[11] ०बन्ध एव — अ, आ

[12] षासादं — इ; प्रासादषष्ठ० — ई

[13] सार्धत्रि० १.९ पू०

[14] षष्ठे त्वौकारेण — अ, आ

[1]षष्ठः स्वरो ह्यूकारः स्यान्मकारेण सुसंवृतः।
हकारे ह्यर्धचन्द्रो हि भ्राजते तस्य मूर्धनि ॥
एतत्सकल[2]सद्भावः" इति ॥३॥

निष्कलस्य लक्षणम् —

[3]निष्क्रामति स्वयं देवो देहं त्यक्त्वा [4]समारुतः।
निष्कलं तं विजानीयात् [5]षड्वर्णरहितं शिवम् ॥४॥

पूर्वं हि[6] —

"षष्ठं त्रयोदशान्तं च पञ्चमे [7]विनियोजयेत्।
शिवं [8]तत्तु विजानीयात्"

इति [9]शिवमुक्तम्। [10]तदेव [11]षष्ठेन ऊकारेण **रहितम्** औकारबिन्दु[12]युक्तं **निष्कलं विजानीयात्।** यतोऽसौ ध्वन्यात्मको [13]**देवः** प्राणवृत्त्या सकलं **देहं त्यक्त्वा निष्क्रामति** इति। यदुक्तम्[14] —

"निष्कलस्त्वं शिवो देवः सान्तो मारुतसंयुतः।" इति ॥४॥

अथ शून्यलक्षणम् —

निश्वा[15]सोच्छ्वसने हित्वा स्थितो देहे तु काष्ठवत्।
शून्यं [16]तं तु विजानीयाद्धृदयेन तु भावयेत् ॥५॥

कुम्भकावस्थायां हकारमित्यर्थः। यदुक्तं तत्रैव[17] —

"शून्यो [18]भग्नशिरा देवो भुजङ्गकुटिलाकृतिः।
निःशब्दो निरहंकारो निराभासो निरिन्द्रियः ॥" इति ॥५॥

---

[1] षष्ठस्वरस्वरस्याकारस्य सुवृतहकारस्यार्धचन्द्रो भ्राजते — अ; षष्ठस्वरस्वनस्याकारस्य सुवृताकारस्यार्धचन्द्रो भ्राजते — आ
[2] सद्भावम् — अ, आ
[3] निष्क्रामः स्वयं — अ, आ
[4] समारुतम् — अ, आ, मु
[5] 'षड्वर्णरहितम्' इत्यारभ्य पञ्चमश्लोके 'तं तु विजानीयात्' इत्यन्तो भागो नास्ति — उ
[6] सार्धत्रि० १.११
[7] विनिवेशयेत् — अ
[8] तं तु — अ, आ
[9] शिवमुक्तः — अ; शिव उक्तः — आ
[10] तमेव — अ, आ
[11] षष्ठेनौकारेण — अ, आ
[12] ०युक्तनिष्कलं — अ
[13] देवे प्राण० — अ
[14] आकरो न लभ्यते।
[15] ०सोच्छ्वासः हित्वा — अ; ०सोच्छ्वासनं हित्वा — आ; ०सोच्छ्वासने — मु
[16] तत्तु — आ, ई
[17] आकरो न लभ्यते।
[18] भग्नो शिरो देवो — अ, आ

अथ कलाढच[लक्षण]म् —

चुम्बाकारेण वक्त्रेण यत्तत्त्वं परिकीर्तितम्।
[1]कलाढचं तं विजानीयात्॥

[2]प्रियतमापरिचुम्बनादाविव [3]बहिरेष [4]पुटद्वयमकुलाकारेण [5]**वक्त्रेण** य उच्चार्यते, **तं कलाढचं विजानीयात्**। अघोरबीजमित्येके। ईशानबीजमित्यपरे। [6]सकलं कलाढचं प्रासादबीजमेवेति सच्छास्त्रविदः। यदुक्तं तत्रैव —

"ये गुणा सकलस्योक्ताः [7]कलाढचस्यापि ते गुणाः।
आदिस्वरं [8]सुदीर्घं च म औ तस्योत्तरोत्तरम्॥
एत[9]दक्षरसंयोगात्सकलादधिकस्तु[10] सः।
[11]कलाभिः सहितो यस्मात्कलाढचः स शिवः स्मृतः॥" [इति]॥

[12]खमलंकृतलक्षणम् —

"आकाशस्थमथ श्रृणु ॥६॥
ऊर्ध्वनादस्य क्षीणस्य [13]यदन्तं [14]परिकीर्तितम्।
तत्रस्थं तं विजानी[15]यादाकाशेन त्वलंकृतम्॥७॥

प्राणवृत्तिसहितनादप्रक्षयाद् द्वादशान्ताकाशस्थं **तम्** उच्चारयेत्। सद्योजातबिन्दुजमिति केचित्। हृदयबीजमित्यन्ये। सच्छास्त्रविदस्तु शिरोबीजमित्याहुः। यदुक्तं तत्रैव[16] —

"सान्तं मायासमायुक्तं बिन्दुना मूर्ध्नि भूषितम्।
व्योमस्थं तं विजनी[17]यात्खमलं मन्त्रनायकम्॥" इति ॥६–७॥

अथ क्षपणलक्षणम् —

[18]व्यावृतेनैव वक्त्रेण [19]ब्रूयाद्देवं जगद्गुरुम्।
दुःखक्षपणमित्युक्तं तत्क्षयात्क्षपणं स्मृतम्॥८॥

---

[1] कलाडचं — इ; कालाढचं — मु
[2] प्रियतं परि० — अ
[3] बहिरेव — अ
[4] पुटद्वयः मु० — आ
[5] 'वक्त्रेण' इति नास्ति — आ
[6] सकलाढयं — अ, आ
[7] कलाढचापि च ते — अ
[8] स्वदीर्घं — अ
[9] ०दक्षरसकलादधिकस्तु — आ
[10] सकलाधिकस्तु — अ
[11] कलाभी रहितो — अ; कलाभि रहितो — आ
[12] कमलं — अ
[13] यदन्तः — मु
[14] च प्रकीर्तितम् — अ
[15] ०या त्वदाकाशेन — आ; ०यादाकाशे खमलङ्कृतम् — मु
[16] आकरो न लभ्यते।
[17] ०यात्कमलं — अ
[18] व्यावृत्तेनैव — मु
[19] भ्रूयादेवं — अ; ब्रूयादेवं — आ, मु

उद्घाटितेनास्येन [1]**ब्रूयाद्** इत्युच्चारयेद् **देवं** [2]**क्षपणं** हकारमेवेत्येके। अघोरबीजमित्यन्ये। हृद्बीजमेवेत्यन्ये सच्छास्त्रविदः। यदुक्तं तत्रैव[3] —

"व्यावृतेनैव वक्त्रेण [4]योऽयं भूद्भगवन्मुखे।
दीर्घस्वरविभिन्नं तं [5]सान्तं क्षपणविग्रहम्।" इति।

प्राथम्याद्दीर्घस्य [6]तदेवम् ॥८॥

[7]अन्तस्थलक्षणम् —

[8]**अधोनादस्य क्षीगस्य [9]यदन्तं परिकीर्तितम्।**
[10]**अन्तस्थं तं विजानीयादनुच्चार्यं [11]प्रकीर्तितम् ॥९॥**

ननु [12]नादपूर्वकत्वात् सर्वस्याक्षरस्य तत्क्षयेऽनुपपत्तिरेव। सत्यम्। अत एव नैतत्कारणम्। अपि त्वन्यदेव [13]अपानवृत्त्या बाह्याकाशवाय्वाकाशपूर्वमन्तः[14]प्रविशतोऽनुच्चार्यमाणत्वा[15]दन्तस्थत्वमुक्तमित्यदोषः। प्रदर्शितश्चायं प्रकारः। प्रणवविषयास्तु तिष्ठन्त्येव। अपान[16]विसंविशत्प्रणवगमात्रावशाद्युच्छ्वसन्ति। बैन्दवमेव सान्तमिति केचित्। [17]अन्तस्थत्वश्रुतेरत्र तन्त्रेणोभयार्थतयोच्चारणाद्विसर्गजयुक्तमित्यस्त्रबीजमेव तथोच्चार्यमाणं **क्षपणम्** उक्तमिति सच्छास्त्रविदः। यदुक्तं तत्रैव[18] —

"सान्तं क्षपणविग्रहम्" इत्युक्त्वा,
"अन्तस्थं नादसंक्षीणं लभ्यते भवनाशनम्।" इति ॥९॥

अथ कण्ठोष्ठ्यलक्षणम् —

[19]**सप्तवर्गाष्टमं कोटिः सप्तमस्य द्वितीयकम्।**
[20]**वर्गातीतं षडन्तं च [21]सप्तमात्त्रिचतुर्थकम् ॥१०॥**
आदिमं तु [22]पुनर्योज्यं षष्ठं वै [23]प्रथमस्य तु।
[24]**खशेखरसमायुक्तं कण्ठोष्ठ्यं चाष्टमं स्मृतम् ॥११॥**

---

[1] भ्रूयाद् — अ
[2] क्षपणंकार० — अ
[3] आकरो न लभ्यते।
[4] येयं भू० — अ; येवं भू० — आ
[5] क्षपणं विग्रहं स्मृतम् — अ
[6] तदेव — अ
[7] अथान्तस्य लक्षणं — अ; अधोनादस्य लक्षणम् — आ
[8] अधो नादस्य — अ, इ, उ
[9] यदन्तः — इ, उ
[10] तत्रस्थं — अ, आ
[11] सदा गुह — इ, ई, उ
[12] ननु अपूर्व० — अ; ननु आपूर्व० — आ
[13] आपातवृत्त्या — आ
[14] प्रविशन्नुच्चार्य० — अ, आ
[15] ०दन्तस्त्वमुक्त० — अ, आ
[16] ०विशसंविशत्प्रणवगो मात्रा० — अ; विसंविशत्प्रणवगो मात्रा० — आ
[17] अन्तःसत्त्व० — अ
[18] आकरो न लभ्यते।
[19] सप्त वाष्टमं कोटि सप्त० — अ, आ
[20] वर्गातीतषडन्तं — ई, उ
[21] सप्तमा त्रि० — अ, आ; सप्तमात्र चतु० — ऊ
[22] पुनर्योज्य — ई, उ
[23] प्रणवस्य — अ, आ
[24] स्वशेखरे समा० — ई

सप्तमाद् यकारादिवर्गाद् [1]**अष्टमं** हकारं, [2]सकारः **कोटिः** [3]प्रान्तं सप्तममित्यर्थः। तस्यैव वर्गस्य संबन्धि [4]**द्वितीयकम्** अक्षरं रेफात्मकं, **वर्गातीतं च** [5]क्षकारात्मकं, षष्ठस्य च [6]वर्गस्यान्तं मकारात्मकं, **सप्तमाच्च** वर्गात् [7]पूर्वोक्तात् त्रिचतुस्संख्यायुक्तं च [लकार][8]वकाराख्यं, **आदिमं तु पुनः** सप्तमाद्यं यकाराख्यमक्षरं, **प्रथमस्य** च वर्गस्य **षष्ठम्** [9]ऊकारं, **खशेखरम्** [10]अर्धचन्द्रबिन्दुयुक्तम् [11]अष्टमम् अक्षरं मन्त्रोक्तमेकप्रयत्नोच्चार्यक[12]त्वान्नवात्मकमित्यर्थः ॥१०–११॥

एते भेदाः समाख्याता अणिमादि[13]प्रसाधने।

[14]मन्त्रा विद्येशाधिष्ठातृशक्तिभेदस्य प्रतिपादकत्वाद्[15]भेदादेव ब्रह्माङ्गादिवदाख्याता [16]इत्येवं विशिष्टभेदोऽष्टधा प्रतिज्ञातोऽत्राणिमादिसिद्धिनिमित्तमुक्तमित्यर्थः ॥

अनुच्चार्यमसंदिग्धं मोक्ष इत्यभिधीयते ॥१२॥

यत्तन्नादस्वरूपं स्थूल[17]शब्दतामनापन्नं तन्मोक्षनिमित्तमित्युक्तम् — "[18]नादाख्यं यत्परं बीजम्" इत्यादि[19]ना **अभिधीयते** [20]चास्यापि स्मरणार्थमिति ॥१२॥

इति [भट्टनारायणकण्ठात्मजभट्टरामकण्ठविरचितायां सार्धत्रिशति-]कालोत्तरवृत्तौ
शिवभेदाष्टकप्रतिपादन-[प्रकरणम्] एकोनविंशतितमं [समाप्तम्] ॥

इत्येकोनविंशः पटलः

---

[1] अष्टाष्टमं — अ, आ
[2] क्षकारः — अ, आ
[3] प्रान्तं प्रथममित्यस्यैव — अ; प्रान्तप्रथममित्यर्थः तस्यैव च वर्गस्य — आ
[4] द्वितीयम् — अ, आ
[5] क्षकारा० — अ, आ
[6] वर्गस्यादेरन्तं — अ, आ
[7] पूर्वोक्तास्त्रिचतु० — अ, आ
[8] वकारादि . . .मं — अ
[9] ऊकारखशेखरम् — अ
[10] अर्धचन्द्रमर्धचन्द्रबिन्दु० — अ, आ
[11] अष्टममन्त्रोक्त० — अ
[12] ०त्वान्नवातमप्रयत्नोच्चार्यकत्वान्नवात्मक० — अ
[13] ०प्रसादने — इ
[14] मन्त्रविध्येशा० — अ; न मन्त्रा विद्येशा० — आ
[15] ०भेदादेरिव — अ
[16] मित्येवं — आ
[17] ०शब्दात्तन्नापन्नं — अ; शब्दा तं नापन्नं — आ
[18] सार्धत्रि० १.५ पू०
[19] ०नाप्यभिधीयते — आ
[20] चाप्यस्यापि — अ

विंशः पटलः

व्याप्तिप्रकरणम्

अथ प्रसङ्गान्नादविषय एव प्रश्नः —

[1]कथं [2]व्यापी [3]अधश्चोर्ध्वं तिर्यक् चैव कथं भवेत्।
एतन्मे ब्रूहि [4]तत्त्वेन [5]कारुण्यात्त्वं महेश्वर ॥१॥

पूर्वं हि —

"[6]नादाख्यं यत्परं बीजं सर्वभूतेष्ववस्थितम्।"

इति [7]**व्यापी** नादः प्रोक्तः। अत्र [8]"ऊर्ध्वनादस्य", "[9]अधोनादस्य" इत्यादिश्रुत्या **कथम्** [10]**अधः ऊर्ध्वं तिर्यक्** च **कथं भवेद्** इत्युक्तम्। अव्यापकधर्मत्वात्तस्येति [11]प्रश्नः। आत्मविषयस्तु —

[12]"पुर्यष्टकसमायुक्तो [13]ह्यध ऊर्ध्वं स गच्छति।"

इत्यनेन गतार्थ एव स्यात्। ननु पूर्वमप्ययमेवार्थः [14]समुपदर्शितः। सत्यम्। मन्त्रसिद्धत्वा-[15]दित्यन्यगतः प्रश्नः ॥१॥

सिद्धान्तस्तु —

[16]यावद्देहे स्थितो [17]जन्तोरध[18]स्तावद्व्यवस्थितः।
[19]निर्गतो व्यापयेत्तिर्यगन्तस्थः [20]सर्वतः स्थितः ॥२॥
[21]त्रिमार्गावस्थितो देवः सर्वदेहेषु वर्तते।

प्रति[22]पुरुषं मायावत् कार्यभेदेनाव्यापकेनैव स्थितत्वादधश्चोर्ध्वं तिर्यक् [23]च संस्थित उक्तः।

---

[1] प्रथमश्लोकात्पूर्वं 'कार्तिकेयः' इत्यधिकम् — इ, ई, उ, मु
[2] स्यापि — आ
[3] कथं चोर्ध्वं — अ
[4] सद्भावं कारुण्यात्तु — इ, ई, उ
[5] कारुण्यात्तु — मु
[6] सार्धत्रि० १.५ पू०
[7] व्यापि नादः — आ
[8] सार्धत्रि० १९.७ पू०
[9] सार्धत्रि० १९.९ पू०
[10] अथोद्भवतिर्यक् — अ; अधोर्ध्वतिर्यक् — आ
[11] प्रश्नकृतविषयस्तु — अ
[12] सार्धत्रि० १७.४ पू०
[13] आह्यधश्चोर्ध्वं — अ,
[14] उपदर्शितः — अ
[15] ०दित्यागतः प्रश्नः — अ
[16] 'यावद्देहे' इत्यतः पूर्वं 'ईश्वरः' इत्यधिकम् — इ, ई, उ, मु
[17] जन्तुरध० — अ, आ, उ
[18] ०स्तात्स्वस्वमध्यव्यव० — अ; ०स्तान्मध्ये व्यव० — आ
[19] निसर्गतो प्यापये० — अ
[20] सर्बगः — इ, ई, उ
[21] त्रिमार्गोऽवस्थितो — आ, ई
[22] ०पुरुषमायावत् — अ
[23] चकारो नास्ति — आ

यदा तु कार्या[1]वस्थातोऽयं **निर्गतः** कारणस्वभाव एव **स्थितः**। तदा [2]**त्रिषु** ऊर्ध्वाधस्तिर्यग्लक्षणेषु **मार्गेषु अवस्थितः** व्यापक उच्यत इत्यविरोधः॥

अत एव —

अविदित्वा [3]न [4]मुच्येत यद्यप्ये[5]तल्लयो भवेत् ॥३॥
[6]तत्त्रिमार्गं त्र्यधिष्ठानं सर्वदेहेषु वर्तते।

यद्यपि एतल्लयः पुरुषो भवेद्दीक्षया। तथापि योऽसौ **सर्वदेहेषु** कार्यद्वारेण नादो **वर्तते** इत्युक्तं, [7]**तत्त्रिमार्गं त्रयाणां** च मन्त्र[8]तदीशेश्वराणाम् **अधिष्ठानं** [9]विज्ञाय मुच्येत इति॥

[10]नन्वात्मज्ञानान्मोक्ष्यते। तन्न। [11]यतः —

यो [12]वेत्त्येवमिमां व्याप्तिं सर्वव्यापी न संशयः ॥४॥
न [13]तस्य [14]गर्भसंभूतिर्यथा [15]देवः प्रभाषते।

एतद्व्याप्तिज्ञानेनैव तद्व्याप्तिज्ञानस्य सिद्धिरित्युक्तम् —
[16]"शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।" इति॥

न चात्म[17]व्याप्तिज्ञानमपि। [18]न स्यादविज्ञानान्मोक्षो यतः —

तावद्भ्रमति संसारे याव[19]द्व्याप्तिं न विन्दति ॥५॥
विदित्वा व्यापिनं [20]जीवं मुच्यते नात्र संशयः।

तथा हि —

यथा [21]तृणजलूका नु तृणाग्रं यावदागता ॥६॥
उपरिष्टान्निरालम्बा [22]तद्वज्जीवोऽत्र संस्थितः।

---

[1] ०वस्थेनोयं — आ
[2] त्रिष्ठुध्वाध० — अ
[3] तु मुच्येत — इ
[4] मुच्यते — अ, मु; मुच्येते — आ
[5] ०तत्खलो भवेत् — इ; ०तल्ललो भवेत् — ई
[6] .....त्र्यधिष्ठानं — अ; त्रिमार्गं च त्र्यधिष्ठानात् — इ; त्रिमार्गश्च त्र्यधिष्ठानं — ई; त्रिमार्गं च त्र्यधिष्ठानां — उ; त्रिमार्गश्च त्र्यधिष्ठानः — मु
[7] तत्र मार्गं — अ
[8] तदीश्वराणाम् — आ
[9] विज्ञानमुच्यत इति — अ, आ
[10] न त्वात्म० — अ, आ
[11] यतम — अ, आ
[12] वेत्त्येवमिमाव्याप्तिः सर्वव्यापीति न — अ; वेत्त्येयमिमा व्याप्तिः सर्वव्यापीति न — आ
[13] यस्य — इ, ई, उ
[14] गर्भभूतादिर्यथा—अ; गर्भसंभूतानिर्यथा—आ
[15] देव — इ, उ
[16] ब्रह्मबिन्दूपनिषत् १७; त्रिपुरातापिन्युपनिषत् ५.१७
[17] ०व्यापिज्ञान० — आ
[18] न स्थादवि० — अ, आ
[19] ०द्व्याप्तिर्न — अ, उ
[20] जीव मुच्यते — अ
[21] तृणजं तृणाग्रं — अ, आ; तृणजलूकानां — इ, उ, मु; तृणजटुकानां तृणाग्रं — ई
[22] तं जीवोऽत्र — अ, आ

संसारावस्थायां मलेन [1]तज्ज्ञानक्रिययोरुपरुद्धत्वात् [2]तद्वयञ्जककार्यकारण[3]स्थानेष्वेव [4]किंचिज्ज्ञत्वाद्यभिव्यक्तेस्तेष्वेव नात्म[5]स्वरूपप्रतिपत्तिः। ततश्च तृण[6]ग्राहिजलूकायास्तृणमिव [7]न ह्येतदस्यात्मनो[8]ऽधिष्ठानभूतमिति। यत्रै[9]वोर्ध्वाधिस्तिर्यग्लक्षणस्थानत्रये तन्नास्ति तत्रैवासौ स्वभावं भ्रान्त्या [10]मन्यत इति व्यापक[11]स्वरूपाज्ञानाद्बन्धः॥

ततश्च —

[12]ऊर्ध्वशून्यमधः शून्यं [13]शून्यं देहान्तरस्थितम्॥७॥
त्रिशून्यं यो विजानाति मुच्यते स ध्रुवं गुह।

यतः [14]प्रोक्तक्रमेण व्यापकात्म[15]स्वरूपवेदनातः **त्रिशून्य**[16]मात्मनोऽपि गतत्वेन जानाति **सः** निश्चितमेव **मुच्यते** [17]दीक्षित इत्यर्थः॥

तदेवम् —

[18]व्याप्तिश्चास्य मया प्रोक्ता [19]संक्षेपान्न तु विस्तरात्॥
अतः [20]परतरं नास्ति व्यापकं व्यापकस्य तु॥८॥

यतो **व्यापकस्य** अपि नादस्य यद् **व्यापकं** आत्मस्वरूपम्, **अतः** परं **नास्ति** ईश्वरेण समव्यापकत्वात्। ततो **मया अस्य** नादस्य [21]**व्याप्तिः** उक्तेति॥८॥

इति [भट्टनारायणकण्ठात्मज-] भट्टरामकण्ठविरचितायां श्रीमत् [सार्धत्रिशति-] कालोत्तरवृत्तौ [22]व्याप्तिप्रकरणं [23]विंशतितमं [समाप्तम्]॥

इति विंशः पटलः।

---

[1] तत्स्थान० — अ, आ
[2] 'तद्' इति नास्ति — अ,
[3] स्थान एव — अ, आ
[4] किं च ज्ञात्वाद्यभि० — आ
[5] ०स्वापात्मप्रति० — अ, आ
[6] ०ग्राही जम्बूकाया० — अ; ०ग्राहि जम्बूकाया० — आ
[7] न देतदस्या० — अ; न देतस्या० — आ
[8] ०ऽधिष्ठानी० — अ, आ
[9] ०वोध्यायस्तिर्य० — अ
[10] मन्त्यत — अ
[11] ०स्वरूपज्ञाना० — अ, आ
[12] उक्तौर्ध्वशून्यं देहान्तरम् — अ; ऊर्ध्वं मध्यमधः शून्यं — आ
[13] शून्यदेहा० — इ
[14] सार्धत्रि० २०. २-६ पू०
[15] स्वरूपावेद० — अ, आ
[16] ०मात्मनो विगत० — आ
[17] दीक्षितमित्यर्थः — आ
[18] व्याप्तिश्चात्र मया — मु
[19] संक्षेपात्तु विस्त० — आ
[20] परं नास्ति — अ, आ
[21] व्यक्तिरुक्तेति — अ, आ
[22] वृत्तिप्रकरणम् — अ, आ
[23] विंशतिः — अ

एकविंशः पटलः

प्रत्ययप्रकरणम्

एवं प्रासङ्गिकं परिसमाप्याथ [1]प्रागुक्ताष्टविधाणिमाद्यैश्वर्यसाधकस्यैव सिद्धचभि[2]मुखीभावे लिङ्ग[3]प्रत्ययं भावज्ञानं शुभाशुभादौ स्वप्नादौ सुस्वप्नादिविषयमिव वक्ष्यामीति प्रतिज्ञा —

अतं परं प्रवक्ष्यामि अष्टधा प्रत्ययो यथा।

कोऽसावित्युच्यते —

[4]अनग्निज्वलनं चैव वृक्ष[5]स्यालभनं तथा ॥१॥
पाशानां स्तोभनं चैव महापातकनाशनम्।
[6]विषसंहरणं चैव [7]निर्बीजकरणं तथा ॥२॥
[8]ग्रहज्वरवि[9]नाशश्च प्रत्ययोऽष्टविधः [10]स्मृतः।

एतच्चोपलक्षणं वह्न्यन्तरजलादिविषयस्यापि। स्थित्यादिपञ्चकमस्य। यदुक्तं **श्रीमत्त्रयोदशशतिके** — "[11]एताश्चान्याश्च सिद्धयः" इति। **श्रीमद्रौरवे**[12] च —

"विश्वरूपधरा मन्त्रा यजमानेच्छया स्थिताः।
सर्वान्कामान्प्रयच्छन्ति" इति॥

एवं ज्ञात्वा तु विधिवत्ख्यातिः सर्वत्र जायते ॥३॥

एवमणिमादि[13]सिद्धचाविर्भावे पूर्वं लिङ्गस्य [14]प्रतीत्या प्राप्तौ सर्वत्रावश्यंभावित्वेन [15]**ख्यातिः** [16]प्रतीतिः [17]साधकस्योत्पद्यत इति ॥३॥

---

[1] सार्धत्रि० १५.२ उ०
[2] ०मखभावे — अ, आ
[3] ०प्रत्ययो भाव० — अ, आ
[4] अनग्निस्त्वल . . . श्चैव — इ; अनग्निज्वालनं चैव — ई
[5] ०स्यालम्बनं — अ; ०स्यालम्भनं — आ, मु
[6] विषसंहारणं — अ; विषुसंहरणं — इ; विषुसंग्रहणं — उ
[7] निर्बीजकारणं — इ; निर्बीजीकरणं — ई; निर्बीजाकरणं — उ
[8] गृह० — अ, इ, उ
[9] ०नाशं च — आ
[10] स्थितः — अ, आ
[11] एताश्चाद्याश्च — अ, आ
[12] मुद्रिते रौरवे नोपलभ्यते।
[13] ०सिद्धचभिभावापूर्वलिङ्गं — अ; ०सिद्धचभिभावे पूर्वलिङ्गं — आ
[14] प्रतीत्य — अ
[15] ख्यातिप्रतीतः —अ
[16] प्रतीतः — आ
[17] साधनस्यो० — अ, आ

तत्र प्रथमप्रयोगः —

प्रणवेनाग्निमध्यस्थो [1]हकारो ह्रीं तथैव च।
[2]आदिरों च नमश्चान्ते अनग्नि[3]ज्वलने हितम् ॥४॥
[4]अग्निं स्रोतसि संयोज्य सहस्रोद्घातसंयुतम्[5]।
पञ्चाक्षर[6]प्रयोगेण [7]ज्वलत्येव न संशयः ॥५॥

रेफद्वय[8]मध्ययुक्तो **हकारः प्रणवेन** युतः [9]ह्रींकारश्चेति द्वौ [10]वर्णावाद्यन्तयोः प्रणवनमस्कारयुक्तौ ॥४–५॥

[द्वितीयः प्रयोगः] —

[11]ओंकारः [12]सर्वतोऽधस्याद्रेफस्तस्योर्ध्वतः स्थितः।
[13]पूर्ववत्संप्रयुक्तोऽयं[14] प्रयोगो भुवि दुर्लभः ॥६॥
[15]शतैः सप्तभिरुद्घातै[16]रालब्धो [17]म्रियते द्रुमः।

रेफ[18]द्वयान्तरस्थितं शिवबीजं संधिः ॥

अत्रैवास्योपलक्षणत्वज्ञापनाय प्रयोगान्तरम् —

भूय[19]श्चाप्यायनं तस्य [20]वारुणे स्रोतसि [21]स्थितम् ॥७॥
स जीवति [22]पुनर्वृक्षो यथापूर्वं तथैव सः॥
तादृगेव [23]पुनश्चासौ किं तु रेफ[24]विवर्जितः ॥८॥

---

[1] गकारो हि तथैव — अ; गकारो ह्रीं तथैव — आ, मु; अकारो हृत्तथैव — इ; अकारो ह्रीं तथैव — ई; अकारो हृन्तथैव — उ

[2] आदिरोश्च नम० — आ; आदिरूर्ध्वं नम० — इ, ई, उ; आदिरों नम० — मु

[3] ०ज्वलनं — मु

[4] अग्निः स्रोतसि — अ; अग्निस्रोतसि — आ, उ, मु

[5] ०संयुक्त — अ; ०संयुतः — आ

[6] ०प्रयोगेन — अ

[7] ज्वलत्येवं न — ई

[8] ०मसिद्धयुक्तो — अ

[9] स्रहस्रौं हं ह्रींकार० — अ, आ

[10] वर्गावाद्य० — अ, आ

[11] 'ओंकारः' इत्यारभ्य 'संप्रयुक्तो' इत्यन्तं नास्ति — अ, आ

[12] सर्वतो यस्माद्रेफ० — इ, उ, मु

[13] इदमर्धं मुद्रिते नवमश्लोकानन्तरं दृश्यते।

[14] यः — अ, आ

[15] शरैः — इ, उ

[16] ०रलब्धैर्म्रियते — अ; ०रालब्धं क्रियते — आ

[17] क्रियते — इ; त्रियते — ई

[18] ०द्वयान्तररितं शिवबीजसन्धिः — अ; द्वयान्तररितं शिवबीजीं सन्धि — आ

[19] ०श्चाप्यनन्तस्य — ई; ०श्चाप्ययनं तस्य — उ

[20] वारुणो — आ; वारिणे — उ

[21] स्थितः — मु

[22] पुनः क्षोभं — अ; . . . न क्षोम यथा — आ

[23] पुनर्द्वासौ — इ; पुन द्वासौ — उ

[24] ०विवर्जितम् — उ

आप्यायनविधौ ह्येष पञ्चधा बिन्दु[1]दीपितः ।
[2]औकारमध्यसंयुक्तः प्रणवेनान्तदीपितः ॥९॥

पूर्व एव च वर्णो रेफरहितो वकारयुक्तो वारुणधारणया स आप्यायने, पञ्चधा वकारेण बिन्दुना युक्तत्वात् । अत एव पूर्वस्य बिन्दुयोग इत्युक्तम् ॥

अथ तृतीयः प्रयोगः —

ईकारादिः स हौ मध्ये वह्निमध्यं ततः परम् ।
प्रयोगो विषुवत्काले [3]पाशानां स्तोभकारकः ॥१०॥
शतैः पञ्चभिरुद्घातैः [4]पतत्येव न संशयः ।

[5]**ईकारादिः** यस्य [6]प्रागुक्तस्य ह्रींकारात्मनो वर्णस्य [7]स तावदेकः हौकारश्च रेफद्वयमध्यस्थो द्वितीयो विषुवत्कालयुक्तः **पाशानां** शरीराणां **स्तोभस्य** [8]तदैवोद्भूतस्येवानुमितस्य **कारकः** ॥

अथ [9]प्राग्वदत्रैव प्रयोगान्तरम् —

पुनश्चोत्थापनं तस्य यथा भवति तच्छृणु ॥११॥
ईकाराद्यन्त[10]संयुक्तं [11]हौ च मध्ये [12]नियोजितम् ।
[13]प्राणानुस्वार[14]संदीप्तं [15]नमोऽन्तं प्रणवं पुनः ॥१२॥
उत्थापने प्रयुञ्जीत सर्वभूतेषु तत्त्ववित् ।
[16]तावद्भिरेव चोद्घातैर्योजनीयः प्रयत्नतः ॥१३॥

प्राग्वदीकारोपलक्षितेन मायाबीजेनाद्यन्तयोर्योजितं **हौ**बीजं **मध्ये प्राणेन** वायुबीजेन यकारेण **अनुस्वारेण** च [17]दीप्तं **नमोऽन्तं प्रणवं** च पुनः कृत्वा, न केवलं तस्य पाशस्तोभा[18]न्निपतत [**उत्थापने**] यावदन्येष्वपि विसंज्ञेषूत्थापने **प्रयुञ्जीत तत्त्वविद्** इति ॥११–१३॥

अथ चतुर्थः प्रयोगः —

[19]लबीजं जीवसंविष्टं [20]हकाराद्यन्तसंस्थितम् ।

---

[1] ०दीक्षितः — इ, उ
[2] ओंकारध्यानसंयुक्तः — मु
[3] पाशास्तां स्तोभ०—अ; पाशकास्तोभ०—इ, उ
[4] पतन्त्येव — मु
[5] इकारादौ — अ, आ
[6] सार्धत्रि० २१.४ पू०
[7] सतां वदेकः — अ, आ
[8] तद्भूतमिवानुमितस्य — अ; तद्भूतमिवानुभूतस्य — आ
[9] प्र . . . पुनर्यागान्तरम् — आ
[10] ०संयुक्तः — अ, आ, मु
[11] हौश्च — अ
[12] नियोजिता — अ; नियोजितः — आ, मु
[13] प्राणानि स्वरसं० — इ, उ
[14] संदीप्तो — मु
[15] नमोऽन्ते प्रणवे पुनः — अ, आ; नमोऽन्ते प्रणवं पुनः—इ, ई, उ; नमोन्ते प्रणवो पुनः—मु
[16] इदमर्धं 'अ, आ' मातृकायोर्नास्ति ।
[17] दीपितं — आ
[18] ०न्निपतति — अ, आ
[19] लं बीजं — इ
[20] हकारात्यन्तसं — आ; हचुकाराद्यो व्यवस्थितम्—इ; ह्यकाराद्यो व्यवस्थितम्—ई, उ

[1]पूर्ववन्मध्य[2]संस्थं च वायुबिन्दु[3]समन्वितम् ॥१४॥
यदस्यारोहणे [4]प्रोक्तं गुरुत्वं जायते यथा ।

जीवस्त्वहंकारो यस्मिंस्तस्मिंस्तद् **लबीजं** [5]हकाराधिष्ठितम् । **हकारश्च** आद्यन्तयोरवस्थितो यस्य । पूर्वप्रयोग इवात्राप्यादौ माया[6]बीजमध्यस्थो ह्रौंकारो **वायुना** [7]यकारेण **बिन्दुना** च समन्वितो महापातकनाशनप्रायश्चित्त[8]निमित्तभूतजपारम्भकाले यदारोहणं तत्परिच्छेदकत्वेनारोपितगुरुद्रव्यान्तरसमत्वजननाय [9]प्रयोक्तव्यः ॥

पापक्षपणाय तु —

भूय एव प्रवक्ष्यामि लघुत्वं जायते यथा ॥१५॥
[10]ओंकारो हं [11]यकारेण [12]ह्यौकारो हं नमस्तथा ।
तुलापुरुष[13]योगोऽयमुद्घातैरयुतेन तु ॥१६॥

पूर्वं प्रणवस्ततो [14]**हंकारो यकारेण** बिन्दुना युक्तः । ततश्च यकारौकारबिन्दुभि[15]र्युक्तो हकारः । पुनश्च [16]हंकारो नमोऽन्त इति महापातकनाशनप्रयोगः ॥

अथ पञ्चमः —

[17]स हकारो वकारेण [18]यकारेण च दीपितः ।
[19]ह्यौ मध्ये ह्लीं नमश्चान्ते वारुणेन तु बुद्धिमान् ॥१७॥
उद्घाताष्टशतेनैव विषं संहरति ध्रुवम् ।

प्रथमं [20]**हकारस्ततो** [21]**वकारः यकारेण** [22]**युक्तः** । ततो **ह्यौ मध्ये ह्लीं नमश्चान्ते** इत्येव च प्रयोगो [23]वारुणेन समाधिना प्रयुक्तो विषसंहरणे कार्यः ॥

---

[1] पूर्ववज्जीवसंस्थं च — अ
[2] ०संस्थश्च — ई
[3] समन्वितः — इ, ई, उ
[4] प्रोक्ता — ई, उ
[5] सकारादिस्थितम् — अ; सकाराधिष्ठितं — आ
[6] बीजं मध्यस्थेन हकारो — अ, आ
[7] धकारेण — अ
[8] ०निमित्तीभूय जवारम्भ० — अ
[9] प्रयोक्तव्यम् — अ, आ
[10] ओंकारोऽयं मकारेण — अ, आ
[11] मकारेण — इ, ई, उ, मु
[12] ह्यौकारोऽयं — अ, आ; ह्यौंकारो हं — इ, उ; ह्योङ्कारो हं — ई
[13] ०योगेय ० — ई
[14] हकारो मकारेण — अ, आ
[15] ०र्युक्तो हकारबिन्दुभिर्युक्तो हकारः — अ
[16] हकारो — अ
[17] 'स हकारो' इत्यारभ्य 'प्रथमं हकारस्ततो' इत्यन्तं नास्ति — अ; सहाकारो यकारेण च दीपितम् — आ; सहकारो — इ, ई, उ, मु
[18] ईकारेण प्रदीपितः — इ, ई, उ, मु
[19] सौर्मध्ये — इ, मु; स्यौर्मध्ये — ई; सौं मध्ये — उ
[20] सकारस्ततो हंकारो — आ
[21] हाकारो यकारेण — अ
[22] युक्तं ततो स्यौ — आ
[23] 'वारुणेन' इति नास्ति — अ

अथ षष्ठः प्रयोगः —

[1]यथाग्निज्वलने [2]दृष्टो निर्बीजकरणे तथा ॥१८॥
शतैः पञ्चभि[3]रुद्घातैर्विशेषो[4]ऽत्र विधीयते ।

विशेषस्तु तत्रोक्ताना[5]मुद्घातानामेव [6]मन्त्रे नेति ॥

अथ सप्तमः —

ओंकारमादितः कृत्वा [7]ह्लूंकारं तदनन्तरम् ॥१९॥
ह्लौं [8]ह्लूं [9]च फण्णमश्चान्ते [10]ग्रहाणां नाशने मतः ।
प्रयोगे [11]वारुणे मार्गे उद्घाताष्टशतेन तु ॥ २०॥

अथाष्टमः प्रयोगः —

[12]प्रणवादि ततो हुं फट् [13]हुं फट् हुं फट् तथैव च ।
[14]फट् फट् फट् फट् [15]फडेवं स्याद्वारुणेन तु बुद्धिमान् ॥
उद्घाताष्टशतेनैव क्षिप्रं नाशयति [16]ज्वरम् ॥२१॥

एवं [17]हुंकारत्रयेणैव [18]फट्काराष्टकेन युक्तोऽयं ज्वरहरणप्रयोगः । [19]एते मन्त्रा लोकपालाधिष्ठातृशक्तिभेदप्रतिपादकत्वात् पूर्ववच्छक्तिपक्ष एव [20]वर्तन्त इति सदागमविधिः ॥

इति [भट्टनारायणकण्ठात्मजभट्टरामकण्ठविरचितायां श्रीमत्सार्धत्रिशति-]
कालोत्तरवृत्तौ प्रत्ययप्रकरणमेकविंशतितमं[21] [समाप्तम्]

इत्येकविंशः पटलः

---

[1] यथाग्निर्ज्वलने — ई
[2] दृष्टे — आ
[3] ०रुद्घातो विशेषोऽत्राभिधीयते — इ, ई, उ
[4] ०ऽत्राभिधीयते — मु
[5] ०मुक्तानामेव — आ
[6] अत्र नेति — अ
[7] हुंकारं — अ; ह्लुंकारं — इ; ह्लूंकारं — मु
[8] ह्लूं — अ, उ; ह्लं च — इ, मु
[9] 'च फण्णम' इत्यारभ्य २१ द्वितीयार्धे 'फट् फट् फट् फट्' इत्यन्तं न दृश्यते – अ; २१ प्रथमार्धे 'हुंफट् हुंफट्' इत्यन्तं नास्ति — आ
[10] गृहाणां — इ, ई
[11] वरुणे — ई, उ
[12] प्रणवादिस्तो — मु
[13] भ्रं फट्. . . तथैव च — मु
[14] 'फट् फट्' इति नास्ति — मु
[15] फडेव — अ, आ
[16] ध्रुवम् — उ
[17] ह्रींकार० — अ
[18] वराष्टकेन — अ
[19] एते तन्मन्त्रा — अ; एतेन मन्त्रा — आ
[20] वर्तंत इति — अ
[21] विंशतिः — अ, आ

द्वाविंशः पटलः

प्रासादनिर्णयप्रकरणम्

अथ प्रासादनिर्णयप्रश्नः —

[1]प्रासादः कीदृशो ज्ञेयो व्याप्तिस्तस्य च कीदृशी।
शरीरं कीदृशं तस्य कथयस्व महेश्वर॥१॥

ननु पूर्वं प्रासादस्योद्धृतत्वात् [2]पुनश्चाक्षेपसमाधानान्निर्णयः सिद्ध एव। अत एवायमन्य एव संशयः। उक्तं हि प्राक्[3] —

[4]"शिवं तत्तु विजानीयान्मन्त्रमूर्तिं सदाशिवम्।" इति।

सदाशिवत्वं च [5]ब्रह्माद्यधिष्ठानव्याप्तिशरीरत्वेन भवतीति तत्स्वरूपनिर्णयाय प्रश्नः॥१॥

अत एव सिद्धान्तोपक्रमो [6]येन तथैवेति न बुध्यते [इति] —

[7]प्रासादं यो न जानाति पञ्च[8]मन्त्रमहातनुम्।
अष्टत्रिंशत्कलोपेतं नासावाचार्य उच्यते॥२॥
प्रासादं सम्यगज्ञात्वा यो दीक्षां कुरुते [9]गुरुः।
[10]अधस्ताच्छिष्यमात्मानं नयत्यत्र न संशयः॥३॥
प्रासादाब्जशिखान्तस्थो [11]यस्तु दीक्षां करोति सः।
आचार्यः सह [12]शिष्येण शिवसायुज्यमाप्नुयात्॥४॥

प्रासादजपा[13]नन्तरं शिवोऽत्रानन्तरप्रकरणेन वक्ष्य[14]माणस्तेनैव च सदाशिवेन देहेन भगवान् सर्वं करोती[15]त्युच्यते —

ब्रह्मा विष्णुश्च रुद्रश्च इन्द्रश्चन्द्रो बृहस्पतिः।

---

[1] आदौ 'कार्तिकेयः' इत्यधिकम् — इ, ई, उ, मु
[2] पुनश्च क्ष . . . योन्निर्ण . . .व — अ; पुनश्च क्ष. . . ा धोनान्निर्णयः सिद्ध एव — आ
[3] सार्धत्रि० १.११ उ०
[4] शिवं तं तु विज्ञेयान्मन्त्र० — अ
[5] ब्रह्माधिष्ठान० — अ, आ
[6] न तथैवेति। न बुद्धचते प्रासादं यः पञ्च-मन्त्र० — अ, आ
[7] द्वितीयश्लोकात्पूर्वं 'ईश्वरः' इत्यधिकम् — मु
[8] ०मन्त्रं महा — इ, उ
[9] यदा — अ, आ
[10] अथ तच्छिष्य० — अ, इ; अधस्तच्छिष्य० — आ, उ
[11] यस्य दीक्षां — अ
[12] शिष्येन — मु
[13] ०नन्तरं शिवाक्रानन्तदुपकरणेन वक्ष्य० — अ; ०नन्तरं शिवाक्रानन्तदुप्रकरणे नव वक्ष्य० — आ
[14] ०माणा तेनैव — अ, आ
[15] ०त्युच्येत — अ

[1]प्रजापतिस्तथादित्यः [2]शुक्रः स्कन्दो भृगुस्तथा ॥५॥
[3]ये चान्ये प्राणिनो देवाः सर्वे प्रोक्ताः प्रसादजाः ।

एवमेव सर्वप्रदं नाथं मुमुक्षवः [4]साधकाश्च ध्यायन्तीत्युच्यते —

एते चान्ये च बहवो [5]मुनयः संशितव्रताः ॥६॥
ध्यायन्ति परमं हंसं प्रासादं नामरूपतः ।

हंसत्वमस्य [6]वक्ष्यमाणं नाम्ना प्रासादबीजेन रूपेण चाष्टत्रिंशत्कलादिना वक्ष्यमाणेन ध्यायन्ति इति ॥

अतश्च —

[7]विभागं चास्य [8]वक्ष्यामि यं [9]ध्यात्वामृतमश्नुते ॥७॥

ध्यानार्थ[10]मेवास्य नामरूपमेवात्मानं[11] प्रासादस्य विभागं वक्ष्यामि इति [12]प्रतिज्ञा ॥७॥

योऽसौ विभागः —

[13]सद्यः कलाष्ट[14]संयुक्तमकाराक्षरजं विदुः ।
विद्यादुकारजं वाममघोरं च [15]मकारजम् ॥८॥
बिन्दुजः पुरुषो [16]ज्ञेय [17]ईशानस्तु [18]शिखात्मजः ।

[19]ननु प्रणवाक्षरा[20]ण्येतान्यकारादीनीत्युक्तम्[21] —

[22]"ओंकारप्रथमां रेखामकारं सृजति प्रभुः"

इत्यादिना । [23]न तु प्रासादाक्षराणि, तानि हि [24]हकारौकारौ ऊकारो बिन्दुर्नादश्चेत्येतावन्त्येवानेन

---

[1] प्राजापति० — आ
[2] शक्रः — मु
[3] मुद्रिते षष्ठश्लोकस्य पूर्वोत्तरार्धे व्यत्यस्ते भवतः ।
[4] साधकश्च यान्ती — अ, आ
[5] ऋषयः — आ
[6] साधत्रि० २३.३
[7] द्विभागः — अ
[8] वक्ष्यामीदं ज्ञात्वात्रतमुच्यते — अ
[9] ज्ञात्वामृत० — आ
[10] ०मेवास्म नाद० — अ, आ
[11] ०रूपमेवात्मना — अ, आ
[12] प्रतिज्ञायायमसौ विभागः — अ, आ
[13] 'सद्यः' इत्यव्ययतया प्रयोग इति भाति ।; सद्यं कलाष्टं० — मु
[14] ०संयुक्तं मकाराक्षरजं — अ; संयुक्तमष्टाक्षरजं — आ
[15] मकारजः — इ
[16] ज्ञेयो — आ
[17] ईशानं तु — ई
[18] शिवात्मजः — इ, ई, उ
[19] न तु – अ, आ
[20] ०ण्येतानि यकारा० — अ
[21] सार्धत्रि० १३.३ पू०
[22] ओंकारे प्रथमा रेखा अकारं — अ;
[23] ननु — अ
[24] हकौ रौकारा अकारौ बिन्दुनादश्चे० —अ; हकारौकार . . . रो बिन्दुर्नादश्चे० — आ

क्रमेणोद्धृतानीति। सत्यम्। अत एवात्र निमित्तत्वेन [1]निर्विष्टानि। अकाराक्षरे सत्युत्पन्ने यज्जातं प्रासादाक्षरजं [2]हकाराख्यं, तत्र **अकाराक्षरजं** सद्योजातं [3]**विदुः**। [4]सप्तम्यां जनेः रूपमेत[5]दुपपद्यते। एवमुकारादिजा वामदेवादयः [6]उकाराद्यात्मजा ज्ञेयाः। **ईशानस्तु** शिखात्मनि [7]ज्ञातः शिखा[8]रूप इति। अतश्च प्रणवकलानन्तरमेवैताः प्रासादकलाः सद्योजाताद्याः प्रणवोत्पन्ना इत्यर्थः। अत एव प्रणवस्य मन्त्रादौ प्रयोग इत्युक्तं प्राक् [9]सृष्टिप्रकरणे। "**सद्यःकलाष्टसंयुक्तम्**" इत्युपलक्षणम्। सद्योजातादयः [10]सकला भेदेनात्र [11]स्वशरीरेऽभिध्येया इत्यर्थः। यदुक्तं श्रीमत्**सर्व**[12]**ज्ञानोत्तरवृत्तौ**[13]—

"पादौ हस्तौ च नासा च शिरश्चैव भुजावुभौ।
सद्योजातकला ह्यष्टौ सद्योमूर्तिरिति [14]स्मृतः॥
गुह्यं लिङ्गं तथा चोरू जानुनी जङ्घके [15]स्फिचौ।
कटिः पार्श्वौ च वामस्य त्रयोदश कलाः स्मृताः॥
[16]हृद्ग्रीवांसयुगं नाभिः [17]पृष्ठं जठरमेव च।
[18]उरश्चेति कला ह्यष्टौ बहुरूपस्य कीर्तिताः॥
ईशानं पञ्चधा मूर्ध्नि वक्त्रं वक्त्रचतुष्टयम्।" इति।

न त्वत्र[19]"सिद्धिर्द्युति [स्तथा] लक्ष्मीः" इत्यादिना श्रीमत्**पौष्करो**क्ताः प्रणवकला व्याख्येयाः। तासामष्टत्रिंशत्संख्याया अभावात्। यदुक्तं तत्रैव—

[20]"एकविंशतिरष्टौ च विज्ञेयाः प्रणवात्मिकाः।" [इति]॥

एवं मन्त्रास्तु [21]पञ्चैते प्रासादात्संभवन्ति ये॥९॥

प्रासादात् शरीरिणः शरीरत्वेन **पञ्चैते** भवन्तीति॥९॥

अन्येषां तु—

दश[22]कोटिः सहस्राणां मन्त्राणाममितौजसाम्।

---

[1] निर्विषयाण्यकाराक्षरे — अ
[2] 'हकाराख्यं तत्राकाराक्षरजं' इति नास्ति — अ
[3] बिन्दुः — अ
[4] 'सप्तम्यां जनेर्डः' पा० सू० ३.२.९७; सप्तम्याञ्जनो रूप० — अ; 'सप्तम्यां जनेः' इति नास्ति — आ
[5] ०दुपस्रज इति पद्यत — अ; ०दुपसृज इति पद्यते — आ
[6] औकाराद्या० — अ; औकाराद्यात्मका — आ
[7] जाताः — अ, आ
[8] 'रूप इति' इत्यारभ्य 'मन्त्रादौ प्रयोगः' इत्यन्तं नास्ति — अ
[9] सार्धत्रि० १३.३ उ०–५ वृत्तौ
[10] स्वकला० — आ
[11] शरीरेऽपि ध्येया — आ
[12] ०ज्ञानोत्तरे वृत्तौ — अ, आ
[13] ग्रन्थो न लभ्यते।
[14] स्मृताः — अ
[15] स्फिजौ — अ, आ
[16] हृदि ग्रीवांस० — अ, आ
[17] पृष्ठजठर० — अ
[18] ऊरुश्चेति — अ
[19] सिद्धिद्युतिर्लक्ष्मीत्यादिना — अ, आ
[20] एका विंशति० — अ, आ
[21] पञ्चैके — अ
[22] ०कोटिसहस्राणां — अ, आ, इ, ई, उ, मु

इष्टेन तु [1]प्रसादेन [2]सर्वे इष्टा न संशयः ॥१०॥
[3]मारुता नव [4]शक्त्याद्या ये मन्त्राः परिकीर्तिताः ।
प्रासादाब्जसमुत्पन्नाः सर्वे [5]चामोघशक्तयः ॥११॥

निरञ्जनानां संख्योक्ता। साञ्जनापेक्षया त्वनन्ता एवेत्युक्तम्[6] —

[7]"अन्ये [8]प्राधानिका [9]मन्त्रा ब्रह्मविष्ण्वा[10]दयोऽपराः ।
साञ्जनास्तेऽण्डमध्यस्थाः [11]सात्त्वराजसतामसाः ॥" इति ॥१०–११॥

अथ तेषामेव [12]प्रागुक्त[13]निवृत्त्याद्यधिष्ठेयद्वारेण तच्छरीरमधिष्ठेयं ज्ञेयमित्युच्यते —

सद्यस्तु पृथिवी [14]ज्ञेयो वामो ह्यापः [15]प्रकीर्तितः ।
अघोरस्तेज इत्युक्तो वायुस्तत्पुरुषः स्मृतः ॥१२॥
आकाशस्तु [16]भवेदीशः स्वयं देवो महेश्वरः ।

एवं च केवलं ब्रह्मस्वरूपोपासकानां तत्र शुद्धविद्यायां क्रमेण निवृत्त्यादि[17]भुवनानि पञ्च पृथिव्यादीनि [18]भिन्नान्येवेत्युक्तम् ॥

तथा शब्दजातमपि —

सद्योजातस्तु [19]ऋग्वेदो वामदेवो यजुः स्मृतः ॥१३॥
अघोरः [20]सामवेदः स्यादथर्वः पुरुषः स्मृतः ।
[21]पञ्चमस्तु परः सूक्ष्मो व्योम[22]व्यापी सदाशिवः ॥१४॥

---

[1] प्रासादेन — आ, मु
[2] सर्वे इष्टा — मु
[3] ११ श्लोकः अ, आ मातृकयोर्मुद्रिते च नास्ति
[4] शक्राद्या — ई, उ
[5] वामोघ० — इ, ई, उ
[6] एवेत्युक्तं तत्रैव — अ, आ
[7] अयं श्लोकः श्रीमद्रौरवेऽप्युक्तमिति मृगेन्द्रवृत्तिदीपिकायामुपोद्घातप्रकरणे २२तमश्लोकविवरणे निर्दिष्टः। किंतु मुद्रितरौरवे नोपलभ्यते।
[8] प्रधानिकमन्त्रादयः ब्रह्म० — अ
[9] मन्त्रादयो ब्रह्म० — आ
[10] ०दयः पराः — अ, आ
[11] सत्त्वराजसतामसाः — अ, आ
[12] सार्धत्रि० ८.६ — ९ पू०, ३७ उ०, ३८ पू० वृत्तौ।
[13] निवृत्त्यधि० — अ, आ
[14] ज्ञेया — इ, ई, उ
[15] प्रकीर्तिताः — इ, ई, उ
[16] भवेद्देवः — इ, ई, उ
[17] भुवनादि पञ्च — अ, आ
[18] भिन्न एवे० — अ, आ
[19] ऋक्छन्दो — अ
[20] सामवेदः स्यादथर्वा — इ, उ; सामवेदस्तु अथर्वः — अ, आ
[21] पञ्चमं यत्परं सूक्ष्मं — अ, आ, मु
[22] ०व्यापी न संशयः — अ, मु; ०व्यापि न संशयः—आ

उपलक्षणत्वादस्य सर्व एव गद्यपद्य[1]वाक्प्रपञ्चः क्रमेण तदधिष्ठितः। **पञ्चमस्तु** शिवः प्रोक्तः परमेश्वराधिष्ठितोऽयमिति ॥१३–१४॥

अथ कारणान्यपि क्रमेण तदधिष्ठितानि ज्ञेयानीत्युच्यते —

सद्योजातस्तु वै ब्रह्मा वामो विष्णुः प्रकीर्तितः।
अघोरो रुद्रदैवत्य[2] ईश्वरः पुरुषः स्मृतः ॥१५॥
ईशानः शिवदैवत्यो [3]हृदयादाववस्थिताः।

हृदयमादौ कृत्वा चैते ब्रह्मादयः स्थिता इति वक्ष्यति[4] — "ब्रह्मणो हृदयं स्थानम्" इत्यादिना ॥

षष्ठं तु यत्परं तत्त्वमसादृश्यगुणैः स्थितम् ॥१६॥
तस्य देहो न वक्तव्यः [5]प्राकृतैर्गुणसंभवैः।

षष्ठं तु यद् देहातिक्रान्तं कारणत्यागक्रमेण बाह्यं **परं तत्त्वं** तस्य रूपं शब्दपरि[6]कल्पनातीतत्वेनानभिधेयम्। किं तु परम् ॥

ज्ञात्वा परम[7]निःश्रेणीं पञ्चसंस्थानगामिनीम् ॥१७॥
ज्ञातमेव [8]सकृद्येन [9]विस्तृतं तु तदेव तत्।
तत्काल एव मुक्तोऽसौ यदा [10]ज्ञातं हि तत्पदम् ॥१८॥

एनां ब्रह्मादिस्थानारोहणसोपानपदपङ्क्ति **ज्ञात्वा तद् येन सकृत् ज्ञातमेव** [11]चित्त[12]स्थैर्याद् देवताकाररूपाभ्यासे उपयुज्यते। यथोक्तम् — [13]"स्थितौ यत्नोऽभ्यासः" इति ॥१७–१८॥

इति [भट्टनारायणकण्ठात्मजभट्टरामकण्ठविरचितायां श्रीमत्सार्धत्रिशति-]
कालोत्तरवृत्तौ प्रासादनिर्णयप्रकरणं द्वाविंशतितमम्[14] [समाप्तम्]

इति द्वाविंशः पटलः

---

[1] ०वाक्प्रपञ्चक्रमेण — अ, आ
[2] ०दैवत्यो — अ, आ, मु
[3] हृदाद्येवमवस्थिताः — अ, आ, इ, ई, उ
[4] सार्धत्रि० २३.१० उ०, ११
[5] प्राकृतैर्वर्णसं — इ, ई, उ
[6] ०कल्पना तत्त्वादनामयत्वे किं तु — अ, आ
[7] निश्रेनीं — मु
[8] सकृद्योतयः . . — अ; सकृद्येत . . — आ
[9] विस्मृतं—अ, आ, ई, उ; विस्मृतेऽपि तदेव—मु
[10] ज्ञानं — इ, मु
[11] न चित्त० — आ
[12] स्थैर्यादिवकान्तररूपा० — अ; स्थै या देवतोन्तररूपा० — आ
[13] योगसू० १.१३; स्थितो यत्नेभ्यास — अ; स्थितो यत्नोऽभ्यास — आ
[14] द्वाविंशतिः — अ

त्रयोविंशः पटलः

ज्ञानामृतप्रकरणम्

अथास्यैव प्रासादनिर्णयप्रकरणस्य शेषभूतं प्रकरणान्तरम्।

शृणु षण्मुख तत्त्वेन ज्ञानामृतमनुत्तमम्।
यन्न कस्यचिदाख्यातं नाख्येयं कथयामि तत् ॥१॥

यदुक्तं प्राक्[1] — "प्रासादाब्जशिखान्तस्थो गुरुर्दीक्षां करोति" इति तदर्थमेतत् —

देहस्थः सकलो ज्ञेयो निष्कलो देहवर्जितः।
[2]आप्तोपदेशगम्योऽसौ सर्वतः [3]किमपि स्थितः ॥२॥

[4]यावद्धि [5]देहसंविदवस्थितोऽसौ तावत् **सकलः** एव पशुधर्मा। यदा [6]त्विह सिद्ध[7]प्रासादस्तु प्लुतोच्चारणे नादशिखावृत्त्या देहातीताविच्छिन्न[8]द्वादशान्तसंविद्भवति [9]तदायं **निष्कलः** [10]शिवसमानधर्मा पाशच्छेदादि कर्तुं समर्थो गुरुरित्यर्थः ॥२॥

[11]यद्येवं सकलो निष्कलश्च भगवान् कथं केन च ज्ञेय इति। तदर्थमेतत् —

हंस हंसेति यो ब्रूयाद्धंसो देवः सदाशिवः।
गुरुवक्त्रात्तु लभ्येत प्रत्यक्षं [12]सर्वतोमुखः ॥३॥

प्राणगमागम[13]स्य हंकारेण प्राणवृत्त्यात्मना सकारेण [14]सहान्वयवृत्तिरूपेणान्वयावृत्याविना[15]भावसिद्धेस्तद्गमागमप्रवृत्त्यैव प्रतिक्षणं "योऽहं सोऽहं सः" [16]इत्याम्रेडितपदत्वेन [17]**ब्रूयाद्** इति संभावनायाम्। यदाहुः[18] —

---

[1] सार्धत्रि० २२.४ पू०
[2] अप्तोपदेश० — मु
[3] किमपि स्थितम् — अ; किमवस्थितः — इ, ई, उ
[4] यावद्विदेव० — अ;
[5] देवसंवि० — आ
[6] ०त्वाह सिद्ध० — अ; ०त्वाहमसिद्ध० — आ
[7] ०प्रासादासु — अ, आ
[8] ०द्वादशान्तासं० — आ
[9] तदयं — अ, आ
[10] शिवः समान० — अ
[11] यद्येयं — अ
[12] सर्वतोमुखम् — अ, आ, इ, ई, उ
[13] ०स्याहंकारेण — आ
[14] स चान्वानवृत्ति० — अ, आ
[15] ०मवसिद्धे० — अ
[16] इत्यामन्त्रणपदत्वेन — अ, आ
[17] भूयादिति — अ, आ
[18] आकरो न लभ्यते।

"संकोचे च विकासे च हंस इत्यक्षरद्वयम्।" इति।

तेन विशिष्टेनैव [1]वागात्मप्राणशक्तिद्वयज्ञानवता पुरुषेण **सदा**[2]**शिवः** सकलस्तावल्लभ्यते। [3]तस्य वागात्मनस्तदा मन्त्रेणैकरूपत्वेनैव सिद्धेः। श्रुतितोऽपि —

[4]हंसः शुचिषद्वसुरन्तरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्।" इति।

सर्वतोमुखः तु [5]निष्कलो **गुरुवक्त्रा**गमादेव कथंचित् [6]सर्वोपाधितिरस्कारद्वारेण लभ्यते। यदाहुः[7] —

आम्नायतः प्रसिद्धं च कवयोऽस्य प्रचक्षते।
[8]अभेदं पञ्चविलयद्वारेण च [9]निरूपणे॥" इति।

योगबलाद्वा **प्रत्यक्षम्** एव लभ्यते। यदुक्तम् **अनुभवस्तवे**[10] —

तं [11]विविक्तधिषणः समाधिना निश्चयोज्झित[12]निवेशनो मुनिः।
त्वामकारण[13]निवृत्तभावनो भावयत्यनुभवैरकृत्रिमैः॥ इति[14] ॥३॥

तदानीं च शरीरेऽपि तस्य प्रतिपत्तिः प्रविलीनेत्युच्यते —

तिलेषु च यथा तैलं पुष्पे [15]गन्ध इव स्थितः।
पुरुषस्तु शरीरेऽस्मिन्सबाह्याभ्यन्तरे[16] स्थितः॥४॥

[17]तदा च सकलज्ञानमपि तस्य प्रलीयत इत्युच्यते —

उल्काहस्तो यथा कश्चिद्द्रव्यमालोक्य [18]तां त्यजेत्।
[19]ज्ञानेन ज्ञेयमालोक्य तथा ज्ञानं परित्यजेत्॥५॥

ज्ञायतेऽनेनेति **ज्ञानं** सकल[20]मुच्चार्योपेयत्वात् तृणपुञ्जगृहीतज्वालावत्तदुपेयं प्राप्य त्याज्यमेव। यदाहुः[21]—

"उपादायापि ये हेयास्तानुपा[22]यान्प्रचक्षते।" इति॥५॥

---

[1] यागात्म० — अ, आ
[2] ०शिवसकल० — अ
[3] तस्या वागा० — आ
[4] तैत्तिरीयारण्यके १०.१२
[5] निष्कले. . गुरु० — आ
[6] सर्वो विधि० — अ; सर्वोविधि० — आ
[7] आकरो न लभ्यते।
[8] अभेदः पञ्च — अ, आ
[9] निरूपणम् — अ, आ
[10] मतङ्गपारमेश्वरे, विद्यापादे, तृतीयपटले १६-१७ श्लोकव्याख्यानेऽप्ययं श्लोकः 'अनुभवस्तवे' इति निर्दिश्य उदाहृतः।
[11] विविक्ता धिषवणसमा० — अ; विविक्त धीषवणसमा० — आ
[12] निवेशिते — अ; निवेशितो — आ
[13] निवृत्ति भावतो — अ, आ
[14] इतिशब्दो नास्ति — आ
[15] गन्धमिव — आ
[16] सबाह्येऽभ्यन्तरे — आ; सबाह्याभ्यन्तर०— इ, ई; सबाह्याभ्यन्तरः — उ; स बाह्याभ्यन्तरे — मु
[17] तदाथ सकल० — अ; तदाव सकल० — आ
[18] तान् त्यजेत् — अ, इ
[19] ५ उत्तरार्धं नास्ति — इ
[20] ०मुच्चापायत्वात् — अ, आ
[21] आकरो न लभ्यते
[22] ०यात्प्रचक्षते — अ, आ

तत्र दृष्टान्तः —

पुष्पं तु सकलं विद्याद्[1]गन्धस्तस्य तु निष्कलः ।
[2]वृक्षं तु सकलं [3]विद्याच्छाया तस्य तु निष्कला ॥६॥
[4]सकले निष्कलो भावः सर्वत्रैव व्यवस्थितः ।
उपायः सकलस्तद्व[5]दुपेयश्चैव निष्कलः ॥७॥

[6]इत्यर्था लोकसिद्धा एव ॥६–७ ॥

यथा चैतत् —

सकले [7]सकलो भावो निष्कले निष्कलस्तथा ।

सकले अप्युपाये सकलान्तरमुपायः, **निष्कले** अपि कदाचिन्निष्कलान्तरं भवतीति ॥

तथा हि —

त्रिमात्रश्च द्विमात्रश्च एकमात्रस्तथैव च ॥८॥
अर्धमात्रा परा सूक्ष्मा तस्या ऊर्ध्वं [8]परात्परम् ।

सार्धषण्मात्रः सकल[9]प्रासाद उच्चार्यमाणक्रमे निष्कलीभवद्ध्वनिमात्रावशेष एव संवेद्यते। ततः परं [10]तच्छुद्धसंविदुदयात् [11]**परात्परम्** एवेति ॥

[12]न केवलं मात्राक्रमेण। यावत्कारणपरित्यागक्रमेणाप्यस्य सकलनिष्कलभाव उच्यते —

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरः शिव एव च ॥९॥
पञ्चधा पञ्चदैवत्यः सकलः परिपठ्यते ।

तत्र —

ब्रह्मणो [13]हृदयं स्थानं कण्ठे विष्णुः समाश्रितः ॥१०॥
तालुमध्ये स्थितो रुद्रो ललाटस्थो महेश्वरः ।
[14]नादान्ते तु शिवं विद्या[15]त्तस्यान्ते तु परं पदम् ॥११॥
[16]परस्मात्तु परं नास्ति इति शास्त्रस्य निश्चयः ।

---

[1] गन्धस्तु तदनु निष्कलः — अ
[2] प्रत्यक्षं तु सकलं — अ; षष्ठश्लोकस्योत्तरार्धं मुद्रिते न दृश्यते।
[3] विद्या देव या तस्य निष्कला — अ, आ
[4] निष्कला सकलो — अ, आ; सकलो सकलो — इ, उ
[5] ०दुपायश्चैव — इ, उ
[6] इत्यर्थाल्लोक० — अ, आ
[7] सकलाभावो — अ
[8] परापरम् — आ
[9] ०प्रासादोच्चार्य० — अ
[10] चच्छुद्ध० — अ
[11] परतामेवेति — अ
[12] ना केवलमात्रा० — आ
[13] हृदयस्थानं — आ, उ
[14] नासाग्रे तु — इ, ई, उ, म्
[15] ०त्तस्याग्रे तु — उ
[16] परस्तात्तु — अ, आ

एतानि स्थानानि क्रमेणान्यत्र जाग्रत्स्वप्नसुषुप्तितुर्यतुर्यातीतपदान्युच्यन्त इति। प्रासादस्य सकलस्योच्चारणे [1]एतत्पञ्चस्थानस्पर्शनं [2]सिद्धमेवेति [3]कपीठे भवतश्च [4]तस्य गमागमौ, [5]तद्-द्वादशान्ते तु शुद्धसंविदुदये प्राप्ते [6]परप्राप्तिहेतुकं तत्र ज्ञानम्[7]॥

अत्रैव प्रश्नः —

[8]गमागमः[9] कथं तस्य केन वा [10]नीयते तु सः ॥१२॥
संशयो मे महादेव कथयस्व यथार्थतः।

पूर्वं ह्यन्तश्चक्रदले[11] —

"पुर्यष्टक[12]समायुक्तो ह्यधश्चोर्ध्वं स गच्छति"

इत्युक्तम्[13]। अधुना तु निष्कलसंवित्पदे द्वादशान्ते व्यपदिश्य तस्य पुर्यष्टकस्य गमागमोऽभ्युपगन्तव्यः। अन्यथा तदुपायं विना [14]तत्संवित्त्यनुपपत्तेः। विज्ञानकेवलाद्यवस्थायामिव [15]गमागमे च [16]तस्यास्मिञ्शरीरे कार्य[17]कारणवियोगा[18]दन्त्यावस्थायामिव पञ्चत्वप्रसङ्ग इति पुनरागमोऽस्मिञ्शरीरे तस्य कथमिति प्रश्नः। **केन** असौ [19]**नीयते** बाह्य इव यस्य स्वात्मनो येन सामर्थ्यासंभवादिति द्वितीयप्रश्नः॥

अत्र सिद्धान्तः —

[20]शक्तया तु नीयते जीवस्तस्मिन्प्राप्य निवर्तते ॥१३॥

क्रियाशक्त्यैवासौ नौः पुरुषेणैव **नीयते**। [21]ततश्च द्वादशान्तं **प्राप्य** पुनः **निवर्तते**। इत्येतच्चानुभवसिद्धमित्युक्तम् **अस्माभिरन्यत्र**[22] —

"बाह्येन्द्रियेषु [23]मनोबलात्प्रवृत्तिः, मनसस्तु [24]प्रवृत्तिर्या सा स्ववेद्यात्मकर्तृका" इति॥१३॥

---

[1] पतत्पञ्च — अ, आ
[2] सिद्ध एवेति — अ, आ
[3] कपीठभवतश्च — अ, आ
[4] तस्यागमो — अ; तस्य गमो — आ
[5] तद् द्वादशान्तं तु शुद्धसंविदुदयः — अ; ता द्वादशान्तु संविदुदय० — आ
[6] वरदप्राप्ति० — अ, आ
[7] तत्र ज्ञाप्यत इति — आ
[8] 'गमागमः' इत्यतः पूर्वं 'कार्तिकेयः' इत्यधिकम् — इ, ई, उ, मु
[9] समागमः — उ
[10] नियते — अ
[11] ०तले — आ; सार्धत्रि० १०.१६ वृतौ।
[12] ०समायोगादधश्चोर्ध्वं — अ, आ
[13] सार्धत्रि० १७.४ पू०
[14] तस्य संविदित्यनु० — आ
[15] 'गमा' इति नास्ति — अ
[16] तस्यास्मिंश्चिरकार्य० — अ
[17] ०कारणयोगाद्यन्यायावस्थामिव — अ
[18] ०दन्यायावस्थायामिव — आ
[19] नियतबाह्य० — अ
[20] 'शक्त्या' इत्यतः पूर्वं 'ईश्वरः' इत्यधिकम् — इ, ई, उ, मु; शक्त्यानुमीयते — इ, ई, उ
[21] तच्च — अ, आ
[22] आकरो न लभ्यते।
[23] मनो . . . मनस्तु — अ; मनो बला मनस्तु — आ
[24] प्रवृत्तिव्यासस्व० — अ, आ

[1]अन्त्यावस्था —

[2]अस्यान्तं ते प्रवक्ष्यामि शृणु षण्मुख तत्त्वतः ।
देहातीतं तु [3]तद्विद्यान्नासा[4]ग्रे द्वादशाङ्गुलम् ॥१४॥
तदन्तं तद्विजानीयात्तत्रस्थो व्यापयेत्प्रभुः ।

यत्तद्द्वा[5]दशान्तं तद् एव अन्तं निष्कलशिवस्थानं, [6]तत्रस्थसंविदेव भवतीति चोक्तमेव[7] ॥

अतश्च —

[8]मनोऽप्यन्यत्र निक्षिप्तं चक्षुरन्यत्र [9]पातितम् ॥१५॥
तथापि योगिनां योगो [10]ह्यविच्छिन्नः प्रवर्तते ।

यद्यपि कार्यकारणानि तैः अन्यत्र स्वविषय एव क्षिप्तानि, तथा[पि] तेषां प्रासादशिवज्ञानिनां स व्यापकात्मप्रतिपत्ति[11]योगोऽभ्यासत [12]एवाव्युच्छिन्नः प्रवर्तते । तदिदमाहुः[13] —
"वसन्विषयमध्येऽपि न वसत्येव बुद्धिमान् ।" इति ॥

अत एव —

[14]एतत्तत्परमं [15]गुह्यमेतत्तत्परमाक्षरम् ॥१६॥
नातः परतरं किंचिन्नातः [16]परतरं [17]शिवम् ।
नातः परतरं ज्ञानमित्याह भगवाञ्शिवः ॥१७॥

परमेश्वरेणैतानि [18]सूत्राण्युक्तानि न मयेत्यर्थः ॥१६–१७॥

[19]शिवज्ञानामृतं प्राप्यं संक्षेपान्न तु विस्तरात् ।
[20]कथितो देवदेवेन परमाक्षरनिर्णयः ॥१८॥

---

[1] अन्त्यवस्था — अ, आ
[2] 'अस्यान्तं' इत्यारभ्य 'विद्यान्नासा' इत्यन्तं नास्ति — अ, आ
[3] तं विद्या० — इ, ई
[4] ०ग्रद्वादशा० — अ; ०ग्रं द्वादशा० — आ
[5] ०दशान्ता वेदना दान्तन्तदेवान्तं — अ
[6] तथा संविदेव — अ
[7] सार्धत्रि० २३. २, ३ वृत्तौ ।
[8] मनश्चान्यत्र — इ, ई, उ, मु
[9] पतितम् — अ, मु; पादितम् — उ
[10] ह्यवच्छिन्नः — इ; ह्युच्छिन्नः — ई; ह्यु . . . छन्नः — उ
[11] ०योगाभ्यासत — अ, आ
[12] एव व्युच्छिन्नः — अ, आ
[13] महाभारते १२.३०४.६
[14] . . . तत्तत्परमं — अ; च तत्परमं — आ
[15] दिव्यमेतत्तत् — इ, उ, मु; दिव्यमेतत्तु — ई
[16] परतरः — मु
[17] शिवः — इ, मु
[18] सूत्राण्युत्क्रमाणि मये० — अ
[19] शिवंज्ञानामृतं प्राप्य — अ; शिवज्ञानामृतं प्राप्य — आ
[20] कथिता देव — अ

न केवलमेतद् **ज्ञानामृत**[1]**प्रकरणम्** तेनात्रोपायत्वेन **प्राप्यं** अधिगम्यं सुसंक्षेपतः कथितं यावत् **प्रासादनिर्णयप्रकरणमपि** [2]प्रागुक्तमिति ॥१८॥

अत एव —

[3]एतत्ते शिव[4]सद्भावं शिववक्त्राद्धि[5]निःसृतम् ।
गुह्याद्गुह्य[6]तमं गुह्यं [7]गूहनीयं प्रयत्नतः ॥१९॥
[8]नाशिष्याय प्रदातव्यं [9]नापुत्राय कदाचन ।
गुरुदेवाग्निभक्ताय नित्यं [10]मुक्तिरताय च ॥२०॥
प्रदातव्यमिदं शास्त्रं नेतरेभ्यः प्रदापयेत् ।
दातास्य नरकं याति [11]सिध्येच्च न कदाचन ॥२१॥

त्वयाप्येतत्परमशिवोक्त[12]मतितमां गोप्यमिति ॥१९–२१॥

यतः —

शिवामृतं मया ख्यातं सत्यं सत्यमिदं तव ।
एवं ज्ञात्वा तु मेधावी विचरेत्तु यथासुखम् ॥२२॥

एतत् **शिवामृतमेवं ज्ञात्वा** इति, अस्य [13]ज्ञानी जीवन्मुक्त एवेति ॥२२॥

तथा —

गृहस्थो ब्रह्म[14]चारी च [15]वानप्रस्थोऽथ [16]भैक्षुकः ।
यत्र यत्र स्थितो ज्ञानी परमाक्षर[17]वित्सदा ॥२३॥
विषयी विषयासक्तो याति [18]देहान्तके शिवम् ।

---

[1] प्रकरणमेतत्तेना० — अ, आ
[2] सार्धत्रि० द्वादशतमं प्रकरणम् ।
[3] एत ते शिवसद्भावः — इ
[4] सद्भावः गुह्यं शिववक्त्राद् — मु
[5] ०निस्सृतः — इ, मु
[6] ०तरं गुह्यं — इ, ई, उ, मु
[7] गृहीतव्य — अ
[8] नाशिष्टाय — अ, मु
[9] न पुत्राय — मु
[10] भक्ति० — इ, ई, उ
[11] विद्यते न कदाचन — इ; विद्धयते न कदाचन — ई; विध्यते न कदाचन — उ; सिध्यति न कदाचन — मु
[12] ०मिति तमां गोप्य० — अ; ०मिततरमां गोप्य० — आ
[13] ज्ञान जीवशक्त — अ; ज्ञानजीवन्मुक्त — आ
[14] ०चारीति — अ
[15] वनप्रस्थोऽथ — मु
[16] मैक्षकः — आ; भिक्षुकः — इ, ई, उ
[17] ०संविदा — अ, आ
[18] देहान्तरे — अ, आ, इ, ई, उ; देहान्तिके — मु; 'शरीरस्यान्ते' इति व्याख्यानुरोधेन 'देहान्तके' इति मूलं शोधितम्; कप्रत्ययः स्वार्थे

ज्ञानादेवास्य शास्त्रस्य सर्वावस्थोऽपि [1]मानवः ॥२४॥
ब्रह्म[2]हत्याश्व[3]मेधाद्यैः पुण्यपापैर्न लिप्यते ।

आश्रमचतुष्टययुक्तेषु यः प्रासादाक्षरविच्छिवामृतज्ञानी चोक्तः, समयादिभेदेन सर्वावस्थायुक्तोऽपि सर्वकर्मफलं त्यक्त्वा **शिवम्** एव शरीरस्यान्ते **याति** इति ॥

परत एवावस्थाप्रसङ्गेनाचार्यभेदकथनम् —

चोदको बोधकश्चैव [4]मोक्षदश्च परः स्मृतः ॥२६॥
[5]इत्येवं त्रिविधो ज्ञेय आचार्यस्तु महीतले ।
चोदको [6]दर्शयेन्मार्गं [7]बोधकः स्थानमादिशेत् ॥
[8]मोक्षदस्तु परं तत्त्वं [9]यज्ज्ञात्वामृतमश्नुते ॥२५॥

[**चोदकः**] मार्गप्रदर्शकोऽपि कल्याणमित्रादि[10]राचार्यो मन्तव्यः । **बोधकस्तु** [11]व्याख्येयगुरुः । **मोक्षदस्तु** दीक्षाकर्तेति ॥२६॥

इति [भट्टनारायणकण्ठात्मजभट्टरामकण्ठविरचितायां श्रीमत्सार्धत्रिशति-]
कालोत्तरवृत्तौ ज्ञानामृतप्रकरणं त्रयोविंशतितमं[12] [समाप्तम्] ॥

इति त्रयोविंशः पटलः

---

[1] मानव — अ
[2] ०हत्त्यश्वमेधा० — आ, मु
[3] ०मेधादैः — अ
[4] खमोक्षश्च परमः स्मृतः — अ; मोक्षदश्च परमः स्मृतः — आ
[5] इत्येषु त्रिविधो . . . आचार्य० — अ; इत्येवं विधो ज्ञेय आचार्य० — आ; इत्येष त्रिविधो ज्ञेय — मु
[6] दर्शनं मार्गं — अ, आ
[7] बोधकस्थान० — अ; बोधकःस्थन० — इ
[8] मोक्षदश्च परं — इ, ई, उ, मु
[9] यं ज्ञात्वा — अ, आ
[10] ०रा . . . यद्वक्तव्यः — आ
[11] व्याख्यो गुरुः — आ
[12] ०विंशतिः — अ

चतुर्विंशः पटलः

प्रत्यक्षयजनप्रकरणम्

अथ किमेषां प्रासादाक्षरज्ञानिनां परमेश्वरयजनं [1]कर्तव्यम्। किं तत्[2] —

प्रत्यक्षयजनं वक्ष्ये संक्षेपान्न तु विस्तरात्।
येनेष्ट्वा ते नरा यान्ति शाश्वतं पदमव्ययम् ॥१॥
[3]स्वयमेव [4]तु तं [5]पश्येद्देवं बिन्दुं चतुष्कलम्।

[6]यस्तत्र **स्वयमेव तु पश्येद्**[7]**देवं चतुष्कलम्** आदौ ताव[8]त्प्रागुक्तं [9]परमं वाक्शक्ति[10]कुण्डलिन्या व्यक्तं रूपम्। अत एव च तस्य निवृत्त्याद्याः [कलाः] [11]प्रागुक्ताः। तथा यस्य कलाभूतं तद्द्वारे[12]णाभ्यासक्रमेण साक्षात्कुर्वन्। न चाशक्यं साक्षात्कर्तुं तत्तस्य [13]यत्नतः॥

[14]अयने द्वे च विषुवत्सदा [15]पश्यति मार्गवित् ॥२॥

असौ [16]ज्ञानी [17]पूर्वोक्तमिडादिनाडीत्रयमेवं **सदा** [18]**पश्यति** एवेति ॥२॥

ततोऽनन्तरम् —

कृत्वायामं पुरा वत्स कुम्भपूरकरेचकम्।
पूर्वं चोभयमुच्चार्य अर्चयेच्च यथाक्रमम् ॥३॥
[19]नमस्कारेण [20]योज्यान्ते [21]मूर्ध्न आरभ्य [22]चार्चयेत्।

---

[1] कर्तव्यत्वम् — अ
[2] किं तु — अ, आ
[3] इदमर्धं नास्ति — अ
[4] कृतं पश्येद्देहे बिन्दुं — ई
[5] पश्येद्देवबिन्दुं — उ; पश्येद्देहे बिन्दुं — मु
[6] य तत्र स्वय० — अ; यन्तत्र स्वय० — आ
[7] देहे चतु० — अ, आ
[8] ०त्प्रागुक्तपरमां – अ; सार्धत्रि० १. ११ वृतौ।
[9] परमा — आ
[10] कुण्डल्या — अ; कुण्डस्याक्तरूपकम् — आ
[11] सार्धत्रि० २२. ८, ९ वृतौ।
[12] ०णोभ्यास० — अ
[13] यतः — आ
[14] अनेन द्वेविषिवत् — अ; अनेन द्वे व विषुवत् — आ; 'अयने द्वे च विषुवत्' इति तृतीयः पादो लुप्तः 'इ, ई, उ' मातृकासु। ; द्वे विषुवत् . . सदा — मु
[15] पश्यन्ति — इ, ई, उ
[16] ज्ञा . . . ति पूर्वोक्त० — अ
[17] सार्धत्रि० ११. ६, ७
[18] पश्यन्ति — अ
[19] नमस्कारेणेति प्रकृति योगान्ते — अ, आ; नमः प्रकृति योगान्ते — मु
[20] यागोक्ते — इ, ई, उ
[21] मूर्ध्नि आरभ्य — अ, आ, मु
[22] वार्चयेत् — इ, ई, उ

कुम्भकादिभेदभिन्नं प्राणायामं **कृत्वा**, **पूर्वं** प्रणवं प्रासादाक्षरं [1]नमस्कारम् **अन्ते च उच्चार्य** प्रत्यक्षीभूतबिन्दु[2]रूपं परमेश्वरम् **अर्चयेद्** असौ ज्ञानी [3]**मूर्ध्नः** प्रभृत्यर्चनाप्रकरणोक्तक्रमेणेति प्रकृति-[4]प्राप्तानुवादः। यदुक्तं तत्र —

[5]"ईशानाद्यास्तु [6]सद्यान्तं मूर्ध्न आरभ्य विन्यसेत्।" इति।

यथाक्रमवचनादेष प्रणवादिप्रयोगस्तत्रापि संबध्यत इति दर्शितम्[7]॥

[8]ततश्च —

सूर्यस्य ग्रहणे वत्स प्रत्यक्षयजनं स्मृतम्॥४॥

बहिर्द्वादशान्ते। यदुक्तम् —

[9]"देहातीतं तु तं विद्यादादित्यग्रहणं बुधः।" इति।

[10]तत्रापि नादशक्तीनां [11]परिक्षयान्निष्कलः स बिन्दूदयोऽस्य [12]ज्ञानिनो जायत इत्युक्तम् — [13]"तस्यान्ते तु परं पदम्" इति॥४॥

इति [भट्टनारायणकण्ठात्मजभट्टरामकण्ठविरचितायां श्रीमत्सार्धत्रिशति-] कालोत्तरवृत्तौ प्रत्यक्षयजनप्रकरणं [14]चतुर्विंशतितमम् [समाप्तम्]॥

इति चतुर्विंशः पटलः

---

[1] नमस्कारं नमस्कारम् — अ
[2] ०रूपकं पर० — आ
[3] मूर्ध्नि प्रभृ० — अ
[4] ०व्याप्तानुपादा — अ
[5] सार्धत्रि० २.१० उ०
[6] सद्यन्ता मूर्ध्यारभ्य — अ
[7] सार्धत्रि० १.१४ वृत्तौ।
[8] तदुक्तम् — आ
[9] सार्धत्रि० ११.९ उ०
[10] तत्राभिनाद० — अ, आ
[11] परिक्षया निष्कलं — अ; परीक्षया निष्कलं — आ
[12] ज्ञातिनो ज्ञायत — अ
[13] सार्धत्रि० २३.११ उ०; तस्यान्ते परमं पदम् — अ, आ
[14] चतुर्विंशतिः — अ

पञ्चविंशः पटलः

लिङ्गोद्धारप्रकरणम्

गृहस्था[1]द्याश्रमिषु मध्याज्ज्ञानिनां च [2]तद्विधानामुक्त[3]नैष्ठिकेषु [4]भैक्षुकवानप्रस्थेषु परिगृहीत[5]जटादि-लिङ्गेष्वकस्मात् केषां[6]चिदज्ञानिनां विषयभोगगर्भोत्पत्तौ तल्लिङ्गाश्रमपरित्यागाय प्रायश्चित्तविधिः—

लिङ्गोद्धारं प्रवक्ष्यामि नैष्ठिकानां तु षण्मुख ।

कथमित्युच्यते —

पञ्च[7]रात्रं त्रिरात्रं वा क्षपयित्वाधिवासयेत् ॥१॥
पूर्वोक्तं तु विधिं कृत्वा संन्यासं परिवर्तयेत् ।

यथाशक्ति तमुपोष्य अधिवासं [8]गुरुः कारयेत्। ततश्च [9]**पूर्वोक्तं** मण्डल[10]**विधिं कृत्वा**, तेन [11]योऽसौ विषयेन्द्रियान्तःकरणादीनां वाक्[12]शक्तेश्च [13]**संन्यासः** [14]प्राक् कृतः, तं **परिवर्तयेत्**[15] ॥

अन्यथा —

समयो[16]ल्लङ्घनात्प्रोक्तं [17]क्रव्यादत्वं शतं समाः ॥२॥

[18]तस्य यतः ॥२॥

कथं परिवर्तयेदित्युच्यते —

[19]योनिचक्रं न्यसेत्तत्र विधिदृष्टेन कर्मणा ।
अष्टारं [20]चक्रमालिख्य नाभिनेमि[21]समन्वितम् ॥३॥

---

[1] ०द्याश्रमिमध्या० — अ,
[2] तद्विधामुक्त० — अ; तद्विधानमुक्त० —आ
[3] ०नैष्टिकेष्टिकेषु — अ, आ
[4] भैक्षक० — आ
[5] ०जलादि० — अ, आ
[6] ०चिदाज्ञानिनां — आ
[7] ०रात्रत्रिरात्रं — आ
[8] गुरुकार्यात् — अ, आ
[9] पूर्वोक्तमण्डल० — अ, आ
[10] ०विधिः। कृत्वा — आ
[11] विषयोऽसौ — अ, आ
[12] ०शक्त्यै च — आ
[13] सत्यागः — अ
[14] प्राकृतस्तं — अ, आ
[15] ०वर्तयेदिति — आ
[16] ०ल्लघ्नात्प्रोक्तं — अ; लङ्घनं प्रोक्तं—उ
[17] वक्रन्यादत्वशक्तं — अ
[18] तस्या यतः — अ, आ
[19] 'योनिचक्रं' इत्यारभ्य 'अष्टारं च' इत्यन्तं नास्ति — इ
[20] च क्रमालिख्य — उ
[21] ०समन्वितः — इ

तस्मि[1]न्नष्टारे चक्रे नाभियुक्ते लिखिते [2]पदाध्व**विधिदृष्टेन कर्मणा** [3]संन्यस्तविषयादि[4]योनीनां विद्यामायाकलाव्यक्त[5]गुणबुद्धचहंकारतन्मात्राणामष्टानां **चक्रं** [6]प्राक् प्रदर्शितं तदधिष्ठातृद्वारेण विन्यसेत्। नाभौ तु तदीशा[7]वृतेश्वरत्वेन [8]विद्येश्वरानिति ॥३॥

ततश्च —

[9]विपरीतं [10]योजयित्वा [11]जनयेत्तत्र नैष्ठिकम्।
[12]पञ्चपञ्चाहुती[13]र्दत्त्वा अरकेषु यथाक्रमम् ॥४॥
हृन्मन्त्रेण तु तं दद्यात्संहारेण तु बुद्धिमान्।

तत्संन्यासविपरीतस्य भौतिकस्यैव समयानुष्ठानं **योजयित्वा अरकेषु** [14]विद्यादियोनीनां क्रमेण तदीश्व[15]रश्रावणाय **हृन्मन्त्रेण** सपाशुपतेनाहुतिपञ्चकं **दत्त्वा तत्र** प्रायश्चित्तवियुक्तमेव **तं नैष्ठिकं** भौतिकमिव **जनयेत्** ॥

एवं कृत्वा यथा[16]पूर्वं [17]जनयेदत्र नैष्ठिकम् ॥५॥

ततश्चात्र भूलोके भूयो यथा अन्यस्त[18]तत्कर्मा भौतिकोऽसावभूत् तथैव [19]**तं जनयेत्** प्रायश्चित्तवियुक्तमिति ॥५॥

तदेवम् —

[20]इष्टिं सांहारिकीं स्कन्द कुर्याद्वै नैष्ठिकस्य तु।

इमाम् **इष्टिं** [21]जटादिलिङ्ग[22]**सांहारिकीं** तस्य **कुर्यात्** ॥

---

[1] ०न्नष्टाक्षरे नाभि० — अ; ०न्नष्टाक्षरे चक्रे नाभि० — आ
[2] पादाध्व० — अ, आ
[3] विन्यस्त० — अ
[4] ०योनिनां — अ, आ
[5] 'गुण' इति नास्ति — अ
[6] सार्धत्रि० १७.४ उ०, ५ पू० वृत्तौ।
[7] ०वृतेश्वरतत्त्वेन — आ
[8] विद्वेश्वरानीति — अ; विद्येश्वरेशानीति — आ
[9] विकृतं योज० — अ; विवकृतं योज० — आ
[10] योजयित्वा तु जनये० — ई
[11] जनयेदत्र — अ, आ; 'जनयेत्त' इत्यनन्तरं 'हृन्मन्त्रेण' इत्येव दृश्यते 'इ' मातृकायाम्। मध्ये ग्रन्थपातः।
[12] पञ्च पूर्णाहुती० — अ, आ, मु
[13] ०र्दद्यादरकेषु — ई; ०र्दद्यादारकेषु — उ
[14] विद्यायोनिनां — अ; विद्यायोनीनां — आ
[15] ०राश्रवणाय — अ, आ
[16] 'पूर्वं जनयेदत्र नैष्ठिकम्' इत्ययं भागो लुप्तः 'इ' मातृकायाम्।
[17] जनयेत्तत्र — ई, उ
[18] सत्कर्म० — आ
[19] तज्जनयेत् — अ
[20] इष्टं संहारकं स्कन्दं — अ; इष्टं संहारकं स्कन्द — आ, मु; 'इष्टिं सांहारिकीं स्कन्द कुर्या' इत्येतल्लुप्तं 'इ' मातृकायाम्।; य... सांहारिकीं स्कन्द — उ
[21] जगदादि० — अ
[22] ०संहारिकं — अ; ०सांहारिकं — आ

ततोऽनन्तरस्य —

सृष्टिसंहार[1]न्यायेन इष्ट्वा सिध्यति [2]नैष्ठिकः ॥
[3]आसक्तो [4]विषयेष्वेव कर्मदोषैर्न लिप्यते ॥६॥

सोऽपि प्रत्यहं **सृष्टिसंहार**क्रमेण मण्डलविधिना परमेश्वरं यजेत्। एवं हि विषया[5]सक्तोऽपि न तैर्बाध्यते। अनन्तरमेवोपभुज्यत इति ॥६॥

इति [भट्टनारायणकण्ठात्मजभट्टरामकण्ठविरचितायां श्रीमत्सार्धत्रिशति-]
कालोत्तरवृत्तौ लिङ्गोद्धारप्रकरणं [6]पञ्चविंशतितमं [समाप्तम्] ॥

इति पञ्चविंशः पटलः

---

[1] ०न्यासेन — अ, आ
[2] नैष्ठिकम् — उ
[3] असक्तो — अ; इदमर्धं लुप्तम् 'इ' मातृकायाम्।
[4] विषये नैव — अ; विषये चैव — ई, उ; विषयेनैव — मु
[5] ०सक्तो विना तै० — अ
[6] पञ्चविंशतिः — अ

षड्विंशः पटलः

अन्त्येष्टिप्रकरणम्

अथ प्रायश्चित्तप्रसङ्गेन —

अन्त्येष्टिं संप्रवक्ष्यामि [1]यथावदनुपूर्वशः ।
शिवाग्निं जनयित्वा तु [2]शिवं पश्चाद्विशोधयेत् ॥१॥
[3]मृद्गोमयाद्यैः संशोध्य भस्मस्नानं यथा [4]पुरा ।
[5]वस्त्रपुष्पैरलंकृत्य अस्त्रबीजेन शोधयेत् ॥२॥
[6]इष्टिं सांहारिकीं कृत्वा [7]उदक्पादं निवेशयेत् ।
दर्भास्तरं[8] पुरा कृत्वा [9]अस्त्रं विन्यस्य सर्वतः ॥३॥
अस्त्रेण [10]ज्वालयेदग्निं समन्तात्सुसमाहितः ।
[11]चन्दनागरुकाष्ठैश्च तिलैश्चाज्यसमन्वितैः ॥४॥
[12]वित्तवतां च [13]तत्[14]सर्वमितरेषां तदिच्छया ।
[15]आग्नेयधारणां ध्यात्वा दहेदस्त्रेण मन्त्रवित् ॥५॥
[16]चितश्चित्तस्य संयोगाद्[17]ग्रहणं पूर्ववद्भवेत् ।

प्रागुक्तेन क्रमेणैव शिवमिष्ट्वा, **शिवाग्निं** जनयित्वा, ततस्तं [18]भगवन्तं सुमृद्गोमयजलैः प्राग्वद्भस्मना च स्नापयित्वा, **वस्त्रपुष्पादिभिः अलंकृत्य** अस्त्रेण संप्रोक्ष्य, दर्भोपरि [19]**उदक्पादं निवेशयेत्**। ततोऽग्नौ **इष्टिं** [20]**सांहारिकीं** प्राग्वत्कृत्वा, **चितः** आत्मनस्तदीयस्य **चित्तस्य** चान्तः-[21]करण**संयोगाद् ग्रहणं** पूर्ववत्कृत्वा, चितौ दर्भेणास्त्रेणास्तीर्य, [22]तेनैतमुदक्शिरसं सामान्यशास्त्रप्र-

---

[1] प्रथमश्लोकस्य द्वितीयतृतीयचतुर्थपादाः लुप्ताः 'इ' मातृकायाम् ।

[2] शवं — उ

[3] मृद्गोमयेन — अ, आ, मु

[4] 'पुरा' इत्यारभ्य 'इष्टिं सांहारिकीं कृत्वा' इत्यन्तो भागो लुप्तः 'इ' मातृकायाम् ।; पुरम् — मु

[5] गन्धपुष्पैः० — अ, आ, मु

[6] इष्टिसंहारिकीं — अ, आ; इति सां० — ई, उ; इष्टिं संहारिकीं — मु

[7] उत्पातं—इ; उदक्पातं—ई; उदक्पात्रं—उ

[8] दर्भास्तरणं — इ

[9] 'अस्त्रं' इत्यारभ्य 'चन्दना' इत्यन्तो भागो लुप्तः 'इ' मातृकायाम् ।

[10] ज्वलयेदग्निं — मु

[11] चन्दनागुरु० — मु

[12] वित्तवस्तु च — अ, आ

[13] यत् — इ

[14] 'सर्वं' इत्यारभ्य 'दहेदस्त्रेण' इत्यन्तो भागो 'इ' मातृकायां लुप्तः ।

[15] आग्नेयीं धारणां – अ, ई, उ

[16] चितेद्वस्त्रस्य — अ; चिते चित्तस्य — आ; पितुश्चित्तस्य — इ; वितुश्चित्तस्य — ई, उ

[17] ०ग्रहणा पूर्व० — आ

[18] भगवता सा मृद्गोमय० — आ

[19] उपान्युदक्पाद — अ; उपान्त्युदक्पादं — आ

[20] संहारिकीं — अ

[21] ०करणं तस्य संयोगाद् — आ

[22] तेनैदमुदक्० — आ

सिद्धया[1] तत्र निवेश्य, आग्नेय[2]धारणया **अस्त्रेण** तत्र समन्ताद् [3]अग्निं **चन्दनागरुकाष्ठैः** अभिज्वालयेद् **वित्तवताम्**। **इतरेषां** तु यथासंभवं काष्ठादिनैव। [4]ततोऽस्त्रपटं दग्ध्वा भगवन्तं विसृज्य स्नायात्। यदुक्तं श्रीमत्**स्वायंभुवे**[5] —

"स्नात्वोदकं [6]ततो दत्त्वा पुनः स्नात्वा शिवं जपेत्।
[7]सद्यादिनेत्रपर्यन्तं शावकर्मवि[8]शुद्धये॥" इति॥

[9]दीक्षातस्तूत्तरे काले [10]समयांस्तु न लङ्घयेत्॥६॥
[11]देवस्य च गुरूणां च महापातकभाग्भवेत्।
अमुक्तसंशया[12] ये च [13]ये चान्ये [14]समलात्मकाः॥७॥
[15]तेषां पापापनोदार्थं[16]मन्त्येष्टिर्विहिता गुह।
स्वसंज्ञालयमाप्नोति समयाद्येषु [17]लङ्घनात्॥८॥

दीक्षातः [18]पूर्वं तयैव क्षपितत्वात् तदुत्तरकालं ये देवगुरुसंबन्धिनः शास्त्र[19]विहिता नित्यानुष्ठानादयः, तान् लङ्घयन्ति प्रमादादाचार्यादयः, ये च समस्तसंशयच्छेदहेतोः शास्त्रस्याश्रवणात् संदेहेनापि तानवश्यं परि[20]पालयन्ति पुत्रकादयः, येऽपि चापरिक्षीणभोगाधिकारमलाः साधकास्तेषामेव शुद्ध्यर्थमियं प्रायश्चित्तेष्टिरिति। न तु समलानामकृतदीक्षाणामिति व्याख्येयम्। दीक्षातोऽनन्तरमिति विरोधात्। अनया चेष्टया **समयाद्येषु** प्रायश्चित्तोपलङ्घनाद्धेतोः **स्वसंज्ञया** च स्वप्रत्ययेन परमेश्वरेण **लयं** दीक्षाफलं प्राप्नोतीति॥ ६-७॥

इति [भट्टनारायणकण्ठात्मजभट्टरामकण्ठविरचितायां श्रीमत्सार्धत्रिशति-]
कालोत्तरवृत्तौ[21]अन्त्येष्टिप्रकरणं षड्विंशतितमं [समाप्तम्]॥

इति षड्विंशः पटलः

---

[1] ०प्रसिद्धा — अ
[2] ०धारणायास्त्रेण — अ
[3] अग्नीन्धनकाष्ठैर..भि० — अ; अग्निमि... दिभि० — आ
[4] ततोऽस्त्रं पटं — अ
[5] स्वायंभुवे — ३१.१५
[6] पुरा कृत्वा न गदित्वा पुनः — अ; पुरा कृत्वा नदीं गत्वा पुनः — आ
[7] 'सद्यादि' इति नास्ति — अ, आ
[8] ०शुद्धयः — अ, आ
[9] 'दीक्षा' इत्यनन्तरं 'गुरूणां च' इत्येव दृश्यते 'इ' मातृकायाम्।; दीक्षितास्तूत्तरे काले—मु
[10] समयं तु—अ, मु; समयान्यस्तु लङ्घयेत्—ई, उ
[11] देवस्य गुणां च महापातकं भवेत् — अ; देवस्य च गुणां च महा० — आ; देवस्य गुरुणां च यो महा० — मु
[12] ०संशयां — इ
[13] 'ये चा' इत्यनन्तरं 'ष्टिर्विहिता' इत्येव दृश्यते। मध्यभागो लुप्तः 'इ' मातृकायाम्
[14] समकालात्मकाः — अ
[15] तेषां पा..पनोदार्थ० — अ; तेषां पापनोदार्थ०—आ; तेषां पाप (निरोधा) र्थ०—मु
[16] ०मन्तेष्टि० — अ
[17] लङ्घयेत् — अ, आ
[18] पूर्ववत्तयैव क्षपितत्वात्तदुक्तकालमये देव — अ; पूर्वं तथै क्षपितत्तदुत्तरकालं ये देव — आ
[19] विहिता सुधा नित्यानुष्ठ..वस्तान् — अ; विहिता सुया नित्या० — आ
[20] ०पालयति — अ
[21] अन्तेष्टि० — अ

सप्तविंशः पटलः

अस्त्रयागप्रकरणम्

[1]विघ्नोपसृष्टे चास्य साधकस्याथ —

[2]अस्त्र[3]यागमविच्छिद्रं प्रवक्ष्याम्यनुपूर्वशः।

तत्राधि[4]वासः —

[5]पूर्वोक्ते भूतले शुद्धे गोमयेनोपलेपिते ॥१॥
मन्त्रद्रव्यसमायुक्तं कलशं [6]वारिपूरितम्।
दिश्यैशान्यां स्थापये[7]त्तन्निश्छिद्रं [8]करकं परम् ॥२॥
ततः पद्मं समालिख्य स्थण्डिले वा [9]समर्चयेत्।
[10]रजःसु बहवो [11]विघ्ना [12]निर्विघ्नः स्थण्डिले गुह ॥३॥
तस्मात्सर्वप्रयत्नेन कार्योऽस्त्रस्य महात्मनः।
सर्वत्र [13]विहितः [14]शस्तः स्थण्डिले [15]याग उत्तमः ॥४॥

अथ तद्यागप्रकरणम् —

प्राकारं [16]कर्णिका पद्मं धर्म[17]ज्ञानादिरेव च।
[18]वैराग्यं च [19]तथैश्वर्यं शक्तयश्च यथाक्रमम् ॥५॥

पाशुपतास्त्रमेव शिखायुक्तं **प्राकार**मिति [20]वक्ष्यतीति [21]तेन न्यासोऽत्रेति [22]प्रकृतिप्राप्तस्येति बाधः। **शक्तयः** अत्र प्रकृतिक्रमेण प्रधानगता एव ॥५॥

---

[1] विश्वोप...वस्य—अ; विश्वोपसृष्टवस्य—आ
[2] 'इ' मातृकायां तत्र तत्र त्रुटितत्वाद्ग्रन्थपातो दृश्यते। अतः उपलब्धस्थलेषु केवलं पाठभेदो यत्र दृश्यते तस्यैव निर्देशः क्रियते।
[3] ०यागनिश्छिद्रं — ई, उ
[4] ०वासे — अ
[5] पूर्वोक्तभूतले — इ, ई, उ
[6] वायुपूरितम् — अ, आ
[7] ०त्तन्निच्छिद्रकरणं — इ, ई; ०त्तं निच्छिद्रकरणं — उ; तं निश्छिद्रकरकं — मु
[8] कटकं — अ
[9] समर्पयेत् — अ, आ, मु
[10] रजसो बहवो — अ, आ, इ
[11] वापि घनात् स्थण्डिले — अ, आ
[12] निर्विघ्नास्तण्डिले—इ; निर्विघ्ना स्थण्डिले—मु
[13] विहितं — आ; विहितशक्तेः — मु
[14] शक्तेः स्थण्डिले — अ; शस्तं स्थण्डिले — आ; शस्त्र स्थण्डिले — ई, उ
[15] यागमुत्तमम्—अ, आ, ई, उ; ... मुत्तमः—इ
[16] कर्णिका पद्मगन्धर्वो ज्ञातितादिरेवच — अ; कर्णिका पद्मगन्धर्वो ज्ञानि तादिरेव च —आ
[17] ०ज्ञानादिमेव च — इ, ई, उ, मु
[18] वैराग्यश्च — आ
[19] तथैश्वर्या — ई
[20] सार्धत्रि० २७.१६ उ०
[21] तेन स न्यासोऽथेति—अ; तेन स न्यासोतेति—आ
[22] सार्धत्रि० ५.२ उ०, ३ पू०

ततश्च —

गन्धपुष्पोपहाराद्यैर्यजेत[1] शिववत्परम्।
[2]मूर्ति कुर्वीत मतिमान्प्राकारेण[3] सुयन्त्रितः ॥६॥
अस्त्रं पाशुपतं दिव्यं स्थापयेत्कर्णिकोपरि।
अष्टत्रिंशत्कलोपेतं पुरा कृत्वा तु विन्यसेत् ॥७॥
[4]मूर्त्यस्त्रं दिक्षु विन्यस्य [5]प्राकारं विदिशां क्रमात्।
[6]दिक्षु [7]मूर्ति विदिक्ष्वस्त्रं प्राकारं सार्वहोमिकम् ॥८॥
अस्त्रबीजमिदं श्रेष्ठं [8]निश्छिद्रकरणं परम्।

[9]प्राकारेण कर्णिकायां पाशुपतमवस्थाप्यास्यां परं दिव्यं शिवास्त्रं न्यस्य अस्य दिग्दलेषु[10] पाशु[11]पतास्त्रं विदिग्दलेषु प्राकारं भोगस्थानेषु न्यस्य पूजयेत् ॥

ततश्च —

बाह्ये कुर्वीत [12]वज्रादीन् सर्वदिक्षु समन्ततः ॥९॥
वज्रं शक्तिं च दण्डं च खड्गं [13]पाशं तथाङ्कुशम्।
[14]गदां त्रिशूलं चक्रं च [15]पद्मं चैव यथाक्रमम् ॥१०॥

लोक[16]पालास्त्राणि विशेषाद्बाह्येषु पूजयेदिति लोकपालावरणस्यात्र बाधः ॥९-१०॥

न्यसेत्पाशु[17]पतास्त्रेण प्राकारेण [18]च संयुतान्।

[19]तानन्वितान् न्यसेत्; तदधि[20]ष्ठातॄनित्यर्थः ॥

---

[1] ०द्यैर्युज्येत — अ, आ
[2] मूर्ति कुर्वीत — इ
[3] प्रकारेण — अ, आ
[4] मूर्त्यस्त्रीन् दिक्षु — अ, इ, मु; मूर्ध्न्यस्त्रं दिक्षु — ई;
[5] प्रकारं — अ
[6] अष्टमश्लोकस्योत्तरार्धं नवमश्लोकस्य पूर्वार्धं च 'इ, ई, उ' मातृकासु न दृश्येते।; मुद्रिते अष्टमश्लोकस्योत्तरार्धं न दृश्यते।
[7] मिष्ट्वा तं विदि०—अ; मिष्टा भविदि०—आ
[8] निच्छिद्र० — अ, आ
[9] ०प्रकारेण — अ आ
[10] 'दिग्दलेषु' इत्यस्यानन्तरं 'पाशुपतास्त्रे' इत्यधिकम् 'अ, आ' मातृकयोः।
[11] ०पतास्त्रविदि० — अ
[12] वज्राद्या सर्व० — अ; वज्राद्यास्स . . . दिक्षु — आ
[13] पाशुपतं तथा — अ, आ, मु
[14] कुशं गदं त्रिशूलं च — अ, आ; गदा त्रिशूलं — उ; कुश गदां त्रिशूलं च — मु
[15] चक्रं पद्मं यथाक्रमम् — अ, आ मु; दशमश्लोकस्य चतुर्थपादादारभ्य विंशतितमश्लोकान्तो भागो लुप्तः 'इ' मातृकायाम्।
[16] ०पाला विशेषा० — अ, आ
[17] ०पतेनैव — अ, आ, मु
[18] समन्वितम् — अ, आ, मु
[19] तानानन्वितान्य०—अ; तानन्वितान्य०—आ
[20] ०ष्ठातानीत्यर्थः — आ

पूजने चाग्नि[1]कार्ये च [2]दिग्विभागः प्रकीर्तितः ॥११॥

प्रयुक्त एव कार्य इत्यर्थः ॥११॥

वृत्तं कुर्वीत कुण्डं तु तस्योर्ध्वं चतुरङ्गुलम् ।
[3]चतुर्नेमिसमायुक्तं हस्तमात्रं समन्ततः ॥१२॥

तस्य [4]प्रकृतिप्राप्तस्य वृत्तस्य हस्तप्रमाणस्य कुण्डस्योर्ध्वमेखला चतुरङ्गुला। अनुपातेन [5]मध्येऽधश्च द्वे अन्त्ये इत्येवं [6]चात्र प्रान्तेन सह [7]**चतुर्नेमि** तद्भवतीति ॥१२॥

ततश्च —

पूर्वे कामप्रदं वृत्तमस्त्र[8]यागे विशेषतः ।

[9]प्रकृतिप्राप्ताया दिशोऽत्राग्नेय्या बाधः ॥

स्थण्डिले वा रजः[10]पाते कुण्डं कुर्यात्सुलक्षणम् ॥१३॥

मण्डलयागे कुण्डे एव। पुष्पयागे तु स्थण्डिलेऽग्निकर्मेति ॥१३॥

शोधनं तस्य कुर्वीत [11]प्राकारेण तु षण्मुख ।

प्रकृतिप्राप्तयोरत्रास्त्रवर्मणोर्बाधः[12] ॥

[13]जननं निष्कृतिं चैव विधिं कुर्याद्यथेप्सितम् ॥१४॥

[14]यथैव कुण्डशोधन[15]मीप्सितं प्राकारेण तथैवाग्निजननादिविधिं **कुर्याद्** इति प्रकृति[16]प्राप्तस्यात्र हृदयस्य [17]बाधः ॥१४॥

---

[1] ०कार्येण — उ
[2] दिग्विभाः परिकीर्तिताः — अ, आ; पूजने दिग्विभागः सार्धत्रि० ५.५ उ० वृत्तौ; १६.८ उ०, ९ पू० मूले। अग्निकार्ये दिग्विभागः सार्धत्रि० ७.५ उ०, ६ पू०
[3] चतुर्णेमि० — अ
[4] सार्धत्रि० ७.५ उ०, ६ पू०
[5] मध्ये यश्च — अ
[6] चन्द्रप्राप्तेन — अ; चन्द्रप्रान्तेन — आ
[7] चतुर्नेमिस्तद्भ० — अ
[8] ०योगे — अ
[9] प्राकृतिप्राया० — अ; प्रायादि दिशोऽत्रा — आ; सार्धत्रि० ७.५ उ०, ६ पू०
[10] ०पादे — अ, आ, मु
[11] प्रकारेण — मु
[12] ०रत्रास्त्रवर्मणो बाधः — अ; रत्र. . .धर्मणो बाधः — आ; सार्धत्रि० ६.१ उ०
[13] न जनन्निष्कृतिं — अ
[14] अथैव — अ, आ
[15] ०मित्थं प्रकारेण — अ
[16] प्राप्तस्य हृदयस्य — अ; सार्धत्रि० ५.५ उ०
[17] 'बाधः' इति नास्ति — अ

[1]ततश्च —

[2]होमं कुर्वीत मतिमाञ्शास्त्रदृष्टेन कर्मणा।

[3]प्रकृतिप्राप्तेन संपूजितमन्त्रन्यासादिविधिनेत्यर्थः ॥

तत्रापि च [4]क्रमः —

बीजं पाशुपतं पूर्वं पश्चात्प्राकारमेव च ॥१५॥
[5]वज्राद्यांश्च ततो हुत्वा [6]भागैः पूर्वोपकल्पितैः।

बीजं शिवास्त्र[7]संख्यया हुत्वा तदङ्गानि तद्भागेनेत्युक्तं [8]प्रकृतौ ॥

[9]हुंफडा वौषडन्तेन पूर्णामन्ते प्रदापयेत् ॥१६॥

अत्रानन्तरमेव [10]प्राकारास्त्रमुद्धृत्य, [11]तस्य प्रागनुद्धृतत्वादाकाङ्क्षितत्वाच्च। तेन तु **वौषडन्तेन** पूर्णाहुतिं दद्यात् ॥१६॥

विघ्ननिवृत्त्यर्थमस्त्रयाग[12]स्योक्तरीत्या प्रागुक्त[13]मण्डलस्येव दीक्षाङ्गत्वमपि वक्तुम्। न दीक्षोपक्रमः —

[14]न्यसेत्प्राकारजां योनिं बिन्दुस्थाने विचक्षणः।

प्रकृतिं च [15]मायातत्त्वं संशोध्य **बिन्दुस्थाने** परस्मिन्वागात्मनि कुण्डलिनी[16]रूपके या [17]प्राकारास्त्रनिमित्तं जातोत्पन्ना [18]योनिर्वागीश्वरी, तां तत्रोपस्थापयेत् ॥

तत्र चाकर्षयेज्जीवं [19]प्राकारेण न संशयः ॥१७॥

---

[1] 'ततश्च' इति नास्ति — अ
[2] हौमं — अ
[3] सार्धत्रि० ६.३ उ०, ४ वृत्तौ।
[4] क्रमं — अ
[5] वज्रं वाद्यांश्च — अ
[6] भगैः — मु
[7] ०संख्या वा हुत्वा — अ
[8] प्राकृतौ — अ; सार्धत्रि० ६.४ उ० वृत्तौ।
[9] ओं भूं फड् वौष० — अ; ओं हुं फड् वौषडन्तेन — आ; ओं भुं फड् वौष० — मु
[10] प्राकारं समुद्धृत्य — अ
[11] तं प्रागनु० — अ, आ
[12] ०स्योक्त्वा प्रागुक्त० — अ
[13] ०मण्डलस्यैव — अ, आ; सप्तमप्रकरणोक्तस्य
[14] न्यसेत्प्राज्ञो योनिं — अ; मन्यसेत्प्राज्ञो मयोनिबिन्दु — आ; न्यसेत्प्राकारजं योनिं — उ; न्यसेत्प्राज्ञः तत्र योनिं — मु
[15] जायातत्त्वं — अ, आ
[16] ०रूपत्रकया — अ
[17] प्रकारोऽस्त्र० — आ
[18] योनिवागीश्वरीं० — अ
[19] प्राकरेण — अ

अधि[1]कारादिहोमे च [2]आहुतीर्द्वित्रयोदश।
शतमष्टोत्तरं पूर्णां महास्त्रेण प्रदापयेत् ॥१८॥

अत्र [3]प्रकृतिप्राप्तेषु दीक्षाकर्मसु सप्तदशसु [4]मध्यात् प्राकारास्त्रेण योन्युप[5]स्थापनादीनि नव। [शिष्टं] प्रकृतिप्राप्तेनैव [6]प्रकारेण। **अधिकारादिहोमे** [7]**द्वित्रयोदश** इति प्रकृतिप्राप्तेषु सप्तसु पाशुपतास्त्रेणाहुतिः पञ्चदश प्रत्येकमिति प्रकृति[8]प्राप्ततत्संख्यामात्राया बाधः। पाशच्छेदे तु मन्त्रानु[9]वादः। या च स्वतत्त्वाहुति[स्तत्र] शतसंख्याया बाध इति ॥१७-१८॥

अथोपसंहारः —

अस्त्रदीक्षां [10]समाप्यैवं सर्वच्छिद्रनिकृन्तनीम्।
योजनीं शिवतत्त्वे तु निर्वाण[11]करणीं पराम् ॥१९॥
[12]ततोऽभिषेचयेत्तत्र कुम्भेन प्राक्प्रकल्पिते।

[13]ततः उदकेन पूर्वोक्तकल्पितेन [14]पूर्वोक्तकल्पिते शुचौ स्थाने तथा स्नानं[15] [16]कलशेन कुर्यात् ॥

अथात्रास्य यागस्यार्थतत्त्वमपि दर्शयितुं [17]तत्फलानुवादः —

विनायक[18]ग्रहादीनि नश्यन्त्येव न संशयः ॥२०॥

इति [भट्ट]नारायणकण्ठात्मजभट्टरामकण्ठविरचितायां श्रीमत्सार्धत्रिशतिकालोत्तरवृत्तौ अस्त्रयागप्रकरणं सप्तविंशतितमं [समाप्तम्]

इति सप्तविंशः पटलः ॥
इति सार्धत्रिशतिकालोत्तरं समाप्तम्

---

[1] ०कारादि होमेषु — ई; ०कारेषु होमेषु — उ
[2] आहुती द्विस्त्रयोदश — अ; आहुतिद्वि० स्त्रयोदश — आ, उ.
[3] सार्धत्रि० ८. १५ उ०-१९ पू०
[4] ध्यानग्रहणं प्राकारा० — अ
[5] ०स्थानादीनि — अ, आ
[6] प्राकारेण — अ, आ
[7] शप्रत्यक्षो मति प्रकृति० — अ, आ
[8] ०प्राप्ते तत्संख्या० — अ, आ
[9] वा पादः — अ
[10] समाप्यैव — अ, मु; समाप्येवं — ई, उ
[11] ०करिणी पराम् — आ
[12] इदमर्धं 'अ, आ' मातृकायोर्न दृश्यते; मुद्रिते विंशतितमश्लोको नास्ति।
[13] ततोदकेन — अ, आ
[14] सार्धत्रि० २७. १ उ०, २
[15] स्थानं — अ
[16] कलशे कुर्यात् — अ, आ
[17] तत्फलोनुवादं — अ, आ
[18] ०गृहादिनि — उ

अनुबन्धः

१

त्रयोदशशतिककालोत्तरम्

[व्याख्यानोद्धृतास्त्रयोदशशतिककालोत्तरश्लोकाः]

प्रथमपटले —

'अथैवं सर्ववर्णेषु अकाररहितः स्थितः।
तन्नादः'

[पृ० १७]

यच्छून्यं तन्निरालम्बमाकाशं परिकीर्तितम्।
पञ्चमं तद्विजानीयान्नादतत्त्वं द्विकुब्जकम्॥

[पृ० १७]

मात्राद्वादशकाः सौराः प्रोक्ताः षण्डविवर्जिताः।
अकाराद्यास्तु तद्युक्ताश्चान्द्रास्ता एव षोडश॥

[पृ० १८]

आदिमात्रो भवेत्सद्यस्तृतीयो वाम उच्यते।

[पृ० १९]

सद्योजाताद्द्वितीयं यद्धृदयं तत्प्रकल्पयेत्।

[पृ० १९]

द्वितीयपटले —

यत्तु पार्थिवबीजं तद्वकारादौ प्रकीर्तितम्।

[पृ० २९]

प्राणेनोच्चार्यमाणेन अपानः पीडयते यदा।
गत्वा चोर्ध्वं निवर्तेत एतदुद्घातलक्षणम्॥

[पृ० ३१]

एवं पञ्चदश प्रोक्ताः प्राणायामास्तु भूगताः।
वारुणस्य दश द्वे च

[पृ० ३१]

नादान्ते त्वमृतं ज्ञेयं यत्सङ्गादमृतीभवेत् ।

[पृ० ३३]

सद्यं कलाष्टसंयुक्तमकाराक्षरसंभवम् ।
आत्मतत्त्वं विजानीयाच्चतुर्विंशतिसंभवम् ॥
कन्दनालोद्भवं तेन अकारः परिकीर्तितः ।
वाममुकारजं विद्यात्त्रयोदशकलान्वितम् ॥
विद्यातत्त्वं विनिर्दिष्टं शिवस्याधारसंस्थितम् ।
पत्रकेसरमध्यं तु कर्णिकायां व्यवस्थितम् ॥
शिवतत्त्वं मकारं तु बहुरूपं प्रतिष्ठितम् ।

[पृ० ३४]

पुर्यष्टकं समाख्यातं कर्णिकान्ते प्रतिष्ठितम् ।
सुषिरं तत्र चाख्यातं यत्र बिन्दुर्व्यवस्थितः ।
चतुष्कलं तु जानीयात्पुरुषं लोकपावनम् ।

[पृ० ३५]

षष्ठपटले —

पुत्रस्नेहान्मया पूर्वमाख्यातं ते शतद्वयम् ।
सूत्रभेदेन तैः सार्धैः [शतकैश्च] त्रिभिः शुभम् ।
भूयश्चतुर्भिराख्यातं तत्त्रयोदशभिस्त्वयम् ।

[पृ० ५५]

सप्तमपटले —

सद्यं पश्चिमभागे तु वामं चोत्तरतो न्यसेत् ।
दक्षिणे बहुरूपं च पुरुषं पूर्वतस्तथा ।
ईशानमूर्ध्वभागे तु पञ्चधैव प्रकल्पयेत् ।

[पृ० ५८]

वह्नितो हृदयं न्यस्य दलैशाने शिरो न्यसेत् ।
नैर्ऋत्यां तु शिखा ज्ञेया कवचो वायुगोचरे ।
नेत्रस्थाने न्यसेन्नेत्रमस्त्रं पूर्वदलादितः ॥

[पृ० ५९]

अष्टमपटले —

पञ्चतत्त्वस्थितं वत्स शरीरं सर्वजन्तुषु ।

शोधितव्यं प्रयत्नेन दीक्षाकाले ह्युपस्थिते।

[पृ० ६२]

एषा तु प्रथमा दीक्षा भूताख्या परिकीर्तिता।

[पृ० ६२]

द्वितीयां ते प्रवक्ष्यामि उत्क्रान्ति पाशदाहिकाम्।

[पृ० ८०]

एकादशपटले —

वृत्तिच्छेदे ऋणं ज्ञेयं वृद्धौ चैव धनं भवेत्।

[पृ० ९९]

अथवा तु महासेन संक्षेपात्कथयामि ते।
षष्टिसंवत्सराः प्रोक्ता अहोरात्रेण योगिनाम्॥
शतत्रयं षष्ट्यधिकं प्राणानां तु षडानन।
यावच्च घटिका प्रोक्ता तावत्संख्या प्रकीर्तिता॥
एवं संवत्सरः प्रोक्तो बाह्येऽत्र घटिका तु या।
प्राणापानावहोरात्रम्'

[पृ० १०२]

एकोनविंशपटले —

षष्ठः स्वरो ह्यूकारः स्यान्मकारेण सुसंवृतः।
हकारे ह्यर्धचन्द्रो हि भ्राजते तस्य मूर्धनि।
एतत्सकलसद्भावः'

[पृ० १३१]

एकविंशपटले —

एताश्चान्याश्च सिद्धयः

[पृ० १३८]

[क्रियाक्रमद्योतिकाया व्याख्यायां प्रभायामुद्धृतास्त्रयोदशशतिककालोत्तरश्लोकाः]

"एवं पञ्चदश प्रोक्ताः प्राणायामास्तु भूगताः।
वारुणस्य दश द्वे च"

[पृ० ६९]

"बिन्दुनादादिभिर्विश्वं यथा व्यापयते क्रिया ।
तथा शक्तिश्च सा शैवी धूपव्याजेन धार्यते ॥
ज्ञानशक्तिः स्वनिष्ठा या स्वभेदाष्टस्वरूपिणी ।
शिवेन समवेता च सैव दीपेन विद्यते ॥"

[पृ० ११४]

"आदिमन्त्रो भवेत् सद्यो द्वितीयो वाम उच्यते ।"

[पृ० ३७४]

[शतरत्नसंग्रहे त्रयोदशशतिककालोत्तरादुद्धृतः श्लोकः]

"भुजङ्गकुटिलाकारा"

[पृ० ४२]

[शिवपूजास्तवव्याख्यायामुद्धृतास्त्रयोदशशतिककालोत्तरश्लोकाः]

"बिन्दुनादादिभिर्विश्वं यथा व्याप्रियते तथा ।
क्रियाशक्तिः सैव शैवी धूपव्याजेन भाव्यते ॥
ज्ञानशक्तिः स्वनिष्ठा या सर्वज्येष्ठस्वरूपिणी ।
शिवेन समवेता च सैव दीपेन चिन्त्यते ॥"

[पृ० ९९]

"इच्छाशक्तौ निर्मलायां विश्वस्योत्पत्तिहेतुतः ।
प्रतिबिम्बालोकनं यत्तदादर्शेन बुद्धयते ॥
शुद्धविद्यामयीनां तु स्ववृत्तीनां परे शिवे ।
सन्धानं भाव्यते येन तच्चामरमितीष्यते ॥
पञ्चतत्त्वात्मिकायास्तु स्ववृत्तेः शिवयोजनम् ।
एकरूपतया यत्तद्भाव्यते सितवाससा ॥
कलाविद्यादिजन्यानां स्ववृत्तीनां शिवार्पणम् ।
तिर्यग्विभाव्यते येन तालवृन्तं तदीरितम् ॥
सर्वोपचारसंयुक्त्यै महामुद्रा प्रदृश्यते" ॥

[पृ० १०१]

"इच्छाशक्तौ निर्मलायां विश्वस्योत्पत्तिहेतुतः ।
प्रतिबिम्बालोकनं यत्तदादर्शेन बुद्धयते" ॥

[पृ० १०४]

२

षट्सहस्रकालोत्तरम्

[क्रियाक्रमद्योतिकायामुद्धृताः श्लोकाः]

"सर्वज्ञाय नमस्तुभ्यं सर्वकर्त्रे नमोऽस्तु ते ।
अविलुप्तस्वरूपाय चिन्मयाय नमोऽस्तु ते ॥
प्रमाणातीतदेहाय नमः शान्ताय तेजसे ।
सत्संवित्कारणातीतहानादानान्तरात्मने ॥
अनादिनिधनेशाय शिवाय परमात्मने ।
नमस्ते तत्त्वरूपाय विभवायामितात्मने ॥
ज्ञानज्ञात्रे तथा ज्ञेयव्यतिरिक्ताय ते नमः ।
ज्ञप्तिमात्रस्वरूपाय आनन्दब्रह्मणे नमः ॥
अविद्याव्यतिरिक्ताय विद्यादेहाय ते नमः ।
स्वप्रमाणैकगम्याय स्वप्रकाशाय ते नमः ॥
नमोऽभिमतकर्त्रे ते पञ्चकृत्यैः सदात्मनाम्" ।

[पृ० १२२]

[क्रियाक्रमद्योतिकाया व्याख्यायां प्रभायामुद्धृताः श्लोकाः]

"अङ्गुष्ठानामिकाभ्यां च जपं कुर्यात्तु मानसम् ।
अष्टोत्तरशतेनैव फलं कोटिगुणं भवेत् ॥
अक्षराक्षरसन्धानं न द्रुतं न विलम्बितम्" ।

[पृ० ११६]

"हस्तमात्रं तु वेदाश्रं"

[पृ० १३६]

"योनौ तु बीजवत् क्षिप्त्वा सद्योमन्त्रं शिवं स्मरन् ।
सद्योजातेन तु हृदा दद्यादाहुतिपञ्चकम् ॥
गर्भाधानं भवेदेवं"

[पृ० १६३]

"वक्त्राभिधारः कथितो वक्त्राणां दीपनं"

[पृ० १६८]

"लिङ्गमूर्धपरीणाहं यथा चैवात्मकं तथा ।
विद्यात्मकपरीणाहं ततो भागद्वयं विना ॥
तस्माद्भागद्वयान्न्यूनं शिवाख्यं यत्पवित्रकम् ।"

[पृ० १८७]

[ज्ञानावरणविळक्कमित्याख्ये ग्रन्थे उद्धृताः श्लोकाः]

"दृष्टान्तेनैव मोहान्धैः सदेश्वरसमानतः।"

[पृ० ३२८]

"मायातत्त्वे तु समयी शिवतत्त्वे तु पुत्रकः।
साधकस्त्वीश्वरे तत्त्वे देशिकस्तु सदाशिवे"॥

[पृ० ४४५]

"साधकस्त्वीश्वरे तत्त्वे देशिकस्तु सदाशिवे"।

[पृ० ६२१]

"साधकस्त्वीश्वरे तत्त्वे देशिकस्तु सदाशिवे।"

[पृ० ११००]

[वर्णाश्रमचन्द्रिकायामुद्धृताः श्लोकाः]

"दीक्षया श्रवणे योग्या दीक्षया पूजने क्षमाः।
दीक्षयाश्रमधर्मास्तु प्रवर्तन्ते यथार्थतः"॥

[पृ० ४१]

"अत्र कश्चिद्विशेषोऽस्ति चललिङ्गार्चने सुत।
पूजा कार्या तु सर्वेषां तद्भक्तशिवयोगिनाम्॥
त्रयाणामपि वर्णानां न च शूद्रान्त्यजातिषु।
शैवाचारक्रियासक्ताः शूद्रास्ते मांसवर्जिताः॥
ऊर्ध्वतन्त्रमुखाचार्यवर्ये विप्रे तु दीक्षिताः।
शिवभक्तास्तु ये तेषां पूजा कार्यान्यथा न हि॥"

[पृ० ४२]

"सर्वेषां चैव वर्णानां द्विजोऽनुग्रहकृन्मतः।
त्रयाणां क्षत्रियो द्वाभ्यां वैश्यः शूद्रः स्वयोनिजे॥
एवं चानुग्रहः कार्यश्चतुर्भिरपि देशिकैः।"

[पृ० ५९]

"ब्रह्मचारी गृहस्थश्च द्विविधो देशिकोत्तमः।
दीक्षाप्रतिष्ठयोरेतावुभावप्यधिकारिणौ॥
किं तु मोक्षैकयुक्तानां विभूतिविमुखात्मनाम्।
ब्रह्मचारी गुरुर्ज्ञेयो गृहस्थश्च द्वयार्थिनाम्॥
गृहस्थादितरेषां तु नास्ति भोगाधिकारिता।
तस्माद्गृही गुरुः कार्यो भोगमोक्षोभयार्थिभिः"॥

[पृ० ७९]

[शतरत्नसंग्रहे उद्धृताः श्लोकाः]

"दीक्षैव मोक्षदा पुंसां चिदभिव्यक्तिकारिणी।"

[पृ० ७०]

"समयी पुत्रकश्चैव साधकाचार्यकास्तथा।
सर्वेषां योजना कार्या शक्तितत्त्वे तु पुत्रक ॥
मायातत्त्वे तु समयी विद्यातत्त्वे तु पुत्रकः ।
ईश्वरे साधको भोगे आचार्यः सकले स्थितः ॥
एवं ज्ञात्वा प्रयत्नेन लयभोगौ प्रकल्पयेत् ।
अज्ञात्वा लयभोगौ तु यो दीक्षां कुरुते गुरुः ॥
आचार्यः सह शिष्यैस्तु नरके रौरवे पचेत् ।
देशिकस्तु प्रयत्नात्तु ज्ञात्वा दीक्षां समाचरेत् ॥" [पृ० ७८]

[शैवकालविवेकव्याख्यायामुद्धृताः श्लोकाः]

अतो नित्याङ्गमेवाहुः पवित्रारोहणं तु यत् । [पृ० ९१]

"स्नानं पूजा जपो होमो ध्यानं चैव तु पञ्चमम् ।
एवं नित्यं सदा कुर्यान्नित्याङ्गं प्रोच्यते पुनः ॥
अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि ।
पञ्चदश्यां व्यतीपाते संक्रान्तौ चोत्तरायणे ॥
मासवृद्धौ दिनध्वंसे षडशीतिमुखेष्वपि ।
रवीन्दुग्रहणे चैव द्विगुणार्चा जपादिका ॥
नित्याङ्गमागमे चोक्तं नैमित्तिकमथोच्यते ।
दीक्षा चैव प्रतिष्ठा च नैमित्तिकमिदं द्विधा ॥" [पृ० ९१]

"फाल्गुने चैव भूतायां तस्माद्भूतपतिं यजेत् ।
अष्टम्यां च चतुर्दश्यां व्रतान्युक्तानि पूर्वतः ॥
तानि सर्वाणि तेनैव व्रतान्येव कृतानि तु ॥

स्कन्दव्रतम् —

चैत्रशुक्लात् समारभ्य कर्तव्यमधुनोच्यते ।
उपोष्य शुचिना षष्ठ्यां विशेषात् षण्मुखं यजेत् ॥

मातृव्रतम् —

चैत्रशुक्लनवम्यां तु मातृव्रतं समाचरेत् ।
चतुःषष्टिस्तु संपूज्या भैरवेण समन्विताः ॥
नवम्यां पूजयेद्यस्तु मासि चाश्वयुजे तथा ।
अखण्डितप्रभावस्तु भवेद्वै नात्र संशयः ॥

अनङ्गव्रतम् —

चैत्रशुक्लत्रयोदश्यामनङ्गं तु पटे लिखेत् ।
पुष्पमण्टपमध्ये तु रम्योद्याने तु पूजयेत् ॥
पुमान् कामितमाप्नोति सर्वस्यैव प्रियो भवेत् ।
सौभाग्यं प्राप्नुयान्नारी इह लोके परत्र च ॥

मासि मासि यजेद्वाथ यथानुक्रमयोगतः ।
मासि भाद्रपदे यत्नादनङ्गं पूजयेत् सदा ॥

गौरीव्रतम्—

गौरीव्रतमथो वक्ष्ये स्त्रीणां सौभाग्यवर्धनम् ।
चैत्रशुक्लतृतीयायां गौरीव्रतं समाचरेत् ॥

सूर्यव्रतम् —

अथ वक्ष्ये विशेषेण सूर्यव्रतमनुत्तमम् ।
नक्षत्रतिथियोगं च ग्रहयोगमथ शृणु ॥
अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि ।
अश्विनीरोहिणीपुष्यमघास्तिस्रस्तथैव च ॥
श्रवणं रेवती चैव यदा भवति षण्मुख ।
भास्करश्चन्द्रश्चादित्यः कविः सोमसुतो गुरुः ॥
नक्षत्रानुक्रमेणैव यदि स्युस्तिथयः शृणु ।
अश्विनीत्यादिवारेषु यदि शुक्लचतुर्दशी ॥
तस्यां विशेषतः कार्यं शिवस्य परमात्मनः ।
अङ्गरागै रोचनाय रक्तैः पुष्पैः प्रपूजयेत् ॥

अथ चन्द्रव्रतम् —

अष्टम्यां रोहिणी स्यात्तु तदा चन्द्रव्रतं चरेत् ।
शिवं संपूज्य विधिवत् स्नानैः पञ्चामृतादिभिः ॥
विलेपनं तु चन्द्रेण चन्दनेन तु वाहितम् ॥

भूमिव्रतम् —

शुक्लपक्षे चतुर्दश्यां यदि तिष्यार्कसम्भवः ।
पूजयेत् पूर्वविधिना चोपवासेन शूलिनम् ॥
कुङ्कुमैश्चाङ्गरागैस्तु गन्धपुष्पैः प्रपूजयेत् ।
पायसं सघृतं देयं प्रस्थमात्रप्रमाणतः ॥
भूमिदानं प्रकर्तव्यं शिवभक्ताय यत्नतः ।
अनेन व्रतमुख्येन पृथ्वीपतित्वमाप्नुयात् ॥
एतद्भूमिव्रतं नाम पृथ्वीपालस्तु कारयेत् ।

देवव्रतम् —

बृहस्पतिमघायोगश्चतुर्दश्यां यदा भवेत् ।
उपोष्य पूजयेत्तस्यां देवदेवं महेश्वरम् ॥
महास्नानप्रकारेण महावर्तीपुरस्सरम् ।
अङ्गरागं चन्दनेन शुक्लपुष्पैः प्रपूजयेत् ॥
धूपं तु चलनं देयं लघुना चन्द्रसम्मितम् ।
सितवस्त्राणि चाश्वं च प्राचार्याय प्रदापयेत् ॥
जातीफलैः प्राशनं च रात्रौ जागरणं हितम् ।
एतद्देवव्रतं नाम आयुःश्रीकीर्तिवर्धनम् ॥

राजराजेश्वरव्रतम् —

बुधे स्वात्यात्मको योगः यदाष्टम्यां प्रजायते ।

राजराजेश्वरपदं प्राप्नुयाद्रोमहर्षणम् ।
राजराजेश्वरं तेन व्रतमेतत्प्रकाशितम् ॥

महाव्रतम् —

शुक्लश्रवणयोगस्तु यदाष्टम्यां प्रजायते ।
चतुर्दश्यामथो वत्स महाव्रतं समाचरेत् ॥
उपोषितस्तु विधिना महास्नानं समाचरेत् ॥इत्यादि॥
पितॄन् पितामहांश्चैव तथैव प्रपितामहान् ।
पुत्रान् पौत्रान् प्रपौत्रांश्च शिवलोकं नयेत् फलम् ॥
इदं महाव्रतं तस्मात् कर्तव्यं पृथिवीश्वरैः ।

विश्वरूपव्रतम् —

रेवतीचन्द्रयोगस्तु सिताष्टम्यां यदा भवेत् ।
भूतायां वा महासेन तदा व्रतमिदं शृणु ॥
यान् यान् कामयते मन्त्री तांस्तान् कामानवाप्नुयात् ।
विश्वरूपमिदं तेन व्रतमेतदुदाहृतम् ॥
कुशोदकप्राशनं च रात्रौ जागरणं ततः ॥इत्यादि॥

नक्षत्रतिथियोगेन तिथीनां ग्रहयोगतः ।
पुनरेव प्रवक्ष्यामि व्रतानि तु यथास्थितम् ॥

पुत्रव्रतम् —

रोहिण्यां चाष्टमीयोगो यदा भवति तत्ततः ।
विशेषपूजा कर्तव्या पुत्रकामैः प्रयत्नतः ॥

सर्वकामव्रतम् —

पुष्यशुक्लचतुर्दश्यां गुरुयोगो यदा भवेत् ।
अथवा सोमसंयोगे विशेषात्पूज्य शङ्करम् ॥
पायसं घृतसंमिश्रं शिवाय विनिवेदयेत् ।
धूपदीपोपहाराद्यैः पूर्ववत्पूजयेच्छिवम् ॥
प्राशनं तु घृतं कार्यं सर्वकामप्रदम् व्रतम् ।

शिवव्रतम् —

आदित्यरेवतीयोगश्चतुर्दश्यां यदा भवेत् ।
अष्टम्यां वा महायोगाच्छिवं संपूज्य पूर्ववत् ॥

चन्द्रव्रतम् —

अष्टमीमृगसंयोगात्तदा चन्द्रव्रतम् चरेत् ।
प्रागुक्तेन विधानेन शिवं संपूज्य यत्नतः ॥
दधि क्षीरं तु नैवेद्यं प्राशनं क्षीरमेव च ।
कीर्तिमारोग्यमैश्वर्यं प्राप्नुयान्नानृतं वचः ॥

भौमव्रतम् —

अश्विनीभौमसंयोगश्चतुर्दश्यां यदा भवेत् ।
अष्टम्यां रोहिणीयोगे तदा भौमव्रतं चरेत् ॥

संपूज्य परया भक्त्या शिवं पञ्चोपचारतः।
रक्तोत्पलप्राशनं च साम्राज्यं प्राप्नुयात् सुत॥

बुधव्रतम् —

रोहिणीबुधसंयोगश्चतुर्दश्यां यदा भवेत्।
अष्टम्यां वा महासेन बुधव्रतं समाचरेत्॥
शिवः पूज्यो विधानेन महास्नानपुरःसरम्।
महावर्तिसमोपेतं प्राशनं पायसं घृतम्॥
पुत्रार्थदारपशवो वर्धन्ते तस्य नान्यथा।

गुरुव्रतम् —

रेवतीगुरुसंयोगश्चतुर्दश्यां यदा भवेत्।
अष्टम्यां तिष्यसंयोगाद्गुरुव्रतं समाचरेत्॥
प्राशनं कपिलाज्यं तु ब्राह्मीरससमन्वितम्।
वागीशत्वमवाप्नोति कृतस्यास्य प्रभावतः॥

शुक्रव्रतम् —

श्रवणं भार्गवयुतं चतुर्दश्यां यदा भवेत्।
गुरुव्रतं तदा सिद्धं पुनर्वस्वष्टमी यदा॥
संपूज्य परमेशानं यथाविभवविस्तरैः।
प्राशनं मधुनैवात्र महाधनमवाप्नुयात्॥

शनिव्रतम् —

भरणीशनियोगस्तु चतुर्दश्यां यदा भवेत्।
अग्नियोगस्तथाष्टम्यां तदा व्रतमिदं चरेत्॥
शिवं संपूज्य विधिवत्प्राशनं दधि एव च।
शनिरेकादशस्थो हि फलं यच्छति शोभनम्॥
विरुद्धोऽशोभनो वत्स तदर्थं तु व्रतं चरेत्।
हेमयुग्मं प्रवालं च काकरं शुद्धमेव च॥
शङ्खं सतारं लोहं च क्रमाद्यत्नेन दापयेत्।
यथासंभवतो वत्स आचार्याय प्रदापयेत्॥

इति ग्रहव्रतप्रकरणम्॥

अथ कृष्णाष्टमीव्रतारम्भः॥

कार्तिकेयः —

व्रतानि सविशेषाणि मासि मासि वद प्रभो।
यावद्वै वत्सरं कृत्स्नं प्राणिनां स्नेहवत्सल॥

ईश्वरः —

कृष्णाष्टम्यां मार्गशीर्षे नक्तभोजी यदा भवेत्।
शंकरं नाम वै रुद्रं भवान्या सह पूजयेत्॥
ईश्वरं बिन्दुना देवीं महाशङ्करनामतः।
स्वमन्त्रोपरि पूजां तु विशेषेण तु कारयेत्॥

अप्तोर्यामिस्य यज्ञस्य फलं शतगुणं लभेत्।
गोमूत्रं चुलुकं पीत्वा हविष्यान्नं तु कारयेत्॥
शंभुरुद्रं च शर्वाण्या पौषे संपूज्य पूजयेत्।
शिवभक्तांस्तु संपूज्य कृष्णाष्टम्यां शिखिध्वज॥
आचार्यपूजां निर्वर्त्य गोघृतं त्रिफलं पिबेत्।
हविष्यान्नं ततो भुक्त्वा वाजपेयफलं लभेत्॥
माघमासीश्वरं नाम कृष्णाष्टम्यां प्रपूजयेत्।
अम्बिकासहसंयुक्तं पूर्ववन्मन्त्रसंयुतम्॥
शैवाचार्यान् पूजयित्वा क्षीरं प्राश्य फलत्रयम्।
गोमेधशतपुण्यं तु प्राप्नुयाद्विधिना सुत॥
फाल्गुनस्यासिताष्टम्यां महादेवं समर्चयेत्।
मालिन्या तु समायुक्तं नित्यकृत्यादनन्तरम्॥
शिवभक्ताय भूर्देया तिलानां प्राशनं शुभम्।
राजसूयायुतफलं लभेरन् शिवयोगिनः॥
चैत्रे स्थाणुं मृडानीं च कृष्णाष्टम्यां प्रपूजयेत्।
सुवर्णकृतभूषाद्यैर्वित्तशाठ्यं विना सुत॥
ईषद्दग्धं यवं प्राश्यमश्वमेधायुतं फलम्।
वैशाखे शिवनामानं शक्त्या सह यदार्चयेत्॥
पूर्वोक्तेन विधानेन शिवभक्तं तदार्चयेत्।
कुशोदकं च संप्राश्य नरमेधायुतं फलम्॥
ज्येष्ठे पशुपतिं पूज्य पार्वत्या सहितं तदा।
नित्यं निर्वर्त्य तत्रैव संपूज्य विधिना सुत॥
गोविषाणोदकं प्राश्य गोमेधफलमाप्नुयात्।
आषाढे चोग्ररुद्रं तु मनोन्मन्या सहार्चयेत्॥
कुशोदकं तु संप्राश्य राजसूयफलं लभेत्।
श्रावणे शर्वनामानं वामाशक्त्या सहार्चयेत्॥
पद्मोदकं तु संप्राश्य सर्वयज्ञफलं लभेत्।
मासि भाद्रपदेऽष्टम्यां त्र्यम्बकं नाम पूजयेत्॥
ज्येष्ठाशक्तिसमायुक्तं प्रागुक्तेन विधानतः।
प्राशयेद्बिल्वपत्रं तु गुरुपूजादनन्तरम्॥
सम्यक् क्रतुशतं तेन कृतं भवति नान्यथा।
मासि चाश्वयुजे पूज्य ईश्वरं कान्तया सह॥
रत्नोदकेन संप्राश्य पौण्डरीकायुतं लभेत्।
कार्तिके मदनारातिं मनोन्मन्या सहार्चयेत्॥
गुरुं संपूज्य विधिवत्प्राशयेच्च गवां दधि।
अग्निष्टोमायुतं तेन इष्टं भवति षण्मुख॥
वर्षान्ते भोजयेद्विप्रान् शिवभक्तिपरायणान्।
भूमिकुञ्जरयानैश्च रत्नद्रविणविस्तरैः॥
पूजयेत् परया भक्त्या व्रतानां यो गुरुर्भवेत्।

वित्तशाठ्यान्महासेन न तत्फलमवाप्नुयात् ॥
॥ इति कृष्णाष्टमीव्रतम् ॥

पिष्टव्रतम् —

पौषमासे तु संप्राप्ते पक्षयोरुभयोः सुत।
चतुर्दश्यामथाष्टम्यां पौर्णमास्यामथापि वा॥
नित्यं निर्वर्त्य विधिवत् ततः काम्यं समाचरेत्।
विशेषपूजा तत्रैव कर्तव्या शुद्धचेतसा॥
नैवेद्यं यावकप्रस्थं खण्डक्षीराज्यसंस्कृतम्।
रुद्रसंख्यांस्तु वै विप्रान् भोजयेच्चैव रक्षयेत्॥
वितस्तिमात्रां प्रकृतिं यवपिष्टविनिर्मिताम्।
सशृङ्गखुरलाङ्गूलां कृतभूषां तु कारयेत्॥
शिवाय तु प्रदातव्या व्रतस्य गुरवे ततः।
सुवाहनसमायुक्ता व्रतपुण्यमतः शृणु॥
सूर्यकोटिप्रतीकाशैर्विमानैः सार्वकामिकैः।
रुद्रवृन्दसमाकीर्णैः रुद्रकन्यासमावृतैः॥
वृषभस्यन्दनैर्युक्तो नानागीतरवान्वितः।
त्रिःसप्तकुलसंयुक्तो यात्यसौ यत्र शङ्करः॥
यावत्तद्रोमसंख्यातः तत्प्रसूतिः कुलेष्वपि।
तावद्युगसहस्राणि रुद्रलोके महीयते॥
सामीप्यं तु समासाद्य सायुज्यं याति चान्ततः।
अनेन विधिना माघे प्रस्थपिष्टमयं यवैः॥
समाप्य च विधानेन चक्रवर्तिपदं लभेत्।
फाल्गुने तु तथा वज्रं निवेद्य तत्फलं लभेत्॥
चैत्रे शक्तिं पिष्टमयीं निवेद्य च शिवाग्रतः।
स मुञ्चति ब्रह्महत्यां शिवलोकमवाप्नुयात्॥
वैशाखमासि दण्डास्त्रं शिवस्याग्रे निवेदयेत्।
हस्तार्धपिष्टजं कार्यं पूजान्ते तु निवेदयेत्॥
मुच्यते पञ्चपापेभ्यो रुद्रलोके महीयते।
ज्येष्ठे पिष्टमयं खड्गं शिवाय विनिवेदयेत्॥
मुच्यते स कृतघ्नत्वाद्रुद्रलोके च गच्छति।
आषाढे पिष्टजं पाशं शिवाय विनिवेदयेत्॥
मुच्यते दुष्कृतैः सर्वैरिह जन्मनि संचितैः।
ध्वजं पिष्टमयं यस्तु शिवस्याग्रे निवेदयेत्॥
श्रावणे तु विधानेन सोऽक्षयं मोक्षमाप्नुयात्।
मासि भाद्रपदे यस्तु गदां पिष्टमयीं ददेत्॥
निधीशत्वं तु संप्राप्य शिवलोके महीयते।
मासि चाश्वयुजे शूलं हस्तार्धं पिष्टसंभवम्॥
शिवाय पुरतो देयो भ्रूणहत्यां व्यपोहति।

कार्तिके तु यदा चक्रं शिवस्याग्रे निवेदयेत् ॥
सप्तजन्मकृतं पापं दहत्यग्निरिवेन्धनम् ।
मासे वै मार्गशीर्षे तु कमलं पिष्टसंभवम् ॥
शिवाय विधिना देयं सर्वैश्वर्यमवाप्नुयात् ।
सर्वेषां चैव नक्तं तु व्रतानां कीर्तितं मया ॥
नित्यपूजां तु निर्वर्त्य काम्यपूजां तु कारयेत् ।
दरिद्राणामनाथानां व्रतानि शृणु लेशतः ॥
कार्तिकं तु समारभ्य एकभुक्तं तु कारयेत् ।
यावदाश्वयुजान्तं तु तस्य पुण्यफलं शृणु ॥
दिव्यं वर्षशतं सार्धं रुद्रलोके महीयते ।
कार्तिकं तु समारभ्य यावदाश्वयुजावधि ॥
संध्याकाले चरेन्मौनं यावत्तारानुवीक्षणम् ।
प्रयाति रुद्रलोकं तु देहान्ते बन्धुभिः सह ॥
मोदते तत्र भुवने दिव्यं वर्षायुतत्रयम् ।
तदन्ते प्राप्नुयाद्योगं शिवत्वेन ध्रुवं यजेत् ॥
कार्तिकं तु समारभ्य यस्तु नक्तेन वर्तते ।
यावदाश्वयुजान्तं तु तस्य पुण्यफलं शृणु ॥
वर्षायुतयुतं तत्र रुद्रलोके वसत्ययम् ।
तदन्ते ज्ञानयोगेन सर्वैश्वर्यफलं लभेत् ॥
कार्तिके .... रेत् ।
निराहारमथो मौनं प्रतिमासं समावधि ॥
रुद्रलोके वसेत्सोऽपि ब्रह्मणां मनुसंख्यया ।
उभयोश्च चतुर्दश्यां निराहारेण वर्तते ॥
कार्तिकं तु समारभ्य यावदाश्वयुजावधि ।
रुद्रलोके .... शिवम् ॥
कार्तिकं तु समारभ्य यावत् संवत्सरावधि ।
शुक्लाष्टम्यां सोपवासं तस्य पुण्यफलं शृणु ॥
रुद्रलोके वसेत्सोऽपि यावदिन्द्राश्चतुर्दश ।"

[पृ० १८४–१९८]

[सकलागमसारसङ्ग्रहे उद्धृताः श्लोकाः]

"शतेनाष्टोत्तरेणैव उत्तमं परिकीर्तितम् ।
तदर्धं मध्यमं शस्तं तदर्धं कन्यसं भवेत् ॥
उन्मील्य नेत्राणि शरत्सहस्रमघोरमस्त्रं रिपुनाशनार्थम् ।
तथाकुलं तस्य बभूवुरक्ष्णां त्रयं ततोऽश्रूण्यपतंश्च तेभ्यः ॥
रुद्राक्षवृक्षा विटपैर्बभूवुः शिवाज्ञया सर्वजगद्धिताय ।
रुद्राक्षवृक्षास्तपनाक्षिजातास्ते द्वादश स्युः कपिलप्रभेदैः ॥
चन्द्राक्षिजाताः षोडशशुभ्रवर्णाः कृष्णा दश स्युर्ज्वलनाक्षिजाताः ।

ब्राह्मं सितं कापिलवर्णयुक्तं क्षात्रं तु वैश्यं ह्युभयात्मकं च ॥
कृष्णं च शूद्रं कथयन्ति बीजं रुद्राक्षवृक्षप्रभवं तु जात्या ।
एकाननं शङ्कर एव साक्षाद् रुद्राक्षबीजं विनिहन्ति हत्याम् ॥
द्विवक्त्रबीजं बहुगोवधघ्नं देवेशदैवत्यमलभ्यमक्षम् ।
आग्नेयमुक्तं वदनत्रयं यद् योषिद्वधघ्नं दधतः क्षणेन ॥
चतुर्मुखं यच्चतुराननीयं नरस्य हत्यां क्षणतो निहन्ति ।
कालाग्निरुद्रं ननु पञ्चवक्त्रमभ्यक्तदुःसङ्गमपातकघ्नम् ॥
स्कान्दं हि यत् षड्वदनं करेण दक्षेण धार्यं द्विजहन्तृशुद्धयै ।
सप्ताननं भोगिपतिं ह्यनन्तं स्तेयाद्विशुद्धिं विदधाति सद्यः ॥
वैनायकं ह्यष्टमुखं सुवर्णं कूटं गुरुस्त्रीगमनाद्यघघ्नम् ।
नवाननं भैरव एव देवो भुक्तिं च मुक्तिं शिवतुल्यशक्तिम् ॥
करोति वामेन करेण धार्यं हत्यायुतानां विनिहन्ति कोटिम् ।
हरिः स्वयं यद्दशवक्त्रबीजं पिशाचभूतग्रहराक्षसांश्च ॥
वेतालसर्पप्रतियोधसिंहव्याघ्रादिकांस्तांश्च निहन्ति शीघ्रम् ।
एकादशास्यं दश चैकरुद्रो धार्यं शिखायां विधिनानवद्यम् ॥
नराश्वमेधायुतवाजपेयसहस्रगोदानसहस्रतुल्यम् ।
यद्वक्त्राणि दशद्वयेन कथितं तद्भास्करीयं स्मृतं
कण्ठस्थं रवितुष्टिकृद्धयमखैर्गोमेधपुण्यैः समम् ।
हस्त्यश्वश्वसृगालमूषिकखगक्लीबान्धनारीमृग-
व्यालर्क्षशुकभेकसर्पमहिषव्याघ्रादिदोषापहम् ॥
यद्वक्त्राणि दशद्वयं ननु लभेत् तत् कार्तिकेयं शुभं
सर्वं सिध्यति भोगभोग्यमतुलं सिध्येत्ततः पादुका ।
इष्टार्थश्च रसा रसायनमथ भ्रूणार्यमातापितृ-
स्त्रीकन्यावधतोऽपि शुध्यति दधन्नास्मात्परं विद्यते ॥
पापिष्ठोऽपि नरोऽक्षमेकमपि यद्धत्ते स शुद्धो भवेत्
कुर्वन् वापि न लिप्यते न तु चितं तत्तन्मुमुक्षूदितैः ।
पुच्छे पुच्छमुखे मुखे च सदृशैर्मुक्ताप्रवालान्तरैः
सौवर्णैर्मणिभिर्दधन् मखफली मर्त्योऽनवद्यो भवेत् ॥
सहस्रं धारयेद्यस्तु रुद्राक्षाणां दृढव्रतः ।
प्रणमन्ति सुराः सर्वे यथा रुद्रम् तथैव तम् ॥
अष्टोत्तरशतैर्माला रुद्राक्षैर्धार्यते यदि ।
क्षणे क्षणेऽश्वमेधस्य फलं प्राप्नोत्यसंशयः ॥
रुद्राक्षमालां यो धत्ते कण्ठे हस्ततले सदा ।
शतमर्धं तदर्धं वा स मुक्तो नात्र संशयः ॥
एकादशं तु रुद्राक्षं मेरुहीनाक्षमालिका ।
अङ्गुष्ठमूले जपतः सद्योमुक्तिः षडानन ॥
रुद्राक्षं तु महाभूत्यै मुक्तिदं परमं शुभम् ।
एकवक्त्रैस्त्रिवक्त्रैर्वा चतुर्वक्त्रैश्च पञ्चभिः ॥
षड्वक्त्रैश्चापि कर्तव्यं तस्मान्मिश्रं तु वर्जयेत् ।

रुद्राक्षस्य मुखं ब्रह्मा तन्नालं विष्णुरुच्यते ॥
रेखायामीश्वरः प्रोक्त इत्येते अधिदेवताः ।
मुखे मुखं प्रकर्तव्यं मूलं मूलेन योजयेत् ॥
धात्रीफलप्रमाणेन चणकं मध्यमाधमौ ।
नवत्रितन्तुना प्रोक्तं कर्तव्यं पूर्ववच्छुभम् ॥
नागपाशं तु सावित्रीं ब्रह्माख्यं वाथ ग्रन्थिनम् ।
ग्रन्थ्यूर्ध्वैकं तु मेर्वाख्यं कर्तव्यं तन्न लङ्घयेत् ॥
क्षालयेत् सद्यमन्त्रेण वामदेवेन घर्षयेत् ।
धूपयेद्बहुरूपेण पुरुषेण तु मन्त्रयेत् ॥
पञ्चमेनैव प्रत्येकं प्रत्येकं तु शतं शतम् ।
मेरुं च पञ्चमेनैव तथा घोरेण मन्त्रयेत् ॥
मेरुं च पञ्चभिः पूज्य शिववच्च यथाक्रमम् ।
कनिष्ठानामिकामध्ये पुष्पं संग्राह्य बुद्धिमान् ॥
प्रच्छन्नपटमाच्छाद्य मूलमन्त्रमनुस्मरन् ।
वामहस्ते तु कुसुमं जपेद्दक्षिणपाणिना ॥
मानसोपांशुभाष्याणां प्रथमं चोत्तमोत्तमम् ।
उपांशु मध्यमं प्रोक्तमधमं भाष्यमेव हि ॥
तस्माद्भाष्यं समुत्सृज्य मानसोपांशुना यजेत् ।"

[पृ० ११०–११३]

[सिद्धान्तसारावलीव्याख्यायामुद्धृताः श्लोकाः]

"आषाढादित्रयो मासाः सुप्त एव जनार्दने ।
शुक्लपक्षेऽथवा कृष्णे प्रशस्ताः सूत्ररोहणे ॥
रोगाभिवृद्धिसंयुक्तः प्रवासी राजपीडितः ।
उक्तमासत्रये यस्तु न कुर्यात् सूत्ररोहणम् ॥
असौ कन्यागते भानौ जप्त्वा दक्षाणुना युतम् ।
कुर्यात् पवित्रकं शम्भोस्तुलायां न कथंचन ॥"

[चर्यापादे श्लो ८४]

"लिङ्गमूर्ध्नि परीणाहे यथोच्चैः स्वात्मकं तथा ।
विद्यात्मकपरीणाहं ततो भागद्वयं विना ॥
तस्माद्भागद्वयं न्यूनं शिवाख्यं यत्पवित्रकम् ।"

[चर्यापादे श्लो १३१–१३२]

"दीक्षा चैव प्रतिष्ठा च नैमित्तिकमिदं द्विधा ।"

[चर्यापादे १३३]

"योऽग्नौ तु बीजवत् क्षिप्त्वा सद्योजातं शिवं स्मरन् ।
सद्योजातेन वाभ्यर्च्य हृदा त्र्याहुतिकं तिलैः ॥"

[क्रियापादे ५३–५४]

"अष्टधा विभजेत् क्षेत्रं मध्ये पद्मं चतुष्पदम् ।

तद्बाह्ये वीथिका कार्या पदैकेन समन्ततः ॥
पद्मासनं चतुर्द्वारं द्विपदेन कपोलकम् ।
कोणबन्धं ततः शिष्टो भद्रमेतदुदीरितम् ॥"

[क्रियापादे श्लो० ८३]

[ज्ञानरत्नावल्यामुद्धृताः श्लोकाः]

"निर्वर्त्यैवं विभोः पूजामीशानं चैशकोणकम् ।
गोक्षीरधवलं ध्यात्वा पूजयेत् कुसुमादिभिः ॥
कर्णिकारदलप्रख्यं प्राग्दले पुरुषं न्यसेत् ।
अघोरं दक्षिणस्यां तु भिन्नाञ्जनचयोपमम् ॥
दाडिमीपुष्पसंकाशं वामदेवं सदोत्तरे ।
पश्चिमस्यामजातं तु शङ्खकुन्देन्दुसप्रभम् ॥
आग्नेय्यां हृदयं पूज्य मुक्ताफलसमद्युति ।
स्वच्छवैडूर्यसंकाशमैशान्यां तु शिरो हितम् ॥
शिखां तु नैर्ऋते भागे तटिद्रूपसमप्रभाम् ।
कृष्णवर्णं तु कवचं वायव्यां दिशि पूजयेत् ॥
नेत्रं तु पूर्वतो ध्येयं सोमसूर्याग्निसप्रभम् ।
दलाग्रेषु न्यसेदस्त्रं ज्वलत्पावकसन्निभम् ॥
एवं वक्त्राणि चाङ्गानि भोगस्थानेषु विन्यसेत् ।
प्रतिबिम्बस्वरूपाणि इन्द्रतो विभवाद्यथा ॥
अनन्ताद्यान् दलाग्रेषु विद्येशांस्तत्र पूजयेत् ।
पीठकर्णे गणेशांस्तु लोकेशान् पीठपादतः ॥
तदस्त्रस्थितिदेशे तु स्थिते ब्रह्मशिलोपरि ।
एवं स्वव्याप्तिभेदेन विभोरावरणं न्यसेत् ॥

[प० १२७–१२८]

३

स्कन्दकालोत्तरम्

[क्रियाक्रमद्योतिकाव्याख्यायां प्रभायामुद्धृताः श्लोकाः]

"पाषाणः शिवसंस्काराद्भुक्तिमुक्तिप्रदो भवेत् ।
पाषाणः शिवतां याति शूद्रस्य न कथं भवेत् ॥"

[पृ० ३७०]

[ज्ञानावरणविळक्कमित्याख्ये ग्रन्थे उद्धृताः श्लोकाः]

"मां वै महेश्वरं विद्धि त्वन्माता तु मनोन्मनी ।"

[पृ० ६४४]

"विद्येश्वरान् गणेशांश्च लोकपालास्त्रमेव च ।
अष्टमूर्तिश्च विज्ञेया रुद्रा एकादश स्मृताः ॥
आदित्यान् द्वादशाभ्यर्च्य वसूनष्टौ च पूजयेत् ।
गन्धर्वाश्चारणाः सिद्धा यक्षा नागाश्च किन्नराः ॥
विद्याधरा यातुधाना गरुडाश्च महर्द्धिकाः ।
ऋषींश्चाप्सरसश्चैव असुरा द्वादश स्मृताः ॥
. . . . शक्तीन् ग्रहांश्चैव . . . समर्चयेत् ।
नक्षत्रयोगकरणान् प्रथमेन्द्रान् समर्चयेत् ॥
अष्टाविंशत्यावरणं पूजयेत् सुसमाहितः ।

[पृ० ६६३]

"कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।
ईशानस्य मुखाज्जातमनन्तं मन्त्रजातकम् ॥
अशीतिकोटिसाहस्रं चतस्रः कोटिलक्षकम् ।
तत्पुरुषाद्विनिष्क्रान्तं मन्त्रभेदं षडानन ॥
चत्वारिंशत्कोटयस्तु सहस्राणि तथैव च ।
त्रिकोटिलक्षं वै वत्स अघोरात्तु विनिर्गताः ॥
विंशत्कोटिसहस्राणि कोटिलक्षं तथैव च ।
अयुतानि चतुःषष्टिर्वामदेवाद्विनिर्गताः ॥
अयुतानि च षट्त्रिंशत् सद्योजाताद्विनिर्गताः ।

[पृ० ६८०]

"सकलं निष्कलं शून्यं कलाढ्यं खमलंकृतम् ।
क्षपणं क्षयमन्तस्थं कण्ठोष्ठ्यं चाष्टमं भवेत् ॥"

[पृ० ७२८]

"एवं संक्षेपतः प्रोक्तं मन्त्रजाल . . . ।
सर्वमन्त्राणि तन्त्राणि वेदशास्त्राणि सर्वशः ॥

प्रासादस्य भवेत्.......चराचरम्।"

[पृ० ७२८]

"भूलोकस्योपरि भुवर्लोकस्त्रिशत्कोटियोजनम्।
नक्षत्रराशिनवग्रहऋषिगणा निवसन्ति॥"

[पृ० ९२१]

"वैकर्तनो विवस्वांश्च मार्तण्डो भास्करो रविः।
– लोक....लोकसाक्षी त्रिविक्रमः॥
आदित्यश्च तथा सूर्यस्त्वंशुमांश्च दिवाकरः।
एतान्वै द्वादशादित्यान् तद्बाह्ये पूजयेद्बुधः॥

[पृ० ९३१]

अष्टषष्टिमहास्थानं वक्ष्यामि शृणु सांप्रतम्।
वस्त्रापदं रुद्रकोटिरविमुक्तं महालयम्॥
गोकर्णं भद्रकर्णं च सुवर्णाक्षोऽतिदीप्तिमान्।
स्थाण्वीश्वरं च विख्यातं त्रिषु लोकेषु विश्रुतम्॥
स्थानाष्टकमिदं ज्ञेयं रुद्रक्षेत्रं महोदयम्।
वस्त्रापदादिस्थाण्वन्तं रुद्रसायुज्यकारकम्॥
छलगण्डं द्विरण्डं च माकोटं मण्डलेश्वरम्।
कालञ्जरं शङ्कुकर्णं स्थूलेश्वरमिति स्मृतम्॥
अट्टहासं च विज्ञेयं पवित्राष्टकमुच्यते।
सर्वयत्नेन गच्छन्ति शिवस्य परमं पदम्॥
गया चैव कुरुक्षेत्रं नाखलं नखलं तथा।
विमलेश्वरं प्रभासं च माहेन्द्रं भीममष्टमम्॥
एतद्गुह्याष्टकं नाम सर्वपापप्रमोचनम्।
गत्वा तु पुरुषः श्रीमान् प्राप्नोति शिवमन्दिरम्॥
श्रीपर्वतं हरिश्चन्द्रं महाकालवनं तथा।
आम्रातिकेश्वरं चैव केदारं भैरवं तथा॥
वाराणसी वैद्यनाथमष्टमं परिकीर्तितम्।
एतद्गुह्यातिगुह्यं स्वयम्भुस्थानं षडानन॥
संतार्य स्वपितॄन् सर्वान् शैवं याति पदं महत्।
अमरेशं प्रभासं च नैमिशं पुष्करं तथा॥
आषाढी डिण्डिमुण्डी च भारभूतिश्च लाकुली।
प्रत्यगात्ममिदं क्षेत्रं शिवसायुज्यकारकम्॥
कैलासं मन्दरं चैव मेरुं वै नीलपर्वतम्।
हिमवान् निषधो विन्ध्यो मलयश्चाष्टमो भवेत्॥
शिवस्य याति देहेनानशनाच्छिवमेव हि।
वीरजा वरुणा गोल्ला जयन्ती कोटिवर्षकम्॥
जालन्ध्रं चैव काश्मीरं देवदारुवनं तथा।
शुद्धाष्टकमिदं क्षेत्रं शिवसायुज्यकारकम्॥
मायापुरी मेरुधिं च भूतेश्वरवटेश्वरम्।

माहेश्वरी महीच्छत्रं प्रसृवर्धनमेव च ॥
देवकोष्ठं च विज्ञेयं सिद्धक्षेत्रं महोदयम् ।
देहिनां तत्र पञ्चत्वं शिवसायुज्यकारकम् ॥
इलावृतं चोत्तरमेरुर्भद्राश्वं केतुमालकम् ।
चत्वारस्तु अनौपम्यं महाक्षेत्रं सुदुर्लभम् ॥
अष्टषष्टिमहाक्षेत्रं स्वयम्भुस्थानं विधीयते ।?

(पृ. १७६–१७७)

"सुरहस्यं नास्तिकाय न दातव्यं षडानन ।
शिवभक्ताय दातव्यं शिवेन कथितं पुरा ॥
कविभिः शास्त्रतत्त्वज्ञैस्तपोनिष्ठैर्जितेन्द्रियैः ।
देवैश्च सेवितं तोयं क्षितौ तीर्थं तदुच्यते ॥
रुद्रावतारस्थानानि स्वयम्भुक्षेत्राणि निर्दिशेत् ।
मृतानां तेषु सर्वेषु शिवक्षेत्रेषु देहिनाम् ॥
भूलोके च महासेन स्वयम्भुस्थानं महाफलम् ।
अर्चनं च जपध्यानं समाधिस्थानमेव च ॥
अक्षयं फलमाप्नोति मृते सायुज्यमाप्नुयात् ।
अष्टषष्टिमहास्थानं वक्ष्यामि शृणु साम्प्रतम् ॥
देहिनां तत्र पतनं शिवसायुज्यकारकम् ।
अष्टषष्टिमहाक्षेत्रं स्वयम्भुस्थानं विधीयते । ।
तपः समाधिश्च जपो दानं देवार्चनं तु यत् ।
अक्षय्यं फलमाप्नोति विनाशश्च न विद्यते ।
देवालयं प्रपा चैव सभास्थानं मठस्तथा ।
वापीकूपतटाकानामक्षयं फलमाप्नुयात् ॥
गोदानं गजदानं च कन्यादानं हिरण्मयम् ।
तिलदानं गृहदानं महीदानं षडानन ॥
दासीदासरथदानं पानीयदानमेव च ।
प्रतिश्रयप्रदानं च मन्त्रदानं च षोडश ॥
ब्राह्मणाय दरिद्राय सोमयाजितपस्विने ।
शिवभक्ताय शान्ताय सदा शूद्रान्नवर्जिने ॥
स्वयंभुक्षेत्रे दातव्यं विषुवग्रहणादिषु ।
तदनन्तफलं दातुर्भवतीति किमद्भुतम् ॥
शिवभक्ताय शान्ताय बहुपुत्राय केवलम् ।
श्रोत्रियाय दरिद्राय आहिताग्नितपस्विने ॥
शुभं गृहं तु संपाद्य गृहोपकरणानि च ।
धनधान्यसुपूर्णं च व्यजनं भुक्तपात्रकम् ॥
मुसलोलूखलांश्चैव समग्रैः समलंकृतम् ।
भोजनस्थालीदलभाण्डं दर्वीपानीयपात्रकम् ॥
उपदंशपचनस्थालीं खट्वाशय्यासनानि च ।
उपधानं कम्बलं च बहिस्तरणमेव च ॥

धूपदीपं च पात्राणि सर्वं से हरिमेव च ? ।
निष्ठीवनाय पात्रं च ताम्बूलाधारमेव च ॥
उदकुम्भं ताम्रभवमुदासेचनपात्रकम् ।
करकं कमण्डलुं चैव कर्णभूषणमेव च ॥
यथा च किंचाभरणं कुण्डलं हारमेव च ।
एतान् सर्वान् समापाद्य स्वजन्मदिवसे शुभे ॥
एवं गृहं तु विप्राय ग्रहणादिषु वा ददेत् ।
न तद्वक्तुमहं शक्तः फलं युगशतैरपि ॥
एतावच्छक्यते वक्तुं तस्य देहस्य सुव्रत ।
स विधाय फलं कृत्स्नं लभते नात्र संशयः ॥
अश्वमेधसहस्रस्य प्रतिष्ठाशतमेव च ।
तत्फलं लभते वत्स शुभगेहं न संशयः ॥"

[पृ० ९७७–९७९]

[पौष्करभाष्ये उद्धृताः श्लोकाः]

"अन्धो मूकस्तु बधिरः पङ्गुर्व्यङ्घ्रिविहस्तकः ।
विकर्णो विकृतास्यश्च विकृताङ्गोऽतिवामनः ॥
संन्यासी पतितो नग्नः षण्डो न्यूनाधिकाङ्गुलिः ।
त्वग्दोषी च दुराचारी वामाचारपरायणः ॥
नाभिषेकविधौ योग्याः ॥"

[पृ० १६७]

"गतं शूद्रस्य शूद्रत्वं द्विजत्वं ब्राह्मणस्य च ।"

[पृ० १६९]

"शिखायज्ञोपवीती च जटाधारी च मुण्डितः ।
वज्ररोमाभिषिक्तश्च आचार्यः स इति स्मृतः ॥"

[पृ० १७२]

"आत्मविज्ञानमाश्रित्य विमलं सर्वतोमुखम् ।
संसारार्णवमग्नानां भूतानां शरणार्थिनाम् ॥
नान्यः शरणदः कश्चिदात्मज्ञानादृते क्वचित् ।"

[पृ० २२९]

[वर्णाश्रमचन्द्रिकायामुद्धृताः श्लोकाः]

"जात्युद्धारणहोमं तु एकैकं तु शतं शतम् ।
दहेद्वै शूद्रजातिं तु अनलेन तु षण्मुख ॥
सच्छूद्रत्वं योजयित्वा क्रियां वै षोडशीं कुरु ।
साक्षाद्विप्रत्वमापन्ने पश्चाद्दीक्षां कुरुष्व च ॥
त्रैवर्णिकानामेवं तु कारयेद्विधिना बुधः ।"

[पृ० २६]

"शिखायज्ञोपवीती च जटाधारी च मुण्डितः ।
वज्ररोमाभिषिक्तश्च आचार्यः स इति स्मृतः ॥"

[पृ० ६२]

"संन्यासी पतितो नग्नः षण्डो न्यूनाधिकाङ्गुलिः ।
नाभिषेकविधौ योग्याः कथिता वै षडानन ॥"

[पृ० ८३–८४]

[शिवाग्रभाष्ये उद्धृताः श्लोकाः]

"शिखायज्ञोपवीती च जटाधारी च मुण्डितः ।
वज्ररोमाभिषिक्तश्च आचार्यः स इति स्मृतः ॥"

[पृ० ४०६]

"संन्यासी पतितो नग्नः षण्डो न्यूनाधिकाङ्गुलिः ।
नाभिषेकविधौ योग्याः कथिता वै षडानन ॥"

[पृ० ४०९]

"शिखायज्ञोपवीती च जटाधारी च मुण्डितः ।
वज्ररोमाभिषिक्तश्च आचार्यः स इति स्मृतः ॥"

[पृ० ४१०]

"अन्धो मूकस्तु बधिरः पङ्गुर्व्यङ्घ्रिर्विहस्तकः ।
विकर्णो विकृतास्यश्च वक्राङ्गोऽधिकवामनः ॥
संन्यासी पतितो नग्नः षण्डो न्यूनाधिकाङ्गुलिः ।
त्वग्दोषी च दुराचारी वामाचारपरायणः ॥
नाभिषेकविधौ योग्याः ॥"

[पृ० ४११]

[शैवसंन्यासपद्धतावुद्धृताः श्लोकाः]

"शिखी यज्ञोपवीती च जटाधारी च मुण्डितः ।
वज्ररोमाभिषिक्तश्च आचार्यः स इति स्मृतः ॥"

[पृ० १६५]

श्लोकार्धानुक्रमणिका

सार्धत्रिशतिकालोत्तरवृत्तावुदाहृतश्लोकार्धादीनामनुक्रमणिका

अनुबन्धस्थश्लोकार्धानुक्रमणिका

पृष्ठसंख्या

ब

भ

म

य

सार्धत्रिशतिकालोत्तरवृत्तावुदाहृतग्रन्थग्रन्थकर्तृसूची

उपयुक्तग्रन्थसूचिः

आचारेन्दुः	आनन्दाश्रमसंस्कृतग्रन्थावलिः (५८) पुण्यपत्तनम्, १९०९
आपस्तम्बश्रौतसूत्रम्	गायकवाडग्रन्थावलिः (१२१) बडोदा, १९५५
आपिशलिशिक्षा	शिक्षासूत्राणि, युधिष्ठिरमीमांसकसंपादितानि, अजमेर, संवत् २०२४
ईशानशिवगुरुदेवपद्धतिः	अनन्तशयनसंस्कृतग्रन्थावलिः अङ्कः (६९, ७२, ७७, ८३) तिरुवनन्तपुरम् १९२०–१९२५
ईशावास्योपनिषत्	ईशाद्यष्टोत्तरशतोपनिषदः, निर्णयसागरमुद्रणालये मुद्रिताः बाम्बे १९३२
ऋग्वेदः	ऋक्संहिता, श्रीपाद-दामोदर-सातवलेकर-संपादिता, औन्धनगरम्, १९४०
कामिकागमः (पूर्वभागः)	दक्षिणभारतार्चकसंघप्रकाशितः, मद्रपुरी, १९७५
कामिकागमः (उत्तरभागः)	अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका अङ्कः (टि-२९८)
किरणम्	किरणागममहातन्त्रम्, शिवागमसिद्धान्तपरिपालनसङ्घप्रकाशितम्, देवकोट्टै, १९३२; किरणागम, 'मरिया पिया विवन्ती' इत्यनया संपादितम्, नेपोलीस्थप्राच्यविमर्शागारप्रकाशितम्, नेपोली, १९७५
किरणवृत्तिः	अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका अङ्कः (टि-२९०)
कूर्मपुराणम्	सर्वभारतीयकाशिराजन्यासेन प्रकाशितम्, वाराणसी, १९७२
क्रियाक्रमद्योतिका	श्रीज्ञानसंबन्धविलासमुद्राक्षरशालायां मुद्रिता, चिदम्बरम्, १९२७
ज्ञानरत्नावलिः	अस्मद्गन्थालये विद्यमाना हस्तलिखितमातृका, अङ्कः (टि-२३१)
ज्ञानावरणविळक्कम्	ज्ञानावरणविळक्कमुम् मापाडियमुम्, धरुमैयाधीनप्रकाशितम् अङ्कः ३६७, ४४४. धरुमपुरम्, १९५७, १९५९.
तत्त्वसंग्रहः, तत्त्वसंग्रहव्याख्या	शिवागमसिद्धान्तपरिपालनसङ्घप्रकाशितः, देवकोट्टै, १९२३
तैत्तिरीययजुर्ब्राह्मणम्	तैत्तिरीयब्राह्मणम्, शारदाविलासमुद्राक्षरशालायां मुद्रितम्, कुम्भघोणम्, १९३५.
तैत्तिरीयारण्यकम्	आनन्दाश्रमग्रन्थावलिः (३६) पुण्यपत्तनम् १९२६
त्रिपुरातापिन्युपनिषत्	ईशाद्यष्टोत्तरशतोपनिषदः, निर्णयसागरमुद्रणालये मुद्रिताः बाम्बे १९३२
धातुपाठः	अष्टाध्यायीसूत्रपाठः, बालमनोरमामुद्रणालये प्रकाशितः, मैलापूर्, मद्रास, १९३७
पाणिनीयशिक्षा	शिक्षासूत्राणि, युधिष्ठिरमीमांसकसंपादितानि, अजमेर्, संवत् २०२४
पौष्करम्	पौष्करसंहिता, श्रीज्ञानसंबन्धविलासमुद्राक्षरशालायां मुद्रिता, चिदम्बरम्, १९२५
प्रभा	क्रियाक्रमद्योतिकाव्याख्या, श्रीज्ञानसंबन्धविलासमुद्राक्षरशालायां मुद्रिता, चिदम्बरम्, १९२७
प्रमाणवार्तिकम्	प्रमाणवार्तिकभाष्यम्, त्रिपिटकाचार्यराहुलसांकृत्यायनसंपादितम्, पाटलीपुत्रम् १९५३

ब्रह्मबिन्दूपनिषत्	ईशाद्यष्टोत्तरशतोपनिषदः, निर्णयसागरमुद्रणालये मुद्रिताः, १९३२
भगवद्गीता	गीताप्रेस्, गोरखपुर १९६५
मतङ्ग॰ क्रिया॰	मतङ्गपारमेश्वरम् (क्रियापादः) अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृकाः, अङ्काः (टि-२१, १८६, ६७८, ६७९)
मतङ्ग॰ विद्या॰	मतङ्गपारमेश्वरागमः (विद्यापादः) अस्मदीयग्रन्थावलिः (५६), एन्. आर. भट्संपादितः, पाण्डिच्चेरी, १९७७
मनुस्मृतिः	निर्णयसागरमुद्रिता, बाम्बे, १९४६
महाभारतम्	टि॰ कृष्णाचार्यसंपादितम्, कुम्भघोणम्, १९०६
मृ॰ वृ॰ क्रिया॰	मृगेन्द्रागमः, अस्मद्ग्रन्थालयप्रकाशितः अङ्कः (२३), एन्. आर्. भट्संपादितः, पाण्डिच्चेरी, १९६३
मृगेन्द्रवृत्तिः, मृगेन्द्रवृत्तिदीपिका	मृगेन्द्रम्, शिवागमसिद्धान्तपरिपालनसङ्घप्रकाशितम्, देवकोट्टै, १९२८
योगसूत्रम्	पातञ्जलयोगदर्शनम्, श्रीरामशंकरभट्टाचार्यसंपादितम्, वाराणसी, १९६३
रत्नत्रयम्	शिवागमसिद्धान्तपरिपालनसंघप्रकाशितम्, देवकोट्टै, १९२५
रौरवम्	रौरवागमः, अस्मदीयग्रन्थावलिः (१८) एन्. आर. भट्संपादितः पाण्डिच्चेरी, १९६२
लौ॰ न्या॰ साहस्री	लौकिकन्यायसाहस्री, वेङ्कटेश्वरमुद्रणालये मुद्रिता, बाम्बे १९६५
वर्णाश्रमचन्द्रिका	रामलिङ्गत्तम्पिरान्प्रकाशिता, धर्मपुराधीनम् १९३०
वसिष्ठस्मृतिः	स्मृतीनां समुच्चयः, आनन्दाश्रमग्रन्थावलिः (४८) पुण्यपत्तनम् १९२९
वाक्यपदीयम्, वाक्यपदीयव्याख्यानम्	के. वि. अभ्यङ्करसंपादितम्, पुण्यपत्तनम्, १९६५, तथा वाराणसी-संस्कृतकलाशालापण्डितैः संपादितम्, काशी, १८८७
वाजसनेयसंहिता	जीवानन्दविद्यासागरभट्टाचार्येण प्रकाशिता, कलकत्ता, १९०८
वातुलशुद्धम्	आगमरहस्यम्, आगमिक-कृष्णदीक्षित-प्रकाशितम्, बङ्गलूर्, १९५८
विश्वामित्रसंहिता	केन्द्रीयसंस्कृतविद्यापीठप्रकाशिता, तिरुपति, १९७०
विष्णुपुराणम्	गीताप्रेस्, गोरखपुर, संवत्, १९९०
शतरत्नसंग्रहः	पण्डितपञ्चाननशास्त्रिसंपादितः, तान्त्रिकग्रन्थावलिः (२२) कलकत्ता, १९४६
शाबरभाष्यम्	मीमांसादर्शनम्, आनन्दाश्रमसंस्कृतग्रन्थावलिः (९७), पुण्यपत्तनम्
शिवपूजास्तवव्याख्यानम्	शिवागमसिद्धान्तपरिपालनसंघेन प्रकाशितम्, देवकोट्टै, १९३५
शिवाग्रभाष्यम्	शारदाविलासमुद्रणालये मुद्रितम्, कुम्भघोणम्, कलि ५०२२
शैवकालविवेकः	आगमिक-कृष्णदीक्षितप्रकाशितः, बङ्गलूर्, १९६६
शैवसंन्यासपद्धतिः	कोमलाम्बामुद्राक्षरशालायां मुद्रिता, कुम्भघोणम्, १९३२
श्लोकवार्तिकम्	एस्-के-रामनाथशास्त्रिसंपादितम्, विश्वविद्यालयः, मुद्रपुरी, १९७२
सर्वज्ञानोत्तरम् क्रिया॰	अस्मत्कार्यालयहस्तलिखितमातृका अङ्कः (टि–३३४)
सांख्यकारिका	निर्णयसागरमुद्रणालये मुद्रिता, बाम्बे १९४०
सामविधानब्राह्मणम्	केन्द्रीयसंस्कृतविद्यापीठग्रन्थावलिः (१) बि-आर्-शर्मणा प्रकाशितम्, तिरुपति, १९६४

सुप्रभेदागमः	अलगप्पमुदलियार्प्रकाशितः, चिन्ताद्रिपेट्टै मद्रास्, कलि ५००९
स्वच्छन्दतन्त्रम्	काश्मीरग्रन्थावलिः (३१) काश्मीर, १९२१
स्वायंभुवागमः	अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका अङ्कः (टि.३९)
सकलागमसारसंग्रहः	अलगप्पमुदलियार्प्रकाशितम्, चिन्ताद्रिपेट्टै, मद्रास्, कलि ५०१२
सिद्धान्तसारावलिव्याख्या	मद्रपुरीराजकीयप्राच्यतालपत्रकोशागारपत्रिका अङ्काः (१७–२०)
सोमशंभुपद्धतिः	शिवागमसिद्धान्तपरिपालनसङ्घप्रकाशिता, देवकोट्टै १९३१
सोमशंभुपद्धतिव्याख्या (त्रिलोचनशिवाचार्यकृता)	अस्मदीयग्रन्थालये विद्यमाना हस्तलिखितमातृका अङ्कः (टि.१७०)

विषयानुक्रमणिका

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE

Nos.

1. Kārāvelane —*Kāreikkālammeiyār,* œuvres éditées et traduites. Introduction par Jean Filliozat. 1956.
2. Jean Filliozat — *Les relations extérieures de l'Inde* (1)
   1. *Les échanges de l'Inde et de l'Empire Romain aux premiers siècles de l'ère chrétienne.*
   2. *La doctrine brahmanique à Rome au IIème siècle.* 1956.
3. Madeleine Biardeau — *Le Tattvabindu de Vācaspatimiśra.* Édition critique, traduction et introduction. 1956. 2ème tirage, 1979.
4. J. Monchanin, J. Filliozat, A. Bareau — *Entretiens* 1955. 1956.
5. Louis Renou — *Etudes sur le vocabulaire du Ṛgveda.* Première série. 1958.
6. Suzanne Siauve — *La voie vers la connaissance de Dieu* (*Brahma-Jijñāsā*) *selon l'Anuvyākhyāna de Madhva.* 1957.
7. Dev Raj — *L'esclavage dans l'Inde ancienne d'après les textes palis et sanskrits.* Avec une préface du Dr. Jean Filliozat. 1957.
8. Alain Daniélou — *Tableau comparatif des intervalles musicaux.* 1958.
9. Alain Daniélou — *La musique du Cambodge et du Laos.* 1957.
10. André Bareau — *La vie et l'organisation des communautés bouddhiques modernes de Ceylan.* 1957.
11. Alain Daniélou et N.R. Bhatt — *Textes des Purāṇa sur la théorie musicale.* Vol. I, Édition critique, traduction française et introduction. 1959.
12. Charlotte Vaudeville —*Kabīr Granthāvalī* (*Dohā*). Avec introduction, traduction et notes. 1957.
13. Madeleine Biardeau — *Sphoṭa Siddhi* (*La Démonstration du Sphoṭa*) *par Maṇḍana Miśra.* Introduction, traduction et commentaire. Texte sanskrit établi par N.R. Bhatt avec la collaboration de T. Ramanujam. 1958.
14. Suzanne Siauve — *Les noms védiques de Viṣṇu dans l'Anuvyākhyāna de Madhva* (*Brahma-Sūtra* I, 1, *adhikaraṇa* 2 *à* 12). Texte avec traduction et notes. 1959.
15. Charlotte Vaudeville — *Etude sur les sources et la composition du Rāmāyaṇa de Tulsī-Dās.* Traduction en hindi par J.K. Balbir. तुलसीदास रचित रामचरितमानस का मूलाधार व रचनाविषयक समालोचनात्मक एक अध्ययन, fasc. I. 1959, fasc. II. 1965.
16. Alain Daniélou et N.R. Bhatt — *Le Gītālaṃkāra.* L'ouvrage original de Bharata sur la musique. Édition critique, traduction française et introduction. 1959.
17. Rasik Vihari Joshi — *Le rituel de la dévotion kṛṣṇaïte.* Préface par Jean Filliozat. 1959.
18. N.R. Bhatt — *Rauravāgama,* édition critique, Vol. I. Introduction : Les Āgama çivaïtes, par Jean Filliozat. 1961. Vol. II, 1972.

Nos.

19. R. Dessigane, P.Z. Pattabiramin et J. Filliozat — *La légende des jeux de Çiva à Madurai d'après les textes et les peintures*. Vol. I Texte — Vol. II Planches. 1960.
20. Claude Jacques — *Gayāmāhātmya*. Introduction, édition critique et traduction française. 1962.
21. Charlotte Vaudeville — *Les duhā de Dhola Mārū*. Avec introduction, traduction et notes. 1962.
22. Sayida Surriya Hussain — *Garcin de Tassy, Biographie et étude critique de ses œuvres*. 1962.
23. N.R. Bhatt — *Mṛgendrāgama* (*Kriyāpāda et Caryāpāda*) *avec le commentaire de Bhaṭṭa Nārāyaṇakaṇṭha*, édition critique. 1962.
24. N.R. Bhatt — *Ajitāgama*, édition critique. Vol. I. 1963. Vol. II. 1967.
25. Hélène Brunner-Lachaux — *Le rituel quotidien dans la tradition śivaïte de l'Inde du Sud selon Somaśambhu — Somaśambhupaddhati*, Introduction, traduction et notes. Vol. I : Le Rituel quotidien. 1963. Vol. II : Rituels occasionnels I. 1968. Vol. III : Rituels occasionnels II. 1977.
26. Pierre-Sylvain Filliozat — *Le Pratāparudrīya de Vidyānātha* — avec le commentaire *Ratnāpaṇa* de Kumārasvāmin. Traduction, introduction et notes. 1963.
27. Dessigane, P.Z. Pattabiramin et J. Filliozat — *Les légendes çivaïtes de Kāñcipuram*. 1964.
28. Ch. Vaudeville — *Bārahmāsā*. Les chansons des douze mois dans les littératures indo-aryennes. 1965.
29. J. Filliozat et P.Z. Pattabiramin — *Parures divines du Sud de l'Inde*. 1966.
30. Michèle Lupsa — *Chants à Kālī de Rāmprasād*. Introduction, texte bengali, traduction et notes. 1967.
31. R. Dessigane et P.Z. Pattabiramin — *La légende de Skanda*. 1967.
32. M.E. Adicéam — *Contribution à l'étude d'AiyaNār-Śāstā*. 1967.
33. J. Filliozat — *Un catéchisme tamoul du XVI^e^ siècle en lettres latines*. 1967.
34. P. Joshi — *Industrialisation et Société dans l'Inde du Nord*. Introduction par J. Filliozat : Observations sur l'étude des sociétés et de l'économie de l'Inde. 1967.
35. F. Gros — *Le Paripāṭal*, Texte tamoul, introduction, traduction et notes. 1967.
36. P.S. Filliozat — *Œuvres poétiques de Nīlakaṇṭha Dīkṣita*. I. Texte, traduction et notes. 1967.

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE

(*suite*)

Nos.

37. *Index des mots de la littérature tamoule ancienne*, Vol. I. 1967; Vol. II. 1968; Vol. III. 1970.
38. Suzanne Siauve — *La Doctrine de Madhva*. 1968.
39. François Gros et R. Nagaswamy — *Uttaramērūr*. Légendes, Histoire, Monuments, avec le *Pañcavaradakṣetramāhātmya* édité par K. Srinivasacharya. 1970.
40. B. Dagens — *Mayamata*. Traité sanskrit d'architecture. Édition critique, traduction et notes. 1ère partie 1970. 2ème partie 1976.
41. N.S. Shukla — *Le Karṇānanda de Kṛṣṇadāsa*. Édition et traduction annotée. 1971.
42. P.Z. Pattabiramin — *Sanctuaires rupestres du Sud de l'Inde*. Vol. I. Andhra. 1971. Vol. II. Tamilnad et Kerala. 1975.
43. Suzanne Siauve — *Les hiérarchies spirituelles selon l'Anuvyākhyāna de Madhva*. 1971.
44. Capitaine de Vaisseau Cordier — *Historique et Statistique de Karikal*. Texte rédigé en 1825. Présentation par François Gros. Vol. I. 1971.
45. Jean Filliozat — Un texte tamoul de dévotion vishnouïte. *Le Tiruppāvai d'Āṇṭāḷ*. 1971.
46. Marie-Claude Porcher — *Rāghavayādavīya* par Veṅkaṭādhvarin. Texte sanskrit édité par M.S. Narasimhacharya. Etude et Traduction. 1972.
47. Neelakanta Sarma — *Textes sanskrits et tamouls de Thailande*. Introduction par Jean Filliozat. 1972.
48. Marie-Claude Porcher — Un poème satirique sanskrit, la *Viśvaguṇādarśacampū*. Introduction, traduction et notes. 1972.
49. Jean Filliozat — Un texte de la religion kaumāra, le *TirumurukāRRuppaṭai*. 1973.
50. Association Internationale des études Tamoules. Compte rendu de la IIIème Conférence Internationale (Proceedings of the Third International Conference Seminar, Paris 1970) édité par François Gros et X.S. Thani Nayagam. 1973.
51. *Mahābhāṣyapradīpavyākhyānāni*, Commentaires sur le Mahābhāṣya de Patañjali et le Pradīpa de Kaiyaṭa, édition critique par M.S. Narasimhacharya. Présentation par P.S. Filliozat. Vol. I. : Adhyāya I, Pāda I, Āhnika 1-4. 1973. Vol. II. : Adhyāya I, Pāda I, Āhnika 5-7. 1975. Vol. III. : Adhyāya I, Pāda I, Āhnika 8-9. 1976. Vol. IV. : Adhyāya I, Pāda 2-4. 1977. Vol. V. : Adhyāya 2, Pāda 1-4. 1978.
52. Alix Raison — *La Hārītasaṃhitā* : Texte médical sanskrit avec un Index de nomenclature âyurvédique. 1974.
53. Tara Michaël — Le joyau du Śiva-yoga, *Śivayogaratna* de Jñānaprakāśa. Édition, traduction et notes. 1975.

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE

(*suite*)

Nos.

54. *Le Mahābhāṣya de Patañjali* avec le Pradīpa de Kaiyaṭa et l'Uddyota de Nāgeśa. Traduction par Pierre Filliozat. Vol. I. : Adhyāya I, Pāda I, Āhnika 1-4. 1975. Vol. II. : Adhyāya I, Pāda I, Āhnika 5-7. 1976. Vol. III. : Adhyāya I, Pāda I, Āhnika 8-9. 1978.
55. Vasundhara Filliozat — *Le Temple de TirumaṅkaiyāLvār à Hampi*. 1976.
56. N.R. Bhatt — *Mataṅgapārameśvarāgama*, avec le commentaire de Rāmakaṇṭha, Vol. I. : *Vidyāpāda*, édition critique, 1977.
57. B. Dagens — *Les Enseignements architecturaux de l'Ajitāgama et du Rauravāgama, Études sur les āgama śivaïtes*, I. 1977.
58. S. Siauve — *Aṣṭādaśabhedanirṇaya*, Explication des dix-huit différences entre les deux branches de l'École de Rāmānuja, de Śrī Vātsya Raṅganātha, Édit. critique, traduction et notes, 1978.
59. F. L'Hernault — *L'Iconographie de Subrahmaṇya au Tamilnad*, 1978.
60. B. Dagens — Le florilège de doctrine śivaïte *Śaivāgamaparibhāṣāmañjarī* de Vedajñāna, Édit. critique, traduction et notes, 1979.

शुद्धाशुद्धसूचिका

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
lxxxi	९	ततो	ततः
xci	३५	प्रश्नातात्पर्य	प्रश्नतात्पर्य
	३७	थकम्नदइत्यादि	इत्यादिकथनम्
cxlvi	१४	भ्यक्षणं	भ्युक्षणं
clxii	२५	पूर्णाहुती	पञ्चाहुती
	२९	न्यासेन	न्यायेन
८	१०	संख्यात्वात्	संख्यत्वात्
	१३	ण्वुल्	हि उल(च्)
१०	३	०लम्भेन	०लम्भे न
३०	१२	तस्य	तत्र
	१५	यथा स्वान्तै	यथास्वं तै
४६	८	त्रिपुण्ड	त्रिपुण्ड्र
५१	२	नियमाङ्क्ष	नियमाकाङ्क्ष
१०६	२९	आकरो न लभ्यते	स्पन्दनिर्णये १.२१
१३९	९	धस्थाद्रेफ	धस्ताद्रेफ
१५३	२०	द्वादशतमं	द्वाविंशतितमं
१५४	६	२६	२५
	९	२५	२६
१५५	२५	सार्धत्रि० २२.८,९	सार्धत्रि० १०.१८ उ०, १९ वृत्तौ
१६२	९	निर्विघ्नः	निर्विघ्नाः
१७७	१	—	उपोषितस्तु विधिना महास्नानपुरःसरम् ।
	२	—	पूजयेत्तु विरूपाक्ष- मङ्गारकं च तत्समम् ॥
	१२	व्रतभिदं	व्रतमिदं
१८०	१६	नैर्यक्तो	नैर्युक्तो
१८३	४	धात्रीफलप्रमाणेन चणकं मध्यमाधमौ ।	धात्रीफलप्रमाणेन श्रेष्ठमेतदुदाहृतम् । बदरस्य प्रमाणेन चणकं मध्यमाधमौ ॥
	५	प्रोक्तं	प्रोतम्
	१८	यजेत्	जपेत्

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१८३	२७	श्लो० ८४	श्लो० १३०
१९५	३०	मन्त्रं	मन्त्री
१९६	१४	पूर्णाहुतीर्दत्वा	पञ्चाहुतीर्दत्त्वा
	२५	नाशिष्टाय	नाशिष्याय
१९९	२	हृदयं	हृदये
२००	४	पञ्चभि	सप्तभि
२०१	२०	न्यासेन	न्यायेन
२०४	१४	तद्बुद्धचाधि	तद्बुद्धचधि
२०६	७	—	व्रीहिभिर्वा ५४.१३
	२६	रालोक्य	रालेख्यः
	३०	संरभो	संरम्भो
२०७	६	—	स्थिता वेदविदः ८१.१२
	७	वर्णानां	पापानां
	१९	सूत्रकारेण	सूत्रकरणे